ह्रस्वदीर्घयोरित्यादि । इतरोऽपि ज्ञापकद्वारेण[1] ह्रस्वद्वयस्य दीर्घद्वयस्य च संज्ञां साधयितुमाह– सनि चानिटीत्यादि । सनि चानिटीत्यत्र ह्रस्वद्वयसन्निधाने सति दीर्घकरणं ह्रस्वद्वयस्य सवर्णसंज्ञाप्रवृत्तेः ज्ञापकार्थम्[2] । तृतीयादौ तु परादिरित्यत्रापि तृतीया-शब्दस्य सम्बन्धिनो दीर्घादुत्तरस्यादिशब्दाकारस्य प्रतिलब्धसवर्णव्यपदेशस्य लोपप्रवृत्तिर्दीर्घद्वयस्य सवर्णसंज्ञां ज्ञापयति । नन्वन्यथा सिद्धे वस्तुनि ज्ञापकं भवति, अस्ति च ह्रस्वद्वयस्य दीर्घद्वयस्य च सवर्णत्वस्य च सिद्धिः । समानो वर्णः सवर्ण इति लौकिकात् सावर्ण्यात् ज्ञापकं चालम्भ्यमाने कादीनीति ज्ञापकात् ह्रस्वदीर्घयोरपि सवर्णसंज्ञाकार्यस्य सिद्धत्वादपार्थकोऽयं योगारम्भः स्यात् । नैतत् । कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय इति वचनात् कृत्रिमे शास्त्रीये ह्रस्वदीर्घविषये सावर्ण्ये सम्भवति सति प्रदेशवाक्ये लौकिकस्याकृत्रिमस्य सावर्ण्यस्य गृहीतुमशक्यत्वात् । ततश्च ह्रस्वद्वयविषये दीर्घद्वयविषये च न भवेत्समानदीर्घादिको विधिरिति तत्सिद्धये ज्ञापकालम्भनमेव[3] ज्यायः, न च तदालम्भने सति वैफल्यं योगारम्भस्य, असिद्धे वस्तुनि ज्ञापकाश्रयणस्य न्याय्यत्वात्, यथा पिबादेशस्य लक्षणेनासिद्धौ गुणाभावो लोपः पिबतेरिति लिङ्गात् साध्यते शास्त्रेण, न तु सिद्धस्य ज्ञापकद्वारेण । अकरणे सति गुणाभाववत् पिबादेशस्यापि सिद्धत्वादपार्थकं पिब इति वचनं स्यात्, अन्यान्यपि लक्षणवाक्यानि ज्ञापकद्वारेण कर्तव्यानि स्युः । तस्मात् ह्रस्वदीर्घयोः सवर्णसंज्ञासिद्धये ज्ञापकमाश्रयितुमयुक्तम् । ह्रस्वद्वयविषये दीर्घद्वयविषये तु युक्तमेव । यद्येवं सवर्णविषयमेवैतद् वृत्तिकारोपदर्शितं ज्ञापकं स्यात् । इवर्णादिविषयस्य तु ह्रस्वद्वयस्य दीर्घद्वयस्य च सवर्णसंज्ञाकार्यं न प्राप्नोति सर्वत्रज्ञापकाभावात् । अस्त्येतत् । वर्णसामान्यविषयतया तु ज्ञापकमेतत् विज्ञास्यते यथा लोपः पिबतेरिति गुणाभावज्ञापकं न केवलं पिबतीत्येकत्वविषये प्रवर्तते यावता पिबतः पिबन्तीत्यादौ द्वित्वबहुत्वविषयेऽपि ज्ञापकस्य सामान्येन प्रवृत्तेः । अथ द्वौ द्वाविति किमर्थम्, यावता सवर्णाविति द्वित्वनिर्देशात् द्वित्वमवगतमेव । एकत्वसंख्याबच्छिन्नायाः संज्ञायाः द्वित्वविषयासम्भवात् । मैवम् । तत्र द्वित्वसंख्याबच्छिन्ने संज्ञिन्यवगते यदि वीप्सायोगो न स्यात् ततो द्वौ समानौ संज्ञिनावित्यर्थमर्थः स्यात्, कौ च तौ द्वावित्याकाङ्क्षायां क्रमव्यतिक्रमे कारणाभावादकाराकारयोरेव प्राथम्यात् संज्ञित्वं भवेत् । ननु यदि चैवं स्यात् तदा तावेव साक्षादुपादीयेताम्, अतस्तयोः अनुपादानाद्वीप्सा-

१. ज्ञापकत्व (वा०)

२. ज्ञापकात् (भं०)

३. ज्ञापकावलम्बनमेव ज्यायः (भं०)

योगितापि संज्ञिन्यवगतैवेति किं द्वौ द्वावित्यनेन ? सत्यम्, गुर्वी तु प्रतिपत्तिस्स्यादिति संज्ञिनिर्देशार्थं द्वौ द्वाविति क्रियते ।

वर्ग्यो वर्ग्येणेत्यादि । वर्गे भवः वर्ग्यः । यदुगवादित इति योगविभागाद् यत्-प्रत्ययः । सवर्ग्यो वर्णो परेण प्रत्यासन्नेनैव वर्ग्येण सह सवर्ण इत्यस्मादाचार्यवचनाद् व्यञ्जनानामपि सवर्णसंज्ञा भवति न केवलं समानानामित्येषोऽपि शब्दार्थः । तेन किं सिद्धं भवतीत्याह—तेनेत्यादि । यतो वर्ग्यो वर्गेण सवर्ण इति वचनेन व्यञ्जनान्यपि सवर्णव्यपदेशभाञ्जि । तेन क ख ग घ ङि-[1] इत्येते परस्परं सर्वत्र व्यपदेशं भजन्ते । एवमन्येऽपीति च छ ज झ ञ इत्यादयः । तथा च कत्वविधावुञ्झतीत्यत्र जकारस्य इकारे धुटि सवर्णे परे कत्वनिवृत्त्यर्थमसवर्ण इति निषेधः क्रियते । ऋकारलृकारयोरित्यादि । ऋकारस्य विजातीयेन लृकारेण सह सवर्णसंज्ञा विधातव्या । न चेदमपूर्वमभिधातव्यम्, अन्योऽन्यवचनेनैव सवर्णसंज्ञायाः लब्धत्वात् । तथाहि सवर्ण इति पूर्वाचार्यसंज्ञापरिग्रहादेव समानो वर्णः सवर्ण इति व्युत्पत्त्या परस्परार्थत्वमवगतमेवेत्यतिरिच्यमानमिदमन्योऽन्यवचनं ऋकारलृकारयोः सवर्णसंज्ञायाः साधकमस्त्येव । होतुः ऋकारः होतृकार इत्यत्र सवर्णसंज्ञाकार्यम् समानः सवण दीर्घः । चिक्लृप्सतीत्यत्र च अकार[2] ऋवर्णस्येत्यत्वं तद्धि ऋवर्णस्योच्यमानं लृकारस्यापि भवति । स्वरस्सवर्णस्य ग्राहक इति ऋकारेण लृकारस्यापि ग्रहणात् । कृपू सामर्थ्ये, अक्लृपिस्यतेरिति ज्ञापकात् प्रत्ययोत्पत्तेः पूर्वमेवान्तरङ्गत्वादृकारस्य लृकारः क्लृप्तुमिच्छति, सन्, स्वरतिसूतीत्यादिनेड्विकल्पः, द्विर्वा, अकार ऋवर्णस्येति लृकारस्याप्यकारः, अभ्यासकार्यम् ।

पूर्वो ह्रस्वः १।१।५

पूर्वमवपूरणे,[3] पूर्वतीति पूर्वः, अच्, सवर्णग्रहणमत्रानुवर्तत इति पूर्वसूत्रात् । उत्तरत्र चेति । सवर्णग्रहणमनुवर्तत इति सम्बन्धः, तच्च योगद्वयेऽप्यनुवर्तमानं पूर्वपरशब्दयोरिह दिग्वाचिनो सतो निर्देशवृत्तित्वेन गुणेन निर्धार्यमाणत्वान्निर्धारणषष्ठ्यन्तं विज्ञास्यत इत्यनेनाभिप्रायेण विवृणोति । सवर्णयोर्यः पूर्व इति च । हे अम्ब इति । अम्बाशब्दः हे शब्दपूर्वः । ततस्सेर्व्ययाच्चेति लुक्, प्रथमैकवचनम् । ह्रस्वोऽम्बार्थानामिति ह्रस्वः । ह्रस्वनदी-

---

१. ङ इत्येते (?)

२. अवर्णस्याकार ऋवर्णस्येत्यत्वम् (भं०)

३. पूर्व पूरणे (वा०)

श्रद्धाभ्य इति सिलोपः। पूर्वस्य लघुसंज्ञापि वक्तव्येति। न चेदमपूर्वमभिधातव्यम्। ह्रस्व इति पूर्वाचार्यसंज्ञाङ्गीकरणस्य संज्ञान्तरद्योतनफलत्वेनैव लब्धत्वात्। न च लघुना कालेन पूर्वस्योच्चारणाल्लघुव्यपदेशः सिद्ध इति शक्यते वक्तुम्। एवमभिधीयमाने हि ह्रस्वकालोच्चारणयोगाद् ह्रस्वसंज्ञाया अपि सिद्धौ सत्यां सूत्रस्याप्यकर्तव्यता[1]-प्रसङ्गात्। तस्मात् व्यवहारार्थं शास्त्रे लघुसंज्ञा सङ्ग्रहणीयैव। किं च न केवलं पूर्वस्य लघुसंज्ञा यावदनेनैव प्रकारेण तस्य संयोगपरस्य सतो गुरुसंज्ञापि बोद्धव्या तथा चोज्झाञ्चकारेत्यादौ नाम्यादेर्गुरुमत इत्याम्-प्रत्ययसिद्धः। एवं च कृत्वा अनृच्छ इति युज्यते निषेधारम्भः। नन्वस्मादेव निषेधारम्भात् संयोगपरो ह्रस्वो गुरुरिति व्यपदेक्ष्यते। तत् किं ह्रस्व इति पूर्वाचार्यसंज्ञाङ्गीकरणेन हेतुना पूर्वस्य संयोगपरस्य सतो गुरुसंज्ञा प्रार्थ्यते। असदेतत्। ऋच्छिनिषेधारम्भादस्ति कश्चिदृच्छिर्गुरुवर्ण इति प्रतिपत्तिः स्यात् सतुक इति विशेषे नास्ति प्रमाणम्। अथास्ति स्वरधर्मत्वाद् गुरुव्यपदेशस्य ऋकारो गुरुरिति निश्चयः। एवमपि ऋच्छिनिषेधाज्ज्ञापकाच्चकार-छकारः संयोगपरो यो ह्रस्वः सः गुरुरित्येवमपि कस्मान्न निश्चीयते। यतश्च ऋच्छि-प्रभृतीनामेव ह्रस्वो गुरुसंज्ञः स्यात्। नान्येषामुज्झि-प्रभृतीनाम्। तस्मादृच्छिप्रतिषेधेन[2] अशक्या ह्रस्वसंयोगपरस्य गुरुसंज्ञाविज्ञातुम्।

परो दीर्घः १।१।५

पॄ पालन-पूरणयोः। पिपर्तीति पचादित्वादच्, गुणः सवर्णयोर्यः पर इति पूर्ववत् षष्ठी सम्बन्धो व्याख्येयः। रुद्रायेति। ङेर्यं अकारो दीर्घ घोषवतीति दीर्घः परस्य गुरु-संज्ञा वक्तव्येति। सा तु दीर्घ इति पूर्वाचार्यसंज्ञापरिग्रहात्पूर्ववल्लब्धेति नापूर्वत्वेन वक्तव्या। अथ किमर्थो योगारम्भः, यावता पूर्वस्य ह्रस्वसज्ञायां कृतायां पूर्वशब्देन सम्बन्धिशब्दत्वादाक्षिप्तस्य परस्य ह्रस्वशब्दाक्षिप्तेन दीर्घशब्देन सामर्थ्यात् सम्बन्धो विज्ञास्यत इत्याह—(ननु[3] पूर्व ह्रस्वलघुसंज्ञयोर्दीर्घगुरुसंज्ञयोश्चन्यतमयैव संज्ञया शास्त्रे व्यवहारसिद्धौ सत्यां संज्ञाद्वयं किमर्थं ? ब्रूमः, संयोगपरस्य ह्रस्वस्य गुरुसंज्ञा तावदवश्यं कर्तव्या कार्यान्तरसिद्ध्यर्थम्। तत्र यदि ह्रस्वसंज्ञैव क्रियते तदा संज्ञानां भिन्नफलत्वाद-

१. सूत्रस्याख्याकर्तव्यता प्रसङ्गात् (व०)
२. प्रतिषेधात् (भं०)
३. न्यूनपाठः (भं०)

यमन्तरेण बाध्यबाधकभावानुपपत्तेः गुरुसंज्ञया ह्रस्वसंज्ञायाः समावेशः स्यात्। ततश्च अततक्षदित्यादौ सन्वद्भावो भवेत् सन्वल्लघुनि चङ परे इत्यत्र ह्रस्वग्रहणं भवन्मते कर्तव्यम्, अस्ति चात्र ह्रस्वोऽकारः संज्ञाद्वयविधाने तु तत्सामर्थ्यात् गुरुसंज्ञया ह्रस्वसंज्ञा बाध्यत इति नास्ति सन्वद्भावप्रसङ्गः।) ननु पूर्वम् ह्रस्वशब्दाभ्यामिति[1]। अयमत्रार्थः। इह यद्यपि पूर्वं ह्रस्वशब्दाभ्याम् परो दीर्घशब्दावाक्षिप्येते तथापि विना वचनमाक्षेपमात्रात् तयोः संज्ञासंज्ञिलक्षणसम्बन्धो नोपलभ्यते। तथाहि परस्य दीर्घसंज्ञा भवतीति कस्यायमर्थः। न तावत् पूर्वो ह्रस्व इत्यस्य पूर्वस्य ह्रस्वसंज्ञासम्बन्धे सत्यस्य योगस्योपक्षीणत्वात्। नाप्याक्षिप्तयोः परदीर्घशब्दयोः तयोः अयश्शलाकारूपत्वेन स्वार्थप्रतिपादन-प्रसिद्धव्यापारयोः सतोरन्वयाभावात्। न च सत्यां परस्य दीर्घसंज्ञायां पूर्वस्य ह्रस्वसंज्ञासम्बन्धः विघटते येन तद्विघटनभयात् परस्य दीर्घ इति व्यपदेशस्स्यात्। न च पूर्वशब्देन संज्ञिनाक्षिप्तस्य परस्य संज्ञित्वं शक्यमवमातुम्। आक्षेपे संज्ञित्वस्यानङ्गत्वादिति योगारम्भ एव ज्यायान्। दीर्घ इति पूर्वाचार्यसंज्ञापरिग्रहात पृथग्योगारम्भाच्च परस्यैव संज्ञा सिद्धेति परग्रहणं सन्ध्यक्षराणामपि दीर्घसंज्ञाप्रतिपत्त्यर्थम्। तेनोच्चैरधः, गोरमत इत्यादौ कृते रेफलोपे पूर्वस्वरयोरैकारौकारयोरेवाप्तदीर्घव्यपदेशयोरन्तरतमौ दीर्घावीदूतौ न भवतः। दीर्घशब्देन सम्बन्धिशब्दत्वादाक्षिप्तस्य ह्रस्वस्यैव दीर्घविधौ स्थानित्वात्।

स्वरोऽवर्णवर्जो नामि १।१।७

स्वरशब्दः पूर्वमुक्तः, नमत्यवश्यमित्यावश्यकाधमर्ण्ययोर्णिनिरिति णिनिः। उपधादीर्घः। सि, इन्हन्पूषेति च दीर्घः। वृजेरिति वृजी वर्जन इत्यस्मात्, अवर्ण अकाराकाराविति। ननु कथमेतत्, अवर्ण इत्ययं कर्मधारयः। ततश्चाकारो ह्रस्व एवावर्णग्रहणेन गृह्यते। आकारस्तु कथं गृह्यत इत्याह–स्वरस्सवर्णस्य ग्राहक इति वचनादित्यस्माद्वचनादकारोऽत्र स्वरो गृह्यमाणस्सवर्णमाकारमपि गृह्णाति, तेनाकाराकारयोः द्वयोरपि निषेधः। इत्थं वर्णग्रहणेन सर्वत्र द्वयोः ग्रहणमिति स्वरस्सवर्णस्य ग्राहक इत्यनेन प्रकारेण यत्र-यत्र[2] हि वर्णशब्दस्य ग्रहणमुच्चारणम् अवर्णे इवर्णे ए इत्यादौ तत्र-तत्र सर्वत्र द्वयोर्ह्रस्वदीर्घयोर्ग्रहणं परिग्रहो वेदितव्य इत्यर्थः। अयं भावः स्वरस्सवर्णस्येत्यनया परिभाषया सर्वत्र सवर्णो गृह्यते, न तु वर्णग्रहणेन। वर्णशब्दो हि वर्णमात्र-

१. ह्रस्वशब्दाभ्यामित्यादि (मं०)
२. यत्र हि इत्यस्य स्थाने यत्रेह पाठः (उभयपेति)

स्यैव सूत्रस्थस्य विशेषको न तु तेन सवर्णस्य ग्रहणं शक्यते विज्ञातुम्। तेन यत्केनचिदुक्तम्[1], वर्णग्रहणेन सवर्णग्रहणमिति तदपास्तं भवति। यदि च वर्णग्रहणेन सवर्णो गृह्यते, यदुगवादित इत्यत्र उकारः ऊकारं न गृह्णीयात्। वर्णग्रहणाभावात्। ततश्च शङ्क्व्यमित्यादावेव शङ्काप्रभृतिभ्यो यत् प्रत्ययः स्यात्, वधूभ्यो हित [2]वधव्यमित्यादौ तु न स्यात्। स्वरः सवर्णस्य ग्राहक इत्यस्याः परिभाषायाः जातिविषयः। तेनाकारसामान्यस्य ग्रहणे सति आकारोऽपि गृह्यते। अकारजातेर्ह्रस्वदीर्घप्लुतभिन्नेऽपि व्यक्तिविषये त्वेषा परिभाषा नास्ति। तथा चास्यैक-व्यञ्जनमध्य इत्येत्वाभ्यासलोपौ विधीयमानौ बबाधेत्यादौ बाधेः न भवतः। तयोः विधौ [3]अकारव्यक्तेरेवोपादानात्। विषयविवेकस्त्वयं लक्ष्यानुरोधादवमन्तव्यः। नामि संज्ञो भवतीति। एतेन नकारान्तेयं संज्ञा न त्वीकारान्तेति दर्शयति। एतच्च नामिनस्स्वर इति व्यवहाराल्लभ्यते। दधिनीति। डुदाञ्[4] दानधारणयोः। दानशीलमिति। आद्वर्णेति किः द्वे चेति वचनादिति द्विर्वचनम्, अभ्यासकार्यम् आलोपे सार्वधातुक इत्यालोपः। औरीमितीकारः, नामिनस्स्वर इति नुरागमः स्वरग्रहणमनन्तराणां समानानां मा भूदिति। किञ्च स्यात् यदि तेषां नामिसंज्ञा स्यात्। चेषीद्वमित्यादौ गुणे कृते धातोरनाम्यन्तत्वान्नाम्यन्ताद् धातोरिति धस्य ढत्वे न स्यात्। न च परत्वाद् ढत्वं भविष्यतीति शक्यते वक्तुम्, गुणस्यान्तरङ्गत्वात् पूर्वं प्रवृत्तेः। परस्माच्चान्तरङ्गं बलीयः, परविधिबाधकान्नित्यादपि विधेरन्तरङ्गस्य बलीयस्त्वात्। उक्तञ्च पूर्वम्—

परं विदुः पूर्वपरोपपत्तौ परस्य नित्यस्य च नित्य एव।
नित्यान्तरङ्गोपगमेऽन्तरङ्गस्तथाविधिः प्रातिपदो बलीयान्॥

अथ कथमन्तरङ्गो गुणमुच्यते[5]। प्रकृत्याश्रयत्वात् प्रकृत्याश्रयं हि कार्यमन्तरङ्गम्, शब्दव्युत्पत्तौ प्रकृतेः प्रथमं बुद्धावभासमानत्वात्। तस्याश्चान्तरङ्गत्वात् तदाश्रयस्यापि कार्यस्यान्तरङ्गत्वमेवेति गुणेऽन्तरङ्गत्वात् कृते ढत्वं व्याहन्यते। ननु नाम्यन्ताद्या विहिता आशीरद्यतनी परोक्षा तासु स्थितस्य ढत्वमिति विहिते विशेषपक्षाश्रयणात् कृतेऽपि गुणे नाम्यन्ताच्चिनोतेस्सीध्वमो-

---

१. यत् किञ्चदुक्तम् (भं०)
२. वधव्यो वासः (वा०)
३. विधावकारः (वा०)
४. धाञ् (वा०)
५. गुण उच्यते (भं०)

विधानमाश्रित्य ढत्वं भविष्यतीति कथं तस्य व्याघातस्स्यात्, नैतत्, सम्भवे हि तुष्टुढ्वे कृषीढ्वमित्यादिर्मुख्यो ढत्वस्य विषयः। यत्र सर्वत्रात्मने ऋदन्तानां चेति गुणो निषिध्यते तत्कथं सम्भवत्यां गतौ विहितविशेषणपक्षाश्रयणेन चेषीढ्वमित्यादौ ढत्वं स्यात्। तस्मादत्र गुणेऽपि कृते ढत्व यथा स्यादिति समानं निवृत्त्यर्थं स्वरग्रहणम्। अनवर्ण इति कर्तव्ये वर्णग्रहणं नजानिर्दिष्ट-परिभाषां[1] प्रत्याशङ्का मा भूदिति। तथा च अजरत् अदर्शदित्यत्र जृदृशोरण्वि-कल्पविषयाद् वक्तव्यादण्यपि विहिते एतत्परिभाषा सामर्थ्यादेव णकारेत्ययं गुणनिषेधो न प्रवर्तते।

एकारादीनि सन्ध्यक्षराणि १।१।८

एकार आदिर्येषां वर्णानामिति बहुव्रीहिः। जश्शसोः शिः, घुट्स्वराद् घुटि नुः, इन्हन्पूषेति दीर्घः। सन्धिशब्दे डुधाञ्, सम्पूर्वादुपसर्गे दः इति किः, पूर्ववदालोपः। सन्धिप्रधानान्यक्षराणि सन्ध्यक्षराणि इति मध्यमपदलोपि कर्म-धारयः। यथा घृतपूर्णो घटः घृतघट इति प्राग्वच्छिभावः। नुकारागमः। एकारादीनि वर्णानीति वर्णशब्दस्य पुंनपुंसकयोस्स्मरणादेवमुक्तम्। दातेति। देङ् रक्षणे, सन्ध्यक्षराणामाकार इत्यात्वम्। श्वस्तनीता अथवा दायता इति तृच्, चकारो धातोस्तृशब्दपारित्यत्र तृणोऽपि[2] ग्रहणार्थः। असति हि तृचः चकारे निरनुबन्धकग्रहणे न सानुबन्धकस्येति तृणो ग्रहणं न स्यात्। आमो सि-लोपश्चेत्यात्वं सि-लोपो औकारस्य सन्ध्यक्षरसंज्ञा प्रयोजनम्। डुढौके इत्यादौ ह्रस्व उकारः असत्यां हि तस्य सन्ध्यक्षरसंज्ञायां ह्रस्व इति ह्रस्वो ढौकेरभ्यासस्य सम्बन्धिनः औकारस्य विधीयमानः कण्ठभागेनान्तरतम्यादा-कारोऽपि ह्रस्वस्स्यात्। तस्यां तु सत्यां सन्ध्यक्षराणां ह्रस्वादेश इदुतावित्य[3]-स्यौकारस्य सन्ध्यक्षरस्यौष्ठ्य उकार एव ह्रस्वो भवति न त्वकारः। नन्वे-कारादीनीति बहुव्रीहौ वर्णानामन्यपदार्थेन व्यवस्थितानामियत्तापरिच्छेदे कारणाभावात् कादीनामपीयं संज्ञा प्राप्नोतीत्याशङ्क्याह–चतुर्णामियं संज्ञेति। ए ऐ ओ औ इत्येतेषामेव चतुर्णामियं संज्ञेति नान्येषाम्। कुतो हेतो इत्याह-[4]स्वरग्रहणानुवृत्तेरिति। चतुर्भ्यः परेषामस्वरत्वादिति भावः। ननूपलक्षणत्वा-दित्यादि। अयमर्थः। एकारादिर्येषामित्येकारोऽत्रोपलक्षणम्, तेन हि आदि-

---

१. परिभाषायाम् (भं०)
२. तृणे (वा०)
३. इदूतावित्यस्यौकारस्य (वा०)
४. स्वरग्रहणानुवृत्तिरिति (वा०)

भूतेनान्ये त्रयो वर्णा उपलक्ष्यन्ते। उपलक्षणञ्च तदुच्यते। येनान्यदुपलक्ष्यते ततश्चैकारोपलक्षितानां त्रयाणामेव वर्णानां संज्ञा प्राप्नोति। एकारस्त्वन्येषामुपलक्षणत्वात् कार्ययोगो न स्यात्। यथा चित्रगुमानयेत्यत्र चित्रगव्यः। नह्युपलक्ष्यदुपलक्षणमात्मानमुपलक्षयति स्वात्मनि क्रियाविरोधात्। नहि सुशिक्षितः प्लवगः स्वं स्कन्धमारोढुं समर्थः। अत एकारस्योपलक्षणभूतत्वात् कथं संज्ञा स्यात्। नास्त्यसौ प्रकारो येनासावपि सन्ध्यक्षरमिति व्यपदिश्यते। देवदत्तशालायाः ब्राह्मणा आनीयन्तामित्यभिहिते तु शालोपलक्षणभूतस्यापि देवदत्तस्य यदानयनं तद् रूपान्तरेण ब्राह्मणत्वेन प्रवर्तते न तूपलक्षणरूपतया। इह त्वेकारस्य रूपान्तरासम्भवात् संयोगान्तो न स्यादित्याह—सत्यमित्यादि। सत्यमिति निपातोऽभ्युपगमे वर्तते। यदि सत्यं तर्हि नाङ्गीक्रियत इत्याह—ह्वामाश्चेति। यदयं ह्वामाश्चेति ह्वेजः सन्ध्यक्षरान्तानामित्यकारः सन्ध्यक्षरसंज्ञानिमित्तत्वमात्वं विदधाति। तत आत्वविधानादुपलक्षणस्यापि एकारस्य संज्ञा भवतीति कथं पूर्वपक्षार्थोऽङ्गीक्रियते। एवञ्च कृत्वेत्यादिना भङ्ग्या ज्ञापकान्तरमुपन्यस्यति। ह्वामाश्चेत्यस्य सौत्रत्वेनाशङ्क्यमानत्वात्। एवम्[1] च कृत्वाऽनव्ययतेः परोक्षायामिति निषेधारम्भः सफलः स्यात्।

कादीनि व्यञ्जनानि १।१।९

ककारादिर्येषां वर्णानामिति विग्रहः। वि-पूर्वादञ्जेः व्यङ्ग्यः स्वरेण प्रकटीकर्तव्यमिति कृत्ययुटोऽन्यत्रापि कर्मणि युट्। ककारादीनि वर्णानीति हकारान्तानीति मन्तव्यम्। रुद्रं स्तौमीति स्तवनक्रियायां रुद्रस्याकर्तृकत्वात् कर्मणि द्वितीया। ष्टुञ् स्तुतौ, धात्वादेष्षस्य पत्वनिवृत्तौ टकारस्यापि तकारः, स्तौतीन्नन्तयोरिति ज्ञापकात्। सि, अन्वि, अदादेर्लुक् उकारस्य वृद्धिर्व्यञ्जनादावित्यौकारः। उपलक्षणस्यापि ककारस्य संज्ञा भवतीत्युक्तम्। तत्र हेतुमाह - यः करोतीत्यादि। यः करोति सः कर्तेत्यत्र सः शब्दात् परस्य विसर्जनीयस्य ककारे परत एष स परो लोप्य इति व्यञ्जननिमित्तकोऽयं लोपो दृश्यते ततो ज्ञायते भवत्युपलक्षणस्यापि ककारस्य व्यञ्जनसंज्ञेति।

ते[2] वर्गाः पञ्च पञ्चशः १।१।१०

तद् जस् त्यदाद्यत्वम्, जस्सर्व ई, वृजेः वर्ज्यन्ते विजातीयेभ्यः पृथक्क्रियन्त इति कर्मणि घञ्, गुणः चजोः कगाविति गत्वम्, पञ्चन् जस्, लुक्। पञ्चश

---

१. एवञ्च कृत्वा (न्यूनपाठः भं०)।

२. ते वर्गाः पञ्च पञ्च पञ्च (दुर्गसूत्रपाठः)

इत्यव्ययमेतदिति शसन्तस्याव्ययत्वेन प्रसिद्ध इति भावः। पञ्च पञ्चेत्याख्याताच्च तसादयः इति शसित्यनेन वीप्सायां शस्प्रत्यय इति दर्शयति। वक्ष्यति हि तसादि-प्रत्ययविधौ संख्याया एकवचनान्ताच्च वीप्सायामिति शसन्ताच्च सामान्येनोत्पन्नस्य सेरव्ययाच्चेति लुक्। वर्गसंज्ञाः भवन्तीति। वर्ग इति संज्ञा येषां ते तथोक्ताः। यादीनामपि पञ्चानां तर्हि संज्ञास्यादित्याह—तास्तु संज्ञा पञ्चेति विशेषणोपादानात्। त इति विशेषादिष्टपरिभाषया[1] वर्णानां मा भूत्, किञ्च स्यात्, अकारादीनामपि पञ्चानां सत्यां वर्गसंज्ञायां त्वमत्रेत्यत्र वर्ग्ये तद्वर्ग्येति सकारस्य वर्गपञ्चमो तकारो भवेत्। अथ किमर्थं शसो निर्देशः एवम्[2] सत्यपार्थकं स्यात्। पञ्चेति संज्ञाविशेषणत्वेन किं कृतं स्यात्, तस्मात् पञ्च वर्गसंज्ञाः। पञ्चानां कादीनां सफल एवेति पञ्चानां पञ्चशब्दो कादीनां विशेषणभूते सामर्थ्यादेव वीप्सायोगो विज्ञास्यत इति किं शसो निर्देशेन, अस्त्येतत्, पञ्च पञ्चेति तु कृते सति परिगृहीतवीप्साकमेवेदं कादीनां विशेषणमिति कश्चित् सम्भावयेत्। ततश्च पञ्च सङ्ख्याव्यवच्छेदः संज्ञानां न प्राप्नोति तन्मा भूदिति दोष इति शसो निर्देशः कर्तव्यः।

वर्गाणां प्रथमद्वितीयाः शषसाश्चाघोषाः १।१।११

वर्गशब्दः पूर्वमुक्तः। द्वयोः पूरणः द्वितीयः, द्वेस्तीयः, घुषिरविशब्दने, षञ् गुणः, अविद्यमानो घोषो येषां ते अघोषाः। लोप्या इति अर्ह-प्रत्ययनिर्देशाद्विद्यमानशब्दस्य लोपः। वर्गाणामित्यादि। तथा च शषसाश्चेति अघोषसंज्ञाः भवन्तीति अपेक्षते। ज्ञानभुत्स्विति। ज्ञानशब्दपूर्वाद् बुध्यतेः ज्ञानं बुध्यत इति क्विप्, हचतुर्थान्तस्य वस्य भः, अघोषे प्रथम इति धस्य तः। ननु वर्गग्रहणं पूर्वस्य सूत्रादनुवर्तमानमर्थवशात् षष्ठ्यन्ते विज्ञास्यते। तत्किं पुनर्वर्गग्रहणेन, उच्यते—प्रथमद्वितीयव्यपदेश इह शास्त्रे वर्गविषय एव यथा स्यादिति पुनर्वर्गग्रहणम्। तृतीयादि-व्यपदेशस्य तु वर्गविषयत्वम्। ([3]प्रथमद्वितीयग्रहणस्यात्र वर्तमानस्योपलक्षणत्वाद्विज्ञास्यते। अथ किमर्थं संज्ञिनां भेदेन निर्देशः क्रियते? सत्यम्, शक्यमेवं कर्तुम्। अवैस्पष्ट्यं स्यात्) ([4]द्वन्द्वनिष्ठानां कस्यचिद्विशेषणं कस्यचिन्न इतीदमवैस्पष्ट्यं स्यात्। प्रथमद्वितीय-

---

१. विशेषानतिदिष्टः (परिभाषासंग्रहपाठः)
२. न्यूनपाठः (वा०)
३. न्यूनपाठः (वा०)
४. न्यूनपाठः (भं०)

ग्रहणस्यात्रानुवर्तमानस्योपलक्षणत्वाद्विज्ञास्यते । अथ किमर्थं संज्ञिनां भेदेन निर्देशः, न शषसह प्रथमा द्वितीया इत्येवोच्यते । वर्गाणामिति च विशेषणं सम्भवानां प्रथमाद्वितीयानामेव विज्ञास्यते । सत्यम्, शक्यत एवं कर्तुम्, अवैस्पष्टोत्तरं स्यात् ।)

घोषवन्तोऽन्ये १।१।१२

वृषेर्घञन्ताद् घोषो विद्यते येषामिति, तदस्यास्तीति वन्तु-प्रत्ययः । अन्यशब्दाज्जस्, जसस्सर्व ईस् । अग्निर्गच्छतीति गम्लृ गतौ । नन्वघोषेभ्यः येऽन्ये वर्णास्ते चेत् संज्ञिनः तदा स्वराणामपि संज्ञा प्राप्नोति, तेऽप्यघोषेभ्योऽन्ये भवन्तीति पूर्वपक्षयति । नन्वन्य इति वचनादित्यादि । अत्र परिहारमाह—न भविष्यतीत्यादिना । अयमर्थः । स्वरान्प्रत्याशङ्कैव नास्ति । कादीनि व्यञ्जनानीत्यतो हि सूत्रादारभ्य कादीनि संस्कार्यत्वेन प्रस्तुतानि । तेषां च लब्धव्यञ्जनव्यपदेशानां वर्गसंज्ञायां पूर्वेण योगेनाघोषव्यपदेशे सञ्जाते घोषवन्तोऽन्य इति सूत्रमिदमारभ्यमाणमन्येषामघोषव्यतिरिक्तानां गादीनामेव बुद्धौ परिस्फुरतां घोषवत्संज्ञाविधायकं सम्पद्यते । ये तु संस्कार्यत्वेन प्रस्तुताः बुद्धावेवापरिस्फुरन्तः स्वराः ते अन्यशब्देनाक्षिप्यमाणाः सन्तः कथमिव संज्ञिनः स्युः । घोषवन्त इति कर्तव्ये अन्यग्रहणं विस्पष्टार्थम् । पूर्वेषामपि[1] संज्ञा स्यादिति चेत्, न । भविष्यति पृथग्योगारम्भात् । [2]अघोषघोषवद्व्यपदेशयोः चैकवर्णविषयतया विरुद्धत्वात् । न च स्वरसंज्ञिन आशङ्क्यन्ते ।[3] तेषामप्यप्रस्तुतत्वात् । अयं योगः पूर्वश्च मन्दधियां भ्रान्तिनिवारणार्थः । शक्यन्ते हि प्रदेशवाक्येष्वघोषः घोषवद् व्यपदेशोऽन्वर्थत्वेन विशिष्टवर्णविषयो विज्ञातुम् । भ्रान्तिस्तु स्यात् के ते अघोषाः घोषवन्तो वेति ।

अनुनासिका ङ ञ ण न माः १।१।१३

णस् कौटिल्ये नसत इति वुण्तृचाविति वुण्, अकादेशः, उपधादीर्घः । आप् के प्रत्यय इतीत्वम् । अनुगता नासिका येष्विति विग्रहः । स्वरो ह्रस्व इति योगविभागान्नासिका शब्दस्य ह्रस्वः । ङकारस्य संज्ञाप्रयोजनम् ङुङ्भ्यामित्यादौ धुटां तृतीय इति गत्वाभावः । ङुञ्च गताविति यस्मात्ङुञ्चतीति, क्विप्, अङुञ्चेरिति निषेधारम्भबलादनिदनुबन्धानामित्यनुषङ्गलोपाभावः ।

---

१. पूर्वेषामेव एषापि संज्ञा स्यादिति (वा०)

२. अघोषः घोषवद् (सम्भावितः शुद्धपाठः)

३. तेषामप्यप्रस्तुतत्वात् (वा०),

भ्याम् संयोगान्तलोपस्तावन्न क्रियते तिर्यङ्ङित्यादिनिर्देशात्। तेन चवर्ग-दृगिति[1] गत्वम्। वर्ग्ये[2] वर्ग्यान्तः, संयोगान्तस्य लोपः, ककारस्य याञ्चा, यज्ञ इत्यत्र कत्वगत्वाभावः। पूर्वाचार्यसंज्ञाङ्गीकरणं ङञणनमानां संज्ञान्तरास्ति-त्वद्योतनार्थम्। तेनैते पञ्चमे पञ्चमानित्यादौ पञ्चमशब्देनापि व्यवह्रियन्ते।

अन्तस्थाः यरलवाः १।१।१४

अन्तशब्दपूर्वात्तिष्ठतेरन्ते तिष्ठतीति नाम्नि स्थश्चेति डः, यरलवानां संज्ञायाः प्रयोजनम् सम्प्रसारणम् लकारस्य तु लिलावयिषतीत्यत्रेत्वप्रवृत्तिः। लूञ्, लुनन्तं प्रयोक्तुमिच्छतीति हेतावित्, वृद्धिः, सन्, इट्, गुणः। इनि कृते स्थानिवदिति लू, द्विर्वचनम्, उवर्णस्य जान्तस्थत्युवर्णस्य इत्वम्।

ऊष्माणः शषसहाः १।१।१५

देवं नौमीति, दिव क्रीडायाम्, दीव्यतीति देवः। अच्, णु स्तुतौ, वन्तु., सि, अन्वि लुक् उकारस्य वृद्धिः। इह सर्वत्र संज्ञाकरणस्य व्यवहारः प्रयोजनं, न चानयोष्मसंज्ञया क्वचिदस्ति व्यवहारः। मनोरनुष्मणीत्यत्रास्तीति चेत्, न। अस्य सूत्रस्य वैफल्यादाचार्येणापठितत्वात्। तथा चानुस्वारो मकारनकारयोरनेन विधीयते। सः च मोऽनुस्वारं व्यञ्जने इत्यनेन पदान्ते मकारस्य सिद्धः, नकारस्य तु पदान्ते। तत्र भवान् रमते इत्यादौ न दृश्यते। अपदान्तेऽपि तयोर्मनोरनुस्वार इत्यनेनास्तीहानुस्वारसिद्धिः। ऊष्मण्यपि पञ्चशर इत्यादावनुस्वारो दृश्यते। ततो मनोरनुष्मण्यनुस्वार इत्यस्य फलशून्यस्यापठ्यमानत्वात् ऊष्म-संज्ञायाः प्रदेशवाक्येऽसम्भवात् योगारम्भो निरर्थक इत्यनेनाभिप्रायेणाह-मनो-रनुष्मणीत्यस्यानर्थकत्वादिति पाठस्त्वेवं प्रकाराणामपि दृश्यते। यथा शक्ति-यष्ट्योरीकण्णित्यादीनामिति न पाठमात्रात् सार्थकत्वं शक्यं विज्ञातुम्।

अः[3] इति विसर्जनीयः १।१।१६

अपरो लोप्य इति विसर्जनीयलोपो न कृतः, संज्ञिभङ्गभयात्। विपूर्वात् सृजेः विसृष्टव्य इति तव्यानीयाविति अनीयप्रत्ययः। अ इति लुप्तप्रथमैक-वचनमिति अं अः इति वर्णानां मध्ये बिन्दुद्वयान्तोऽकारः पठ्यते, तस्येहानु-

---

१. चवक्रदृगिति (अशुद्धपाठः वा०)
२. वर्ग्ये वर्गान्तः (वा०)
३. अ इति विसर्जनीयः (दुर्गपाठः)

क्रियमाणत्वादनुकार्येणार्थेनार्थवत्वात् । ततः सञ्जातस्य प्रथमैकवचनस्य लोपः । लोपविधायकस्यैवंविधे विषये लक्षणस्याभावात् कथं लोप इत्याह—लोपस्त्वित्यादि । आदिलोपोऽन्तलोपश्चेति पूर्वाचार्याणां यदभियुक्तैः वचनं स्मर्यते तस्मादत्र लोप इत्यर्थः । कश्चरतीति, क्विप्, सि, किं[1] क इति क आदेशः । कश्छादयतीति । छदेश्चुरादित्वादिन्, उपधादीर्घः, सि, अन्वि, गुणः । अकारात् परं विन्दुद्वयं विसर्जनीयसंज्ञं भवतीत्युक्तम् । तत्कथमकारः परिहर्तुं शक्यत इत्याशङ्क्याह—इति शब्दोऽकारस्य संज्ञानिवृत्त्यर्थ इति । इतिशब्दस्येह क्रियमाणस्यैतदेव प्रयोजनम् । विन्दुद्वयस्यैव संज्ञा यथा स्यादकारस्य मा भूदिति । अन्यथाप्रयोजनशून्यत्वादिति शब्दमाचार्यः न कुर्यात् । एवं च कृत्वा इदुदग्निरिति विन्दुद्वयात्पूर्वस्येकारस्याकृतयत्वस्य श्रवणमुपपद्यते यदि तर्हि अकारस्य संज्ञा माभूदिति इति-शब्दः क्रियते किमाकारेण विफलेनेत्याह—उच्चारणार्थस्त्वकार इति उच्चारणमर्थः प्रयोजनं यस्याकारस्य सः तथोक्तः । तु शब्दोऽवधारणे, तेनायमर्थः विन्दुद्वयमुच्चारयितुमकार इहोपात्तः न तु संज्ञासम्बन्धमनुभवितुम् नह्यकारं विना विन्दुद्वयमुच्चारयितुं शक्यते । एवमुत्तरत्र सूत्रेष्वपीत्यादि । यथात्राकारः उच्चारणार्थः । एवमग्रिमेषु त्रिषु सूत्रेषु ककारपकारयकारास्संज्ञित्वेनाभिमतानां वर्णानामुच्चारणार्थाः न तु संज्ञासम्बन्धस्तेषामपि भवतीति शब्दस्य करणादिति सर्वत्र हेतुः । इह च विपूर्वः सृजिः संज्ञा, तेन विसृष्टो विसर्ग इत्येतेन अपि विन्दुद्वयस्य संज्ञे भवतः इति रसकारयोर्विसृष्ट इत्यादिव्यवहार उत्पन्नः । अन्यथा ह्यन्यूनानतिरिक्ता संज्ञा संज्ञिनं प्रत्यायतीति विसृष्टशब्दो प्रतिलब्धविसर्जनीयसंज्ञः कथं विन्दुद्वयं प्रत्याययेत् ।

≍क इति जिह्वामूलीयः १।१।१७

कखयोर्जिह्वामूलीयं न वेत्येतत्सूत्रविहितो विसर्जनीयादेशः । इह क इति संज्ञित्वेन लुप्तप्रथमैकवचन उपात्तः । मूल प्रतिष्ठायाम् । नाम्युपधेति कः । जिह्वायाः मूलं जिह्वामूलम्, तत्र भव इतीयस्तुहित इति तु शब्दादीय-प्रत्ययः । ककारात् पूर्वं इत्येतेन ककारस्य संज्ञित्वं दर्शयति । वर्ण इति । विसर्जनीयस्य वर्णस्थानिकत्वाद् वर्ण इत्युक्तम्, न त्वसौ वर्णानां मध्ये पठ्यते । केन पुनरसौ विसर्जनीयस्थाने विहित-कखयोर्जिह्वामूलीयं न वेत्यनेन, यद्येवं जिह्वामूलीयोच्चारणेन विधानम्, विधानाश्रयाच्च जिह्वामूलीयसंज्ञेति स्पष्टमितरेतराश्रयो दोषः स्यात् । अस्त्येतत्, भाविनी तु संज्ञा विज्ञायते,

---

१. किमः कः (दुर्गपाठः)

यथास्य सूत्रस्य शाटकं वयेति। तेन सः तथाविधः कश्चिदादेशः कखयोः परयोः विसर्जनीयस्य भाव्यते। यस्य भावितस्य स्थाने सतो जिह्वामूलीय इत्येतेषां संज्ञा भवति। एवं च न संज्ञोच्चारणेन संज्ञिनां विधानमिति नास्ती-तरेतराश्रयदोषप्रसङ्गः। पाठक्रमाच्चार्थक्रमो बलीयानिति पूर्वं संज्ञासूत्रस्य पाठेऽपि विधिसूत्रादनन्तरं तद् व्याख्यातव्यम्। कः करोति, डुकृञ् करणे, इति तनादेरुः, करोतीति गुणः विकरणस्य तु नाम्यन्तयोरिति।

ऽप इत्युपध्मानीयः १।१।१८

पफयोरुपध्मानीयं न वेत्येतत्सूत्रविहितो विसर्जनीयादेशः। इह प इति संज्ञित्वेन पूर्ववद् उपात्तः। ध्माशब्दोऽग्निसंयोगयोरुपपूर्वः, उपध्मातव्य उपध्मानीय इत्यनीयः, पकारात् पूर्वो वर्ण इति व्याख्याक्रमोऽत्र पूर्ववन्मन्तव्यः। कः पातीति। पा रक्षणे, अन्विलुक्, कः फलतीति-फलानि।

अं[1] इत्यनुस्वारः १।१।१९

स्वृ शब्दोपतापयोरित्यस्मादनुपूर्वादनुस्वर्यते इति कर्तरि च कारक इति घञ्। अं इति लुप्तप्रथमैकवचनमिति। अं इति वर्णानां मध्ये अं इति यो वर्णः पठ्यते तस्येहानुक्रियमाणत्वादनुकार्येणार्थेनार्थवत्वादुत्पन्नस्य सेरादिलोप इत्यादिना लोपः। अं इत्यत्र यो विन्दुरित्येतेन विन्दुरिह संज्ञी नत्वकार इति दर्शयति। त्वं स्मरसीति। युष्मद् सि, त्वमहमिति त्वमादेशः।

पूर्वपरयोरर्थोपलब्धौ पदम् १।१।२०

अर्थ याञ्चायाम्, डुलभष्[2] प्राप्तौ, चुरादित्वादिन्। अर्थ्यत इति अर्थः। स्वरवृदृइत्यल्, कारितलोपः। उपपूर्वाल्लभेरुपलम्भनमुपलब्धिरस्त्यत एव ज्ञापकात् षानुबन्धलक्षणाप्प्रत्ययप्राप्तावपि क्तिप्रत्ययः। अर्थस्योपलब्धिरर्थोपलब्धिरिति कर्तृकर्मणोः कृतीति कर्मणि षष्ठ्यन्तस्यार्थशब्दस्य तत्पुरुषः। पद गतौ, पद्यते, क्षीयते येनार्थस्तत्पदम्। गोचरसंचरेति चर-शब्दाद् घप्रत्ययः। पूर्वपरयोरित्युच्यते। तत्र कः पूर्वः को वा पर इत्यपेक्षामपनेतुमाह — पूर्वस्य लिङ्गस्य परस्य च स्यादेरित्यादि शब्दव्युत्पत्तिनिमित्तेऽस्मिन्शास्त्रे शब्दसंस्कारोपयोगिनौ पूर्वपराविह गृह्येते। तदुपयोगिनौ च पूर्वपरौ प्रत्ययावेव

---

१. अमिति (मं०)
२. न्यूनपाठः (वा०)

प्रसिद्धावतस्तावेवात्र पूर्वपरत्वेनाभिमतौ । तत्र पूर्वशब्देन प्रकृतेर्लिङ्गस्य धातोश्च ग्रहणम् । परशब्देनापि यथाक्रमं प्रत्ययस्य स्यादेस्त्यादेश्च[1] । पूर्वेणादिशब्देनौजसित्यादयो गृह्यन्ते । अपरेणापि तसन्तीत्यादयः । अन्यस्य तु परत्वेनापरिग्रहे कारणं वक्ष्यति । यस्समुदायस्तस्य पदसंज्ञा भवतीत्येतेन पूर्वपराविष्टसमुदायस्यैवेयं संज्ञा न प्रत्येकं पूर्वपरयोरिति दर्शयति । एतच्च प्रत्येकं संज्ञासम्बन्धे प्रयोजनाभावाल्लभ्यते । नहि ग्रामोऽत्रेत्यादौ प्रकृतेः प्रत्ययस्य च द्वयोः पदव्यपदेशे सति किञ्चित् फलम् । एकयैव समुदायविषयया ग्राम इत्यस्य पदसंज्ञया अकारस्य लोपस्य प्रवृत्तेः । पदमिति पूर्वाचार्यसंज्ञापरिग्रहाच्च समुदायस्संज्ञी । यतो हि व्यवहारयोग्योऽर्थोपलभ्यते तत्पदम् । तथाविधश्चार्थः समुदायादुपलभ्यते न तु एकस्मात् पूर्वस्मात्परस्माद्वा । तस्मात्समुदायस्यैवेयं संज्ञा तद्विशेषणं तु पूर्वपरयोरित्यर्थस्योपलब्धौ सत्यामित्येतेनार्थोपलब्धाविति सप्तमीयं कालभावयोस्सप्तमीत्यनेनेति दर्शयति । अव्यधिकरणार्थस्योपलब्धस्य हि भावे पदसंज्ञाभावो लक्ष्यते ।

ग्रामो वस्स्वमिति । युष्मद् आम् एषां विभक्तावित्यन्तलोपः, स्वरागमः । सामाकम् । युष्माकमित्यस्य पदस्य लब्धव्यपदेशाद् ग्राम इत्यस्मादुत्तरस्य युष्मदस्मदोः पदमित्यादिना वमादेशौ । यजन्तेऽत्र यज् देवतापूजादौ[2], अन्ते, अन्वि, असन्ध्यक्षरलोपः । अत्रेति । एतद् त्र सप्तम्या इति त्र प्रत्ययः । तेष्वेतदकारतामित्येतददोऽकारादेशः । यजन्त इत्यस्य पदत्वात् एदोत्पर इत्यकारलोपः । अर्थोपलब्धिग्रहणं किमर्थं यावता पूर्वपरारब्धसमुदायस्येयं संज्ञा क्रियते न च तथाविधोऽस्ति कश्चित्प्रकृतिप्रत्ययसमुदायो यतोऽर्थो नोपलभ्यत इति व्यवच्छेद्याभावादपार्थकमर्थोपलब्धिग्रहणमिति पूर्वपक्षयति । ननु पूर्वपरौ यत्रेत्यादि । यत्तच्छब्दाभ्यां संज्ञित्वेनाभिमतस्समुदायो निर्दिश्यते । अत्र परिहारमाह--सत्यमित्यादिना । अर्थावगमे पदसंज्ञा यथा स्यादित्येतदर्थम् अर्थोपलब्धिग्रहणम्[3] न कृतम् किं तर्हि, विशिष्टस्यार्थस्य विभक्त्यन्तेन शब्देन वाच्यस्य यदोपलम्भो भवति तदा यथा स्यादित्येतदर्थम् । एतच्च कथं प्रयोजनं भवति यदि परो विभक्तिसंज्ञकं परिगृह्यते । तेनेत्यादि । तेनार्थोपलब्धिग्रहणेन हेतुना स्यादित्यादि विभक्त्यन्तस्यैव शब्दस्य पदसंज्ञाप्रवर्तते न त्वन्यप्रत्ययान्तस्य स्यादित्यादिलक्षणाद् योऽन्यप्रत्ययः तदन्तस्येत्यर्थः । किं स्यादित्यादि । यद्य-

---

१. त्यादेस्स्यादेश्च (भं०)

२. न्यूनपाठः (भं०)

३. अर्थेनार्थोपलब्धिः (भं०)

न्यप्रत्ययान्तस्य पदसंज्ञा स्यात् को दोषो भवेदित्यर्थः । दोषमाह—ज्ञानबुधाविस्यत्र प्रयोगे ज्ञानबुधित्ययमपि प्रत्ययलक्षणेन क्विबन्तः शब्दः पदमिति व्यपदिश्यते । ततश्च पदान्ते धुडामिति पदव्यपदेशनिबन्धनो धकारस्य प्रथमस्स्यात् । तस्मात् विभक्त्यन्तं पदं यथा विज्ञायेदित्येतदर्थमर्थोपलब्धिग्रहणम् । यद्येवमित्यादि । विशिष्टस्यार्थस्य परिग्रहायार्थोपलब्धिग्रहणं क्रियते तदा अर्थ इत्येव क्रियताम् । एवमपि कृते सत्यर्थग्रहणसामर्थ्यादेव विशिष्टार्थ-परिग्रहसिद्धः । अर्थ इति चेयं सत्सप्तमी । यत्र चार्थस्संस्तत्रावश्यमुपलभ्यत एवेत्यपार्थकमुपलब्धिग्रहणम् । ब्रूम इति । परिहारमिति विशेषः । तमेवाह—यत्रेत्यादि । उपलब्धिग्रहणे लब्धे यत् पुनरुपलब्धिग्रहणं कृतं तस्यैतत् प्रयोजनम् । यत्र पूर्वोऽस्ति परश्च नास्ति परो वा विद्यते पूर्वश्च न विद्यते तत्रापि पदसंज्ञा यथा स्यादित्युपलब्धिग्रहणसामर्थ्याद्धि पूर्वपरावप्रधानीकृतार्थोपलब्धे प्राधान्यं ख्याप्यते । तेनेत्यादि । उपलब्धिग्रहणेन हेतुनेत्यर्थः । व्यतिपूर्वस्यास्तेः से-प्रत्यय इति कर्मव्यतिहारेऽर्थे वर्तमानाद्धातोः कर्तर्यर्थे[1] आत्मनेपदं वक्तव्यमित्यनेन वचनेन परस्मैपदिनोऽप्यस् भुवीत्यस्मादात्मनेपदम् । से-प्रत्ययः अन्विलुक्, अत्र परस्य से-शब्दस्य पदत्वात् तत्परस्य युष्माकमित्यादेः क्वचित् प्रयोगे वस्नसादयो भवन्ति । दधीत्यत्रेत्यादि । पदत्वादेतदेव कार्यम् ।

अनतिक्रमयन् विश्लेषयेत्[2] १।१।२१

अतिपूर्वात्क्रमेरिति, क्रमु पादविक्षेप इत्यस्माद् दीर्घाभाव इति । अस्योपधाया इति प्राप्तस्य । नातिक्रमयन्ननतिक्रमयन्निति नञ् समासोऽयम् । प्रथमान्तयोरपि विभक्त्योः द्वितीयाद्या इत्यादिना द्वितीयाद्यभावेऽपि[3] क्वचिद् दृश्यते समास इति हि तत्रैव वक्ष्यति विपूर्वाद् श्लिषे इति श्लिष् आलिङ्गन इत्यस्मात् सप्तमी स्यादिति विधावर्थे विध्यादिषु सप्तमी चेत्यनेन । परिभाषेयमिति । परिभाषाप्रत्यवमर्शादियमिति स्त्रीत्वेन निर्देशः । परिभाषणं परिपरिभाट्, क्विप्, तस्यै परिभाषे । परिभाषणाय योगोऽयमिति व्याख्येयम् । वर्णानामेकत्र युक्तानामिति संश्लेषमुपगतानामित्यर्थः । ननु को नाम चक्षुष्मान् परत्र वर्णस्य विश्लेषणमव्यवहितेन रूपेण क्रमप्राप्तामुल्लङ्घ्य पूर्वत्र कुर्यात् । तत्किमनेनारब्धेन वचसेत्याशङ्क्याह—बालानामित्यादि ।

---

१. कार्यर्थे (वा०)
२. १।१।२२ (दु० वृ०)
३. द्वितीयाऽपि (वा०)

व्यञ्जनमस्वरं परं वर्ण नयेत् १।१।२२[1]

अविद्यमानो स्वरो यस्य व्यञ्जनस्येति विग्रहः। तस्य लोप इत्यत्र तत्पुरुषग्रहणस्य समासविषयोपलक्षणम्। तस्य तत्पुरुषत्वाद् बहुव्रीहावपि नकारस्य लोपः। नयेदिति पूर्वविधौ सप्तमी। आद्यं पदचतुष्टयं द्वितीयान्तमिति नयतेर्द्विकर्मकत्वादित्यत्र हेतुः। यथा अजां ग्रामं नयतीति। विध्यर्थमिदमिति पर-नयनस्य विधीयमानत्वादविद्यमानस्य स्वरस्यैव वर्णस्य व्यञ्जनव्यपदेशप्रवृत्तेरस्वरग्रहणमतिरिच्यमानमुपध्मानीय-जिह्वामूलीययोरव्यञ्जनयोरपि पर-नयनार्थमिति केचिदाहुः तद्विघटयितुमाह—उपध्मानीयजिह्वामूलीययोः इत्यादि। अस्वरग्रहणं चेदं[2] मन्दमतीन्प्रति सिद्धस्यैवार्थस्यानुवादार्थम्, तथा च वर्णग्रहणमपि शक्यते हि वर्णाधिकारात्परं वर्णमित्यभिधातुम्।

लोकोपचाराद् ग्रहणसिद्धिः १।१।२३

लोकृ दर्शने। लोक्यन्ते श्रेयोऽर्थिभिर्जनैः। दृश्यन्त इत्यकर्तरि च कारके संज्ञायामिति घञ्। लोकोपचारादिति कर्मणि पञ्चमी, ल्यबन्तस्य शब्दस्य लोपः। कर्माधिकरणयोः पञ्चमी वक्तव्येत्यनेन लोकोपचारं समीक्ष्य ग्रहण-सिद्धिर्भवतीति ह्ययमत्रार्थः। सेधनं सिद्धिः, स्त्रियां क्तिः, ग्रहणस्य सिद्धिः ग्रहणसिद्धिः। लोकाः पूर्वाचार्याः इति तत्तद्वस्तु परिज्ञानार्थं सर्वैरवलोक्यन्त इति लोका उच्यन्ते ये शास्त्राणां प्रणेतारः पूर्वाचार्याः। कृत्ययुटोऽन्यत्रापीति युडिति भावे करणाधिकरणयोश्च विधीयमानो युट् कर्मणि न प्राप्नोतीत्यस्माद्वचनाद् भवतीति यथा राजभिर्भुज्यन्ते राजभोजनाश्शालय इत्यादौ कर्मसाधनेन च ग्रहणशब्देनात्र कार्यमुच्यते। तेनायमर्थः। लोकानामुपचारं समीक्ष्य ग्रन्थगौरवभयाद् यदिह शास्त्रे नोक्तं कार्यं तस्य निष्पत्तिर्भवति लोकोपचारात् तदनुमन्तव्यमित्यर्थः। किं पुनः तत्कार्यमित्याह—लुब्लोपलुप्तादयः[3] इतिप्रत्ययादर्शनस्य लुक्संज्ञा, अदर्शनमात्रस्य च लोपसंज्ञा, दूरादाह्वाने प्लुत इत्यादयो विधय इहानुक्ताः पूर्वाचार्यशास्त्रादनुसरणीयाः। आदिग्रहणेनान्येषामनुक्तानां विधीनां परिग्रहः। यश्चेह शास्त्रे केनचिद् ज्ञापक-योगविभागादि-लक्षणेन प्रकारेण सङ्गृहीतुं न शक्यते तत्रानुसरणीयो लोकोपचारः न तु स्वशास्त्रसिद्धे सम्भवत्यपि प्रकारे तदनुसरणं ज्याय इत्यनेनाभिप्रायेणाह—यत्र त्वित्यादि। ज्ञापकेन

---

१. १।१।२१ (दु० वृ०)
२. चेदानीम् (भं०)
३. प्लुतादयः (भं०)

सिद्धिर्यथा नकारानुबन्धागमस्य[1] इदनुबन्धधातुविषयस्य । सः ह्यनिदनुबन्धा-नामिति प्रतिषेधारम्भादेव ज्ञापकसिद्धः । तत्र चेदितो नुं धातोरिति किम-नेन लोकोपचारेण । योगविभागेनापि सिद्धिर्यथा चित्रगुः निष्कौशाम्बिरित्यादौ ह्रस्वत्वस्य । तद्धि स्वरः ह्रस्वः इति योगविभागादेव सिद्धम् । तत्र किं गोस्त्रियोरुपसर्जनस्येत्यनेन च योगविभागादिनेत्यादिग्रहणेन द्वाविंशतिरष्टा-विंशतिरित्यादावात्वसिद्धयर्थं द्व्यष्टनोः संख्यायामबह्वीह्यशीत्योरित्यादि-शास्त्रान्तरं नानुमन्तव्यम् । आकारो महतः कार्य इति कार्यग्रहणादेव सिद्धत्वा-दिति दर्शयति । तदेवं कुशकाशावलम्बनेनापि स्वतन्त्रसिद्धावसत्यां लोकोप-चारानुसरणं श्रेयः ।

भट्टोग्रभूतिकृते शिष्यालोकाभिधाने संज्ञापादः[2] प्रथमः ।

द्वितीयः पादः

समानस्सवर्णो दीर्घो भवति परश्च लोपम् १।२।१

दीर्घी इत्यव्ययमिति । च्व्यन्तस्याव्ययत्वेन प्रसिद्धत्वात् लुप्तप्रथमैकवचन-मिति । अव्ययाच्चेत्यनेन । च्वेश्च लोप इति, निर्देशसामर्थ्यादित्यपेक्षते । दधी-हत इति दधिशब्दादमो नपुंसकात्स्वमोरिति लोपः । ईह चेष्टायाम् । मधूहन-मिति । ऊह वितर्के, युट् कर्मषष्ठीसमासः । होतृषिरिति कर्मधारयः । मध्वा-नयेति मधुशब्दादमः पूर्ववल्लोपः । णीञ् प्रा,[3] आङ् पूर्वो हि । अन्विगुणः, हेरकारादिति सेर्लोपः । अथ लृकारस्यापि दीर्घविधि प्रदर्शयितुमुदाहरणं कस्मान्नोपन्यस्तमित्याह--लृकारस्येत्यादि । तथा चाहुः शिक्षाकाराः "लृकारस्य दीर्घाः न सन्तीति" अनुकरणविषये तु सम्भवत्यपि लृकारे ततः पूर्वस्य लृकारस्य दीर्घविधिभाजो न तथा प्रयोगस्सम्भवति । गम्लृ-सहितः लृकारः गम्लृकार इत्येवं रपरस्तु दीर्घविधेर्विषयः सम्भवति न वेत्यत्र प्रयोगतत्त्वविदः प्रमाणम् । अथ समानग्रहणं किमर्थम्, यावता सवर्ण इति सप्तमी निर्देशात्सप्तम्या निर्दिष्टे पूर्वस्येति पूर्वेण दीर्घेण भवितव्यम् । पूर्वश्च यः सवर्णस्य सजातीयो वर्णो यद-पेक्षया समानो वर्णस्सवर्ण इति व्यपदिश्यते तेनावश्यमर्थात्समानेनैव भवि-

---

१. नकारागमस्य (वा०)
२. सन्धिपादः (वा०)
१. प्रापणे (इति पूर्णपाठः)

तव्यम् । एवं च सवर्णे परे दीर्घ उच्यमानस्समानस्यैव भविष्यतीति किं समानग्रहणेनेति पूर्वपक्षयति । ननु सवर्णे पर इत्यादि । उच्यत इत्यादिना परिहरति, सवर्ण इति निमित्तोपादानबलादेव लब्धे समानग्रहणे यत्समानग्रहणं क्रियते तत्स्यैतत् प्रयोजनम् । यत्रापि प्रयोगे समानस्यानेन सूत्रेण दीर्घो न[1] क्रियते स्वभावदीर्घत्वाल्लक्षणान्तरेण वा दीर्घप्रवृत्तेस्तत्रापि दीर्घात्परस्य सवर्णस्य दीर्घो[2] लोपश्च यथा स्यादिति । अन्यथा हि दीर्घानुयायित्वेन विधीयमानस्सवर्णलोपः सति दीर्घत्वे सन्निपातपरिभाषया न स्यात् । तेनेत्यादि । तेन दीर्घमात्रात्सवर्णलोपप्रवृत्त्यर्थेन समानग्रहणेन हेतुना । कुमारीयं वृद्धेत्यत्र च परसवर्णलोपः सिद्धयति । कुमारीशब्दो वयसि प्रथम इति ई-प्रत्ययान्तः स्वभावदीर्घः वृद्धा इत्ययमपि जसीति लक्षणेन कृतदीर्घः । इदानीमेतत् प्रयोजनं विघटयितुमाह—ननु पर लोपार्थमित्यादि । यथैव आत्वादीनां च इत्यनेन त्वरादीनामभ्याससम्बन्धिनोऽकारस्यैवात्वं सन्वदित्वदीर्घत्वबाधनार्थं क्रियते । तथैव कुमारीयं वृद्धा इत्यादावपि परलोपसम्पत्तये दीर्घस्यैव दीर्घः करिष्यते । इत्थं च कृते दीर्घत्वे तदनुयायी परसवर्णलोपो भविष्यतीति किं तत्प्रवृत्त्यर्थेन समासग्रहणेन । नैवं शक्यमिति । दीर्घस्य दीर्घविधानमिति शेषः । कथं न शक्यमित्याह—दीर्घीति हि च्विनेत्यादि हि यस्मादर्थे च्विनेति चेयं विशेषण इति तृतीया, तेनायमर्थः दीर्घीत्ययं निर्देशश्च्विप्रत्ययेन यस्मात्तस्माद्दीर्घस्यैव दीर्घविधानमशक्यमेवं कर्तुम् । कथं पुनः च्विप्रत्ययनिर्देशे सत्यशक्यमेवं कर्तुमित्याह—तेन दीर्घो ह्रस्व इत्यादि । तेन च्विप्रत्ययनिर्देशेनाभूततद्भावार्थाभिधायकेन हेतुना अदीर्घो ह्रस्वो दीर्घादेशविधिं प्रति स्थानित्वेनाक्षिप्तो न तु दीर्घोऽपि । तत्कथं[3] दीर्घस्यैव परलोपसम्पादनाय दीर्घो भवेत् । च्विप्रत्ययेन चायं दीर्घीति निर्देशो न तु तदस्यास्तीति इन्प्रत्ययेन भवति ग्रहणानर्थक्यप्रसङ्गात् । च्विप्रत्ययस्य निर्देशे तु नानर्थकं भवति ग्रहणम् । असति हि तस्मिन् कृभ्वस्तियोगे स्मर्यमाणस्य च्वेरप्रवृत्तिप्रसङ्गात् । एवं च च्विप्रत्ययप्रभावाद् दीर्घस्य दीर्घत्वाप्रवृत्तेः ।

कुमारीयमित्यादौ पर सवर्णलोपो न भवेदिति[4] तत्सिद्धये समानग्रहणम् ॥ यद्येवम्, च्विप्रत्यय एव न निर्देष्टव्यः, प्रयोजनाभावात् । प्रत्युतनिर्देशे

---

१. दीर्घेन (वा०)
२. दीर्घो लोपश्च (?)
३. तत्केन प्रकारेण (मं०)
४. स्यादिति (वा०)

समानग्रहणं कर्तव्यं जायत इति पराभिप्रायमाशङ्क्य परिहर्तुमाह—च्विप्रत्यय-निर्देशस्तर्हि इत्यादि । तथेत्यनेन च्विप्रत्ययं प्रत्यवमृश्यते तथा तेन च्विप्रत्यय-प्रवृत्तिलक्षणेन प्रकारेण सूत्रे निर्देशस्य यत्करणं तद्[1] वैचित्र्यार्थम् । अर्थशब्दः प्रयोजनवाची । वैचित्र्यं वैचित्र्यता । च्विप्रत्ययनिर्देशस्य प्रयोजनं तच्च च्व्य-न्तशब्दविषयं विवक्षितं भवति । तेनैतदुक्तं भवति—च्विना निर्देश एतदर्थः क्रियते । दीर्घीभवतीत्यादिवच्छुक्लीभवतीत्यादीनामपि विचित्राणां च्व्यन्तानां शब्दानां साधुत्वं स्यात् । आचार्येण हि किञ्चित् साक्षात् लक्षणं प्रणीतं किञ्चिच्चैवंविधेन प्रकारेण सङ्गृहीतमिति च्विनिर्देशश्च्व्यन्तानां साधुत्वसं-सूचनार्थः कर्तव्यः । यद्येवम्, भवति योग एव तेषां साधुत्वं स्यात् । शुक्ली करोति, शुक्ली स्यादित्यादयस्त्वसाधव एव स्युः । अस्त्येतत् । भवतिस्तु धातुः क्रियासामान्यवाची धातूपलक्षणपरो विज्ञास्यते । तेन कृञस्तिभ्यामपि क्रिया-सामान्यवाचिभ्यां योगे च्विः भविष्यति । न च विद् सत्तायामित्यनेनापि योगे स्यादित्याशङ्कनीयम् । तद्योगे च्वेरभिधानाभावात् । अभिधानलक्षणाश्च कृत्तद्धितसमासाः । अभूततद्भावलक्षणस्तर्ह्यर्थः च्व्यन्तस्य दीर्घीत्यतो निर्देशात्[2] कथमवाप्य इति चेत्, न । शब्दैरर्थाभिधानस्य स्वाभाविकत्वात् । तथा च देवानाप्नोतीति वातमाप्नोतीति इत्येवं व्युत्पादितावपि देवापिवातापि-शब्दा-वसुरविशेषलक्षण एवार्थे वर्तेते, शब्दशक्तिस्वाभाव्यात् । तस्माच्च्विना निर्देश-श्च्व्यन्तानां साधुत्वद्योतनार्थः कृतः । तेन ह्रस्वस्यैव समानस्य दीर्घत्वविधाना-द्दीर्घाणां दीर्घाप्रवृत्तेः स्वभावदीर्घाल्लक्षणान्तरे वा कृतदीर्घात्परस्य समाना-त्परस्य सवर्णस्य लोपो न स्यात् । सः यथा स्यादिति समासग्रहणं क्रियते । ननु सवर्णे परे समानस्योत्तरैर्लक्षणवाक्यैरेत्वादीनि कार्याणि वक्ष्यन्ते, अतः पारिशेष्यात्सवर्ण एव दीर्घो विज्ञास्यत इति किं सवर्णग्रहणेन, उच्यते—निमित्त-शून्यमिदं दीर्घविधानं मा भूदिति सवर्णग्रहणम् । नन्वेवं च सति परश्च लोप-मित्येतत् कथं सङ्गच्छते । तत्राप्युच्यते—आमिप्रत्ययविधौ सः लोपवदन्वाचीय-मानोऽपि परलोपः यथा स्यादिति कैवास्यासङ्गतिः । अथ दण्डहस्त इत्यत्र दीर्घः कस्मान्न भवति । अस्ति ह्यत्र सावर्ण्यम्, अकारापेक्षया हकारस्य सावर्ण्यसद्भावात् । अकुहविसर्जनीया[3] कण्ठ्या इति स्थानसावर्ण्यात् । उच्यते—प्रत्यासत्तेस्तेषां द्वौ द्वावित्यनेन परस्य सवर्णव्यपदेशः तस्यात्र निमित्तभावः । न चैवं हकारस्येति न भवति तस्मिन्परे दीर्घः । न च न व्यञ्जन इति निषेध-

---

१. तद्वैचित्र्यम् (भं०)
२. निर्देशः (वा०)
३. अकुहविसर्जनीयानाम् (वा०)

स्यायं विषय इति वाच्यम् । अभिहितेन हेतुना दीर्घत्वस्य प्राप्त्यभावात्परग्रहणं समानस्यैव पक्षे लोपो मा भूदिति । शकन्ध्वादीनां पूर्वलोप[1] एव वक्तव्य इति एवकारो दीर्घव्यावृत्त्यर्थः । के पुनस्ते शकन्ध्वादयश्शब्दा इत्याह—येषां शब्दानामित्यादि । शिष्टप्रयोगानुसारेणेति न तु स्वमनीषिकयेत्यर्थः । शकन्धुरित्यादिशब्दः पचाद्यजन्तः । कुलशब्दः कुल-संस्त्यान इत्यस्य नाम्युपधत्वात्कप्रत्ययान्तः । अजा शब्दो जान्तः । त्रयोऽप्येते षष्ठी-समासाः । केशविषय एवेति सीमन्तशब्दः साधुरिति शेषः । अन्यत्रेति[2] केशविषयात् ।

अवर्ण इवर्णे ए १।२।२

इवर्णे इति सप्तमी कालभावयोरित्यनेन । एवमन्यत्राप्येवं प्रकारे विषये सप्तम्यनेनैव मन्तव्या । ए इत्यस्मात्स्वरूपेणार्थेनार्थवत्वादुत्पन्नस्य सेरादिलोप इत्यादिना लोपः । एवमुतरत्रापि । एवं च सर्वत्रेति । इवर्ण इत्यत्र निर्देशे उत्तरत्र चैवमेव कर्मधारयो बोद्धव्यः । परश्च लोपमित्येवेति । ननु परलोपग्रहणं प्राक्तनयोगे कृतकृत्यत्वादुपक्षीणसामर्थ्यं तत्कथमिहानुवर्तते, केनोक्तं तदनुवर्तत इति, किं तर्हि तत्सदृशं शब्दान्तरप्रयोगसंसिद्धये यदनुमीयते तदिहानुवर्तते । यथा च न च परलोप्य इत्याह—एवं सर्वशब्दानाम् अनुवृत्तावयमेव प्रकारः । अवर्ण अकाराकाराविति । स्वरस्सवर्णस्य ग्राहक इति वचनात् । तवेदमिति । युष्मद् जस्, तवममजसीति तवादेशः । सेयमिति । तद् सि त्यदाद्यत्वम्, तस्य च आप्रत्ययः । सूत्रे सन्धिर्न कृत इत्यादि । इवर्ण ये इति हि अयादेशलक्षणो सन्धौ कृते इवर्ण इति लुप्तसप्तमीकं पदं ये इत्येव रूपस्तु वमादेशोऽत्र इति कस्यचिन्मन्दमतेस्सन्देहः स्यात्, सः मा भूदिति सन्धिर्न कृतः । सूत्र इति च जातावेकवचनम्, तेन वक्ष्यमाणेष्वपि सूत्रेष्वेवमेव बोद्धव्यम् ।

उवर्णे[3] ओ १।२।३

अवर्णवत् ।

ऋवर्णे अर् १।२।४

ऋ चासौ वर्ण ऋवर्णः । अरो रेफस्य विसर्गो न कृतः, स्वरूपभङ्गभयात् । उवर्णमिति । ऋणशब्दो भित्तर्णवित्ताश्शकल इत्यत्र साधुः । सर्द्धिरिति । ऋधु

---

१. पर (भं०)
२. अन्यत्र हि (भं०)
३. न्यूनपाठः (वा०)

वृद्धौ, अर्द्धनमिति[1]। स्त्रियां क्तिः ऋणप्रवसनेत्यादि। ननु ऋणार्णमित्यादौ अरादेशे कृते ह्रस्वस्य दीर्घतेत्यनेन सिद्धो दीर्घः। नामधातुविषयेऽप्यकारः प्रवृत्त्यप्रवृत्ती तत्रैव क्वचिद्ग्रहणानुवृत्त्या अरो दीर्घविकल्पे कृते विज्ञास्येते। तत्किमरादेशविधानेन, नैतत्, तत्र ह्याकारो महतः कार्यं इत्यतः पदग्रहणस्यानुवृत्तेः। पदे परतः पूर्वपदस्य ह्रस्वान्तस्य दीर्घो विज्ञायते। तत्कथमरादेशे[2] कृते दीर्घस्स्यात्। ननु पूर्वपदेन ह्रस्वं विशेषयिष्यामः। पूर्वपदस्य यो ह्रस्व इति तथा च अनन्त्यस्यापि अरो अकारस्य दीर्घो भविष्यति। नैवं शक्यम्। एवं हि सति पूर्वपदस्य सम्बन्धिनो ह्रस्वस्य यत्र-तत्रस्थस्यापि दीर्घः स्यात्, ततो[3] ह्रस्वेनैव पूर्वपदं विशेष्यम्। तथा च पूर्वपदस्य ह्रस्वान्तस्येति विज्ञायमाने अरादेशस्य दीर्घो न सिध्यति। ननु दीर्घशब्देनाक्षिप्यमाणस्य ह्रस्वग्रहणस्य तत्रातिरिच्यमानत्वादनन्त्यस्याप्यरो ह्रस्वस्य दीर्घो भविष्यति, अस्त्येतत्, अतिप्रसङ्गस्तु स्यात्। क्वचिद् ग्रहणानुवृत्त्या न भविष्यति इति चेत्सोऽयं व्यक्तः। एवं लक्षणानुसारेण व्यवहरतामन्धकुक्कुटीन्याय इति वक्तव्यमेव ज्यायः। ऋणार्णमित्यादि। ऋणाधिकमृणम्, प्रकृष्टमेव ऋणम् वसनमेव ऋणम्, वत्सरमेव ऋणम्, कम्बलमेव ऋणम्, दशानामेव ऋणम् इति विग्रहः। शीतार्त इति। शीतशब्दे ख्यायतेः क्त प्रत्ययः। द्रवघनस्पर्शयोश्च्यः सम्प्रसारणम्, तद्दीर्घमन्त्यमिति दीर्घः ऋत[4] इत्यतो गत्यर्थाकर्मकेति क्तः, आधमर्ण्याभावाद् भित्तर्णवित्ताश्शकलाधमर्णभोगेष्विति नत्वाभावः। सुखार्त इति। सुखेश्चौरादिकाददन्तादिनि कृते पचादित्वादच्। उपसर्गावर्णस्येत्यादि। प्रादीनामुपसर्गाणां सम्बन्धिनो वर्णस्य धातुसम्बन्धिनि ऋकारे परे आरादेशो वक्तव्यः। प्रार्च्छतीति। ऋच्छेन्द्रियेत्यस्य रूपम्। नामधातौ[5] तु वेति नामलिङ्गविभक्त्यन्तमाहुः। नामभूत्वा यो धातुस्सम्वृत्तस्ते धातव इति वचनेन। तत्र नामधातौ य ऋकारस्तस्मिन्परे उपसर्गावर्णस्यारादेशो वा वक्तव्यः। पक्षे अरादेशः।

लृवर्णे अल् १।२।५

ऋकारल्कारयोस्सावर्ण्यादृकारस्येव लृकारस्याप्यात्वे कते आ चासौ वर्णश्चे ति लृवर्ण इत्येवं विग्रहः तवल्कारः।

---

१. तत्किमारादेशे कृते (वा०)
२. अवर्णमिति (वा०)
३. तेन (भं०)
४. इत्यत्रान्ते (वा०)
५. नाम्नो (भं०)

एकारे ऐ ऐकारे च १।२।६

खट्वैतिकायन इति । कस्यापत्यमिति कुञ्जादेरित्यायनण्, सप्तमी-तत्पुरुषः । तमैषेति । एतत् सि त्यदाद्यत्वम्, सो सः, आप् । प्रेलयति । इल् प्रेरणे चुरादित्वादिन्, गुणः । प्रैषः, प्रेष्य-इति । ऐष एष इत्येते इषेः घञि ध्यणि च, गुणे कृते सति रूपे । प्रैतीति । इण् गतौ । प्रैधत इति । एध वृद्धौ । कथं तर्हीत्यादि । ऐषैष्ययोः सम्बन्धिन्येकारे परे लोपो निषिद्धः । तत्कथं प्रैषः प्रेष्य इत्येते रूपे भवत इति प्रश्न ? ईष उञ्छे इत्येतस्येति द्वे रूपे भवत इति घञि ध्यणि च गुरूपधत्वाद् गुणाभावे सतीति विशेषः । स्वशब्दाकारस्येत्यादि । स्वशब्दस्य सम्बन्धिनोऽकारस्येरीरिन्नित्येतयोः परयोः ऐत्वं वक्तव्यम् । स्वैरमिति । ईर् गतौ भावे घञ्, स्वस्येरः स्वैरः, क्रियां काञ्चिदध्याहृत्य विशेषणत्वान्नपुंसकत्वम् । स्वैरीति । स्वमीरितुं शीलमस्या इति । नास्न्यजाताविति णिनिः । ननु स्वैरोऽस्यास्तीति सन्त्वादित्वादिनि कृते स्वैरीति भविष्यतीति किमीरिन् ग्रहणेन, अस्त्येतत्, स्वेन ईरते अवश्यमिति आवश्यकाधमर्ण्ययोर्णिनौ सति स्वैरीत्यपि[1] रूपं स्यादिति ईरिन्-ग्रहणम् ।

ओकारे औ औकारे च १।२।७

खट्वौपगव इति । उपगतो गावो यस्य स उपगुः । स्वरो ह्रस्व इति ह्रस्वः । उपगोरपत्यमित्यण् । उवर्णस्त्वौत्वमापाद्यः । सप्तमी तत्पुरुषः । औखतीति उख गत्यर्थः । उख उखीत्यत्र पठ्यते स्थूलौतुरिति । ओतुर्मार्जारः, कर्मधारयः । बिम्बौष्ठीति बहुव्रीहिः । अक्षौहिणीति । अक्षाणामूहोऽस्यास्तीति-न्प्रत्ययः । ऋन्नेभ्यस्त्वीति । प्रौह इति । ऊहेः भावे घञ्, प्रौढः प्रौढिरिति वहेरेकत्र निष्ठेति क्तः । अन्यत्र स्त्रियां क्तिः स्वपिवचीति सम्प्रसारणम् । होढः, घढधभेभ्य इति धत्वम्, तवर्गस्य षढेति धस्य ढः ढोढे लोप इति ढलोपः । उपधायाश्च दीर्घः ।

इवर्णोऽयमसवर्णेन च परो लोप्यः १।२।८

य इत्यस्मात्स्वरूपेणार्थेनार्थवतो विधीयमानत्वात्कर्मणि द्वितीया, लोपनीयो लोप्यः । शकिसहीति य-प्रत्ययः । व्यञ्जने पर इत्यादि । न व्यञ्जने स्वरा इति यत्वादेस्सन्धिकार्यस्य व्यञ्जने परे प्रतिषेधो वक्ष्यते । अतो हेतोः स्वर एव परे सामर्थ्याद् यत्वादिकार्यम् अत्र प्रकरणे विज्ञायते । दध्यत्रेति । दधि-

---

१. स्वैरीति (वा०)

शब्दे डुधाञः कि-प्रत्ययान्तः । नद्येषेति । नदतीति पचादित्वादच्, नदादित्वादीकारः । एषेति प्राग्वत् । नन्वसवर्णे परे वर्णान्तराणां वत्वादीनि सन्धिकार्याणि सन्तीति सामर्थ्यादिवर्णस्यैव यत्वमसवर्णे भविष्यतीति किमिव वर्णग्रहणेन, अस्त्येतत्, आन्तरतम्यात्तु तालव्यो यकारादेशः । तालव्यस्य चवर्गस्याप्याशङ्क्यते इति । ततश्च पचति यजतीत्यादावपि यत्वं स्यात् । तन्मा भूदेष दोष इतीवर्ण-ग्रहणम् । असवर्ण इति किम् ? इति इवर्णस्य सवर्णदीर्घविधानादसवर्ण एव यत्वं भविष्यतीति, तत्किमसवर्णग्रहणेनेति प्रश्नः । अथ मतम्, यत्र सवर्णेऽपि दीर्घत्वं न विहितं कुमारी इयं कुमारीयमित्यादौ । तत्र यत्वं माभूदिति, तन्न, यतो दीर्घविधौ समानग्रहणादत्र परसवर्णलोपे कृते न व्यञ्जन इति यत्वस्य निषेधो भविष्यति, तत्किमेतन्निवृत्त्यर्थेनासवर्णग्रहणेन । न च स्वरादेशत्वात् बलीयो यत्वं लोपात्पूर्वं प्राप्नुयादित्याशङ्कनीयम् । स्वरूपस्यादेशस्य स्वरादेशपरिभाषया लोपात्पूर्वं प्रवृत्तेः । तथा च यस्य इत्यादौ सि-लोपात्पूर्वं स्वररूपादेशस्तद्यकारं च प्रवर्तते । एवं च कृत्वा नामि व्यञ्जनान्तादिति आयेराकारे[1] लुप्ते स्वरवद् भावविधानमर्थवद् भवतीत्याह— दधीत्यादि । यत्वं प्रति निमित्तं वर्णमावेदयितुमसवर्णग्रहणं क्रियते अन्यथा तु निमित्तं विना यत्वं विधीयमानं दधीत्यादावपि प्रसज्येत । कथं पुनः सत्यवर्णग्रहणे वर्णस्य निमित्तभावश्शक्य आवेदयितुम् ? उच्यते—सवर्णादन्यस्मिन्वर्णे असवर्णे इत्येवं व्याख्यायमाने सति वर्णस्य निमित्तत्वेन परिग्रहात् । असवर्ण इति हि पर्युदासोऽयम् । पक्षान्तरे त्वभिहितेन न्यायेनापार्थकमसवर्णग्रहणं स्यात्, तस्मात् सवर्णादन्यस्मिन् वर्णे परे यत्वमिदमित्यसवर्णग्रहणाज्ज्ञायते । नन्वेतद् परलोप निषेधारम्भसामर्थ्यादेव विज्ञास्यते, नैतत्, अन्वाचीयमानोऽपि हि परलोपनिषेधः स्यात् । पर्युदासे च सवर्णादन्यो वर्णः समान एव न निमित्तम् । दीधीवीव्योरित्यसमानेऽपि ओकारे परे यत्वस्य दर्शनात् । न च विसर्गेऽपि वर्णे परे यत्वमाशङ्कनीयम् । इदुदग्निरिति इकारस्याविकृतस्य दर्शनात् । तस्माद्वर्णस्य यत्वं प्रतिनिमित्तत्वार्थमसवर्णग्रहणम् । अत एवासवर्णे पर इति वृत्तावुक्तम् । प्रसज्यप्रतिषेधे तु सवर्णे न भवतीति व्याख्यायमाने कीदृशमभावस्य परत्वं स्यात् । वर्णश्च स्वर स्वर एव न व्यञ्जनम् तत्र निषेधस्य वक्ष्यमाणत्वात् लोपप्राप्तेर्विषये पर एवेति परग्रहणं विस्पष्टार्थम् । तथा च लोप्यग्रहणमपि लोपस्यैव हि प्राप्तस्य निषेधो विज्ञास्यते न च पर इति कृते परस्यैवाशङ्क्येत, परलोपग्रहणानुवृत्त्यैव परस्याभावसिद्धेः । न च पर इत्यस्यानर्थक्यप्रसङ्गात् ।

---

१. आयिः (भं०)

वमुवर्णः १।२।९

असवर्णे पर इति । सवर्णादन्यस्मिन्स्वरे वर्णे पर इत्यर्थः । एवमुत्तरत्रापि व्याख्येयम् । वध्वाख्येति । आख्यानमाख्येति । ख्यातेराङ्पूर्वात् । आतश्चोपसर्ग इत्याङ्-प्रत्ययः । षष्ठीसमासः ।

ए अय् [1]**१।२।१०**

ए इत्यस्मादनुकार्येणार्थेनार्थवत्वात् सेरुत्पन्नस्यादिलोप इत्यादिना लोपः । अनुकार्यस्त्वत्र प्रयोगस्थ एकारः । एवमुत्तरत्रापि । अय् इत्यस्मात्स्वरूपेणार्थेनार्थवत्वात्प्रथमा । एवमुत्तरत्रापि । बुद्धय इति । बुधेः स्त्रियां क्तिः ।

ओ अव् १।२।११[2]

पक्षे गोऽग्रम्, गोऽजिनमित्येदोत्पर इत्यकार लोपः । इह तु नित्यमिष्यते इति । स च इष्यमाणो वा शब्दस्य व्यवस्थितविभाषाविज्ञानाल्लभ्यते । गवेन्द्रः गवाक्ष इति षष्ठी समासावेतौ ।

अयादीनां य-वलोपः पदान्ते न वा लोपे तु प्रकृतिः १।२।१२[3]

यश्च वश्च तौ यवौ, यवयोर्लोपः । अत्र यवयोरयादीनपेक्षमाणयोस्सापेक्षत्वादयुक्तार्थत्वे अपि समासो भवत्येव । यवयोः केवलयोरसम्भवात् सापेक्षत्वस्याव्यभिचारात् । एवंविधायां चापेक्षायां दृश्यते समासो यथा देवदत्तस्य गुरुकुलमित्यत्र गुरोः । न वेति निपातसमुदायो विकल्पार्थः, प्रतिषेधार्थोऽपि च दृश्यते । सः तु न गृह्यते प्रतिषेद्धव्याभावात् । लोप इति सप्तमीकालभावयोरित्यनेन । प्रकृतिशब्दोऽव्युत्पन्नः स्वभावार्थवृत्तिः । क आसते । (इह[4] लोपे सति सामान्येन यस्य कस्यचित्कार्यं प्राप्नोति तस्य प्रकृतिभावः, नत्वयादीनामेव सम्बन्धिनस्स्वरस्य । तेन कस्मा आसनमित्यादौ दीर्घात्परः लोपो भवतीति) किमो जस्, किं कः, जस्सर्व ईस् आसे अन्ते प्रत्ययः, आत्मने चानकारादिति न-लोपः, अयादेशः, अनेन य-लोपः । कस्मायिदमिति । किम्, ङे, किं कः, स्मै सर्वनाम्नः । इन्द इतीति । इन्दु शब्दस्य सम्बुद्धौ चेत्योत्वम् ।

---

१. १।२।१२ (दु० वृ०)
२. १।२।१४ (दु० वृ०)
३. १।२।१६ (दु० वृ०)
४. न्यूनपाठः (वा०)

भूतपूर्वं ह्रस्वमाश्रित्य ह्रस्वनदीति सि-लोपः । वक्ष्यति हि तत्र सम्बुद्धिग्रहणेऽनुवर्तमाने पुनः सि-ग्रहणं भूतपूर्वाभ्यामिकारोकाराभ्यां सिलोपप्रतिपत्त्यर्थमिति । असा इहेति । अदस्, सि, सावौ सिलोपश्चेत्यौत्वम् । सेश्च लोपः । सौ स इहेति इदमो रूपम् । गौर्यत्रेति । गौरशब्दोऽत्राव्युत्पन्नः । गौरादेरितीकार-प्रत्ययः । वर्णान्त्यपरिभाषया यवयोर्लोपे सिद्धे पदग्रहणमस्याः परिभाषायाः अनित्यत्वज्ञापनार्थम् । एतेन तत्रेदमिरिति इदमोऽन्त्यस्येत्वं न भवति । न वा शब्दो विकल्पवाच्यप्यस्तीति बोधयितुं वा ग्रहणमेव न कृतम् । ननु प्रकृतिग्रहणेनात्र सन्धिकार्यं निषिध्यते, तच्च यवयोर्लोपप्रवृत्तावेव प्राप्तः न त्वप्रवृत्ताविति यर्थाल्लोप एव सति प्रकृतिरिति विज्ञास्यते, तत्किं लोपग्रहणेन, असदेतत्, लोपाप्रवृत्तावपि परनयननिवृत्तिकारिणी प्रकृतिस्स्यादिति लोपग्रहणम् । तु-शब्दः प्रकृतिभावो नित्य एवेति विशेषद्योतनार्थः । नेति कर्तव्ये प्रकृतिग्रहणं वैचित्र्यार्थम् ।

एदोत्परः पदान्ते लोपमकारः १।२।१३[1]

पदान्ते यावेदोताविति । एतेन पदान्तग्रहणम् तत्पुरुषं उत्तरपदार्थप्रधाने लब्धाप्रधानभावयोरप्येदोतोरेव विशेषणम् न तु प्रधानस्याकारस्येति दर्शयति । अन्यथा हि नय भवेत्यादावपि गुणे कृतेऽकारलोपः प्रसज्येत । बहुत्वे स्त्रियां यतोऽपैतीत्यादयश्च निर्देशाः न सङ्गताः स्युः । अयवोर्बाधः इति । यस्मिन्प्राप्ते यो विधिरारभ्यते सः तस्य बाधको भवतीति । अग्नेऽत्र वायोऽत्रेति । अग्निवायु-शब्दयोः सम्बुद्धौ चेत्येत्वमोत्वञ्च । एदोदिति । तपरकरणमसन्देहार्थम् ।

नो अत्रेत्यादावकार-लोपाभावं प्रति पुनः पदान्तग्रहणं हेतुत्वेनोक्तम् । एतच्च ग्रन्थाधिक्यादर्थाधिक्यमेव लभ्यते । सन्धेरविवक्षणं वा अकारलोपाभावे हेतुरित्यपरे मन्यन्ते । तान् प्रति तु पदान्तग्रहणमिहैव पदान्ते विधिर्नोत्तरत्रेत्यवधारणार्थम् । तेन न व्यञ्जन इत्यस्य निषेधस्यापदान्तेऽपि प्रवृत्तेः । चितं स्तुतमित्यादौ यत्वबत्वे न भवतः । यवलोप इति । समासस्थं लोपग्रहणमिहाकृष्टं दुश्शकमिति पुनर्लोपग्रहणम् । कारवचनं तपरस्तत्कालस्य ग्राहकः । कारशब्दपरश्चेति तत्कालार्थं कृतम् । तेन वायो आयाहि वायवायाहीत्यादौ आकारस्य लोपो न भवति ।

---

१. १।२।१७ (दु० वृ०)

न व्यञ्जने स्वरास्सन्धेयाः १।२।१४[1]

सन्धेया इति। सम्पूर्वाद् धाञः सन्धातव्या इति स्वराद् यः, आत्खनोरीचेतीत्वं, गुणः। यत्वादयस्सामान्येनेत्यादि। आदिग्रहणेन वत्वरत्वादयो विधयः गृह्यन्ते। यत्वविधौ स्वरग्रहणस्यासत्वाद् यत्वादयो विधयः स्वरे व्यञ्जने च सामान्येन विहितास्ते स्वर इव व्यञ्जनेऽपि परे प्रसज्येरन्। मा प्रसाङ्क्षुरिति निषेधोऽयमारभ्यते। गौरीगृहमिति। गृहशब्दो गेहे त्वमिति ग्रहेरक् प्रत्ययान्तः। त्रयोऽप्येते षष्ठीसमासाः। यथाक्रमं यत्ववत्वरत्वानि निषिध्यन्ते। पित्रमित्यत्र रत्वमिष्यत इति स्वरग्रहणादिति शेषः। यत्वादिलक्षणो हि विधिस्स्वराणामेव प्राप्त इति त एव सन्धिनिषेधभाजो विज्ञास्यन्त इति स्वरग्रहणं क्वचित्सन्धिनिषेधस्यानित्यत्वे हेतुः सम्पद्यते। एवं गव्यूतावप्यवादेशः। अन्यत्रेत्यध्वपरिमाणात्। यूतिशब्दः साति हेति इत्यत्र साधुः। अथ सन्धेय-ग्रहणं किमर्थम्, यावता व्यञ्जने परे स्वराः यत्वादीनि न प्राप्नुवन्तीत्यर्थः विनापि सन्धेयग्रहणं विज्ञास्यते, अस्त्येतत्, संहिताविषये तु कार्याणि पाश्चात्यानीति प्रदर्शयितुं सन्धेयग्रहणम्। तेनाविवक्षणे संहितायाः सन्धिकार्यं न भवति। का पुनरियं संहिता। परो यः सन्निकर्षो वर्णानां वर्णशून्येन कालेनाव्यवधानं सा संहिता।

[2]भट्ट श्री उग्रभूतिकृते शिष्यहितान्यासे भट्टोत्सवलिखिते द्वितीयस्सन्धिपादः।

तृतीयः पादः

ओदन्ता अ इ उ आ निपाताः स्वरे प्रकृत्या १।३।१

नो इत्यादीनामेकदेशानुकरणमोकारः। उकारोऽसन्देहार्थः। निपतत्यन्त्येषु अर्था इति निपाताः। व्यञ्जनाच्चेति[3]। अधिकरणे घञ्। प्रकृतिशब्दोऽव्युत्पन्नः, ततः प्रकृत्यादित्वात्तृतीया। तथा अ इ उ आश्चेति। निपाता इत्यपेक्षते। नो इतीत्यादि। नो प्रभृतिभ्यः सेरव्ययाच्चेति लुक्, प्रकृतिभावादवादेशस्याभावः। अ अपेहीत्यादि। अत्रापि समानदीर्घस्य। अपेहीति। अपपूर्वादिणः हि, अन्विलुक्, हौ चेति गुणाभावः। इ इन्द्रं पश्येति। दृशिर् प्रेक्षणे,

---

१. १।२।१८ (दु० वृ०)
२. द्वितीयः पादः समाप्तः (पुष्पिका भं०)
३. व्यञ्जनान्ताच्चेति (भं०)

हि अन्विलुक्, दृशेः पश्यः, हेरकारादिति हि लोपः पूर्ववत्[1]। उ उत्तिष्ठेति। तिष्ठतिरुत्पूर्वः, स्थस्तिष्ठः, हि लोपः पूर्ववत्। आ एवं नु मन्यस इत्यादि। अत्रैवं न भवति। मन्यस इति। मन ज्ञाने, दिवादेर्यनः यद्येवम्, क्रियायोगे मर्यादाभिविधौ च य आकारस्तस्यापि प्रकृतिभावः कस्मान्न भवति। आ उष्णं ओष्णम्, आ इह एहि, आ उदकान्तात् ओदकान्तात्, आ आहिच्छत्राद् आहिच्छत्रादिति। उच्यते—द्विविधोऽस्ति आकारः, अङनुबन्धो ङनुबन्धश्चेति। तत्र आकारादिभिरनुबन्धैः साहचर्यादङनुबन्धस्यैवाकारस्य ग्रहणं न तु ङनुबन्धस्य। क्व पुनरयमङ्-अनुबन्धः? उच्यते—यत्र पूर्वप्रक्रान्तस्यार्थस्य अन्यथात्वद्योतनायाकारः प्रयुज्यते, यथा—आ एवं नु मन्यस इति। नैवं त्वं पूर्वमवमंस्थाः, सम्प्रति तु मन्यस इति। यत्रापि च स्मृतेः सूचकः आकारः प्रयुज्यते तत्रापि अङनुबन्धस्य यथा—आ एवं किल तत् इति। ईषदर्थादिषु वर्तमानो ङनुबन्ध इति, नासाविह गृह्यते, कुतः पुनरेष विशेषावसायो यदीषदाद्यर्थवृत्तिरयमाकारो ङनुबन्धोऽन्यत्राङनुबन्धः। अत्रोच्यते[2]—आङीषदर्थे, आङ्मर्यादाभिविध्योरिति च पूर्वाचार्यवचनादीषदर्थे मर्यादाभिविधौ च ङनुबन्धः। विना तेनेति मर्यादा। सह तेनेत्यभिविधिः। क्रियायोगे अपि ङनुबन्धविशिष्टस्यैव, आङि युद्ध इति ह्वयति क्रियायोगेऽपि ङनुबन्धविशिष्टस्य निर्देशात्। तस्मादीषदर्थादिवृत्तेराकारस्य ङनुबन्धकस्य न भवति प्रकृतिभावः। आकारोपादानञ्च स्वरस्सवर्णस्य ग्राहक इत्यस्यानित्यत्वज्ञापनार्थम्, नित्ये ह्यस्मिन्नकारेणाकारस्यापि ग्रहणादाकारं नोपाददीत। अनित्यत्वज्ञापनस्य तु[3] प्रयोजनं बबाधेत्यादावस्यैकव्यञ्जनमध्ये इत्येत्वाभ्यासलोपयोरभावः। पटाविहेति। पटुशब्दस्य सम्बुद्धौ चेत्यौत्वम्। ह्रस्वनदीति सि-लोपः। येनविधिस्तदन्तस्येत्यादि। येन विशेषणेन यत्किञ्चिद्विधीयते तत्तदन्तस्यात्मान्तस्य ग्राहकं दृष्टं, येन विधिस्तदन्तस्येति वचनात्। यथा इङभ्याञ्चेत्याकार आकारान्तस्य। इह च निपातानामोकारेण विशेषणभूतेन प्रकृतिभावलक्षणं कार्यं विधीयत इत्यतोऽकारान्तत्वे निपातविषये लब्धे सति यत्पुनरण्यन्तग्रहणं क्रियते तस्यैतत् प्रयोजनम्, ओदन्तविषय एवान्तत्वापत्तिर्यथा स्यात्। अकारादिनिपातविषये मा भूदिति परिभाषा-सामर्थ्याद्व्यन्तत्वावबोधः ओकारस्येवाकारादीनामपि विशेषाभावात् स्यात्। ततः च इति चेति, इति इह इतीह, ननु इदम् नन्वि-

---

१. न्यूनपाठः (भं०)
२. इत्यत्रोच्यते (वा०)
३. अनित्यत्वज्ञापनार्थस्य (वा०)

दम्, वा इति वेति । अत्राप्यकारादीनां [1]अनुवर्तिनां प्रकृतिभावो भवेत् तस्मादकारादीनामन्तत्वविज्ञानं मा भूत्, ओकारस्यैव यथा स्यादित्यन्तग्रहणम् । तेनेत्यादि । तेनान्तग्रहणेनेत्यर्थः । तदन्तानामिति । तेषां निपातानां येऽन्तावयवभूतास्तेषामित्यर्थः[2] । ननु अर्थवद्-ग्रहणपरिभाषया केवलानामेव सार्थकानामकारादीनां प्रकृतिभावो विज्ञास्यते न निपातानामन्तर्वर्तिनामनर्थकानामिति किमकारादीनामन्तत्वव्यावृत्त्यर्थेन [3]अन्तग्रहणेन, एवं तर्हि अस्या एवानित्यत्वज्ञापनार्थमिदमन्तग्रहणम् । तेनेन्हन्पूषार्यम्णेति दीर्घत्वव्यावृत्तिः । वाग्मिनावित्यादावनर्थकस्यापि ग्मिन्नवयवस्येनो भवति । यथा सार्थकस्य दण्डिनौ दण्डिन इत्यादौ । एवञ्चान्तर्भूतानामप्यकारादीनां प्रकृतिभावः स्यात् । सः मा भूदित्यन्तग्रहणम् । ओ अत्रेत्यत्र तु प्रकृतिभाव आद्यन्तवदेकस्मिन्निति वचनात् । स्वरग्रहणं विस्पष्टार्थमित्युक्तं तत् कथं यावता स्वर इत्यक्रियमाणे सति कुतो हेतोस्स्वरस्य निमित्तभावोऽवगम्यत इत्याह—स्वर एव सन्धिकार्यं प्राप्तमिति व्यञ्जने निषेधारम्भादित्यभिप्रायः । ननु यस्य कार्यस्य स्वरो निमित्तं तस्य प्रकृतिभावेन निवृत्तिर्यथा स्यादन्यस्य मा भूदित्येतत् प्रयोजनं स्वरग्रहणस्य कस्मान्न भवति, तथाहि दधि इ अस्मै ददाति, दधी अस्मै ददातीत्यत्रेकारस्य निपातत्वे कार्ये प्राप्नुतः परलोपः स्वरनिमित्तकं यत्वञ्च । ततः यदि स्वरग्रहणं न क्रियते तदा यथैव परस्वरनिमित्तकं यत्वमिकारस्य प्रकृतिभावान्न भवति, एवं परलोपोऽपि न स्यात् । तस्मात् एतदर्थं स्वरग्रहणं क्रियते, स्वरनिमित्तकस्य यत्वस्य प्रकृतिभावेन निवृत्तिर्यथा स्यात्, परलोपस्य मा भूदिति । नहि परलोपस्स्वरनिमित्तकः तेनासौ भवत्येव । तदेतेन प्रयोजनेन प्रयोजनवत् स्वरग्रहणं कथं विस्पष्टार्थं स्यात् । अस्त्येतत्, व्यवहारोपारूढं त्वेतन्न तथा प्रयोगजातमिति नोपन्यस्तम् । न सन्धेया इति । वर्तमाने प्रकृत्या वचनान्तरमपि क्वचिन्मानुवर्तेदिति ज्ञापनार्थम् । तेन द्वितीयातृतीयाभ्यां वेत्यतो वेत्युत्तरत्र न सम्बध्यते । टा प्रत्ययनिर्देशो विना कर्तृकरणाभ्यां क्वचित्तृतीया सम्भवः प्रदर्शनार्थः । तेन प्रकृत्या सुन्दर इत्यादयस्सिद्धाः ।

द्विर्वचनमनौ १।३।२

उच्यतेऽनेनेति वचनम् । करणे युट् द्वयोर्वचनम् द्विर्वचनम्, कर्मषष्ठ्यन्तस्य द्विशब्दस्य वचनशब्देन तत्पुरुषः । अनाविति लुप्तप्रथमैकवचनमिति । आदि-

१. अन्तर्वर्तिनाम् (वा०)
२. तेषां निपातानां येऽन्ते अवयवभूता अ इ उ आस्तेषामित्यर्थः (वा०)
३. अर्थः (भं०)

लोप इत्यादिना अनो यद् द्विर्वचनमिति । एतेन द्विर्वचनमनौ ग्रहणेन विशेषयन्ननाविति पर्युदासोऽयमिति सूचयति । यथा चैतत् तथा दर्शयिष्यते । अग्नी अत्रेत्यादि । अग्निशालाशब्दाभ्यां प्रथमाद्विर्वचनम् । पटुशब्दादानयनक्रियापेक्षया लब्धकर्मभावाद् द्वितीया द्विर्वचनम्, तस्यौकारः पूर्वमिति । शालेत्यत्र औरीम् । अत्रेत्येतददो रूपम् । आनयेति । हेरकारादिति हेर्लोपः । प्रकृतिभावाद् यथाक्रमं यत्ववत्वादय आदेशाः न भवन्ति । इह कस्मात्प्रकृतिर्न भवतीति प्रसज्यप्रतिषेधं मन्यमानस्यायं प्रश्नः । तत्र हि सर्वं द्विर्वचनं प्रकृत्यौकारस्तु न भवतीति सूत्रार्थः । एवञ्च देवयोरिदं वृक्षाभ्यामत्रेत्यत्रापि द्विर्वचनत्वादोस्भ्यामोरपि प्रकृतिभावः प्राप्नोति, तथा च रेफपरनयनेन स्याताम् । इतरः पर्युदासाश्रयणेन परिहरति, ब्रूमः इत्यादिना । अनाविति नायं प्रतिषेधमात्रप्रधानः प्रसज्यप्रतिषेधः, किं तर्हि सदृशवस्तुपरिग्राही पर्युदासः । तेन पर्युदासपक्षपरिग्रहणेन हेतुना यदौकारेण सदृशं द्विर्वचनं वर्णमात्रं स्यादिरूपं तस्य प्रकृतिभावः न तु अन्यस्यौकारेण विसदृशस्य स्यादेः । तद्देवयोः वृक्षाभ्यामित्यत्रापि यावेतावोस्भ्यामौ तावपि सदृशावौकारेणेति तयोरपि प्रकृतिभावः स्यादित्याह—न चौस्भ्यामौ तथा भूतावित्यादि । भूतशब्दो भू-प्राप्ताविति[1]त्यस्य चौरादिकस्य आधृषाद्वेति विकल्पितेऽन्नन्तस्य क्तप्रत्ययान्तः । यावेतावोस्भ्यामौ तौ तथात्वमौकारेण सादृश्येन प्राप्तौ वर्णसमुदायरूपत्वादनयोः । अत औकारे सदृशस्य द्विर्वचनस्य प्रकृतिभावविधानादोस्भ्यामोश्चौकारेण वैसादृश्याद् देवयोरिदमित्यादौ नास्ति प्रकृतिभावः । एतदेवार्थं वैधर्म्येण प्रतिपादयितुमाह—यदि त्वित्यादि । यदि पुनरयमनाविति निषेधमात्रप्रतिपादनपरः प्रसज्यप्रतिषेधस्यात् तदा सर्वस्य द्विर्वचनस्य सदृशस्य विसदृशस्याप्यौकारेण प्रकृतिर्भवतीति सूत्रार्थविज्ञानादोस्भ्यामोरपि सा प्रकृतिस्स्यात् न त्वेष प्रसज्यप्रतिषेधः । द्विर्वचनं प्रकृत्या भवत्यौकारस्तु न भवतीति वाक्यभेदप्रसङ्गात् । पर्युदासे त्वनयोः यद् द्विर्वचनं तत्प्रकृत्या भवतीति नास्ति वाक्यभेदप्रसङ्गः । एकवाक्यतायाञ्च सम्भवत्यामयुक्तः प्रतिपत्तृप्रतीतिगौरवकारी वाक्यभेद इति लाघवार्थमनाविति पर्युदास एवाश्रीयते । यद्येवमौकारेण सदृशस्य द्विर्वचनस्यासम्भवात् कस्यायं प्रकृतिभावो विधीयते इति सकोपस्यायं प्रश्नः ? किं पुनः तद् द्विर्वचनमित्यादि । इतरोऽपि विकृत्यवस्थां प्राप्तमौकारमेव प्रकृतिभावभाजं प्रदर्शयितुमाह—उच्यत इत्यादि । औरीमौकार पूर्वमिति च लक्षणद्वयेन य औकारस्यादेशः क्रियते तस्यास्ति औकारेण सादृश्यमिति सोऽस्य प्रकृतिभावस्य विषयः । ननु परश्च लोपमिति वचनेन लुप्तोऽसौ कथमिव तस्य विषयस्स्यादिति

१. धृषत्वेति (वा०) ।

पृच्छति । ननु तल्लुप्तमिति विकाररूपं यद् द्विर्वचनमित्यर्थः । अस्त्येतदित्यानोत्तरयति । पर निमित्तमाश्रित्य पूर्वस्मिन्स्थानिनि य आदेशः सञ्जातः सः पर एव ज्ञातव्यः । तथा च अग्नी पटू शाले इत्यादीनां ये ईदूदेतः परसवर्णनिमित्ताः ते द्विर्वचनरूपा इति लब्धो विषयः प्रकृतिभावस्य कृते वा परलोपे प्रत्ययलोपमाश्रयणेन द्विर्वचननिमित्तः प्रकृतिभावो विज्ञास्यते, वचनसामर्थ्याद्वा । ननु अहेतुरयमस्तीह द्विर्वचनस्य, दधिनी अत्रेत्यकृतपरलोपविषयः । सत्यम् । अस्ति, नन्वोकार एव केवलो द्विर्वचनग्रहणं प्रयोजयति । यद्यनाविति पर्युदासः किं द्विर्वचनग्रहणेन ? उच्यते—औकारसदृशस्य सन्ध्यक्षरमात्रस्य ते इह तयिहेत्यादौ प्रकृतिभावनिवृत्त्यर्थं द्विर्वचनग्रहणम् । यद्येवम्, अग्नी इत्याहेत्यादौ प्रकृतिभावं न प्राप्नोति, नहि एतद् द्विर्वचनम्, अनुकरणत्वात् । सत्यम् । प्रकृतिवदनुकरणं भवतीत्येवात्र सन्धिनिषेधो विज्ञास्यते । प्रकृतिरनुकरणस्य अनुकार्यम्[1] उच्यते । अयं तर्हि पर्युदासपरिग्रहे दोषः । पचेते अत्र, पचेथे -अत्रेत्यत्र आते आथे[2] (इत्येतयोः द्विर्वचनयो औकारेण सादृश्यात् प्रकृतिभावो न प्राप्नोति, भवत्ययं दोषः, यथा तु न दोषस्तथा आते आथे) इति चेत्यत्र वक्ष्यति – इह पर्युदासप्रसज्यप्रतिषेधयोर्यथाक्रमम् । अब्राह्मणमानय, अश्राद्धभोजीत्यादिकं विषयमुदाहरन्ति । तत्रोभयत्रापि नञ्समासश्रवणाद्विशेषो नावधार्यते को वा पर्युदासः को वा प्रसज्यप्रतिषेधः इति सन्दिहानः पृच्छति । अथ पर्युदासप्रसज्यप्रतिषेधयोः को भेद इति, ब्रूम इत्यादिना तयोः विशेषमाह – नञ् समासावुभयत्रापि तुल्यौ यत्र समासविधेः प्राधान्यं प्रतिषेधस्योपसर्जनोभावः । परपदेन च सह नञः सम्बन्धः सः पर्युदासः । यथा अब्राह्मणमानयेति । अत्र हि ब्राह्मणसदृशस्य क्षत्रियादेरानयनात् विधिः प्रधानम्, अप्रधानं तु प्रतिषेधो ब्राह्मणानयननिषेधस्य फलतः सम्पत्तेः । अतएव नञ् ब्राह्मणपदेन सम्बध्यते । तस्मादयं पर्युदासः । यत्र तु प्रतिषेधाभिधायिनो नञः प्राधान्यं क्रियापदेन सह तस्याभिसम्बन्धो विधेः त्वप्रधानभावः सः प्रसज्यप्रतिषेधः । यथा अश्राद्धभोजीति । अत्र हि श्राद्धं न भुङ्क्त इत्यर्थावगमान्नञ् क्रियापदेन सह सम्बध्यमानो भोजनविधिमप्रधानीकृत्य प्राधान्यमनुभवति । श्राद्धं तावन्न भुङ्क्ते वस्त्वन्तरं भुङ्क्ते मा वा भुङ्क्त इति नास्ति विधावत्र तात्पर्यम् । तेनेमं प्रसज्यप्रतिषेधमामनन्ति । यद्येवम्, नञोऽत्र क्रियया सम्बन्धादुत्तरपदेन सह सम्बन्धो नास्तीत्ययुक्तार्थत्वात्प्रसज्य-

१. अनुकरणम् (वा०)
२. न्यूनपाठः (मं०) ।
३. ब्राह्मणस्यानयन (वा०) ।

प्रतिषेधो समास एवानावित्येवं रूपो न सम्भवतीति कथं तत्पक्षाश्रयेणेह[1] कस्मात्प्रकृतिर्न भवतीत्युक्तम् । एवं मन्यते, अकर्तरि च कारक इति कारक-ग्रहणाज्ज्ञापकात्प्रसज्यप्रतिषेधेऽप्यस्ति समासः । एतच्च तत्रैव[2] वक्ष्यामः ।

बहुवचनममी १।३।३

वचनशब्दः करणसाधनः । बहूनामर्थानां वचनं बहुवचनम् । अमीति । अदः शब्दस्य बह्वर्थवृत्तेः[3] यः प्रयोगः तस्यामीत्येतदनुक्रियते । अमीति लुप्तप्रथमैक-वचनमिति पूर्ववदमीत्येतद् बहुवचनमिति बह्वर्थाभिधायकमित्यर्थः । अमी आदित्या इति । अदितेरपत्यानीति ण्य[4]-प्रत्ययः । आदि वृद्धिः । अम्यत्रेति । ननु अत्रेनो न लोपस्यालुप्तवद्भावात् स्वरो न परभूत इति यत्वं न प्राप्नोति, नैतत्, सन्धिकार्ये कर्तव्ये नास्त्यलुप्तवद्भावः[5] स्वामीश्वरेति समानदीर्घ-श्रवणात् ।

अनुपदिष्टाश्च १।३।४

दिश् अतिसर्जने, उपपूर्वः, उपदिश्यतेस्मेति निष्ठेति क्तः । हशोश्चेति षत्वम्, तवर्गस्य षटेति टः, नञ्-समासः, पूर्वं तत्र ग्रहणादधिकृते वर्णसमा-म्नाये येऽनुच्चारितास्तेऽनुपदिष्टा इत्युच्यन्ते । यद्येवम्, का तेषां सन्धिकार्य-प्राप्तिरित्याशङ्क्याह—अनुपदिष्टाः साक्षान्नोक्ताः इति व्यक्तिद्वारेणोप-देशाभावेऽपि जातिद्वारेण तेषां सङ्ग्रहात् स्वरस्सवर्णस्य ग्राहक इति वचने-नास्ति सन्धिकार्यप्राप्तिरिति वचनम् । के पुनः तेनोक्ताः इत्याह—प्लुता इति । मात्रात्रयपरिमाणवर्णाः प्लुता उच्यन्ते । का पुनः मात्रा, यावता काले-नाक्षणोरुन्मेषनिमेषौ भवतः तावता कालेनोच्चारणक्रिया मात्रा । देवदत्त३ इह इत्यादि प्लुतस्य प्रकृतिभावाद् यथाक्रममेत्वमोत्वं च न भवतः । सम्बुद्धावोद-न्तस्येत्यादि । सम्बुद्धिनिमित्त ओकारोऽन्तो यस्य तस्य प्रकृतिभाव इतिशब्दपरे वा वक्तव्यः । एतच्च प्लुतग्रहणे कर्तव्ये यदनुपदिष्टग्रहणं कृतं ततो लभ्यते । अनुपदिष्टा हि ते उच्यन्ते य इह प्रकरणे प्रकृतिभाङ्क्त्वेन न कथिताः । भानो

---

१. तत्पक्षाश्रयणेनेह (ए)
२. तत्र (भं०)
३. बहुत्व (भं०)
४. यण् (भं०)
५. नास्य (वा०)

इतीत्यादि भानुशब्दस्य सम्बुद्धौ चेत्योत्वम्, ह्रस्वनदीति सिलोपः। गवित्यय-माह इति गोशब्दस्य डो प्रत्ययान्तत्वात्। तेन प्रकृतिभावस्याभावादवादेशः। अत्र चानुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् अनुकार्येणार्थेनार्थवत्वस्यास-त्वाद्[1] असत्यां लिङ्गसंज्ञायां गोशब्दाद्विभक्त्यभावः। समानसंज्ञकस्य ऋकारे परे चेति प्रकृतिर्वा वक्तव्येति सम्बध्यते। देव ऋषिरित्यत्र कर्मधारयः। माला ऋषिरित्ययं तु मालाहस्त ऋषिः मालर्षिरिति मध्यपदलोपि कर्मधारयः। प्रकृतिभावपक्षे ऋवर्णे अरित्यरादेशः।

भट्टोग्रभूति[2] कृते शिष्यहितान्यासे शिष्यालोकाभिधाने तृतीयस्सन्धिपादः।

चतुर्थपादः

वर्गप्रथमाः पदान्ताः स्वरघोषवत्सु तृतीयान् १।४।१

पदान्तवृत्तयो वर्गप्रथमाः तृतीयानापद्यन्ते। तत्र स्ववर्गापरवर्गाद् वेति सन्देह-मपाकर्तुमाह--स्ववर्गादिति। प्रत्यासत्तेरित्यत्रैव हेतुः। एतच्च स्थाने अन्तरतम इति परिभाषया लभ्यते। कण्ठस्थानस्य हि प्रथमस्य तादृश एव कण्ठस्थाने-ऽन्तरतमस्तृतीयो भवति। एवं तालुस्थानस्यापि तालुस्थानत इत्ययं क्रमस्सर्वत्र बोद्धव्यः। वागत्रेति। वाच् इत्यस्य चवर्गस्य दृग्रिति गत्वम्। वा विराम इति प्रथमः ततो अत्र शब्दे परे तृतीयोऽनेन गः। नन्वयं प्रथमो लाक्षणिक इति कथमस्य तृतीयस्स्यात्। वक्तीति वाक् शक्नोतीति शक्, क्विप्, शगत्रेत्यादा-वेव तृतीयः स्यात् यत्र प्रतिपदोक्तः प्रथमः। अस्त्येतत्। अनित्या तु लक्षण-प्रतिपदोक्तपरिभाषा नेहाश्रीयते, अनित्यत्वं चास्याः स्थादोश्चेति स्थादोर्लाक्ष-णिकस्य नामिनो गुण प्रतिषेधादवसीयते। षडानयेति, षष् शस् कतेश्च जस्शसोर्लुक्, हशषेति डः, तस्य प्रथमे कृते तृतीयोऽनेन डः। आनयेति। (हेर्व-कारात्[3] हन्तेः हिलोपः) त्रिष्टुबियमिति। ष्टुभुस्तम्भेस्त्रीणि। स्तोभत इति क्विप्। वाग्गतिरिति। गमनं गतिः इति स्त्रियां क्तिः, पञ्चमोपधेति दीर्घः। वनतितनोत्यादीनि पञ्चमलोपः, अश्चातः[4] इति आकारस्य अकारः, षड्

१. अनुकार्येणार्थेनार्थवत्वात् (वा०)
२. तृतीयः पादः (पुष्पिका भं०)
३. न्यूनपाठः (भं०)
४. अतश्चातः (भं०)

गच्छन्ति इति षषो जसः पूर्ववल्लुक्। तद्गमनमिति गमेर्भावे युट्, भिन्ने पदे षष्ठीसमासो वा। त्रिष्टुब्गायत्रीति। त्रिष्टुप् सहिता गायत्रीति कर्मधारयः। भवानाहेति। भवन्त्, सि, अत्वसन्तस्येति दीर्घः, आहेति, ब्रूञ् व्याख्याने, अदादिः, ब्रुवः पञ्चानामादित इति ति प्रत्ययः स्यात् ब्रुवश्च आह[1] आदेशः। प्रथमव्यपदेशो वर्गविषय एवेति प्रथमशब्दश्रवणाद् एव वर्गग्रहणे लब्धे पुनर्वर्गग्रहणं संज्ञापूर्वकत्वेन क्वचित्तृतीयस्थाप्यनित्यत्वज्ञापनार्थम्। तेन मरुदस्यास्तीति, विद्युदस्यास्तीति कृते वन्तुप्रत्यये मरुत्वान्, विद्युत्वान् इत्यन्तर्वर्तिनीं विभक्तिमाश्रित्य प्रत्ययलक्षणेन पदान्तवृत्तिरपि वर्गप्रथमस्तृतीयादेशं न प्रतिपद्यते। विद्युत्वानिति। विपूर्वाद् द्युतेर्विद्योतनशीलेति। क्विब्भ्राजीति क्विप्। वाक्पुनातीति पूञ् पवने। ष्वादीनां ह्रस्वः।

पञ्चमे पञ्चमांस्तृतीयान्त वा १।४।२

पञ्चानां पूरण इति, संख्यायाः डमाविति म प्रत्ययः। तृतीयान्वेति। समुच्चये वा शब्दः। यदि तु विकल्पे स्यात्ततः पञ्चमतृतीययोरभावपक्षे प्रथमोऽपि श्रूयेत। न वा ग्रहणं च विकल्पाभिधायकमुत्तरत्रापार्थकं स्यात्। वाङ्मधुर इति, तृतीयासमासः। षण्नयनम्। तन्नीति षष्ठीसमासः। त्रिष्टुब्मिनोतीति, डुमिञ् प्रक्षेपणे, अथ पञ्चमे तंवेति कस्मान्न क्रियते, तंवेति च वचनेन पञ्चमादेशे विकल्पिते सति घोषवति पञ्चमे परे पक्षे प्रथमस्य पूर्वसूत्रेण तृतीय आदेशः सिद्ध इति किमर्थं गुरुसूत्रं क्रियते, तंवेति कृते तकारो वर्णः पाक्षिकः आदेशः स्यादिति चेत्, न। भविष्यति तत्प्राङ्नाम चेति निर्देशादित्याह—पञ्चमं तंवेत्यादि सुबोधम्।

वर्गप्रथमेभ्यः शकारः स्वरयवरपरच्छकारं न वा १।४।३

स्वरयवराः परे यस्माच्छकारादिति विग्रह इत्येतेन स्वरयवरपरा इत्ययं पञ्चम्यर्थे बहुव्रीहिरिति दर्शयति। स्वरयवरेभ्यः पर इति पञ्चमीतत्पुरुषस्तु न विज्ञायते, एवं हि विज्ञायमाने सति शकारं प्रति स्वरयवराणामवधित्वं प्रतिपादितं स्यात्, तच्च नेष्टम्। वर्गप्रथमेभ्यः परे ये स्वरयवरास्तेभ्य परो यश्शकार इति व्याख्यायते। एवमपि स्वरयवरान्प्रति वर्गप्रथमानामवधित्वं न सम्भवति। तेषु परेषु वर्गप्रथमानां तृतीयादेशस्य विहितत्वादविद्यमानत्वात्

---

१. आहिरादेशः (भं०) आहि आदेशः (वा०)

(अथ[1] भूतपूर्वगत्या वर्गप्रथमानामवधित्वं भविष्यतीत्याशङ्क्याह—) न च सर्वेभ्यः स्वरयवरेभ्यः परश्शकारो दृश्यत इति नायं तत्पुरुषः। वाक्छूर इति शूरवीर विक्रान्तौ चुरादित्वादिन्। अच्, कारितलोपः, तृतीयासमासः। षट्-छ्यामेति। बहुव्रीहिः। तच्छ्वेतमिति। श्विता वर्णे अजन्तः, भिन्ने पदे षष्ठी-समासो वा। त्रिष्टुब्छ्यूयत इति श्रु गतौ यण्[2] नाम्यन्तानां यणायीति दीर्घः। प्रत्यङ्छेते इति अञ्चु गतौ, प्रतिपूर्वः, प्रत्यञ्चतीति क्विप्। अनिदनुबन्धाना-मिति अनुषङ्गलोपः नास्ति, तद्विधौ जिघ्रतेर्वेत्यतो वेत्यस्याभिसम्बध्यमानस्य व्यवस्थितविभाषावाचित्वात् संयोगान्तलोपस्तावन्न भवति। उदङ्ङिति निर्देशाच्चवर्गदृगादीनाञ्चेति गत्वम्। वर्ग्ये वर्गान्तः संयोगान्तलोपः। शेते इति। शीङस्सार्वधातुक—इति गुणः वर्गप्रथमग्रहणं विस्पष्टार्थमिति प्राक्त-नस्य वर्गप्रथमग्रहणस्यार्थवशाद्विभक्तिविपरिणाम इति पञ्चमीविपरिणामे सति मन्दमतीनाम् अवैस्पष्ट्यं[3] स्यादित्यभिप्रायः। लानुनासिक इत्यादि। लकारपरस्यानुनासिकपरस्य च शकारस्य छत्वं विकल्पेनेष्यते। वेत्यनुवर्तमाने पुनर्वाग्रहणं विषयान्तरेऽपि विकल्पं सूचयति। ननु समुच्चयाभिधायी पूर्वो वा शब्दः कथमिहाभिसम्बध्यमानः वैकल्पमभिलप्स्यात्[4]। भवेतेतदेवं यदि पूर्वो वा शब्दोऽत्राभिसम्बध्येत, नत्वसावभिसम्बध्यते। तस्य पूर्वत्रैव कृतकृत्यत्वात्। तत् सदृशं वस्त्वन्तरं यदनुमीयते तदनुमीयमाने येन विकल्पाभिधायकेन रूपेणेह सम्बन्धमुपयाति तेनैव सम्बत्स्यते[5]। तच्छ्लाघ्यमिति। श्लाघ्यकत्थने, श्लाघ-नीयमिति ध्यण्, छत्वाभावपक्षे चंश इति तकारस्य चत्वम्। स्वरयवरेष्विति न कृतं वैचित्र्यार्थम्। ननु चंश इति सूत्रारम्भात् विकल्पः लब्ध इति किं नवा-ग्रहणेन, नित्ये ह्यस्मिंश्छत्वे तच्छ्लाघ्यमित्यादि पररूपे प्रथमे च कृते सिद्ध-मेवेति चंश इति सूत्रमनारम्भणीयं स्यात्, अस्त्येतत्, सूत्रकारमते तु लानु-नासिकपरस्य शकारस्य छत्वं नास्तीति तत्र चंश इत्येतत् वचनमर्थवत्स्यात्। स्वरयवरपरस्य तु नित्यं छत्वं प्राप्नुयात्। तन्मा भूदेष[6] दोष इति पुनः नवा ग्रहणम्।

---

१. न्यूनपाठः (वा०)
२. न्यूनपाठः (वा०)
३. अवैस्पष्ट्यार्थम् (वा०)
४. वैकल्पमभिदध्यात् (मं०)
५. सम्बध्यते (वा०)
६. भूदेव (वा०)

तेभ्य एव हकारः पूर्वचतुर्थं न वा १।४।४

चतुर्णां पूर्ण इति संख्यायाः पूरण इति डः, अन्तस्थो डेर्षो इति थकारागमः। चतुरो[1] वा शब्दस्योत्वम्। ततः षष्ठीसमासः। वाग्घीन इति। ओहाक् त्यागे। हीयते स्मेति निष्ठेति क्तः, दामागायतीतीत्वम्, ल्वाद्योदनुबन्धाच्चेति निष्ठानत्वम्। तृतीयासमासः। तद्धितमिति। हि गतौ वृद्धौ च, क्तः, अथवा दधातेर्हिः, तेभ्यो हितं तद्धितमिति चतुर्थी समासः, चतुर्थी तु हितयोगे चेत्यनेन वक्ष्यमाणेन वचनेन। त्रिष्टुब्भुतमिति जुहोतेः क्त-प्रत्ययः। तृतीयासमासः इति। प्रत्यङ् हसति इति। हसे हासे एकारः। सिचि दीर्घप्रतिषेधार्थः। वर्गप्रथमेभ्य इति वर्तमाने तेभ्यः ग्रहणं स्वरयवरपर इत्यस्य निवृत्त्यर्थम्। तेनेहापि भवति। वाग्ल्हादयति वाग्ह्लादयति। एव शब्दोऽत्र समुच्चये निपातानामनेकार्थत्वात्। पुनः न वा ग्रहणमिहैव विकल्पेनोत्तरत्रेत्यवधारणार्थम्।

परूपं तकारो लचटवर्गेषु १।४।५

रूप रूपक्रियायाम्। चुरादित्वादिन्। रूप्यत इति रूपम्। स्वरवृदृ इत्यल्, षष्ठीसमासः। चवर्गे तवर्गे च परतः इत्येतेन वर्गग्रहणं चकारेणापि सम्बध्यते इति दर्शयति। एतच्च लकारात् पूर्वं चकारस्य पाठाल्लभ्यते। तल्लुनातीति प्वादीनां ह्रस्व इति लूओ ह्रस्वः। तच्छादयतीति, छदिः, चुरादित्वादिनन्तः। तज्जुषतीति[2] जुष हिंसायाम्, कष शिष इत्यत्र पठ्यते। उड्डीनः, इति डीङ् गतौ, उत्पूर्वः, उड्डयते, गत्यर्थाकर्मकेति क्तः, ल्वाद्योदनुबन्धानामिति नत्वम्। डीङ् ओदनुबन्धत्वं स्वादय ओदित इति गणसूत्रेण पदान्ते धुडामिति तदो दस्य तत्वं तस्यानेन परूपम्। तन्नकार इति षष्ठी समासः। एवं तज्जकार[3] इत्ययमपि तानिति कर्तव्ये परूपग्रहणं व्युत्क्रमशङ्कानिवृत्त्यर्थम्।

चंशे १।४।६

यत्र पक्ष इत्यादिना सूत्रारम्भस्य प्रयोजनमाह—लानुनासिकपरस्यापि शकारस्य वा छत्वमिष्यत इत्युक्तम्, तन्न, छत्वाभावपक्षे सफलमिदं वचनम्, शकारस्य श्रूयमाणत्वात्। छत्वसत्तापक्षे तु न सफलमित्यत्र कारणमाह—छत्वपक्षे हीत्यादि पररूपे कृते इति पूर्वसूत्रेण प्रयोगाणामिति कृत्वचत्वानाम्।

---

१. चतुर्वा (वा०)
२. तज्खषति (वा०)
३. तण्णकारः (वा०)

ङणनाः ह्रस्वोपधाः स्वरे द्विः १।४।७

डुधञ् उपपूर्वादुपधीयत इत्यातश्चोपसर्गा इत्यङ्, द्विर्भावः विधीयमानः ङणनाविधिभाज इत्येवमवयवार्थो मन्तव्यः। उदङ्ङत्रेति। उदङ्ङिति प्रत्यङ्ङित्यनेन तुल्यम्। सुगण्णाहेति। शोभनं गणयतीति गणेः अदन्तात् सुपूर्वात् चुरादीन्नन्तात्, क्विप् कारितलोपः। आहेति ब्रूञो रूपम्। पचन्निहेति, पचन्निति शन्तृङ्। पूषणाविति। घुटि चासम्बुद्धाविति दीर्घोऽत्र न भवति, इन्हन्पूषेति नियमात्। परमदण्डिनावित्यादौ तूत्तरपदस्य तत्स्था लोप्या इति लुप्तविभक्तेरप्युपलब्धिग्रहणाल्लब्धव्यपदेशस्य नकारो द्वित्वं न प्रतिपद्यते, भावकर्मणोरिति नकारस्य द्वित्वाकरणात्। ननु ह्रस्वादिति क्रियताम्, एतच्च ङणनामवधित्वेन[1] विशेषणं विज्ञास्यते, ह्रस्वात् परे ये ङणना इति तत्किमुपधाग्रहणेन, अस्त्येतत्, संज्ञापूर्वकत्वेन द्वित्वस्य नित्यार्थमुपधाग्रहणम्। तेन सणनिट इत्यादयो निर्देशाः। सुगण् गत इति। गच्छति स्म, गत्यर्थाकर्मकेति क्तः।

नोऽन्तश्चछयोः शकारमनुस्वारपूर्वम् १।४।८

अनुस्वारपूर्वं शकारमापद्यत इति। एतेनानुस्वारपूर्वमिति विशेषणोऽन्यथानुपपत्त्यानेनैव व्याख्यानेनाकारात्पूर्वमनुस्वारो विधीयत इति दर्शयति। अन्यथा ह्यनुस्वारपूर्वमिति शकारस्य विशेषणं दुर्योज्यं स्यात्। सिद्धं हि सर्वत्र विशेषणमुपादीयते न तु सिद्धं भवांश्चिनोतीत्यादि-उदाहरणेनैवं प्रकारेण निवृत्तमत्र ह्रस्वोपधाग्रहणमिति सूचयतीत्येतच्च पदान्त इत्यनुवर्तमाने पुनरन्तग्रहणाल्लभ्यते। प्रशाञ्चिनोति, प्रशाञ्चरतीति शसिः पूर्वः प्रशास्यतीति क्विप्। पञ्चमोपध[2] इति दीर्घः। मोनो धातोरिति मस्य नः, एवम् उत्तर सूत्रयोरपि[3] इति प्रशान् शब्दस्य नेष्यत इति सम्बन्धः।

तथयोः सकारम्[4] १।४।९

भवांस्थुडति, थुडसम्वरणे, तुदादेरनीत्यगुणत्वम्। अथ त्वन्तनोषि इत्यादौ नकारस्य सत्वं कस्मान्न भवति, न भवति, अपदान्तत्वात्। पदान्तो हि स उच्यते यः[5] पदस्यावग्रहकाले श्रूयते यथा भवांस्तनोतीत्यत्र भवान् इति नकारः।

---

१. द्वित्वेण (वा०)
२. न्यूनपाठः (वा०)
३. उत्तरत्र (भं०)
४. १।४।१० (दु० वृ०)
५. पदान्तस्य (भं०), इत्यत्रैव अवग्रह इत्यस्यार्थः उच्चारण इति कृतम् (भं०)

न चैषः प्रकारः त्वन्तनोषीत्यत्र भवति, संहिताविषय एव नकारस्य श्रूयमाण-त्वादिति न भवति सत्वम् ।

ले लम् १।४।१०[1]

अनुस्वारपूर्वमिति लकारस्य विशेषणमिह न सम्बध्यते यतस्सानुनासिको-ऽयं लकारः स्मर्यते तदुक्तं सन्ति हि यणस्सानुनासिकाः निरनुनासिकाश्चेति यणोऽन्तस्था उच्यन्ते । अतएव वृत्तौ भवाँल्लुनातीत्यत्रार्धचन्द्राकृतिरनुनासिक उदाहृतः ।

जभ्ञनशकारेषु अकारम् १।४।११[2]

महाञ्जयतीत्यादि । महन्त् सि, सान्तमहतोरिति दीर्घः । ननु महा-ञ्जयतीत्यादीनि त्रीणि रूपाणि, तवर्गचटवर्गेति चवर्गादेशविधानेनैव सिद्धानि तदपार्थकं जभ्ञनेषु अकारादेशविधानम् । अस्त्येतत्, इदमेव तु[3] तेष्वादेश-विधानं ज्ञापयत्यपदान्ते सः विधिर्न तु पदान्त इति ।

शिञ्चौ वा १।४।१२[4]

ञ्चाविति द्वितीया द्विर्वचनान्तम् । समुच्चये वाशब्दो इति न तु विकल्पे, कुतः, विकल्पे हि सति आदेशाभावपक्षे अकारोऽप्यभ्यनुज्ञायेत, न च पूर्वेण तस्य अकारादेशविधानादभ्यनुज्ञानं न भविष्यतीति शक्यं वक्तुम् । एवं हि सति वाग्रहणमनर्थकं स्यात् । ञ्चकारअकारयोः उभयोः[5] विधानसामर्थ्यादादेशद्वयस्य लब्धत्वात् । महाञ्छूर इति कृते[6] शादेशे सामान्यव्यञ्जननिमित्तकं चवर्ग-दृगिति गत्वं प्राप्नोति, तन्न भवति, चकारोच्चारणसामर्थ्यात् । ननु ञ्चाविति द्विर्वचननिर्देशेनादेशद्वयप्रतिपत्तौ सत्यां प्रत्येकं अकारचकारावादेशावुदाहर्तुं युक्तः, तत्कथं ञ्च इति समुदायरूप आदेश उदाहृत इत्याह—ञ्च इति समु-दायादेश इति द्वित्वनिर्देशात्कथं समुदायादेशपक्षो युक्त इत्याह—यदि पुनरि-त्यादि । आदेशद्वये हि व्याख्यायमाने अकारादेशविधानं पूर्वेणासिद्धत्वात्पुनर-

---

१. १।४।११ (दु० वृ०)
२. १।४।१२ (दु० वृ०)
३. न्यूनपाठः (वा०)
४. १।४।१३ (दु०वृ०)
५. न्यूनपाठः (भं०)
६. न्यूनपाठः (वा०)

पार्थकं स्यादित्येके । एवमयमादेशः किमर्थः तर्हि द्विर्वचननिर्देश इत्याह—द्विर्वचननिर्देशः वैचित्र्यार्थ इत्यवयवद्वित्वापेक्षया द्विर्वचनेनायं विचित्रो निर्देशः कृत इत्यर्थः । अन्ये त्वादेशादित्वापेक्षयैव द्विर्वचनेन निर्देशं व्याचक्षते । तथाहि ञ्च ञ्च इति द्वाविमावादेशौ तत्र वा शब्दस्य विकल्पार्थत्वाशङ्कायां ञ्चादेशस्य प्रवृत्तिपक्षे यन्नकारस्य स्थाननिनोऽभ्यनुज्ञानमायातं तद् द्वितीयेनादेशेन प्रवृत्तेन सता निवृत्त्यर्थ[1] इत्यर्थः । तत्समुच्चयाभिधायी वा शब्दोऽत्र सम्पद्यते[2] । एवं चादेशविषयत्वेन पुनः प्रवृत्तिरूपं यद्वैचित्र्यं तदस्य द्विर्वचननिर्देशस्य प्रयोजनं जायते । यद्येवम्, विकल्पानभिधायी चशब्द एव कस्मान्न कृतः, किं वा ग्रहणेन, उच्यते—निपातानामनेकार्थत्वं प्रदर्शयितुमेव न कृतम् ।

डढणपरस्तु णकारम्[3] १।४।१३

ननु डढणाः परे यस्मात् इत्ययमर्थो डढणेष्विति सप्तम्यैव लब्ध इति डढणेष्विति कस्मान्न कृतम्, किं परग्रहणेनेत्याह—डढणेष्वित्यादि । ननु डढणेभ्यः पर इत्यस्यापि समाससङ्ग्रहार्थं परग्रहणं स्यात् तथा च षण्णामित्यत्र षडो णो नेति डस्य णत्वे कृते सत्यागमनकारस्य णकारः परस्यानेन[4] सिद्धं भवति । नैतत् । तत्र तवर्गचदेति टवर्गादेशविधानेनैव तस्य सिद्धत्वात् । तु शब्दः समुच्चयार्थः । अथ वा शब्दस्य निवृत्त्यर्थः कस्मान्न भवति, शक्नोति हि न विशेषप्रतिपत्तिकारी तु शब्दो वा शब्दं निवर्तयितुम् । असदेतत् । अवर्तमानेऽपि वा शब्दे समुच्चयार्थे दोषाभावात् । न चानुवृत्तिमात्राद्विकल्पं वा शब्दः प्रतिपादयति[5] येन तन्निवृत्तये तु शब्दोऽयमिति व्याख्यायते[6] ।

मोऽनुस्वारं व्यञ्जने १।४।१४[7]

सम्राडित्यत्र वेर्लोपो अपृक्तस्येति क्विपि, लुप्तेऽपि प्रत्ययलक्षणेन क्विवन्तता वेदितव्या । संराजितेति तृच् ।

---

१. निवर्त्यते (भं०)
२. समुच्यते (वा०)
३. १.४।१४ (दु०वृ०)
४. परस्याणेन (भं०)
५. समुच्चयार्थे वा शब्दे (वा०)
६. व्याख्यायेत (भं०)
७. १।४।१५ (दु०वृ०)

वर्ग्ये तद्वर्गपञ्चमं वा[1] १।४।१५

मकारस्यान्तस्थायां परस्यामित्यादि यदुक्तं तत्तद्ग्रहणाद् विशेषान्तर-प्रतिपत्तिकारिणो लब्धमिति नापूर्वत्वेन वक्तव्यम्। तँल्लोकमिति। दृश्यादि-क्रियापेक्षे कर्मत्वे द्वितीयान्तप्रयोगोऽयम्।

"भट्टोग्रभूति[2] कृते शिष्यहितान्यासे सन्धिप्रकरणे वर्गपादश्चतुर्थः।"

पञ्चमः पादः

विसर्जनीयश्चे छे वा शम् १।५।१

चे छे इति सप्तम्यौ, कालभावयोरित्यनेन। चछयोर्हि सत्तायां शकारस्य सत्ता लक्ष्यते। एवमुत्तरत्रापि सप्तमी। शमिति स्वरूपेणार्थेनार्थवत्त्वाद्वि-भक्तिः। एवं षमित्यादावपि वाच्यम्। समुच्चये वा शब्द इति चे छे वा इत्यनेन प्रकारेण वा शब्दोऽयं निमित्तसमुच्चये न तु विकल्पे, विकल्पे सति विसर्जनीयोऽपि पक्षे श्रूयेत। उत्तरसूत्रयोश्चेति समुच्चये वा शब्द इति सम्बन्धः। कश्चरतीत्यादि। नन्वत्र शकारस्य इचुयशास्तालव्या इति स्थान-सावर्ण्यादघोषे प्रथम इति चत्वं कस्मान्न भवति, न भवति प्रक्रियालाघवार्थं शमित्येवमकरणात्। एवमुत्तरत्रापि षत्व-सत्वयोः कृतयोः प्रथमादेशविधानेना-न्तरतम्याट्टत्वठत्वयोः प्राप्तिः परिहर्तव्या[3]। ऋषिश्चेत्स्यात्। इत्यभिधेयः इति शेषः। हरिश्चन्द्र इत्यत्र रूढिशब्दत्वादसत्यप्यवयवार्थानुगमे हरिश्चन्द्रोऽस्येति शब्दसंस्कारस्य विगृह्णन्ति। चछयोरिति न कृतं वैचित्र्यार्थम्।

टेठे वा षम् १।५।२

सेवितप्रमाणे चेत्स्यातामिति प्रमीयते परिच्छिद्यते येन तत्प्रमाणम्। सेवितप्रमाणे च यदि वाच्यत्वेन भवेतामिति। ततो गोशब्दस्य पदशब्दे परे षकारागमो वक्तव्यः। गोष्पदो देश इति गावो पद्यन्ते गच्छन्ति यस्मिन्देशे सः गोभिस्सेवितो देशो गोष्पद इत्युच्यते। गोचरादिसूत्रेण च शब्दाद् घः। गोष्पदोऽयं[4] जलाशयः इति गोः पदं गोष्पदम्। नन्वत्र षष्ठीसमासे गो-

१. १।४।१६ (दु०वृ०)
२. चतुर्थः पादः (पु०भं०)
३. परिहेतव्या (वा०)
४. गोष्पदमयम् (भं०)

सम्बन्धिपदं वाच्यत्वेन प्रतीमः न तु लक्षणार्थं किञ्चित्, तत्कथं प्रमाणमेतदुदाहरणं स्यात्, उच्यते—नेह गोष्पदशब्दस्स्वार्थप्रतिपादनायोपात्तः, किं तर्हि, जलाशयस्येयत्तां परिच्छेत्तुम् । तेन परिच्छेदमात्रं हेतुत्वेन युज्यते एतत् प्रमाणम् । उदाहरणमन्यत्र । सेवितात्प्रमाणाच्च गोः पदं गोष्पदमित्यत्र गोसम्बन्धिपदमर्थो न तु सेवितप्रमाणे ।

तेथे वा सम् १।५।३

प्रतिष्ठा चेत्स्यात् इति । अवस्थानं, तिष्ठा सा यदि वाच्या भवेदित्यर्थः । प्रतिष्ठातः अन्यत्र । अपदादापदमिति पर्यपाङ्योगे पञ्चमीति पञ्चम्यन्तेन पदशब्देनाङ्मर्यादाभिविध्योरयमव्ययीभावः । यथासंख्यं यथाक्रममिति । संख्या[1] क्रमाञ्चानतिक्रम्येत्यर्थः । स-आदेशो वक्तव्यः । वर्णान्त्यस्य विधिरिति च नादन्त्यस्येति[2] शेषः । तस्कर इत्यादि । तत्करोतीति । त्यदाद्यकाराद्यन्तेति कृञष्टः । बृहतां पतिः बृहस्पतिः । अन्यत्रेति—चोरदेवताभ्याम् ।

कखयोर्जिह्वामूलीयं न वा १।५।४

कखयोश्शिट्परयोरित्यादि । शिडिति शपसहा उच्यन्ते । ते कखाभ्यां परे यदा भवन्ति तदा विसर्जनीयस्य सौत्रकार्यं नेष्यते । अत्र च न वा शब्दस्य व्यवस्थितविभाषात्वे हेतुः । वृक्षः । क्षर सञ्चलने । अस्य पूर्वाचार्यसंज्ञा प्रदर्शनलक्षणं वैचित्र्यं प्रतिपादयितुं कखयोः कं वेति न कृतम् ।

पफयोरुपध्मानीयं न वा १।५।५

क पातीति पा रक्षणे, अदादिः, अद्भिः प्सातमिति अप्, भिस्, अपां भेद इति दत्वम् । प्सा भक्षणे प्सायतेस्म, निष्ठेति क्तः । पुनः नवा-ग्रहणं विकल्पप्रतिपत्त्यर्थम् । अन्यथा द्वयोर्विकल्पयोः मध्ये ये विधयस्ते[3] नित्या भवन्तीति नित्योऽयं विधिर्ज्ञायते[4] ।

शेषे से वा वा पररूपम् १।५।६

एको वा शब्दः निमित्तसमुच्चये इति निमित्तेषु शषसेषु अनुक्तस्य कार्यस्य

---

१. संख्याक्रमम् (वा०)
२. तदन्तस्येति (ए)
३. विधेयाः (वा०)
४. विधिर्विज्ञायेत (वा०)

यस्समुच्चयः तत्रैको वा शब्दो वर्तते, तेनाघोषपरेषु शषसेषु परतो विसर्जनीयस्य लोपः विकल्पः समुच्चीयते । वृक्षाः स्थावराः लोपाभावे पक्षे तु सौत्रो विकल्पः। वृक्षास्स्थावराः, वृक्षाः स्थावराः इति । शे वा, षे वा, से वा इत्येवं रूपस्तु निमित्तसमुच्चयो न तथा सूत्राङ्गम् इति यथोक्तमेव निमित्तसमुच्चयो मन्तव्यः । कश्शेते इति । शीङः सार्वधातुक गुण इति गुणः । कष्षष्ठ इति । षष्, षण्णां पूरण इति संख्यापूरणे डमाविति डः । अन्तस्थो डर्पोरिति थकारागमः, तवर्गस्य षटेति थस्य ठत्वम् । कः स्तौतीति ष्टुञ् स्तुतौ, अदादिः, उकारस्य वृद्धिरिति वृद्धिः । न वेत्यनुवर्तमाने विकल्पोपादानमिहैव विकल्पो नोत्तरत्रेत्यवधारणार्थम् ।

उमकारयोर्मध्ये १।५।७

उमित्यत्राग्नेरमोऽकार इत्यमोऽकार[1]-लोपः । अकारयोरित्येकशेषोऽयम् । मध्यापेक्षा चैषा षष्ठी तदाह—द्वयोरकारयोर्मध्यमिति । अकारयोर्मध्यमितीह कश्चिच्चोदयति । अथामुमिति कस्मान्न क्रियते । अकारस्य परस्य विसर्जनीयस्योत्वमकारघोषवतोरेव परयोस्सामर्थ्याद्विज्ञास्यते । अन्यस्वरे यत्वलोपयोर्विधानादघोषे परे शादीनाञ्च पररूपपर्यन्तानाम् । अतः किमनेनोत्तरेण च योगेनेति । तदसत् । जिह्वामूलीयादीनामादेशानामभावपक्षेऽप्युत्वप्रसङ्गादिति यथान्यासकरणमेव ज्यायः ।

अघोषवतोश्च १।५।८

को गत इति । गच्छतिस्मेति गत्यर्थाकर्मकेति क्तः । यो धावतीति, यत् सि त्यदाद्यत्वम् । धावतीति सर्तेर्धावः । अघोषवतोरूमित्येको योगो न कृतो वैचित्र्यात्[2] ।

अपरलोप्योऽन्यस्वरे यं वा १।५।९

अन्यस्मिन्नकारादौ स्वरे पर इत्यकारस्यावधित्वेनोपादानात् तदपेक्षयान्यत्वविधानादेवमुक्तम् । समुच्चये वा शब्दः इति विकल्पवृत्तित्वे तु विसर्जनीयोऽपि पक्षे श्रूयते। रुद्र उपरीति। उपरीति ऊर्ध्व-शब्दादूर्ध्वायां दिशीति विगृह्य पुरस्तादादित्वाद् हि-प्रत्यया प्रकृतेश्चोपदेशः। अव्ययमेतत् । नन्वकारात् परस्य

१. इत्यकारः (मं०)
२. वैचित्र्यार्थम् (वा०)

विसर्जनीयस्योत्तरसूत्रेण यत्वलोपो विधास्यते[1], नामिनोऽपि परस्य रत्वं वक्ष्यति[2] ततोऽर्थादकारस्येव विसर्जनीयं प्रत्यवधित्वं लब्धमिति किमपरग्रहणेन, अस्त्येतत्, गुर्वी तु प्रतिपत्तिस्स्यादित्यपर इत्युच्यते। अतएवादिति कर्तव्ये परग्रहणं कृतम्। अन्यः स्वर इति किम्, इति अन्यशब्दविषयोऽयं प्रश्नः। इतर अकारे परे मा भूदिति प्रत्युदाहरति कोऽर्थ इति प्रश्नवाची स्वाभिप्रायमाह। तत्त्वस्यायं विषय इति अकारात् परस्य विसर्जनीयस्य अकार एव परे विसर्जनीयलोपो विकल्पेन[3] भूतामित्यन्यग्रहणं क्रियते। एतच्चाप्रयोजनम्। अयं हि विषयो विशेषविहितस्योत्वस्येति तद्विषयपरिहारेणाकारादावेव स्वरे परे यत्वलोपौ विज्ञास्येते, तत्किमन्यग्रहणेनेत्याह – अन्यग्रहणमित्यादि। सामर्थ्यलब्धोऽप्यर्थो मन्दमतीनां सुखार्थमन्यग्रहणेनोपात्त इत्यर्थः। यलोपाविति कर्तव्ये यं वेति पृथङ्निर्देशो यत्वस्येषत्स्पृष्टतरत्वेन प्राधान्याख्यापनार्थः। ईषत्स्पृष्टतरत्वं हि अत्र यत्वमिच्छन्ति। ईषत्स्पृष्टतरत्वं हि पुनरुच्चारणे स्थानकरणशैथिल्यमुच्यते।

आभोभ्यामेवमेव स्वरे १।५।१०

भो इत्यादौ यो भो-शब्दस्तस्य भो इत्यनुकरणमनुकार्येणार्थेनार्थवत्वाद्विभक्त्युत्पत्तिः आकाराद् भो-शब्दाच्च परो विसर्जनीयो लोप्यो भवतीत्येवं विवृण्वन्नाकारभोशब्दयोः लोपयत्वयोश्च यथासंख्यभावं सूचयति। एतच्च प्रत्येकं कार्यद्वय-समुच्चयार्थस्य वा शब्दस्येहानुवर्तमानत्वाल्लभ्यते। देवा आहुरिति। दीव्यन्तीति देवाः दिवि राजन्तः इति[4] वा। आहुरिति ब्रूञ्, अन्ति, ब्रुव पञ्चानामिति अन्ति-प्रत्ययस्य उस्, ब्रुवश्चाह आदेशः, भो इहेति। भवन्त् सि, भवतो वादेरिति वन्त् इत्यस्यौत्वम्। प्रभोराश्रय इत्यत्र तु यत्वलोपौ न भवतः। भो-शब्दस्यानर्थकत्वात्। पुरुषाः शेरते, इति शीङ् स्वप्ने, अन्ते, शीङस्सार्वधातुक इति गुणः। शेतेरिदन्तेरिति रेफागमः। आत्मने चानकारादिति न लोपः। पररूपं नास्तीत्यादिना कायभाजो विसर्जनीयस्य सत्तां प्रदर्शयन्प्रत्युदाहरणस्य साङ्गत्यं प्रदर्शयति। सति हि पररूपे विसर्जनीयाभावात्कस्यात्र यत्वलोपौ निषिध्येते इति प्रत्युदाहरणमसङ्गतं स्यात्। एवमेव ग्रहणमित्यादि। नन्वीषत्स्पृष्टतरं यत्वस्य सूचयितुमेव ग्रहणं स्यात् तत्कथं तस्य

१. विज्ञास्यते (भं०)
२. वक्ष्यते (वा०)
३. किल (वा०)
४. इति वा (ए)

अन्यत्र[1] प्रयोजनं भवेत्, उच्यते —अजहद्धर्मत्वादधिकाराणां पूर्वसूत्रोपात्तधर्म-परिगृहीतस्यैव यत्वस्येहानुवृत्तिर्भविष्यतीति विशिष्टयत्वस्यानुवृत्तिलक्षणं प्रयोजनमुल्लङ्घ्य वृत्तिकारोपदर्शितमेव प्रयोजनमेवमेव ग्रहणस्य व्याख्येयम् । ननु भो शब्द एवामन्त्रणार्थवृत्तेरोकारान्तस्योपलक्षणं विज्ञास्यते तत्कथमेतत् प्रयोजनं व्याख्यायते । नैतत्, अवधिमात्रं प्रत्युपक्षीणस्य तस्योपलक्षणत्वायोगात् । भगो अत्रेत्यादि । भगवन्त्[2] सि, उत्वविधौ वक्तव्यकथनात् वन्त् इत्यस्य चोत्वम् । सामान्यस्वरार्थमिति । अकारे स्वरेऽन्यत्र च यथा स्यादिति स्वरग्रहणम् । असति हि स्वरग्रहणे कथमकारे स्वरे न स्यादित्याह—अन्यस्वर इति । वचनादित्यादि ।

घोषवतिलोपम् १।५।११

दोषा यान्तीति, दुष्यत्येभिः[3] इति दुषेः व्यञ्जनान्ताच्चेति करणे घञ्, यान्तीति, या प्रापणे, अदादिः लुक् । भो यज इति यजेः हि लोपः, पुनर्लोप-ग्रहणं यकारनिवृत्त्यर्थम् इति । प्राक्तनं तु लोप्य-ग्रहणं यकारेण सम्बद्धमिति तदनुवृत्तौ सकारोऽप्यनुवर्तेत । तस्यानुवृत्तौ अपार्थको योगभेदस्स्यात् । स्वर-घोषवतोरिति पूर्वप्राकरणाद्[4] योगभेदादेव तत्प्रतिपत्तये किमर्थं लोपग्रहणमिति चेत्, शक्यत एवं विज्ञातुम्, गुर्वी तु प्रतिपत्तिस्स्यादिति यकारनिवृत्तये लोप-ग्रहणमेव ज्यायः । भगो-अघो-शब्दाभ्यामपि लोपो वक्तव्य इत्येवमेव ग्रहणानु-वृत्तेरेतत्फलं व्याख्येयम् ।

नामिपरो रम् १।५।१२

नामिनः परो नामिपर इत्यनेन पञ्चमीसमासस्तत्पुरुषो न तु पञ्चम्यर्थे बहुव्रीहिरिति दर्शयति । कथं पुनर्नायं बहुव्रीहिरित्यवसीयते, उच्यते—यद्ययं बहुव्रीहिस्स्यात् ततो नामिनि परे रत्वं विहितं स्यात्, नामि च स्वरान्तर्गतः स्वरे च परे उत्तरसूत्रेण रेफादेशः विधास्यते । एवं घोषवत्स्वरपरे रमित्येव सूत्रविन्यासं कुर्यात् किं नामिनि परे पृथक्त्वविधानेन—तदेवमकरणान्नेह[5] बहुव्रीहिराश्रीयते । ननु सुपीस्सुतूरित्यादावपि पिसितुसोस्सकारस्य विसर्जनीये-

---

१. अन्यत्र (वा०,
२. भगवन्त्, अघवन्त् (वा०)
३. दुष्यत एभिः (वा०)
४. पूर्वत्रैवाकरणात् (वा०)
५. तदेवमकारणान्नेह (वा०)

कृते यदि तस्य यद्रत्वं तस्यापि यदि विसर्जनीयः स्यात् तत्किमनेनान्तरासञ्जातेन रत्वेन कृतं स्यात्। रूपविशेषलक्षणस्य फलस्यानुपलभ्यमानत्वादित्याह—ईरूरौ विधीयेते। न चासति रत्वे ईरूरौ भवत इति रत्वेन ईरूरौ भाव्येते। भावितयोश्च तयोरीरूरौ भवत इति तत्प्रवृत्तये रत्वमिदं सूत्रेण विधीयते। यद्येवं बुद्धिः धेनुरित्यादावपि सकारस्य यो विसर्जनीयस्तस्यापि नामिपरस्य रत्वमीरूरोः प्रवृत्त्यर्थं कस्मान्न भवति, उच्यते—नात्र विषये कृतेऽपि रत्वे ईरूरौ प्रवर्तेते। तद्विधौ हचतुर्थान्तस्येत्यतो धातुग्रहणानुवृत्त्या धातुसम्बन्धिनोरीरूरोः स्थानित्वेन परिग्रहात्। तथा च धनुर्भ्यामित्यत्र ईरूरौ न भवतः। अतो बुद्धिः धेनुरित्यादौ कृतेऽपि रत्वे धातुत्वाभावादीरूरोरप्रवृत्तेः कस्मै प्रयोजनाय रत्वं स्यात्। परग्रहणं रत्वं प्रतिस्थानिनः स्थानित्वाशङ्का निरासार्थम्। देवा इह, भो उत्तिष्ठेत्यादावाभोभ्यां परो नामी रत्वं प्राप्नोतीति एवमपि कश्चिदाशङ्क्येत्।

घोषवत्स्वरपरः १।५।१३

घोषवन्ताश्च स्वराश्चेत्यादि-द्वन्द्वेऽल्पस्वरस्य स्वरशब्दस्य पूर्वनिपातकरणं तद्विधेरनित्यत्वसूचनार्थम्। तेनोलूखलमुसल इत्यादि सिद्धम्। ते परे यस्मादित्यादि। एतेनायं पञ्चमीसमासः तत्पुरुष इति दर्शयति। एतच्च घोषवत परस्य विसर्जनीयस्यासम्भवाल्लभ्यते। पूर्वेण सिद्धत्वादपार्थको योगारम्भ इत्याह—सिद्धे सतीत्यादि। नियमस्वरूपं प्रदर्शयितुमाह—तेनेत्यादि। अद्भिः स्नातमित्यत्र यदि रत्वं स्यात् ततस्तद्विधानसामर्थ्यादसति विसर्जनीये रेफ एव श्रूयेत।

र प्रकृतिरनामि परोऽपि १।५।१४

यो यस्माज्जायते सः तस्य प्रकृतिरित्यनेन कारणपर्यायेण प्रकृतिशब्दो यथा पटस्य तन्तवः प्रकृतिरिति दर्शयति। जायते सत्तां प्रतिलभते इत्यर्थः। उमकारयोर्मध्ये अघोषवतोश्चेति सूत्राभ्यामुत्वं प्राप्तम्। अपरो लोप्यो अन्यस्वरो यं वेति अनेनापि[1] लोप-यत्वे प्राप्ते यस्मिन्प्राप्ते यो विधिरारभ्यते सः तस्य बाधको भवतीत्यनेन रेफादेशविधानेन बाध्यन्ते। तेषां तूत्वलोपयत्वानां को विषय इत्याह—तेषां त्वित्यादि। सः प्रकृतिः सकारस्य स्थाने यो विहितः विसर्जनीयः सः तेषामुत्वलोपयत्वानां विषय इत्यतोऽन्यस्य यो विसर्जनीयस्तस्यानेन रत्वं विधीयते। अन्तर्गत इत्यादि। अन्तर् स्वर् इत्येतेऽव्यये।

---

१. न्यूनपाठः (भं०)

रेफस्य विसर्गः तस्यानेन रत्वम् । चेतसो राजनित्यादिप्रचेतसः सकारस्य यो विसर्जनीयस्तस्य राजन्नित्येतस्मिन्परे रत्वं वक्तव्यम् । हे प्रचेता राजन्निति, प्रगतो चेतो वा अस्य[1] सः प्रचेता, तस्यामन्त्रणमेतत् । सकारस्य विसर्गे[2] कृते वा रत्वं रत्वपक्षे रोरे लोपमित्यादिना रेफलोपो दीर्घश्च । अन्यत्र घोषवतोऽचेत्युक्तम् । अहरादीनामित्यादि । अहरादयः पत्यादयश्च प्रयोगतोऽनुसर्तव्याः । गीर्पतिरित्यादि । गृ निगरणे, दुर्वी[3] हिंसार्थः, क्विप्, ऋदन्तस्येरः गुणे इति रः, राल्लोप्याविति व-लोपः । सर्वत्र षष्ठीसमासः कृते रेफे इरूरोरीरूरौ । एतच्चापि शब्दस्य बहुलार्थस्य विजृम्भितमिति नापूर्वत्वेन वक्तव्यम्, तथा च अहर्गच्छति, अहर्ददाति, अहरिदमित्यादौ घोषवति स्वरे च नित्यं रत्वम् । क्वचित्तु नैव, अह्नोरूपम् अहोरूपमिति । अहश्च रात्रिश्च अहोरात्रः । अकारस्समासान्तः । अह्नोः रथन्तरम् अहोरथन्तरमित्यादौ ।

एष स परो व्यञ्जने लोप्यः १।५।१५

एष चरति, स चरति, इत्यादिषु प्रयोगेषु यावेष सः शब्दौ तावेष स पर इत्यत्र निर्देशेऽनुक्रियेते[4] । अतएवानुकरणत्वाद् एषश्च सश्च तौ एषसाविति । वृत्तौ विसर्जनीयस्य लोपो न कृतः । एषसाभ्यां पर एषस पर इत्येतेन तत्पुरुषोऽयं न तु बहुव्रीहिरिति दर्शयति ततश्च यः करोति स कर्ता इति सशब्दात्परस्य विसर्जनीयस्य लोपदर्शनादवगम्यते । शादय आदेशप्राप्ता इति तेऽपवादत्वादनेन बाध्यन्त इति शेषः । एष चरतीत्यादि । एतत् तत्[5] सि, त्यदाद्यत्वम् । सोमः ददातीति । डुदाञ् दाने जुहोत्यादिः । यश्चरतीत्यादि । यत् सि, त्यदाद्यत्वम् । एषसाभ्यामिति कर्तव्य इत्यादि । एषसाभ्यामिति पञ्चमीनिर्देशेनैव पञ्चम्या निर्दिष्टे परस्येति परग्रहणे लब्धे यत्पुनरपि परग्रहणं क्रियते तस्याधिकस्य करणे एतत्प्रयोजनमक्-प्रत्यये कृते नञ्समासे च लोपो मा भूदिति । तेनेति । परग्रहणेनेत्यर्थः । अव्ययसर्वनाम्न इत्यक्-प्रत्यय इति । अज्ञातादावर्थ इति शेषः । नन्वेषसशब्दाभ्यामित्यादि । एषसपर इति वचनेन केवलाभ्यामेषसाभ्यां परस्य विसर्जनीयस्य यल्लोपलक्षणं कार्यं सूत्रेणोक्तं तत्केन

---

१. यस्य (भं०)
२. विसर्जनीये कृते (भं०)
३. धुर्वी (भं०)
४. निर्देशेन क्रियेते (वा०)
५. न्यूनपाठः (भं०)

प्रकारेणाक्-प्रत्ययसहिताभ्यां परस्य प्राप्नुयात्। शब्दान्तरत्वादित्यक् प्रत्यय-विषये लोपस्य प्राप्तिरेव नास्तीति किं तन्निवृत्त्यर्थेन परग्रहणेनेति मन्यमानस्य प्रश्नः। तन्मध्यपरिभाषा सामर्थ्यात् सत्यक्-प्रत्ययेऽस्ति प्राप्तिरित्युत्तरयति। सत्यमित्यादि। स्वरादन्त्यात्पूर्व इति वचनेन तयोरेतत्तदोर्मध्ये पतिते क्-प्रत्यय एतत्तद्ग्रहणेनैव गृह्यत इत्येषसाभ्यामुच्यमानो लोप एषक-सकाभ्यामपि प्राप्नोति। तन्मध्यपतित इत्यस्य वचनस्यास्तित्वे वक्ष्यमाणमनक इति निषेध-करणं लिङ्गम्। असति ह्यस्मिन्वचने इदमोत्वमुच्यमानमिदकसो नैव प्राप्नोती-त्यद्व्यञ्जने नक इत्यत्रानक इति प्रतिषेधं न कुर्यात्। तस्मात्तन्मध्यपतित-स्तद्ग्रहणेन गृह्यत इति वचनात्। सत्यप्यक्-प्रत्यये लोपस्य (प्राप्तिरेव[1] नास्तीति) तन्निवृत्तये परग्रहणं युक्तम्। [2]नञ्समासेऽप्यस्ति प्राप्तिः येनविधि-स्तदन्तस्येति वचनात्। तथा च पतिरमास इत्यसमासग्रहणं क्रियते। मेषो गतः दासः पचति इत्यत्र मेषदासशब्दाभ्यां योऽर्थः प्रतीयते तस्मादेकदेशभूता-भ्यामेषसशब्दाभ्यामप्रतिपादनात्तयोरनर्थकत्वमित्यर्थवद्ग्रहणपरिभाषया ताभ्यां परस्य विसर्जनीयस्य लोपो न भवति। यद्येवम्, सम्प्रैषो वर्तत इत्यत्र भवत्ययमेष शब्दो भावघञन्तोऽर्थवानिति कृत्वा लोपः कस्मान्न भवति। प्रशब्दाकारेण सन्धौ कृते नायमेष शब्द इति चेत् परनिमित्त आदेश इति वचनादेष शब्द एवायमित्यस्ति लोपस्य प्राप्तिरित्याह— एष शब्दस्येत्यादि। एतच्छब्दे सर्वनाम्ना व्युत्पादितस्यैषशब्दस्यार्थवतो ग्रहणं न त्वन्यस्याप्यर्थवतो भावघञन्तस्य। अत्र हेतुमाह— स शब्देनेत्यादि। नन्वसर्वनामापि ग्रामवासा-द्येकदेशः स शब्दोऽस्ति तत्कथं तेन साहचर्यादिति युक्तो हेतुः स्यात्। सत्यम्। अर्थवतस्तु स-शब्दस्येह ग्रहणादित्युक्तम्। अर्थवांश्च तच्छब्दसाधितः सर्व-नामैव सूत्रे परिगृहीत इति तेन साहचर्यं भवति व्यवस्था हेतुः।

न विसर्जनीयलोपे पुनः सन्धिः १।५।१६

लोपनं लोपः। भावे घञ्। सन्धिरिति। सम्पूर्वात् डुधाञः सन्धानं सन्धि-रित्युपसर्गे दः किः, आलोपे सार्वधातुक इत्यालोपः। रुद्र आहेति। ब्रूञो रूपम्। अपरलोप्य इति विसर्ग लोपः। भो इदमिति। भो इति भवन्त् इत्यस्य सम्बुद्धेः रूपम्। आमोभ्यामिति विसर्गलोपः। विसर्जनीयग्रहणं शब्दान्तरलोपे सति सन्धिनिषेधाशङ्कानिरासार्थं तेन क्षीरमिश्रमुदकं क्षीरोदकमित्यादौ मध्यम-

---

१. प्राप्तिरस्तीति (वा०)

२. नहि (वा०)

पदलोपेऽपि सन्धिर्न निषिध्यते । पुनर्ग्रहणमित्यादि । तत्र केचित्तावदाहुः—

सैष दाशरथी रामस्सैष राजा युधिष्ठिरः ।
सैष दुर्योधनो राजा सैष पार्थो धनञ्जयः ॥

इत्यादौ क्वचिद्विसर्गस्य लोपेऽपि सन्धिनिषेधो मा भूदिति पुनर्ग्रहणं क्रियत इति । अन्ये त्वाहुः—इतिहासपुराणादावेवंविधाश्शब्दाः प्रयुज्यन्ते । अन्यत्र त्वेषां साधुत्वसंसिद्धये लक्षणमिदानीन्तनं प्रवर्तते न वा इत्यत्र सूरयः प्रमाणम् । सन्धिकार्यस्य प्राप्तस्यैव निषेधो विज्ञास्यत इति सन्धिग्रहणं संहिताविषये प्रकरमेतदिति प्रदर्शनार्थम् ।

रो रे लोपं स्वरश्च पूर्वो दीर्घम् १।५।१७

अग्नीरक्षतीत्यादि घोषवत्स्वरपर इति रत्वे कृते अनेन[1] रेफलोपो दीर्घश्च । इह कस्मान्न[2] भवतीत्यादि । उच्चैरित्यव्ययम् । गौरिति । गोशब्दस्य सौ परे गोरौ घुटि इत्यौत्वम् । अत्र पूर्ववद्रेफादेशे कृते रेफलोपे सञ्जाते तत्सहभावेन विधीयमानः पूर्वस्वरयोरैकारौकारयोः यथाक्रमं दीर्घ ईकार ऊकारश्च कस्मान्न भवति, तत्कथं पुनर्दीर्घान्तरसम्भवेऽप्यैकारौकारयोः (स्थाने[3] दीर्घावीदूतावेव प्राप्नुयातामित्यत्र हेतुमाह—तालव्योष्ठ्ययोरित्यादि । एतेन तालव्योष्ठ्ययोरैकारौकारयोः) आन्तरतम्यात्तालव्यौष्ठ्यावेव दीर्घावीदुतौ प्रसज्येयातामिति दर्शयति । तत्रैदौतोस्तालव्यौष्ठ्यत्वम् । ए ऐ कण्ठतालव्यौ, ओ औ कण्ठ्यौष्ठ्याविति वचनात् । ईदूतोरपि इचुयशास्तालव्याः उपूपध्मानीया ओष्ठ्या इति तालव्यौष्ठ्यत्वम् । अत्र परिहारमाह—सत्यमित्यादिना । (दीर्घेण[4] हि सम्बुद्धि) शब्दत्वादाक्षिप्तस्य ह्रस्वस्य स्वरस्य स्थाने भवितव्यम्, न तु दीर्घस्य । नित्यदीर्घाणि तु सन्ध्यक्षराणीत्युक्तं प्राक् । अतो दीर्घत्वादैकारौकारयोर्दीर्घावीदूतौ न भवतः । यद्येवम्, दीर्घेणाक्षिप्यमाणो ह्रस्वः स्वर एवेति किं स्वरग्रहणेन, उच्यते दीर्घस्य क्वचिदनित्यत्वसूचनार्थं स्वरग्रहणम् । तेन "स्वर्गार्थं ब्राह्मणे दानं, यशोऽर्थं नटनर्तके । सङ्ग्रहार्थञ्च भृत्येषु, भयार्थं पुनः राजसु ॥" इत्यादौ पुनः रो रेफस्य लोपे सत्यकारो दीर्घो न भवति । ननु

---

१. तेन (वा०)
२. कस्माद् भवति (वा०)
३. न्यूनपाठः (भं०)
४. दीर्घेण हि सम्बन्धि (भं०)

रेफे परे यस्स्वर इति व्याख्यायमाने सप्तम्या निर्दिष्टे पूर्वस्येति निर्दिष्टग्रहणस्यानन्तर्यार्थत्वादनन्तरो व्यवहितपूर्व एव स्वरो दीर्घ प्रतिस्थानित्वेन विज्ञास्यते। तदपार्थकं पूर्वग्रहणम्। विस्पष्टार्थं तु।

द्विर्भावं स्वरपरश्छकारः १।५।१८

भवनं भावः। श्रिणीभूभ्यो नुपेति घञ्, द्वौ वारौ द्विरित्येवं विगृह्यते। द्विशब्दात् तसादित्वादाख्याताच्च तमादय इति सु-प्रत्ययः। स्वरात्परश्छकार इत्येतेन पञ्चमीसमास एव न तु पञ्चम्यर्थे बहुव्रीहिरिति दर्शयति। एतच्च छादेर्घिरिति स्वरे परे छकारस्य द्वित्वाकरणाल्लभ्यते। दीर्घात्पदान्ताद्वेष्यत इति पदस्यान्ते वर्तमानाद् दीर्घात्परस्य छकारस्य द्वित्वं विकल्पेनेष्यते। एतच्च यथालक्ष्यं छकारस्य द्विर्भावार्थाद् भावग्रहणादेवावगतमिति नापूर्वत्वेन वक्तव्यम्। देवीच्छायेति। देवशब्दात्पचाद्यजन्तान्नदादित्वादीकारः प्रत्ययः। षष्ठी समासः। अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदान्तवृत्तिरयं दीर्घ ईकारः। ह्रीच्छतीति। ह्रीच्छ लज्जायाम्। आङः परस्य तु नित्यमिष्यत इति द्वित्वमिति शेषः। आच्छायेति, ईषच्छायेति विग्रहः। आङ् इति ङ्-अनुबन्धविशिष्टस्याकारस्योपादानादीषदर्थादिवृत्तेरेवाकारादयं नित्यो विधिः। अन्यत्र तु दीर्घात्पदान्ताद्वेति विकल्प एव भवति। आच्छाया आछायेति। आङ् इति चैतदुपलक्षणपरत्वेन व्याख्येयमिति। तेन माङोऽपि परस्य छकारस्य नित्यं द्वित्वमिष्यते। माच्छैत्सीत्, छिदिर द्वैधीकरणे दि, सिच्, सिचः इतीट्। व्यञ्जनान्तानामनिटामिति वृद्धिः। न मा मास्म योग इति निषेधादकारागमाभावः। आङ्-अनुबन्धविशिष्टात्तु मा शब्दात्पूर्वं वा विकल्पः। प्रमाच्छन्दः, प्रमाछन्दः इति प्रमाशब्दो समान इत्यस्य प्र-पूर्वस्यातश्चोपसर्ग इत्याङ्प्रत्ययान्तः। स्वरादिति कर्तव्य इत्यादि। स्वरादिति पञ्चम्या परग्रहणं लब्धमिति भावः। लक्ष्यानुसारेणेति स्वमनीषिकयेत्यर्थः। नन्वयमर्थो भावग्रहणादेवाधिकादावाप्यत इति किं परग्रहणेन, सत्यम्[2]। अन्यतरं तु शक्यमकर्तुम्। भाव-परयोरेकस्य कर्तुमशक्यत्वात्। दद्ध्यत्र, मद्ध्वत्रेति दधिमधु-शब्दाभ्यां नपुंसकात्स्यमोरिति सि लोपः। कृते द्विर्भावे धुटां तृतीयः इति पूर्वस्य दस्य तृतीयो दः। ननु स्वरादेशपरिभाषया यत्वबत्वयोस्स्थानिवद्भावाद् व्यञ्जनं न परभूतमिति कथमत्र धस्य द्विर्भावस्स्यात्। अस्त्येतत्। द्विर्वचनविधि प्रति

---

१. आच्छायेति (वा०)

२. नित्यम् (वा०)

तु प्रतिषिध्यते स्थानिवद्भावो द्विर्वचनविधिं प्रति न स्थानिवद् इति वचनात् ।

भट्टोग्रभूतिकृते शिष्यहितान्यासे सन्धिप्रकरणे वर्गपादः पञ्चमः ।

षष्ठः पादः

च वा हा १।६।१

ब्राह्मणो क्षत्रियो वा इत्येवमादि-प्रयोगस्थानां चादीनामनुकरणभूताश्चादय इह संज्ञित्वेन निर्दिश्यन्ते तेभ्योऽनुकार्येणार्थेनार्थवत्वात्प्रत्येकं (सञ्जातस्य[1] प्रथमैकवचने स्यादि) लोपः । निपातशब्दोऽधिकरणषञ्जन्त इत्युक्तं प्राक् । नन्विपूर्वादिणो न व्येतीत्यव्ययमिति पचादित्वादच्प्रत्ययः । नाम्यन्तयोरित्यादिना गुणे कृते विशब्देकारस्य[2] यत्वम् । ननु कथमेतत्, यावता पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेनेति गुणात्पूर्वं विशब्देकारस्य समानदीर्घत्वं प्राप्नोति । कृते तु तस्मिन्परनिमित्त आदेश इति वचनादिकारस्य धातुत्वाद् गुणस्स्यात्, ततश्चाव्ययशब्दो न सिध्यति । पूर्वञ्च धातोरुपसर्गेण योगो न्याय्यः । अन्यथा साधनसम्बन्धे सत्यनुभूयत इत्यादावकर्मकत्वाद् भवतेः, कर्मण्यात्मनेपदं न प्राप्नोति । पूर्वं धातूपसर्गेण योगे सति अकर्मका अपि धातवः सोपसर्गाः अर्थान्तराभिधायित्वे सति सकर्मकाः भवन्तीति कर्मण्यात्मनेपदं सिध्यतीति तस्माद् धातूपसर्गसम्बन्धस्यान्तरङ्गत्वात्तन्निमित्तकस्य दीर्घस्य[3] स्यादेव गुणात्पूर्वं प्रवृत्तिः । अत्रोच्यते—पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति । प्राक्त्वयुक्त उपसर्गेण सम्बन्धः । उपसर्गो हि क्रियाविशेषणत्वेन[4] प्रसिद्धः । न च साधनादवाप्तजन्माक्रिया उपसर्गजनितेन विशेषणेन सम्बन्धमनुभवितुमलमित्युत्पादकेन साधनेन । साध्यस्वभावा सा पूर्वमभिसम्बन्धमपेक्षते । साधनसम्बन्धं तु विरहय्य[5] कीदृशं तस्याः रूपं यद्विशेषणायोपसर्ग उपादीयते तत्तस्मात्पूर्वं धातोस्साधनेन सम्बन्धः । यद्येवम्, अनुभूयत इत्यादौ का गतिः, उच्यते—अनेकार्थत्वाद् धातूनां भवतेस्सकर्मकादर्थान्तरवृत्तित्वात्कर्मण्यात्मनेपदं भविष्यति । तस्मादिण इणो धातोस्सञ्जाते साधनाभिधायिनि प्रत्यये

१. संज्ञा तस्य प्रथमैकवचनस्यादि (?)
२. विकारेऽकारस्य (वा०)
३. दीर्घस्यादावेव (मं०)
४. विशेषकत्वेन (वा०)
५. विरहय (वा०+मं०)

तन्निमित्ते च गुणे कृते सति सिद्धो व्ययशब्दः निपातसंज्ञो भवति। (अव्ययसंज्ञश्चेति[1]। अथ किमर्थमिमे उभे संज्ञे क्रियेते नत्वेकैव निपातसंज्ञा क्रियतां तयैव च व्यवहारो भविष्यति किमव्ययसंज्ञया, उच्यते—अव्ययसंज्ञायाः प्रणयनमव्ययमित्यनेनैकदेशेन "सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। सर्वेषु च वचनेषु यन्न व्येति तदव्ययमिति।" पूर्वाचार्यलक्षणस्य सङ्ग्रहार्थम्। तेन त्रिषु स्त्रीपुंनपुंसकेषु यत्सदृशं लिङ्गविशेषापरिग्रहात्तुल्यं रूपं तथा सर्वासु च विभक्तिषु विभक्तिनिमित्तेषु च कर्मादिकारकेष्वेकरूपम्। यदपि सर्वेषु वचनेषु एकत्वादिषु न व्येति, नानात्वं न गच्छति) रूपान्तरं न प्रतिलभ्यते तत्सर्वमव्ययम्। तेनानुपात्तानामुच्चैः-प्रभृतीनामव्ययसंज्ञा सिद्धा भवति। अपार्थकस्तर्ह्युत्तरो योगः। नापार्थकः, तत्प्रपञ्चार्थत्वात्। यद्येवम्, अव्ययसंज्ञैवास्तु किं निपातसंज्ञया, अव्ययमिति पूर्वाचार्यसंज्ञा संश्रयणात् सूत्रानुपात्ताप्यव्ययसंज्ञा विज्ञास्यते एवं तर्हि निपातसंज्ञयाप्यस्ति एषां चादीनां व्यवहार इति पूर्वाचार्यप्रसिद्धिमुपदर्शयितुं निपातसंज्ञा प्रणीयते इति केचन्मन्यन्ते। नो शब्दस्य निपातत्वादोदन्त इत्यादिना प्रकृतिभावः। ब्राह्मणाश्चेति। च शब्दस्याव्ययत्वात् ततः परस्य सेरव्ययाच्चेति लुक्। गुरुसंज्ञाकरणादित्यादि। दा शिडित्यादिवल्लघ्व्यां संज्ञायां कर्तव्यायां यदेतदव्ययमिति गुरुसंज्ञायाः करणं ततो हेतोश्चादीनां समुच्चयादिलक्षणार्थं प्रतिपादनप्रसिद्धव्यापाराणां सतामियमव्ययसंज्ञेष्यते। अर्थमात्रप्राधान्यविवक्षया त्वेषामव्ययत्वं नास्त्येव, तेन किं सिद्धं भवतीत्याह—तेनेत्यादि। वाक्यान्तरस्थस्य च शब्दस्यानुकरणभूतो स्थानेऽयं च पठित इत्ययं च शब्दः। एवं यस्मादर्थ इत्यव्ययमपि[2] हि शब्दः। तथा चानयोस्समुच्चयादिलक्षणमर्थमप्रतिपादयतोरनुकार्येणार्थेनार्थवत्वेऽप्यव्ययसंज्ञा न भवतीत्यादावित्यादिग्रहणेनोच्चैरतिक्रान्तोऽत्युच्चैः सो अत्युच्चैः स इत्यादावतिक्रान्तस्यार्थस्य प्राधान्ये सत्यप्यव्ययसंज्ञा पूर्ववन्न भवति।

अन्तर् स्वर् प्रातर् पुनरधोऽप्याहुः १।६।२

पुनरधरिति। र प्रकृतिरिति रत्वम्, अपि समुच्चय इत्युत्तरत्रेति शेषः। किमुत्तरत्रासौ समुच्चिनोतीति चेत्, अव्ययसंज्ञा, इतरथा हि तां येन नाप्राप्तिन्यायेनोपसर्गसंज्ञा बाधेत।

---

१. न्यूनपाठः (भं०)

२. इत्ययमपि (वा०)

प्र परा नि १।६।३

निर्देशे नि-शब्दस्य णत्वं न भवति। स्वरूपभङ्गप्रसङ्गात्। उपपूर्वात् सृजेरुपसृज्यते धात्वर्थेन युज्यत इत्यकर्तरि च कारक इति कर्मणि घञ्। अपोपेत्यतदन्तमिति अपोपेत्येकदेशेन सूत्रमुपलक्षयति। पदमिति कृतद्वन्द्वं लुप्तजस्कमिति पूर्ववत्, पूर्वाचार्यसंज्ञाङ्गीकरणं क्रियायोगे सति प्रादीनां संज्ञासम्बन्धप्रतिपत्त्यर्थम्। तेन सेना परा अयत इत्यत्रोत्कृष्टवाचिनः परा-शब्दस्य अयतिक्रियासम्बन्धाभावादुपसर्गस्यायताविति लत्वं न भवति, क्रियायोगे चोपसर्गस्मरणादाकार इह सूत्रे ङनुबन्धविशिष्टः पठितः। क्रियायोगे तथाभूतस्यैव तस्य स्मरणात्। तदुक्तम्—

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित्॥

इति। तथा चाङि युद्ध इति निर्देशं करोति।

अन्वाद्या कर्मप्रवचनीयाः १।६।४

आदौ भव आद्य इति यदुगवादित इति थोगविभागाद् यत्। कर्मप्रोक्तवन्तः कर्मप्रवचनीयाः। अतीते काले कृत्ययुटोऽन्यत्रापीति कर्तरि अनीयः प्रत्ययः। कर्मशब्दः क्रियावचनः। वचिरप्यनेकार्थत्वाद् द्योतने वर्तते। तेन ये प्रयुज्यमानाः क्रियापदे क्रियाविशेषं द्योतितवन्तः, प्रयुज्यमाने तु वक्ष्यमाणस्य सम्बन्धस्य विशेषस्य द्योतकाः ते कर्मप्रवचनीया इत्युक्तं भवति। पूर्वाचार्यसंज्ञाङ्गीकरणं तदुक्तं विषयविशेषपरिग्रहार्थम्। तेनानु-शब्दो लक्षणेत्थंभूताख्यानभागवीप्सासु सहार्थे डानौ च कर्मप्रवचनीयसंज्ञः। तत्र लक्षणं चिह्नं हेतुर्वा। किञ्चित्प्रकारं प्राप्तः इत्थम्भूतस्तस्याख्यानमित्थम्भूताख्यानं स्वीक्रियमाणोऽसौ[२] भागः। पदार्थान्[३] व्याप्तुमिच्छा वीप्सा। सह लक्षणोऽर्थः सहार्थः। ह्रानिर्न्यूनता। तत्र लक्षणे तावत्—वृक्षमनुविद्योतते विद्युत्। अत्र वृक्षो लक्षणं विद्योतमाना तु विद्युल्लक्ष्या। तयोः वृक्षं प्राप्य विद्युत् विद्योतते इति प्राप्तिक्रियाजनितो यो लक्ष्यलक्षणः सम्बन्धः सोऽनुशब्देन द्योतते। एवं शाकल्यस्य संहितामनु प्रावर्षत्। अत्र संहिता हेतुः, वर्षणं हेतुमत्तया[४] शाकल्य-

---

१. अपूर्णमिदं सूत्रम् (उभयत्र)
२. शो (उभयत्र)
३. पदार्थम् (वा०)
४. हेतुमत्तयो (उभयत्र)

शाकल्यस्य संहितां श्रुत्वा देवः प्रावर्षदिति श्रवणक्रियाजनित हेतुहेतुमद्भाव-लक्षणं सम्बन्धमनुशब्दः द्योतयति । इत्थंभूताख्याने—साधुर्देवदत्तो मातरमनु । देवदत्तस्यात्र मातृविषये साधुत्वापत्तिराख्यायते तेन मातरं प्राप्य देवदत्तस्य साधुत्वापत्तिरिति प्राप्तिक्रियाजनितो मातुः साधुत्वापत्तेश्च यो विषयविषयि-भावलक्षणसम्बन्धः तस्य द्योतकोऽयमनुशब्दः । भागे – यदत्र मामनु स्यात्तद् दीयताम् । योऽत्र मम भाग आभजति स दीयतामित्याभजनक्रियाजनितस्स्व-स्वामिभावलक्षणोऽत्र सम्बन्धः । मामित्यस्मदो द्वितीयैकवचनो त्वन्मदोरेकत्व इति मदादेशः, अन्तलोपः, अमोचाम् । वीप्सायाम्—वृक्षं वृक्षमनुशेते । द्विश्च पदमिति वीप्सायां द्विर्वचनं द्विर्वा, अत्र वृक्षाणां पक्षिशयनक्रियायाश्च[1] यो आधाराधेयसम्बन्धः सोऽनुशब्दद्योत्यः । सहार्थे—पर्वतमनुसम्बद्धा सेना । पर्व-तेन सहेत्यर्थः । हानौ –अनुशाकटायनं वैयाकरणाः, शाकटायनं वैयाकरण-मपेक्षयान्ये वैयाकरणाः हीनाः इत्यर्थः । परिशब्दो लक्षणादिषु चतुर्षु वर्जने च कर्मप्रवचनीयसंज्ञः । वृक्षं परि विद्योतते विद्युत्, साधुर्देवदत्तो मातरं परि, यदत्र मां परि स्यात्तद् दीयताम्, वृक्षं वृक्षं परिशेते, परित्रिगर्तेभ्यः वृष्टो देवः, त्रिगर्तान्वर्जयित्वेत्यर्थः । अभिशब्दो लक्षणेत्थम्भूताख्यानभागवीप्सासु[2] । वृक्ष-मभिविद्योतते विद्युत्, साधुर्देवदत्तो मातरमभि, वृक्षं वृक्षमभिशेते यस्मादधिकं[3] यस्य चेश्वरवचनं तस्य सप्तमी (इति[4] स्वस्वामिनोर्द्वयोरपि पर्यायेण सप्तमी भवति ।) अधि स्वस्वामिसम्बन्धे—अधिब्रह्मदत्ते पाञ्चालाः, अधिपाञ्चालेषु ब्रह्मदत्तः । अत्र कालभावयोः सप्तमीत्यत्र कर्तरि चेति चकारानुवृत्त्या सम्बन्ध-षष्ठ्यां प्राप्तायां सप्तमी च, सा च कदाचित्स्वामिनो वा ब्रह्मदत्तात्, कदा-चिद्वा स्यात् पाञ्चालात् । कथमु, उच्यते – इह सर्वत्र सम्बन्धे किञ्चित्प्रसिद्ध-मनूद्यप्रसिद्धं विधीयते । अत्र यदा स्वमप्रसिद्धत्वाद्विधीयते तदा स्वामिनो-ऽनूद्यमानात्सप्तमी (यदा[5] तु स्वाम्यप्रसिद्धत्वाद्विधीयते तदा स्वामनूद्यमाना-त्सप्तमी) प्रति शब्दो लक्षणादिषु पूर्वोक्तेषु चतुर्षु प्रतिनिधिप्रतिदानविषये च कर्मप्रवचनीयः । मुख्यसदृशः प्रतिनिधिः । दत्तस्य प्रतिनिर्यातनं प्रतिदानम् । वृक्षं प्रति विद्योतते, साधुर्देवदत्तो मातरं प्रति, यदत्र मां प्रति स्यात्तद् दीयताम्, वृक्षं प्रति शेते, अभिमन्युः अर्जुनतः प्रति, माषानस्मै तिलेभ्यः प्रतियच्छति,

१. मयूर (वा०)
२. न्यूनपाठः (भं०)
३. न्यूनपाठः (भं०)
४. न्यूनपाठः (भं०)
५. न्यूनपाठः (भं०)

तिलान्गृहीत्वा माषान्ददातीति ग्रहणादानक्रियाजनित उत्तमर्णाधमर्णभाव-लक्षणसम्बन्धोऽत्र प्रतिना द्योतते। पूर्ववदनुकरणः[1] क्रियाजनितोऽनुकार्यानुकरणभावलक्षणः। अर्जुनस्य मुख्यस्य तत्सदृशेनाभिमन्युनानुक्रियमाणत्वात्, पञ्चमी च दिगितरर्तेऽन्यैश्चेति च शब्दत्वात्[2]। आङ् मर्यादाभिविध्योः कर्मप्रवचनीयः। विना तेन मर्यादा, सह तेनेत्यभिविधिरति। आपाटलिपुत्राद् वृष्टो देवः, पञ्चमी पर्यपाङ्योगे इत्यनेन। अप शब्दो वर्जनेऽर्थे। अपसाकेतात् वृष्टो देवः, साकेतं वर्जयित्वेत्यर्थः। उप-शब्दो हानावधिकार्थकः[3] सम्बन्धे च। उपार्जुनं योद्धारः, उपखार्यां द्रोणः, खार्याः द्रोणोऽधिक इत्यर्थः। पूर्ववदत्र सप्तमी। एवमन्येषामपि विषये विशेषकर्मप्रवचनीयत्वमवगन्तव्यम्।

परकार्ये विकार्यादिः १।६।५

विकारीति। विकार[4]-शब्दात्तदस्यास्तीति इन्-प्रत्ययः। परिभाषेयम्। विकारित्वं परिभाष्यमाणमादिवर्णः परिभाषणभाक्। परकार्य इति कर्तव्यता-विषयः। परस्य कार्ये कर्तव्य इति। क्व च परस्य कार्यं क्रियते, यत्र पञ्चम्या निर्देशोऽस्ति। यथा ई तस्यास इत्यत्र हि आस इति पञ्चमी निर्देशात् पञ्चम्या निर्दिष्टे परस्येति परस्य कार्यं क्रियते। आदिवर्ण इति वर्णाधिकारात्।

पूर्वे कार्ये त्य इष्यते १।६।६

अन्ते भव अन्त्यः इति। यदुगवादित इति योगविभागाद् यत्। इयमपि परिभाषा। अधिकारित्वं[5] परिभाष्यमाणमन्त्यो वर्णः परिभाषणभाक्। पूर्वकार्यम् इति कर्तव्यता-विषयः। पूर्वस्य कार्ये कर्तव्य इत्यादि। क्व च पूर्वस्य कार्यं क्रियते यत्र सप्तम्या निर्देशोऽस्ति यथा त्यदादीनाम विभक्तावित्यत्र हि विभक्ताविति सप्तमीनिर्देशात्। सप्तम्या निर्दिष्टे पूर्वस्येति कार्यं क्रियते।

क्वचित्पूर्वः परो सर्गो १।६।७

पूर्वेण परिभाषाद्वयेनातिप्रसक्तेऽधिकारित्वे[6] वचनमिदमारभ्यत। इत-

---

१. न्यूनपाठः (भं०)
२. पूर्वत्र त्वनुकरण (भं०)
३. धिकः (ए)
४. विकारि (वा०)
५. विकारित्वम् (वा०)
६. विकारित्वे (वा०)

इहेति । इदं ङसि, ङि, अस्मादस्मिन्निति विगृहीत पञ्चम्यास्तस्, इदमो ह, तत्रेदमिरिति सर्वस्येदमः इत्वं न त्वन्त्यस्य, अष्टौ तिष्ठन्तीत्यादि । अष्टन्सर्वास्विति आत्वे कृते जश्शसोः सर्वयोरौत्वं न तु तयोरादेः ।

संसार्य[1] योगसाधनम् १।६।८

संसरणीयं संसार्यमिति । सर्तेः ध्यण्, युज्यते नानाप्रकारैरर्थैस्सम्बध्यत इति योगः सूत्रमुच्यते । तदाह – योगस्य सूत्रस्येति, लोकोपचारादित्यस्यैवायं प्रपञ्च इति । एतत्सूत्र-साध्यस्यार्थस्य लोकोपचाराद् ग्रहणसिद्धिरित्यनेनैव सिद्धत्वादिति भावः ।

"भट्टोग्रभूति[2] कृते शिष्यहितान्यासे शिष्यालोकाभिधाने सन्धिप्रकरणे निपातपादः षष्ठः ।"

---

१. अपूर्णोऽयं प्रतिभाति ।

२. निपातपादः षष्ठः (वा०)

नामप्रकरणम्

प्रथमः पादः

धातुविभक्तिवर्जमर्थवल्लिङ्गम् २।१।१

धातवश्च विभक्तयश्च धातुविभक्तयः इति विग्रहविशेषप्रदर्शनेन धातोः विभक्तय इति नायं तत्पुरुष इति दर्शयति । कथं पुनरेतदवगम्यते, त्यादिवर्जमित्यकरणात् । तत्पुरुषे हि विभक्तिशब्दः त्यादीनां वाचक इति तन्निषेधार्थं त्यादिवर्जग्रहणमेव कुर्यात् । वर्ज्यत इति वर्ज इति धातुविभक्तीनां वाचित्वाद् वर्ज-शब्दादञ्प्रत्ययान्तादाप्प्रत्ययः । ततो धातुविभक्तयो वर्जं यस्मिन्नर्थवतीति विग्रहे कृते स्वरो ह्रस्वो नपुंसक इति ह्रस्वत्वम् । अर्थोऽस्यास्तीत्यर्थवदिति शब्दो रूपापेक्षया नपुंसकेन निर्देशः नपुंसकात्स्यमोरिति सि लोपः । विरामव्यञ्जनादावित्यनुषङ्गलोप इति, नत्वानुषङ्गश्चाकुञ्चेरित्यनेन । तत्र ह्यघुट्स्वरव्यञ्जनग्रहणं सम्बध्यते । यथा चात्र संयोगान्तलोपस्य प्रवृत्तिः । तथा चानुषङ्गसंज्ञाविधावेव वक्ष्यति । अर्थवदित्युच्यते । तत्रार्थशब्दो बहुष्वर्थेषु दृष्टप्रयोगः । तथा ह्ययं धनवचनो दृश्यते । यथा—"यस्यार्थस्तस्य मित्राणीति" । तथा याञ्चावचनोऽपि यथा—अर्थी देवदत्तो याच्ञावानिति गम्यते । अभिधेयवचनोऽपि यथा—अयमस्याभिधेयावयवस्यार्थ इति । इदमस्याभिधेयमिति गम्यते । तत्रार्थशब्देनेह किमुच्यत इत्याह—शब्देनोच्चारितेनेत्यादि । एतेनाभिधेयवचनोऽर्थ शब्द इह गम्यते न धनयाच्ञावचन इति दर्शयति । तद्वचने तु ग्रहणं धनयाञ्चयोश्शब्दविषयत्वेनासम्भवात्प्रयोजनवचनोऽप्यस्ति । केनार्थेनागत, केन प्रयोजनेनेति गम्यते तत्राभिधेयप्रतिपादनम् एव[1] शब्दस्य प्रयोजनमिति प्रयोजनवचनोऽपि अभिधेयवचनान्न भिद्यते ततः प्रयोजनवचनोऽस्त्वभिधेयवचनो वा किमत्र शब्दविप्रतिपत्त्या । सर्वथा धनयाच्ञावचनो न गृह्यते । निवृत्तिवाचिनस्त्वसम्भवादिह न परिग्रहः । ननु सम्भवति मशकार्थो धूम इत्यत्रार्थशब्दो निवृत्तिवाची । भवेतेदेवम्, यदिमशकनिवृत्त्यर्थो धूम इति द्वितीयस्यार्थशब्दस्य प्रयोगो न स्यात् । तस्मान्नार्थशब्दो निवृत्तिवाचीति किं वचनस्तर्ह्यत्रार्थशब्दः, प्रयोजनवचन इति ब्रूमः । तच्च प्रयोजनं क्वचिन्निवर्त्य-

---

१. इह (भं०)

मानतयाऽपि भवतीति निवर्त्यमानधूमस्य मशकः प्रयोजनम्। अथवा सम्भवन्त्यप्यर्थशब्दो निवृत्तिवचनो न गृह्यते। वृत्तिमतश्शब्दस्य स्वतोऽसत्त्वात् संज्ञासम्बन्धानुपपत्तेः। तस्मादभिधेयवचनोऽत्रार्थशब्दः। धातुविभक्तिवर्जमिति धातोः केवलस्यार्थवत्वात्प्राप्तौ सत्यां निषेध आरभ्यते। विभक्तिशब्देन विभक्त्यन्तस्य निषेधः केवलायाः विभक्तेरभावात्। धातोरपि केवलस्यासम्भवो प्रयोग इति चेत्, भवत्येव, प्रयोगमध्यगतस्यापि तु तस्य प्राप्नोत्यर्थवत्वाल्लिङ्गसंज्ञा (तस्य[1] तु भाष्यत इति) प्रत्युदाहरणे केवलस्यैव धातोस्संज्ञा सम्बन्धे सति द्वित्वप्राप्तिराशङ्क्यते। यथा च धातुमात्रस्यार्थवत्वं तथा च धातुसंज्ञासूत्रे वक्ष्यामः। राजेति। राजन्नित्यस्यार्थवत्वात्तस्मात्पराविभक्तय[2] इति सि-प्रत्ययः। घुटि चासम्बुद्धाविति दीर्घः। ननु विना विभक्तिमनुप्रयुज्यमानस्यास्य कथमर्थवत्वं निश्चीयते, उच्यते—अन्वयव्यतिरेकाभ्याम्। तथा हि सति शब्दे तदर्थप्रतिपत्तिः अन्वयव्यतिरेको सति शब्दे तदर्थस्याप्रतीतिः। अत्र च तौ सम्भवतः। तथाहि राजा राजानौ राजान इत्येकत्वादीनामर्थानां विभक्तिवाच्यानामाविर्भावतिरोभावेऽपि राजार्थो न हीयत अतो मन्यामहे, सम्भवति कश्चित् प्रातिस्विकेन रूपेण राजन्-शब्दस्यार्थ इति। ततोऽर्थवत्वाद् युक्तः, ततो विभक्त्युत्पत्तिः। भाष्येत इति। भाष् व्यक्तायाम्, आते सार्वधातुके यण्। कुले इति। औरीम्, द्वित्वं स्यादिति। सामान्यव्यञ्जननिमित्तकमिति शेषः। ह्रस्वैकारस्य इकारो भवेदिति। सन्ध्यक्षराणां ह्रस्वादेश इदुताविति वचनात्। ननु परश्च लोपमिति वचनेन कुल इत्यत्र लुप्तायां विभक्तौ कथं विभक्त्यन्तता प्रयुज्येत, उच्यते—परनिमित्त आदेश इति। पूर्वस्मिन्स एव बोद्धव्यः। विभक्तिलोपोऽपि युज्यते। विभक्त्यन्तत्वमेव विभक्तिग्रहणं च प्रकरणान्तरविहितानामपि त्यादिविभक्तीनां ग्राहकम्, अन्यथा स्यादिग्रहणमेव कुर्यात्।

अथ भित् छित् एवमादीनां क्विबन्तानां कथं लिङ्गसंज्ञा यावता क्विबन्तो धातुत्वं न जहातीति धातव एवैते तत्र धातुवर्जमिति प्रतिषेधो प्राप्नोति, अस्त्येतत्, किन्तु यदयं युजेरसमास इति युजेः क्विबन्तस्य घुटि परतो नुरागमं शास्ति ततो ज्ञायते भवति क्विबन्तस्यापि धातोः लिङ्गसंज्ञा। नह्यसत्यां तस्यां घुट उत्पत्तिर्युज्यते। अथ धातुविभक्तीत्येवं कस्मान्न क्रियते। एवं हि कृते अक्षरलाघवं भवत्यर्थवद् ग्रहणञ्च न[3] कर्तव्यं जायते, पर्युदासवृत्त्यैव धातु-

१. तथा तु भाष्येत इति (वा०)
२. पर (वा०)
३. कर्तव्यं न (वा०)

विभक्त्यन्तसदृशस्यार्थवतस्संज्ञित्वेन विज्ञानात्, तर्हि वर्णग्रहणेन, नैतत्, नञो निर्देशे हि सति धातुविभक्तिविषयेऽपि कश्चिदल्पमतिः[1] संज्ञामाशङ्क्येत् । नञा निर्दिष्टपरिभाषादर्शनात् सादृश्यस्य चानवस्थितत्वाच्छब्दमात्रेणाऽपि सादृश्यं परिगृह्येत्, ततश्च धातुना शब्देन विभक्त्यन्तेन सदृशस्य शब्दस्य संज्ञा विज्ञायते तथा राजन्शब्दे प्रत्येकमनर्थकानामपि वर्णानां संज्ञा स्यात् । अर्थवत्त्वेन तु सादृश्यमाश्रीयते, तदर्थवतस्संज्ञेयमिति नास्त्येष निश्चयः । पर्युदासे चैवमुच्यते । प्रसज्यप्रतिषेधे तु सादृश्याभावात्कथमर्थवतस्संज्ञा लभ्यत इति । वर्जग्रहणमेव कर्तव्यम् । अर्थवदिति किमिति, अर्थवद्ग्रहणपरिभाषयार्थवत एव संज्ञा भविष्यतीति मन्यमानस्य प्रश्नः । परिहारमाह—वृक्ष इत्यादावप्ययं भावः नियतशब्दस्वरूपमादाय यत्र कार्यं विधीयते तत्रैषा परिभाषा व्यवस्था हेतुत्वेन स्मर्यते । यथा—आभोभ्यामित्यत्र । अत्र हि लोपयतेः भो इति नियतरूपापादानेन विधीयमाने सति प्रभोराश्रय इत्यत्र न प्रवर्तते । इह तु रूपविशेषस्य संज्ञित्वेन कस्यचिदनुपादानादेतस्याः परिभाषाया अनुपस्थाने[2] सत्यनर्थकानामपि वृक्षेत्यादावयवानामकारादीनां संज्ञा प्रसज्येत्, ततश्चाव्ययेभ्य इव तेभ्यो विभक्तिः प्राप्नोति, सा तेषां लिङ्गसंज्ञानिबन्धना मा भूदित्यर्थवद्ग्रहणम् । यदि तर्ह्यनर्थकाः वर्णाः तत्समुदायस्यार्थवत्वं केन हेतुना स्यात्, उच्यते—अबाधितायां समुदायार्थप्रतीतौ किमत्र कारणोपन्यासेन, दृश्यते चावयवानाम् आनर्थक्येऽपि[3] समुदायस्यार्थवत्वम्, तद्यथा विक्षिप्तानि रथाङ्गानि प्रत्येकं व्रजिक्रियायामसमर्थान्यपि समुदायभावमापन्नानि समर्थानि भवन्ति । अभावशशविषाणादिशब्दानां बाह्यार्थत्वाभावेऽपि बुद्धिप्रतिभासमानेनार्थेनार्थवत्वाल्लिङ्गसंज्ञा प्रवर्तत एव ।

तस्मात्पराः विभक्तयः २।१।२

सि औ जस्, अम् औ शस्, टा भ्याम् भिस्, ङे भ्याम् भ्यस्, ङसि भ्याम् भ्यस्, ङस् ओस् आम्, ङि ओस् सुप् इत्यादि विभक्तिरिति । विपूर्वाद् भजेः विभज्यत आभिः लिङ्गार्थः कर्मादिभावेन विगृह्यते, स्त्रियां क्तिः । स्यादीनां द्वन्द्व इति । नन्वत्र कृते द्वन्द्वे ऐकपद्यात् संहितैकपदे नित्येति वचनात् यत्वादिना सन्धिकार्येण भवितव्यम् तत् कस्मान्न भवति, न भवति, विभक्ति-

---

१. प्रतिभः (भं०)
२. अनुपादाने (वा०)
३. अनर्थके (वा०)

स्वरूपपरिज्ञानभ्रान्तिप्रसङ्गात्। सन्धिकार्ये कृते (वा[1] कियती) विभक्तिरिति भ्रान्तिः प्रसज्येत। लुप्तजस्कं चैतदिति पदापेक्षया नपुंसकेन च निर्देशः स्यादिभ्यः स्वरूपेणार्थेनार्थवत्वादुत्पन्नस्य जसो लोप आदिलोप इत्यादिना। तस्माल्लिङ्गात् पराः स्यादयो विभक्तयो भवन्तीति। एतेन परत्वं विभक्तित्वं चानूद्य स्यादयो विधीयन्त इति दर्शयति। अथ स्यादीनां विभक्तिसंज्ञार्थमिदं वचनमिति कस्मान्न व्याख्यायते, कथमविहितानां तेषां संज्ञा सम्बन्धो युक्त इति इति चेत्, न प्रथमाविभक्तिरित्यादिना प्रकरणेन तेषां विशिष्टं विधानमस्त्येव। अत्रोच्यते – यदीदं विभक्तिसंज्ञार्थं स्यात् ततः स्यादीनां स्वरूपेणोपादानं ग्रन्थगौरवहेतुत्वादपार्थकं स्यात्। प्रथमादय इत्येव कुर्यात्। विधौ तु प्रत्येकं प्रत्ययस्वरूपपरिज्ञानार्थमवश्यं स्यादयः सर्वेऽत्रोपादेयाः। तस्मात् प्रथमादय इत्यकरणान्नेदं संज्ञार्थमित्यवगम्यते। ननु प्रथमादयः इति कृते घुट्संज्ञा पञ्चानां प्रथमादिविभक्तीनामपि प्राप्नोति, प्राप्नुयाद् यदि न सखिष्टादावग्निरिति वक्ष्यमाणेन व्याख्याक्रमेण ज्ञापकं न स्यात्। सति तु तस्मिन्प्रथमादिविभक्त्यन्तर्गतानां स्यादिप्रत्ययानामेव पञ्चानां घुटसंज्ञा विज्ञास्यते। इदानीं विभक्तिसंज्ञानुवादप्रसङ्गेन स्यादीनां संज्ञान्तरमप्यस्ति इति दर्शयन्नाह—एषाञ्चेत्यादि। कुतः पुनरेतेषां स्यादीनां प्रथमादिसंज्ञा लभ्यत इत्याह – प्रथमादिसंज्ञा इत्यादि। एषां स्यादीनामनुबन्ध उच्चारणविशेषार्थः[2]। तत्र सेरिकार उच्चारणार्थः। जश्शसोर्जकारशकारौ वा जश्शसोश्शिरित्यत्र विशेषणार्थौ। असति हि तयोरनुबन्धोपादाने अससोरिति निर्देशस्स्यात्, ततश्च व्यामोहो भवेत् किमिदमुत्सृष्टानुबन्धयोर्ङसिङसोः ग्रहणम्, अथवा प्रथमाद्वितीयाबहुवचनयोरिति। तन्न, निरनुबन्धकग्रहणे न सानुबन्धकस्येति परिभाषाव्यापारे सति प्रतिपत्तिगौरवं मा भूदिति अनुबन्धोपादानमेव ज्यायः। टा प्रत्ययस्य टकार इनटेत्यादौ विशेषणार्थः, इनेत्युच्यमाने स्थान्यादेशविभागो दुर्घटः स्यात्। अथाप्यसन्देहार्थमिन आ इत्युच्येत, एवमपि आकारस्य ग्रहणं प्राप्नोतीति, अनर्थकत्वान्न भविष्यतीति चेत्, अर्थवद्ग्रहणपरिभाषाया अनित्यत्वप्रदर्शनात् प्राप्नोत्येवेति कर्तव्यो विशेषणार्थष्टकारः। ङे इति ङकारः ङेर्य इत्यत्र विशेषणार्थः। एर्य इत्युच्यमाने वर्तमानाया आत्मनेपदोत्तमैकवचनस्याप्येकारस्य ग्रहणं प्रसज्येत। तथा च पचे इत्यादावप्येकारस्य विकरणादुत्तरस्य यत्वमाशङ्क्येत, अकारान्तस्य पच (द) इत्यस्यालिङ्गत्वादेकारस्य प्रकरणान्तरस्थत्वान्नैवं भविष्यतीति चेत् तदुत्तरे प्रति-

१. का कियिते (उभयत्र)
२. विशेषणार्थः (?)

पत्तिलाघवकारी ङकार एवानुबन्धो ज्यायान् । ङसि ङसोरपि ङकारेकार-ङकाराः ङसिङसोरलोपश्चेत्यत्र विशेषणार्थः सुपः पूर्वाचार्यप्रसिद्ध्या पठितो न त्वस्य पाठे प्रयोजनं पश्यामः ।

वृक्षाः इति । जसीति दीर्घः । वृक्षानिति । शसि सस्य च न इति दीर्घत्वं नकारो वृक्षाभ्यामित्यकारो दीर्घमिति दीर्घः । वृक्षायेत्यादावपि वृक्षेभ्य इति घुटि बहुत्वेत्वे इत्येत्वम् । ननु प्राक्तनस्यैव लिङ्गग्रहणवशाद्विभक्तिविपरिणाम इति । इति[1] पञ्चम्यन्तता विज्ञानादवधिभावो विज्ञास्यते तत्किं[2] परामर्शार्थेन तस्माद् ग्रहणेनेत्याह—तस्माद् ग्रहणमित्यादि । ग्रहणमुच्चारणम् इत्यर्थः । ततोऽस्मात्सूत्राद्वक्ष्यमाणे प्रकरणे लिङ्गग्रहणस्याधिकारो यथा स्यादिति तस्माद् ग्रहणं क्रियते । इह तु तस्यानुवृत्तिरानन्तर्यादेव सिद्धेति नेहार्थं तदुपयुज्यते । यद्येवम्, उपधादिसंज्ञा धातुविषये न स्युः, सत्यम्, अस्य उपधाया इति व्यवहाराद् भविष्यति । ननु सकलशास्त्रव्यापिन्या प्रत्यय पर इति परिभाषया[3] स्यादयः परे विज्ञास्यन्त इति[4] किं परग्रहणेन । सा च परिभाषा न त्वधिकारः अन्यथा अणादीनां स्त्रीप्रत्ययानां च[5] परत्वं न स्यादित्याह—प्रत्यय पर इत्यादि । अनेकप्रकरणव्यवहितायां परिभाषायामपेक्षमाणायां मन्दमतीनामवैस्पष्ट्यं[6] स्यादिति । परग्रहणे स्यादिति तानगृहीतुं परग्रहणं क्रियते । नन्वयं यथा असत्यपि विभक्तिग्रहणे विशेषणे पूर्वाचार्यप्रसिद्धिवशात् त्यादयो विभक्तय इति व्यपदिश्यन्ते यथा स्यादयो विभक्तयोऽपि व्यपदेक्ष्यन्ते । अन्तरेणापि विभक्तिग्रहणं तत्किं विभक्तिग्रहणेन स्यादिविशेषणार्थेन इत्याह—त्यादिवत् स्यादीनामित्यादि । त्यादिवदवगते स्यादीनां विभक्तिव्यवहारे यद्विभक्तिग्रहणं क्रियते तदाकारो दीर्घमित्यादावुपयोगार्थप्रकारो दीर्घं घोषवति विभक्तिसम्बन्धिन्येव दीर्घमापद्यते । एतस्यार्थस्य प्रतिपत्तिर्यथा स्यादिति (देववानित्यादौ[7] वन्तुप्रत्यये दीर्घाभावः) शसि सस्य च नेत्येषोऽपि विधिरल्पशो ददातीत्यादौ तमादि शसि न प्रवर्तते । विभक्तिसम्बन्धिनि[8] चाकारे लोप-

१. न्यूनपाठः (वा०)
२. परामर्शत्वेन (वा०)
३. परिभाषायास्स्यादयः (वा०)
४. तत् (भं०)
५. शब्दानां (वा०)
६. असति (भं०)
७. न्यूनपाठः (भं०)
८. सम्बन्धिन्यकारे च (भं०)

विज्ञानाद् दण्डाग्रमित्यादावकारे लोपमित्येतन्न भवति तदेवमुत्तरार्थं विभक्ति-ग्रहणमित्येतदुक्तम् भवति। एतच्च यद्यप्युत्तरत्र स्याद्यनुवृत्त्यापि सिध्यति तथापि विभक्तिग्रहणस्याकृतार्थस्य सतोऽतिरिच्यमानत्वादुक्तम्। प्रसङ्ग-प्राप्तांस्तु स्यादीन्विभक्तिरिति पूर्वाचार्यसंज्ञया विशेषयितुमत्रैव विभक्ति-ग्रहणं क्रियते।

पञ्चादौ घुट् २।१।३

पञ्चन् जस् लुक्,[1] संज्ञिलक्षणेनार्थेनार्थवतो घुट्शब्दादुत्पन्नस्य जस आदिलोप इत्यादिना लोपः। राजेत्यादि सर्वत्र घुटि चासम्बुद्धाविति दीर्घः। राज्ञः पश्येति, राजन् शस्, तत्रासत्यां घुट्संज्ञायामघुट्स्वरादावुच्यमानो वम-संयोगादित्यादिनाकारलोपो न स्यात्। तवर्गश्चटेति तस्य नत्वम्। अथ पञ्चानां विभक्तीनामित्यानाम्। अथेत्याक्षेपो निपातः। पञ्चशब्दोऽयं संख्या-शब्दः। संख्याशब्दस्य योगः केनचित् संख्येयेन भवितव्यम्। तत्रास्य पञ्च-शब्दस्य विभक्तयो वा संख्येयाः प्रत्ययाः वा स्यादयः, तत्र विशेषानुपादानात् युक्तानां[2] प्रथमादिविभक्तीनां संज्ञा कस्मान्न भवति, यद्यपि चायमर्थोऽनन्त-रस्य विधिर्वा भवतीत्यनन्तरस्यादि अनुवृत्त्यापि परिहर्तुं शक्यते। तथापि स्वतन्त्रसिद्धं[3] परिभाषान्तरमस्तीति प्रदर्शयितुमाह—न भवतीत्यादि। यद्य-नेन पञ्चानां विभक्तीनां संज्ञा स्यात् (ततस्तृतीयाचतुर्थ्योरपि[4] घुड्व्यपदेशः प्राप्नोति। एवञ्च सख्या सख्ये इत्यत्र सखिशब्दस्य) घुट्संज्ञकयोष्टाङ्योः परयोः परत्वाद् घुटित्वे इत्येत्वे कृते सति इकारान्तत्वस्य विहितत्वादिदुदग्नि-रित्यग्निसंज्ञायाः प्राप्तिरेव नास्ति, तदप्राप्तौ च सत्यां तन्निबन्धमपि कार्यं न भवति, एत्वञ्च न सम्भवतीति तस्या अग्निसंज्ञायाः योऽयं निषेधारम्भः सः फलशून्यो भवेत् निषेधस्याभावात्, तस्मात्ततो निषेधारम्भात्पञ्चमशब्दस्य विभक्तीरपास्य प्रत्यया एव[5] सङ्ख्येया इत्यनुमीयते[6] क्रमे व्यतिक्रमे कारणा-भावादादाविति शब्दमवैस्पष्ट्यं स्यात्।

---

१. वतेश्च जस्शसोर्लुक् (भं०)
२. पञ्चानाम् (वा०)
३. परिहारान्तरम् (भं०)
४. न्यूनपाठः (भं०)
५. च त्व (वा०)
६. इत्यवसीयते (भं०)

जश्शसोः नपुंसके २।१।४

जस्च शस्च तौ जश्शसौ। सामानि रम्याणि, सामानि पठति। जश्शसोः शिः, घुटि चासम्बुद्धाविति दीर्घः। रम्याणि पठतीत्यनयोरुपन्यासो जश्शसोः प्रवृत्ति प्रदर्शनार्थः। ननु जसः पूर्वसूत्रेण सिद्धा घुट्संज्ञा, तदपार्थकम् तस्य पुनरिहोपादानमित्याह—जसः सिद्धायां घुट्संज्ञायामित्यादि नियमस्वरूपं प्रदर्शयितुमाह—नपुंसके जस एवेत्यादि। नान्यस्येति सिप्रभृतेः चतुः संख्यावच्छिन्नघुट्संज्ञकस्य नपुंसक एव जसो घुट्संज्ञेति तु विपरीतः नियमो न भवति। राजान इत्यादौ पुंसि घुट्संज्ञाया अभावप्रसङ्गात्। सामनी वेमनी इति, औरीम्, नपुंसके जस एव घुट्त्वादौकारस्य घुट्त्वव्यपदेशस्य नास्तीति घुटि चासम्बुद्धाविति दीर्घाभावः। ननु नपुंसकविषये जश्शसोरवश्यं भाविना शिभावेनैव भवितव्यम्, ततश्च लाघवार्थं शिनपुंसक इति कस्मान्न क्रियते, एवमपि कृते जश्शसोरेव संज्ञा विज्ञास्यते तत् किं जश्शसोरित्यनेन स्यात्। मतम्। एवं कृते सति शस एव शेर्ग्रहणं स्यात् न तु जसश्शिः, तस्य पूर्वेण सिद्धत्वादिति, तन्न, एवं हि विज्ञायमाने सत्यसन्देहार्थं शस्नपुंसक इति कर्तुमुचितं स्यात्। शिरिति कृते नपुंसकग्रहणमपार्थकं स्यात्, नापार्थकम्, असति हि तस्मिन् शस एव शिग्रहणेन ग्रहणं स्यात्, न तु जसः, शसो ग्रहणे शसित्येवं कुर्यादिति चेत् न, पुंस्यपि शसो घुट्संज्ञा प्रसङ्गात्, तस्मान्नपुंसकग्रहणं जसोऽपि शेः परिप्रापकत्वान्नापार्थकत्वमिति शिर्नपुंसक इति करणाज्जसोऽपि शेर्ग्रहणं भविष्यति। एवं तर्हि शक्यत एवं कर्तुम्, प्रतिपत्तिगौरवं तु स्यात्।

आमन्त्रिते सिः सम्बुद्धिः २।१।५

मत्रि गुप्तपरिभाषणे आङ्पूर्वः इकारो नकारागमार्थः। अनिदनुबन्धानामिति प्रतिषेधकरणाज्ज्ञापकान्नकारागमः, चुरादित्वादिन्, आमन्त्रणमामन्त्रितम्, नपुंसके भावे क्तः, इट् निष्ठेटीन इतीनो लोपः, सम्बोधनं सम्बुद्धिः, सम्पूर्वाद् बुधः स्त्रियां क्तिः। आमन्त्रितेऽर्थे यस्सिरिति आमन्त्रणे चेत्यनेन विहितः। हे गङ्गे इति। अत्र लोपात्पूर्वं स्वरादेशत्वात् सम्बुद्धौ चेत्येत्वे कृतेऽपि ह्रस्वनदीत्यादिना श्रद्धाग्रहणसामर्थ्यात् सम्बुद्धिलोपः। गङ्गे इति सम्बुद्धौ चेत्येत्वं न भवति[1]।

आगम उदनुबन्धः स्वरादन्त्यात् परः २।१।६

आगच्छतीत्यागमः, पचादित्वादच्, अनुबध्यते कार्यार्थमासज्यते इत्यनु-

---

१. स्यात् (वा०)

बन्धः। अकर्तरि चेति घञ्। स्वरादिति। स्वरतः पुंसि संज्ञायामिति घः, अन्ते भवः अन्त्यः इति यदुगवादित—इति योगविभागाद् यत्। परिभाषेयमिति। तत्र परत्वं परिभाष्यमाणमुदनुबन्धः आगमः परिभाषणभाक्। अन्त्यस्वरादित्यवधिनिर्देशः। का पुनरियं परिभाषणमित्याह—अनियमे नियमः परिभाषति। इह चानियमः प्राप्तः, यदागम उदनुबन्ध आगमिनः क्वावकाशो वर्ततामित्यनियमेनागमस्य प्रवृत्तौ प्राप्तायां नियमार्थमिदं वचनं परिभाषेत्युच्यते, सा चेयं परिभाषा लिङ्गवती। लिङ्गमुकारोऽनुबन्धश्चिह्नमित्यर्थः। एतेन चिह्नेन विधिवाक्येषु इयमुपतिष्ठते। विध्यङ्गशेषभूतायां वा विधिः। सो नुरित्यादि। तस्य यदङ्गं सो नुरिति नुकारागमः। तस्य शेषभूता तदङ्गभावं प्राप्तेत्यर्थः। अङ्गभावाभ्युपगमस्य तु अनडुह इत्यस्यान्त्यात् स्वरात्परस्सौ परः नुकारागमो भवतीत्येकवाक्यतया मन्तव्यः, तदेवं विधिवाक्यं दर्शयति। सोऽनुरिति। अनड्वामिति। वह् प्रापणे अनस्पूर्वः। अनो वहतीत्यनसि डुश्चेति विण्, अनसश्चान्त्यस्य डत्वं वेर्लोप इति वलोपः, उपधादीर्घः, सि, सो नुरिति नुकारागमः संयोगान्तलोपः। आगमग्रहणं किम्, मरुत्वान्, तदस्यास्तीति वन्तुप्रत्ययः। भवत्ययमुदनुबन्धो नत्वागमः इति नायमन्त्यात्स्वरात्परो भवति। पर इति किम्, पूर्वो मा भूत्। न च पञ्चम्या निर्दिष्टे परस्येति परिभाषया परग्रहणमवाप्यते, कुतः, परस्येति षष्ठीनिर्देशेन परस्मिन्देशे स्थितस्य सतः कार्ये[1] कर्तव्ये स्याः परिभाषायाः उपस्थानात्, तथा[2] ईतस्यास इत्यत्र नहि आसः परस्यान्प्रत्ययस्य प्रत्यय पर इति वचनादेव[3] आ परत्वस्य ईत्वं क्रियते ततोऽत्र युज्यते तस्योपस्थानमिह तु नैवमिति परग्रहणं क्रियते।

तृतीयादौ तु परादिः २।१।७

इयमपि परिभाषा तत्र परादित्वं परिभाष्यमाणमुदनुबन्ध आगमः परिभाषणभाक्। तृतीयादाविति सप्तमी सा तु कालभावयोरित्यनेन। तुशब्दः तृतीयादौ तु विभक्तिगणे सत्युदनुबन्ध आगमः परस्यादिर्भवतीति पूर्वस्मादत्र विशेषं द्योतयति। ननूत्तरत्र तृतीयादिग्रहणस्याननुवृत्तिद्योतनार्थस्तु शब्दस्यात्, तत्कथमसौ विशेषं द्योतयेत्, ब्रूमः, यदयं न सखिष्टादावग्निरित्यत्र आदिग्रहणं करोति ततोऽवगम्यते नाग्निसंज्ञाविधौ तृतीयादिग्रहणमनुवर्तत इति

१. कर्तव्ये कार्ये (भं०)
२. यथा (भं०)
३. वचनादवाप्त (भं०)

नदीश्रद्धासंज्ञाविधावपि नानुवर्तिष्यते। नद्या अम्शसोरादिलोपविधानात् श्रद्धायास्सिलोपारम्भाच्च। एवमुपधादिसंज्ञाविधायकेष्वपि वाक्येषु तृतीयादिग्रहणं ज्ञापकद्वारेण नानुप्रवर्तिष्यते इति न तस्योत्तरत्रानुवृत्तिद्योतनार्थस्तु शब्दः। ततो विशेषमेवासौ द्योतयति। परस्य प्रत्ययस्येति शास्त्रे परत्वेन प्रत्ययस्यैव प्रसिद्धेः परस्यावयवो भवति। एतेनादिशब्दोऽयमिहावयव-वचन इति दर्शयति। दृश्यते चावयवार्थवृत्तिरादिशब्दो यथा—धात्वादेष्षस्स इत्यत्र परावयवे सति यत्फलं तद् दर्शयितुमाह—तद्ग्रहणेनेत्यादि। तद्ग्रहणेन परः प्रत्ययः प्रत्यवमृश्यते पूर्वेणेति। आगम उदनुबन्ध इत्यादिना सर्वेषामिति सुरामि सर्वत इति सुः, उकार इहार्थः। अस्य परावयवत्वे सति किं सिद्धमित्याह—अकारागमस्येत्यादि लिङ्गावयवत्वे तु घुटि बहुत्वेत्वे इति निमित्तं सम्पूर्वयोः[1] नोपपद्येत। अथ तृतीयायामुदाहरणं किम्, केचिदाहुः - अतिरिणा अतिनुनेति। अत्र रायमतिक्रान्तेन कुलेन, नावमतिक्रान्तेन जलेनेति विगृहीते अतिरै, अतिनौ इत्येताभ्यां टा-प्रत्यये विहिते नपुंसकह्रस्वात्पूर्वमागम-(आदेशयोरागमविधिर्बलवानिति[2] वचनात् ह्रस्वात् पूर्वादागम) विधेर्बलवत्त्वेन नामिनस्स्वर इति नुः, तस्य परावयवत्वात्स्वरान्तस्य लिङ्गस्योच्यमाने स्वरो ह्रस्वो नपुंसक इति ह्रस्वः सिद्धो भवति। अन्ये तु व्याचक्षते—प्रत्ययोत्पत्तिमनपेक्ष्य प्रकृत्युत्पत्तिमनन्तरमेवात्र नपुंसकस्य ह्रस्वत्वं प्रवर्तते, तद्धि नपुंसकानुवृत्तिमपेक्ष्यमाणं न प्रत्ययोत्पत्तिं प्रतीक्षते एवं च कृते ह्रस्वत्वे प्रत्यये च सञ्जाते नुरागमो लिङ्गावयवोऽपि भवन्न दोषायेति नेदमुदाहरणं तृतीयायाः। किमर्थं तर्हि तृतीयाग्रहणमिति चेत्, चतुर्थ्यादीनामुपलक्षणार्थं तृतीयादाविति बहुव्रीहिणा चतुर्थ्यादय उपलक्ष्यन्ते, यद्येवम्, चतुर्थ्यादाविति कर्तव्ये किं तृतीयाग्रहणेन, अस्ति च चतुर्थ्यादावागमस्य परादित्वात् फलं किं तदिति चेत्, सर्वस्यै सर्वस्या इत्यादावन्तादेशवर्तिनस्सकारस्य विसर्जनीयाभावः। अत्रोच्यते, अतद्गुणसंविज्ञानोऽपि बहुव्रीहिरस्तीत्येतदनेन तृतीयाग्रहणेन साध्यते, नह्युपलक्षणमतद्गुणसंविज्ञाने बहुव्रीहौ कार्येण युज्यते। यथा—चित्रगुमानयेत्यत्र चित्रगव्याः। अत्रापि चोपलक्षणभूता तृतीया न स्वतः कार्यं प्रतिपद्यते।

---

१. संशयो (भं०)
२. न्यूनपाठः (भं०)
३. नपुंसकार्थवृत्तित्वमपेक्ष्यमाणम् (भं०)
४. न्यूनपाठः (भं०)

इदुदग्निः २।१।८

इत् उत् इति प्रथमान्तपदे। वर्णग्रहणेत्यादि। वर्णो यत्र गृह्यते तत्र सवर्णोऽन्तो यस्य तस्य विधिकार्यं भवति। एवञ्चाग्निसंज्ञेयमिदुदिति वचनादिकारोकारान्तयोश्शब्दयोः विज्ञायते। यद्येवम्, अस्यापत्यमिः, अ शब्दाद् भगवतो विष्णुवाचकादिणतः इतीञ्, इवर्णावर्णावित्यकारलोपः। ततो द्वितीयैकवचनम्। इं पश्येत्यत्र न प्राप्नोति (सत्यम्[1], आद्यन्तवदेकस्मिन्नित्यन्तवद्भावं भविष्यति। तपरत्वमसन्देहार्थम्) इति तपरशब्दात् कर्मधारयात् तु प्रत्ययः। असति तपरत्वे अग्निरिति सन्धौ कृते किमिदं यवयोर्ग्रहणम्। अथेकारोकारयोरिति सन्देहस्स्यात्, सः मा भूदिति तपरकरणम्। नन्वसति तस्मिन्स्वरस्सवर्णस्य ग्राहकः इति ईकारान्तावपि शब्दौ संज्ञां प्रतिपद्येयाताम्, ततश्च नियं लुवमित्यत्रापि अग्निसंज्ञाकार्यम्। अमोऽकारलोपः स्यात्, नैतत्, अस्याः परिभाषायाः पूर्वमनित्यत्व-प्रतिपादनादिह ग्रहणादिकारोकारयोरेव परिग्रहो विज्ञास्यत इत्यसन्देहार्थमेव तपरकरणम्।

ईदूत्स्त्र्याख्यौ नदी २।१।९

स्त्र्याख्याविति द्विर्वचननिर्देशादीदुदित्यत्रापि द्विर्वचनं विज्ञायते तच्चादिलोप इत्यादिना लुप्तत्वान्न श्रयत इत्याह—ईदूदिति लुप्तप्रथमाद्विर्वचनमिति। अन्तर्वर्तिनीं च प्रत्ययलक्षणेन विभक्तिमाश्रित्य वर्गप्रथमेत्यादिना तृतीयो दः, स्त्र्याख्यावित्यत्र प्रत्ययोत्पत्तेर्पूर्वं ख्याजादेशः। तत्र[2] असार्वधातुकविषये व्याख्यानात् मूलविभुजादिभ्यश्चेति क-प्रत्यय इत्येतेन स्त्र्याख्यशब्दोऽयं मूलविभुजादिदर्शनात् क-प्रत्ययान्तो न तूपसर्गे त्वातो डः इति ड-प्रत्ययान्तः इति दर्शयति। ड-प्रत्ययो हि कर्मण्यणीत्यनेनाण्-प्रत्ययेन परत्वात् बाध्यत इत्यण् प्रत्ययोऽत्र कर्मोपपदत्वात् स्यात्। ततश्च स्त्र्याख्यावित्यनिष्टं रूपं भवेत्, अत्र च स्त्र्याख्याविति संज्ञिपदमीकारोकाराभ्यां विशेष्यते विशेषणेन च विशेष्यस्य तदन्तविधिर्भवतीति वचनादीकारोकारान्तौ शब्दौ स्त्र्याख्यौ नदीसंज्ञौ विज्ञायेत इत्याह—ईकारोकारान्तावित्यादिशब्दौ स्त्रियाः वाचकाविति विवृण्वन्नाख्या शब्दार्थं व्याचष्टे[3]। स्त्रियाः वाचको यो पदान्तरसन्निधिमन्तरेण स्त्रियमाचक्षत इत्यर्थः। मात्र इति मात्र-शब्दस्सम्बन्धिशब्दो नित्यं

१. न्यूनपाठः (भं०)
२. कुतः (भं०)
३. विवृणोति (वा०)

स्त्रीविषय इति स्त्र्याख्यत्वात्प्राप्तः तस्य नदीसंज्ञा ईदूद्ग्रहणान्न भवति। यू इति लुप्तविभक्तिके निर्देशे कर्तव्ये तपरकरणं विस्पष्टार्थम्। अत्र स्त्रियामिति कस्मान्न क्रियते, एवमपि कृते स्त्र्यर्थवृत्तित्वं लभ्यत—एवेति[1] किमाख्याग्रहणेनेत्याह—स्त्रियामिति कर्तव्य इत्यादि। स्त्रियामिति कर्तव्ये यदाख्याग्रहणं क्रियते तस्यैतत्प्रयोजनं पदान्तरसन्निधिमन्तरेण वागिति[2] यः स्त्र्यर्थवृत्तिशब्दः तस्येयं नदीसंज्ञा यथास्यादन्यस्य मा भूदित्याख्याग्रहणसामर्थ्याद्धि नियम आश्रीयते, (स्त्रियामेव[3] ये वाचकाः ते न तु) लिङ्गान्तरमपीत्यर्थः। क्व च माभूदित्याह—इह मा भूदित्यादि। ग्रामं नयतीति ग्रामणीः, यवांल्लुनातीति यवलूः, क्विप्, अनयोः नदीसंज्ञा मा भूदित्याख्याग्रहणं क्रियते, यदि स्याद् ग्रामण्यै स्त्रियै, यवल्वै स्त्रियै इत्यत्र नदीसंज्ञानिबन्धन ऐ भावो भवेत्, कथं पुनराख्याग्रहणे नित्यस्त्रीविषये कृते सत्येतौ ग्रामणीयवलू-शब्दौ परिहर्तुं शक्येत इत्याह—नेमौ ग्रामणी-यवलू-शब्दावित्यादि। एतयोर्हि नित्यस्त्रीविषयत्वं नास्ति क्रियाशब्दत्वेन पुंस्यपि वर्तमानत्वात्। या त्वनयोः स्त्रियां वृत्तिस्सा स्त्रीशब्दसान्निध्यात्। यद्येवम्, यः शब्दः प्रथमं स्त्रीत्वविशिष्टमर्थमाह पश्चात्तु प्रकारान्तरेण लिङ्गान्तरयुक्तमर्थान्तरं तस्य तदानीमस्त्र्याख्यत्वान्नदीसंज्ञा न प्राप्नोति, कस्य, उच्यते—कुमारीमिच्छत्यात्मन इति यिन् ततः कर्तरि क्विप्, य्वोर्य्वञ्जन इति य-लोपः, चतुर्थ्येकवचनं कुमार्यै ब्राह्मणायेत्येवं प्रकारे विषये कुमारीप्रभृतेः। अस्त्येतत्, किन्त्वत्र स्त्र्याख्यत्वात्पूर्वमेव या नदी संज्ञा प्रवृत्ता तामन्तरङ्गत्वात्कृतास्पदां पश्चादुपजायमानो लिङ्गान्तरप्रयोगो न निवर्तयति बहिरङ्गत्वादिति भवत्येवमादौ संज्ञायाः प्रवृत्तिः। इयुवस्थानीयस्येत्यादि। इय् च उव् च ताविय्वौ इयुवोस्स्थानं इयुवस्थानम् (इव[4] इयुवस्थानीय) इति विगृहीते तमादित्वादीय-प्रत्ययः। यस्य शब्दस्येयुवादेशौ दृश्येते तस्य स्त्र्याख्यस्य नदीसंज्ञा नेष्यते किं सर्वस्य, नेत्याह—स्त्रीशब्दं वर्जयित्वेति। स्त्रीशब्दः स्त्री चेति धातुवद् भावादियादेशोऽपि[5] वर्ज्यते तेन तस्य नदीसंज्ञा भवत्येव। हे श्रीः हे भूरिति श्रिञ् सेवायाम् क्विब् वचिप्रच्छीति क्विप्, दीर्घश्च। भ्रू-शब्दो भ्रमेः भ्रूः[6] इति भ्रू-प्रत्ययान्तः। हे शब्द आमन्त्र-

---

१. इति (भं०)
२. खगिति (वा०)
३. यो वाचयते न च (भं०)
४. अस्य (भं०)
५. देशस्थानीयो (भं०)
६. भ्रसश्चतूरिति ऊप्रत्ययान्तः (वा०)

णाभिव्यनक्त्यर्थः। ततो द्योतनार्थेनार्थवत्वात्सिः, तस्याव्ययाच्चेति लुक् भवत एतौ श्रीभ्रूशब्दाविषुस्थानीयावेकस्य क्विबन्तस्य सतो धातुत्वात् श्रियै इत्यादाविया देशदर्शनात्। अपरस्यापि भ्रूर्धातुवदिति धातुत्वातिदेशात् भ्रुवावित्यादावुवादेशदर्शनात् स्त्र्याख्यौ चैतेनानयोर्नदीसंज्ञा निषिध्यते। तन्निषेधार्थं भवतीत्याह—सम्बुद्धौ ह्रस्व इत्यादि। स्त्रीशब्दस्येत्यादि। हे स्त्रिरित्येव भवतीति नदीसंज्ञानिमित्तयोः ह्रस्वसम्बुद्धिलोपयोरनिषेधात्। यद्येवम्, तत्कथं महाकविप्रयोगः "विमानना सुभ्रु कुतः पितुर्गृहे" इति। भवति हि सुभ्रूशब्दो निषेधविषयः। ततश्चात्रापि ह्रस्वसम्बुद्धिलोपौ न स्याताम्। एवं तर्ह्यसाधुरेवायं प्रमादात्प्रयुक्तः, नञानिर्दिष्टस्यानित्यत्वाद्वा क्वचिन्निषेधो न प्रवर्तते, तदत्र सूरयः प्रमाणम्।

आ श्रद्धा २।१।१०

आ इति लुप्तप्रथमैकवचनम्। श्रत्पूर्वाद् धात्रः। अतएव निपातनादाङ्-प्रत्ययः। आकारान्तः स्त्र्याख्य इत्याकारेण स्त्र्याख्यस्य विशेषणात् पूर्ववत् तदन्तविधिः। मतिरिति। मन ज्ञाने, भावेऽर्थे क्तियां क्तिः, पञ्चमोपधेति दीर्घः, वनति-तनोतीति पञ्चमलोपः। आतश्चातः[1] इत्याकारस्याकारः। भवत्ययं मतिशब्दः स्त्र्याख्यः नत्वादन्त इति श्रद्धासंज्ञाया अभावः। कीलालपा इति। पा पाने कीलालं पिबतीति मनिनादिसूत्रेण च शब्दाद्विट्, टकारो विड्वनोरा इत्यत्र विशेषणार्थो वेर्लोपः, क्विप्-प्रत्ययः त्वत्र[2] न क्रियते, वेर्लोपात् पूर्वं स्वरादेशत्वाद् दामागायतीत्यादिना ईत्वप्रसङ्गात्कीलालपशब्दः पुंस्यपि स्यान्न[3] नित्यं स्त्रीविषय इति श्रद्धासंज्ञः।

अन्त्यात्पूर्वोपधा २।१।११

उपपूर्वाद् धात्रः, उपधीयत इत्युपधा इति, आतश्चोपसर्ग इत्याङि सत्यालोपो सार्वधातुक इत्यालोपः। स्त्रियामादाप्, अन्त्यात् वर्णात् पूर्वो वर्ण इति पूर्वं तत्र ग्रहणस्य वर्णाधिकारार्थत्वादेवमुक्तम्। पञ्चानाम् सप्तानाम्, इति पञ्चन् सप्तन्, आम् संख्यायाष्णान्तायाः इति नुरागमः नान्तस्य चोपधाया इति दीर्घः। लिङ्गान्तनकारलोपः। अन्त्यात् वर्णादिति किम्, अन्त्याद्वर्णसमुदायान् मा भूत्। किञ्च स्यात्, शिष्ट इत्यादौ शासेरिदुपधाया इति

१. पश्चात्र (वा०)
२. तत्र (भं०)
३. वृत्तेर्न (भं०)

श-मात्रस्येत्वं स्यात्। पूर्वो वर्ण इति किम्, वर्णसमुदायः पूर्वो[1] मा भूत्, तथा चात्रैव शौ इत्यस्येत्वं स्यात्।

व्यञ्जनान्नोऽनुषङ्गः २।१।१२

अनुपूर्वात् ष्वञ्ज सङ्गे इत्यस्मात् अनुषज्यत इत्यकर्तरि चेति घञ्, चजोः कगाविति गत्वं, विदुष इत्यादौ विद् ज्ञाने वर्तमाने शन्तृङ्, वेत्तेश्शन्तु वन्सु इति तस्य वन्सुरादेशः। अन्विलुक्, ङे न गुण इति गुणाभावः। विद्वन्स्, महन्त् इति स्थिते, शस्, तकारस्यानुषङ्गसंज्ञायां सत्यां अनुषङ्गश्चाक्रुञ्चेरिति न लोपः। ऊर्जेरिति। ऊर्ज बलप्राणनयोः। ऊर्जनमिति। क्विबिति भावेऽर्थे कृत्ययुटोऽन्यत्रापीति क्विप्, न तु क्विप्चेत्यनेन क्विप्। एतेन हि कर्तरि क्विब्विधीयते। कारितलोप इति कारितस्यानामिड्-विकरण इत्यनेन। अथ किमर्थमनुषङ्ग इति गुर्वी संज्ञा क्रियते, यावता व्यवहारसिद्धये दा शिडिति-वल्लघ्व्येव संज्ञा प्रणेतव्येत्याह—गुरुसंज्ञाकरणमित्यादि। अनुषङ्गसंज्ञा-निमित्तं कारणं यस्य लोपस्य तस्य कार्यान्तरेण सह सम्प्रधारणायां सत्यां बलवत्ता यथा स्यादिति गुर्वी संज्ञा क्रियते। तेन किं सिद्धं भवतीत्याह – तेनेत्यादि। तेन गुरुसंज्ञाकरणेनेत्यर्थः। भवद्भ्याम् (इत्यत्र[2] भवन्त् इत्यस्य भ्यामि परे) संयोगान्तलोपश्च प्राप्नोति अनुषङ्गलोपश्च। तत्र परत्वात् संयोगान्तलोप-स्स्यात्। गुरुसंज्ञाकरणात् त्वनुषङ्गलोप एव भवति इति तस्मिन्कृते घुटां तृतीय इति दत्वम्। अर्थवदित्यत्रापि नपुंसकात्स्यमोर्लोप इति सौ लुप्ते अर्थ-वन्त् इत्यस्य संयोगान्तलोपश्च प्राप्नोति। विरामव्यञ्जनादावुक्तमित्यादिना-नुषङ्गलोपश्च। तत्रानुषङ्ग एव भवति, बलीयस्त्वात्। ननु परत्वादेवासौ भवति[3], नैवम्, अन्तरङ्गत्वाद्धि संयोगान्तलोप एव प्राप्नोति। अन्तरङ्गत्वं तु तस्याल्पापेक्षत्वाद् बहिरङ्ग इति तद् बाधनेन संयोगान्तलोपो अन्तरङ्गत्वात् स्यात्। गुरुसंज्ञाकरणान्नानुषङ्गलोप एव भवति।

धुड् व्यञ्जनमनन्तःस्थानुनासिकम् २।१।१३

(अनन्तस्थानुनासिकशब्दो[4] पूर्वं कृतव्युत्पत्तिः, अन्तस्थाश्च अनुनासिकाश्च तदन्तस्थानुनासिकं ततो नञ्समासः।) विद्युद्भ्याम्, विपूर्वाद् द्युतेः विद्योतन-

---

१. पूर्वम् (भं०)
२. न्यूनपाठः (भं०
३. भविष्यति (भं०)
४. अन्तःस्थानुनासिकमिति द्वन्द्वः ततो नञ्समासः (भं०)

शीलेति क्विब्भ्राजि इति क्विप्, धुटां तृतीय इति दत्वम्। चत्वारि सामानीति जस्शसोरन्यतमस्य शिभावः। अत्र रेफनकारयोरन्तःस्थानुनासिकयोर्यदि धुट्संज्ञा स्यात् ततः किं स्यादित्याह—धुड्स्वरादित्यादि। व्यञ्जनग्रहणं किम्, स्वरस्य मा भूत्। अभित्साताम्। अत्र यद्याकारस्य धुट्-संज्ञा स्यात् ततो धुटश्च धुटीति सिज्लोपः स्यात्। नन्वेवं सति धुटश्च धुटीत्यनेन इटश्चेटीति वचनमपार्थकं स्यात्। नापार्थकम्, ईटि परे सिचो लोप इट एव परस्येति नियमार्थत्वात्। तथा च अचैषीदित्यादौ सिच एव श्रवणं सिध्यति। इतरथा ह्यत्रापि धुट् च धुटीति सिच् लुप्येत्, तस्मात् स्वरस्य संज्ञा मा भूदिति व्यञ्जनग्रहणं तच्चानन्तस्थानुनासिकमिति प्रसज्यप्रतिषेध पक्षेक्रियते।

अकारो दीर्घं घोषवति परे २।१।१४

अकारान्तं लिङ्गमित्येतेन लिङ्गग्रहणमिहाभिसम्बध्यमानमकारेण विशेष्यते विशेषणेन विशेष्यस्य तदन्तविधिः भवति इत्यकारग्रहणेनाकारान्तं लिङ्गं कार्यत्वेन विज्ञायते इति दर्शयति। यद्येवम्, आभ्यामित्यत्रेदमोऽनक् इत्यत्रात्वे दीर्घत्वं न प्राप्नोति, अनकारान्तत्वादन्तवद्भावाद् भविष्यतीत्यदोषः। घोषवदादौ विभक्तौ परस्यामित्युक्तम्। तत्रापरश्चोदयति कथं पुनः घोषवतीत्यनेन घोषवदादिर्लभ्यत इत्याह—यस्मिन्विधिरित्यादि। यस्मिन्घोषवति परे विधिकार्यं तत्तदादाविति। सघोषवानादिर्यस्यां विभक्तौ तस्यां प्रत्येतव्यम्। एवञ्च घोषवदादौ विभक्ताविति लभ्यते देवायेति। ङेर्यः, अनेन दीर्घः। नन्वकारनिमित्तं यत्वं कथमकारस्य दीर्घत्वं विधाय विघातं कुर्यात्। सन्निपातलक्षणो हि विधिरनिमित्तं तद्विघातस्येति, उच्यते—नास्त्यवस्थानं[1] वर्णग्रहणेऽस्याः परिभाषायाः हि लोपविधावहन्तेरिति प्रतिषेधारम्भात्। सः ह्येतदर्थो जहीत्यत्र हि लोपो मा भूदिति। यदि च वर्णग्रहणेऽप्येषा परिभाषोपतिष्ठेत् ततो हौ परे हन्तेर्जेहाविति यो हन्तेर्जकारः सः कथं हं विघातं प्रति निमित्तं स्यात्, अतो हन्तेर्जकारस्य सम्बन्धिनोऽकाराद् वर्णादुत्तरस्य हेर्लोपो नैव प्राप्नोति हन्तेरिति निषेधो[2] नारम्भणीयं स्यात्। तदारम्भणाच्चैतदवगम्यते, नूनमेषा सन्निपातपरिभाषा वर्णग्रहणे नोपतिष्ठत इतीह च घोषवान् वर्णो दीर्घं प्रतिनिमित्तत्वेन परिगृह्यत इति सिद्धं देवायेत्यादौ वकारस्य दीर्घत्वम्। अन्ये त्वकारस्य दीर्घत्वे सति मात्राधिक्यं जायते न तु विघात इति वर्णयन्तस्सन्निपातपरिभाषायाः नायं विषय इति मन्यन्ते। कारवचनं तपरस्तत्कालस्य

१. नास्त्युपस्थानम् (मं०)
२. प्रतिषेधो (मं०)

कारशब्दपरश्च इति वचनादैस्भावो मा भूत् । खट्वाभिरित्यत्र आदिति कर्तव्ये दीर्घग्रहणं वैचित्र्यार्थं, संज्ञापूर्वकत्वाद्विधेरनित्यत्वार्थं तु न भवति । लक्ष्यानुरोधात् । देववानित्यत्वसन्तस्येति दीर्घः ।

जसि २।१।१५

अकारे लोपमिति लोपस्य बाध इति । इतरथा तु समानदीर्घत्वेन सिद्धत्वात्सूत्रमिदमनारम्भणीयं स्यात् । अग्नय इति । इरेदुरोज्जसीत्येत्वम्, अकारो दीर्घम्, जस्, घोषवतोरिति कर्तव्ये योगविभागो वैचित्र्यार्थम् ।

शसि सस्य च नः २।१।१६

न इति वकारस्य स्वरूपेणार्थेनार्थवत्वात्प्रथमा । एवमस्यादेशविषयेऽपि वाच्यं शसश्च सकारस्येति । एतेन शसस्सन्निधानात् तत् सम्बन्धिनस्सस्य नत्वं न तु सारसानित्यादौ लिङ्गसम्बन्धिन इति दर्शयति । विभक्तिग्रहणानुवृत्तेरिति । तस्मात्परा विभक्तय—इत्यतः अल्पश इति शसन्तादव्ययाच्चेति[1] सेर्लुक्, सस्येति किम्, अकारस्य मा भूत् ।

अकारे लोपम् २।१।१७

अकारे विभक्तिसम्बन्धिनि पर इति विभक्तिग्रहणानुवृत्त्याकारस्य विशेषणादिति भावः । यद्येवम्, यस्याकारस्य विभक्तिनिमित्तं तस्मिन्परेऽकारस्य लोपो न प्राप्नोति, अविभक्त्यकारत्वात् । ततश्च यस्म इत्यादौ न सिध्यतीत्याशङ्क्याह—विभक्तिनिमित्तेऽपीत्यादि । एतेन विभक्तिनिमित्तोऽप्यकारो विभक्तिरित्युच्यत इति दर्शयति । भवति हि तन्निमित्तत्वात्तच्छब्दलाभो यथा—आयुषो निमित्तं घृतमायुरित्युच्यते । एवं च विभक्त्यकारोच्यमानोऽकारस्य लोपः विभक्तिनिमित्तत्वाद्विभक्तिव्यपदेशभाज्यप्यकारे प्रवर्तत एव । ननु देवमित्यादि मुख्यो विधेर्विषयोऽस्ति । तत् कथं य इत्यादौ गौणे विषयेऽस्य प्रवृत्तिस्स्यादित्याह—यः करोतीत्याद्याचार्यवचनाद् गौणमुख्यव्यवहारो नेहाश्रीयत इति भावः ।

भिसैस्वा २।१।१८

अकार इत्येतद् इह पञ्चम्यन्तं सम्बध्यत इत्युक्तम् । तत्र कारणमाह—अर्थवशादित्यादि । विभक्तिशब्देन विभक्त्यन्तशब्दः उच्यते, अर्थवशात्प्रयोजन-

---

१. समासान्ताद् (भं०)

सामर्थ्याद्विभक्तेः। विभक्त्यन्तशब्दस्य विपरिणामो भवति। पूर्वं विभक्ति-तिरोधाने सति तस्य विभक्त्यन्तरादेशो भवतीत्यर्थः। एवञ्चाकार इत्येव पूर्वं प्रथमान्तो यद्यपि प्रकृतस्तथापीहानुवर्तमानः पञ्चम्यन्तो विज्ञायते। एवं लिङ्गग्रहणमपि प्रथमायास्तु विभक्तेः पञ्चमीत्वेन विपरिणाम इत्यशक्यं व्याख्यातुम्। परिणामो हि स उच्यते, तत्त्वादप्रच्युतस्य धर्मिणः पूर्वधर्म-तिरोधाने[1] सति धर्मान्तरोदयः। [2]यथा—पयसो दधि-भावापत्तिः। न चैव-मात्मकः परिणामः प्रथमायास्सम्भवति। नहि सा पञ्चमीभावेनावस्थिता[4]। नापि तदर्थः पञ्चम्यर्थभावेन। तत् कोऽयं विभक्तेः शब्दात्मिकायाः विपरि-णामव्यवहारः, शब्दस्य त्वकार इत्यस्य विभक्त्यन्तरादेशोऽपि, स एवायम-कार इमामवस्थां प्राप्त इति प्रत्यभिज्ञायमानत्वाच्छक्यते विपरिणामो वर्ण-यितुम्। वा शब्दो वैचित्र्यार्थ इति विचित्राणामैस्भाव-रहितानां भावो वैचि-त्र्यम्, सोऽर्थः प्रयोजनं यस्य वा शब्दस्य सः तथोक्तः। अयं भावः। वा शब्दो अयं व्यवस्थितविभाषावाची। तेन क्वचिदैसादेशस्याप्रवृत्तिरिति [5]भद्रं कर्णेभि-रित्याद्यपि सिद्धम्। छन्दोविषयेऽस्मिन्प्रयोगे किं यत्नेनेति चेत्, तर्ह्यर्वन्नर्वन्त-मित्यादिकमपि सूत्रद्वयमयत्नार्हः स्यात्। तस्मात्सूत्रकारेणैव[6] कृतच्छन्दोऽर्थो[7] यत्न इति युक्तो वा शब्दः कर्णेभिरित्याद्यर्थः। घुटि बहुत्वे त्वे इत्येवं प्राप्त-मिति तद् बाध्यत इति शेषः। ननु देवैरित्यादयः प्रयोगाः एस्यपि कृते सिद्धाः तत्किमैस्भावेन, एस्क्रियतामैस्वा कोऽत्र विचार इति चेत्, न खलु कश्चित्[8] क्रमप्राप्त्या एसिति पाठो युक्त इत्याह—एसिति कर्तव्य इत्यादि व्यञ्जना-न्तशब्दविषय—ऐसादेशं विना नास्ति सिद्धिरिति तदर्थमैसित्युच्यते। कः पुन-रसौ व्यञ्जनान्तो विषय इत्याह—अतिक्रान्तैः जरामतिजरसैरिति। जरा शब्दो जृषः धानुबन्धेत्यङ्-प्रत्ययः। गुणस्तु ङे न गुण इति निषेधोऽपि जरा जरस्स्वरे वेति निर्देशाद् भवति, एकदेशविकृतस्यानन्यवदिति वचनादिति। अन्यथा तु जरा-शब्दस्योच्यमानो जरस्भावः कृतह्रस्वस्य तस्य नैव प्राप्नोति

---

१. भावे (मं०)
२. न्यूनपाठः (मं०)
३. तुविभक्तेस्सः न सम्भवति (मं०)
४. न्यूनपाठः (वा०)
५. भद्रं कर्णेभिः शृणुयाम देवा (वा०)
६. तेन क्वचिद् (मं०)
७. च्छन्दार्थो कृतः (मं०)
८. कश्चिदित्यर्थः (मं०)

शब्दान्तरत्वात् । तस्मादतिजरसैरित्यस्य सिद्ध्यर्थमैस्वचनम् । एतत् प्रयोजनं विघटयितुमाह—नन्वत्रेत्यादि । अत्रास्मिन्भवदभिहिते प्रयोगे सन्निपातपरिभाषया जरस्भावो नैव प्राप्नोति । अकारान्तत्वस्य हि सन्निपातेन संश्लेषेण लक्षितो यो विधिरैसादेशलक्षणः सः तद्विघातस्याकारान्तता संश्लेषविघातस्य जरस्भावकरणेन[1] निमित्तं न भवति । एवञ्चातिजरसैरित्यत्र जरस्भावस्याप्रवृत्तेरैसादेश एव कर्तव्यः किमैस्करणेनेत्याह—एवं तर्हीत्यादि । सन्निपातपरिभाषायाः अनित्यत्वज्ञापनार्थमिदमैस्वचनम् । नित्यत्वे सति जरस्भावस्याप्रवृत्तेरफलमैस्वचनं स्यात्, तेन किं सिद्धं भवतीत्याह—तेनेत्यादि । अन्यथा त्विणत इत्यकारान्तता निमित्त इण्प्रत्ययोऽकारस्य विघातं न कुर्यात् । अन्ये तु नित्यत्वमत्र विषयेऽस्याः वर्णयन्तोऽतिजरसैरिति[2] भाव्यमित्याहुः । तत्र युक्तायुक्तत्वविवेके सूरयः प्रमाणम् ।

घुटि बहुत्वे त्वे २।१।१९

यस्मिन्विधिस्तदादौ तत्कार्यमिति वचनात् केवलस्य वा घुटो निमित्तत्वेनासम्भवात् । घुटीत्यनेन घुडादि-प्रत्ययो गृह्यते । तस्य बहुत्व इत्येतद्विषयभावेन विशेषणमित्याह—बहुत्वे स्थितो यो घुटादि-प्रत्यय इति । देवानामिति । आमि च नुः दीर्घः, तु शब्दो व्यवस्थितविभाषां समुच्चिनोति । तेन युष्मभ्यमस्मभ्यमित्यत्र एत्वं न भवति । चतुर्थीबहुवचनम् । युष्मत् अस्मत्, एषां विभक्तावन्तलोपः । भ्यसभ्यमिति अभ्यमादेशः ।

ओसि च २।१।२०

ओसिति रूपसामान्य[3]विवक्षायां द्वावप्योसौ गृह्येते । चकारो वा ओसः परस्य समुच्चयार्थः ।

ङसिरात् २।१।२१

अथ किमर्थमादित्युच्यते । मात्रालाघवार्थम् अदित्येवमुच्यताम्[4] । एवमप्युच्यमाने देवादित्यादि सिध्यत्येव । न चातिजरसादित्यस्य सिद्ध्यर्थं दीर्घोच्चारणमत्र विषये सन्निपातपरिभाषया जरस्भावस्याप्रवृत्तेः । तत्किमर्थं-

---

१. सन्दिग्धः पाठः (?)
२. अतिजरैः (भं०)
३. विवक्षणाद् (भं०)
४. अदेवोच्यताम् (भं०)

मादिति दीर्घोच्चारणमित्याह—दीर्घोच्चारणं वैचित्र्यार्थम् । नन्वदित्युच्यमाने सति समानदीर्घं बाधित्वा अकारलोपः प्रवर्तते। तथा च देवादित्यादि न सिध्यतीति मन्यमानश्चोदयति—नन्वदिति कृत इत्यादि । अत्र परिहारमाह – न भविष्यतीत्यादिना । न भविष्यत्यकारलोपः, कुत इत्याह—आदेशस्येत्यादि । यदि ह्यदिति कृतेऽप्यकारलोपः प्रवर्तेत ततो देवदित्यादि रूपं भवेत्। तत-श्चादित्येतस्यादेशस्य यदकारोच्चारणं तदनर्थकं प्रसज्येत, तकारमेवादेशं विदध्यात् । अत्रोच्यते—तकारादेशे विहिते सति परकार्ये विकार्यादिरिति ङसेरकारस्य तकारादेशः प्राप्नोति, ततः तन्निवृत्त्यर्थमकारोच्चारणं स्यात् । अनेकवर्णस्सर्वस्येति सर्वादेशप्रवृत्तेरकारलोपस्तु न निवर्तयितुं[1] शक्यत इति तन्न, क्वचित्पूर्वपरो सर्वाविति सर्वस्यैव ङसेस्तकारादेशो विज्ञास्यते । तस्माद-कारोच्चारणमादेशनिवृत्त्यर्थं[2] न भवतीत्यकारलोपे क्रियमाणे सत्यपार्थकं स्यात्। अतस्तदनर्थकं मा भूदित्यकारलोपबाधनेन समानदीर्घत्वमेव भविष्य-तीति दीर्घोच्चारणमपार्थकं सद्वैचित्र्यार्थमेव जायते ।

इत टा २।१।२२[3]

प्रकरणक्रमेण पूर्वं स्थानिन उपादाने कर्तव्ये यदादेशस्य प्रथममुपादानं तस्य प्रयोजनं कार्यान्तरं बाधित्वा पूर्वमिनादेशो यथा स्याद् इति । तेनातिक्रान्तेन कुलेनातिजरसिना[4] इत्यत्र अतिजर टा इति स्थिते, परमपि जरस्भावं बाधित्वा पूर्वमिनादेशः प्रवर्तते यथा तु सन्निपातपरिभाषा, तथा नैतदिष्यत इत्याहुः ।

ङेर्यः २।१।२३[5]

ङेरिति चतुर्थ्येकवचनात्प्रथमा । नन्वेतद्रूपं सप्तम्येकवचनस्यापि समान-मिति तत्कस्मान्न गृह्यत इत्याह—ङेरित्यादि । यदि सप्तम्येकवचनं गृह्येत ततो बहुत्व इत्यत्र कृतयकारादेशं निर्देशं न कुर्यात् । तस्माद् घुटि बहुत्व इति निर्देशो ज्ञापयति नेह सप्तम्येकवचनं गृह्यत इति ।

---

१. निवारयितुम् (मं०)
२. मादेरादेशः (मं०)
३. २।१।२३ (दु० वृ०)
४. जरेण (?)
५. ३।१।२४ (दु० वृ०)

स्मै सर्वनाम्नः २।१।२४[1]

नत्वं न भवति। अतएव सर्वनाम्न इति निर्देशात् यत्वस्य बाध इति पूर्वसूत्रेण प्राप्तस्य कस्मै इति। किं कः। अमुष्मै इति। अदसः ङे, त्यदाद्यत्वम्, स्मैभावः, अदसः पदे मः, उत्वम्मादित्युत्वम्। भवते इत्यनुषङ्गश्चाकुञ्चे इत्यनुषङ्गलोपः। इह सर्वनामग्रहणेन पूर्वाचार्यप्रसिद्ध्या सर्व विश्व उभ उभय इत्यादयस्सर्वादयो गृह्यन्ते। तेषामेव सर्वनामसंज्ञात्वात्। तथा चोक्तम्--सर्वादीनि सर्वनामानीति सर्वादिरिति तु न कृतं सर्वेषां यानि नामानि सर्वादीनि तेषां परिग्रहो यथा स्यादिति। तेन ये संज्ञाभूतास्सर्वादयस्ते सर्वनामत्वात् पर्युदस्ताः भवन्ति कथं पुनः संज्ञाभूतानाम् असर्वनामत्वमित्याह--सर्वादीनामिति संज्ञाभूतानां कस्यचित्संज्ञात्वं प्राप्तानामित्याहुः[2]। संज्ञाभूता हि ते प्रतिनियतवस्तुविनिवेशनो भवन्तीति तेषां सर्वार्थाभिधायित्वान्नास्ति सर्वनामत्वम्। स्मर्यत इत्यनेन पूर्वाचार्यप्रसिद्धिमुपदर्शयन्सर्वार्थाभिधायिनामपि कृत्स्नप्रभृतीनामसर्वनामत्वं सूचयति। ननु नामी सर्वादयः परस्परस्य पर्यायतां यान्ति भिन्नार्थत्वात्। तथा ह्ययमिति प्रत्यक्षवस्तुविषयो निर्देशः। सः प्रतिपरोक्षविषयः तत्कथम् एषां[3] सर्वादीनां सर्वेषां नामानीत्येवं सर्वनामव्यपदेशो प्रवर्तते। उच्यते--यद्यपि सर्वेषां नाम सर्वनामेत्येवं विगृह्यते तथाप्येषां स्वविषयापेक्षं सर्वनामत्वं मन्तव्यम्[4]। यथा स्वविषयापेक्षं सामान्यस्यापि गोत्वस्य सर्वगतत्वम्। नहि गोत्वं पादपादिष्वसम्भवादसर्वगतमिति शक्यतेऽभिधातुम्। तस्मात् गोत्वसामान्यवत् सर्वादयः सर्वनामव्यपदेशभाजः। यद्येवम्, अतिक्रान्तः सर्वमतिसर्वः तस्मै अतिसर्वायेत्यादौ स्मैभावः प्राप्नोति।

भवति ह्ययं सर्वशब्दः सर्वार्थवृत्तित्वात्सर्वनाम। तदन्तविधिश्च येन विधिस्तदन्तस्येति वचनादत्रास्ति। तथा च परमसर्वस्मै इत्यादिसिद्धम्। तस्मात्प्राप्नोति अतिसर्वायेत्यादौ स्मैभावः इत्याशङ्क्याह--अप्रधानेभ्य इत्यादि। अत्रैव हेतुमाह--प्रधान इत्यादि। प्रधाने कार्यसम्प्रत्यय इति[5] कार्यस्य सम्प्रत्ययः सम्प्रतीतिः परिज्ञानमित्यर्थः। सर्वार्थश्चात्रा[6]प्रधानम्। अतिक्रान्ता-

---

१. २।१।२५ (दु० वृ०)
२. प्राप्तमित्यर्थः (भं०)
३. एतेषाम् (भं०)
४. उच्यते (भं०)
५. न्यूनपाठः (भं०)
६. सर्वश्चात्र (वा०)

र्थस्य प्राधान्यमिति न स्मैभावः। तीय-प्रत्ययान्तादित्यादि। द्वेस्तीयः, त्रेस्तृ चेत्येतद् योगद्वय-विहितस्तीय-प्रत्ययोऽन्तो यस्य तस्मादपि परस्य ङे-प्रत्ययस्य स्मै भावो विकल्पेनेष्यते। इह सर्वनाम्नां मध्ये उभशब्दः पठ्यते तस्यात्र पाठे प्रयोजनं न विद्मः। सर्वनामकार्यं ह्येकत्वबहुत्वविषयमुभशब्दस्याप्रत्ययो द्विर्वचनं च विषयः। सोऽप्यप्-प्रत्ययेन विना द्वित्वम्, तथा च उभे उभाविति प्रयोगौ स्मर्येते। न च सर्वनामत्वादव्ययसर्वनाम्न इत्यक्-प्रत्ययोऽस्य कार्यम्। उभकावित्यस्य प्रयोगस्य स्वार्थिके क-प्रत्यये एव कृते सिद्धत्वात्। त्रतसावपि सर्वनाम्नो विधीयमानावुभशब्दान्न सम्भवतः, तयोरव्ययत्वाद् द्वित्वाभिधाने सामर्थ्याभावात्। अस्य च नित्यं द्विर्वचनविषयत्वात्। तस्मात् चिन्त्यमभियुक्तैरस्य पाठे प्रयोजनम्। डतरडतमावत्र पठ्येते तौ तमादित्वाद्, विधायं कतरस्मै कतमस्मै इत्युदाहार्यम्। को भवतो कतरो किं-शब्दाद् द्वयोरेकस्य निर्धारणे गम्यमाने डतर-प्रत्ययः। को भवतां कतमः, जातिपरिप्रश्नविषयादेव किं शब्दात्, बहूनां मध्यादेकस्य निर्धारणे गम्यमाने डतम-प्रत्ययः। भवन्तु-इत्युदनुबन्धोऽत्र पठ्यते। तस्य प्रयोजनमव्ययसर्वनाम्न इत्यक्-प्रत्ययः। अज्ञातो भवान् भवकानिति। तथा विश्वग्देवयोरित्यादिना अद्रयादेशोऽपि। भवन्तमञ्चतीति भवद्रयङ्ङिति। स ह्यसर्वनाम्न इत्यत्र सर्वनामग्रहणानुवृत्तेः सर्वनाम्नोऽपीष्यते। पूर्व-पर-अवर-दक्षिण-उत्तर-अपर-अधर-इत्येते[1] गणे पठ्यन्ते। तत्कथं दक्षिणाय गाथकायेत्ययं स्मैभावशून्यः प्रयोगः। उच्यते— व्यवस्थायां गम्यमानायामेतानि पूर्वादीनि सर्वनामानि स्मर्यन्ते। कदा पुनर्व्यवस्था गम्यते यदैते पूर्वादयस्स्वार्थमवध्यपेक्षं प्रतिपादयन्ति। तद्यथा—ग्रामात्पूर्वादिति। अत्र हि पूर्वशब्देन योऽर्थः प्रतिपाद्यते सः ग्रामलक्षणमवधिमपेक्षते। एवं दक्षिणशब्दोऽप्यवधिं व्यपेक्ष्य स्वार्थं प्रतिपादयन्सर्वनामकार्यं प्रतिलभ्यते। दक्षिणाय गाथकायेत्यत्र च दक्षिण-शब्दो नावधिमपेक्षते। प्राचीण्यार्थप्रतिपादनपरत्वात्। तेनात्र स्मैभावो न भवति।

स्व-शब्दस्येत्यादि। आत्मा-आत्मीय-ज्ञाति-धनवचनः स्वशब्दः। तत्रास्य स्वशब्दस्य ज्ञातिधनयोस्संज्ञारूपेण वर्तमानस्य सर्वनामत्वमाचार्यैर्नेष्यते। उल्कानीद मेऽमी अश्वाः प्रभूताः स्वानः भुज्यन्ते इति च प्रत्युदाहरति। चतुर्थ्येकवचनप्रसङ्गेऽप्यत्र न भवति। किं पुनः ज्ञातिधनाभ्यामन्यत्र स्वशब्दस्योदाहरणम्। स्वस्मै पुत्राय स्वस्मै गवे इत्यादि। स्व-शब्दोऽत्रात्मीयवचनः। अन्तर शब्दस्य तु बहिर्योग इष्यते इति। सर्वनामत्वमिति शेषः। ननूप-

---

१. इत्येतानि (मं०)

संज्ञानेऽप्यस्य सर्वनामत्वं स्मर्यते । अस्त्येतत् । बहिर्योगग्रहणेनैवोपसंज्ञाने-ऽपि भविष्यति । तथा हि बहिरित्यनुवृत्तो देश उच्यते । तेन योगः बहिर्योगः । सः च बाह्यस्य भवतीति । अन्तरस्मै चाण्डालगृहायेति । नगरबाह्याः चाण्डाल-गृहा उच्यन्ते । अथापि बहिश्शब्देन बाह्यमुच्यते बाह्येन योगः बहिर्योग इति । तथापि[१] नगराभ्यन्तरवर्ति यद्गृहं तदेवेदमुच्यते । उपसंज्ञानशब्दोऽप्ययं यद्य-प्युपसंवीयते प्रावरणान्तरेणाच्छाद्यत इति कर्मसाधनः । तदोपसंज्ञानमन्तर्वा-सोऽभिधीयते[२] तस्य च बाह्येन योगाद् बहिर्योगग्रहणेनैव सिद्धिरस्ति । अथाप्युप-संवीयत अनेनेति करणसाधनः । ततश्चाप्युपसंज्ञानस्य[३] परि प्रावरणं विव-क्षितं तस्य च बहिष्ठ्येन योगसद्भावाद् बहिर्योगेनैव सिद्धिः । अथोच्यते तुल्य-प्रमाणे शाटकयुगेऽपि रहिते सति यत्रेदं न निश्चीयते किमन्तरीयमुत्तरीयं वा किमिति, तत्र बहिर्योगस्यानिश्चयाद् बहिर्योगग्रहणेन न सिध्यति इति तदर्थ-मुपसंज्ञानग्रहणमिति । तन्न, यतो य एष मन्तव्यः प्रेक्षापूर्वकारी तेनावश्यं व्यवहारनियममिच्छता किञ्चिदुपलक्षणमाश्रित्य विभक्तव्यमिदमत्रान्तरीयमिद-मुत्तरीयमिति । तथा च सति नियतो बहिर्योग इति नार्थ उपसंज्ञानग्रहणेन, बहिर्योगग्रहणेनैवावगतत्वात् । तेन बहिर्योगे गम्यमानेऽन्तरशब्दस्य सर्वनाम-त्वमिष्यते । यद्येवम्, अन्तरायै पुरीत्यत्रान्तरा शब्दस्यापि लिङ्गग्रहणपरि-भाषया सर्वनामत्वाद्ध्रस्वस्वरागमौ प्राप्नुतः, उच्यते--अपुरीति । बहिर्योगे विशेषं स्मरन्ति । तेन सर्वनामकार्याभावः ।

ङिः स्मिन् २।१।२५[४]

समे देशे यजेतेत्यत्रास्मिन् भावो न भवति सर्वशब्दपर्यायस्य सम-शब्दस्य सर्वनामत्वास्मरणात् । न चात्र सम-शब्दस्सर्वशब्दस्य पर्यायः । (निम्नोन्नतत्व-रहिते[५] देशे वर्तमानत्वात् । दृश्यते च सम-शब्दः सर्वशब्दपर्यायः ।) यथा सम-राज्यं वर्तते ते सर्वेषां राज्यमित्यर्थः । ङसिङ्योस्स्मात् स्मिनाविति कर्तव्ये योगविभागो वैचित्र्यार्थः ।

---

१. तदपि (भं०)
२. वस्त्रम् (भं०)
३. उपसंज्ञानमुपरि (भ०)
४. २।१।२४ (दु० वृ०)
५. न्यूनपाठः (भं०)

विभाष्येते पूर्वादेः २।१।२६[1]

भाष् व्यक्तायां वाचि । विपूर्वः, सि, ततोऽव्ययाच्चेति लुक्, आते सार्वधातुक इत्यण् । आते आथे चेतीत्वं विभाष्येते इति । द्वे पदे इति । ऐकपद्ये लक्षणाभावादिति भावः । विभाष्येते इत्यस्यार्थमाह—विकल्पेन कथ्येते इति विकल्पेन भावात्मकेन रूपेणेत्यर्थः । नित्यं प्राप्ताविति । एतेन प्राप्तविकल्पोऽयमिति दर्शयति । अथ किमर्थं विभाष्येत इति कर्तव्ये यावता तौ वेति क्रियताम्, एवमपि कृते विकल्पो लभ्यत एवेत्याह—तौ वेति कर्तव्य इत्यादि । सत्यम्, लभ्यते विकल्पः । सत्यनन्तरस्यैव स्विमन्नादेशस्य स्यान्न तु स्मादादेशस्यापि । कथं पुनः प्रकृतेऽप्यादेशद्वये अनन्तरस्यैव[2] विकल्पः स्यादित्याह—अनन्तरस्येत्यादि । कृते तु विभाष्येते ग्रहणे द्विर्वचननिर्देशसामर्थ्यादादेशद्वयस्यापि विकल्पस्सिध्यतीति तदर्थं विभाष्येते इति क्रियते । तर्हि आदेशद्वयं ङेरेव कस्मान्न विकल्प्यते । उच्यते—तौ वेति कर्तव्ये यद् विभाष्येते इत्यक्षराधिक्यं करणं ततो ज्ञायते अधिकोऽप्यत्र कार्यी कार्यमात्वेनाभिप्रेत इति । तेन ङसिरप्यधिकोऽनुवर्तते । प्रत्येकं तु ङसिङ्योस्स्मात्स्मिनौ न विभाष्येते व्याख्यानात् तीयप्रत्ययान्तादपि वेष्यत इति स्मात्स्मिनाविति शेषः ।

सुरामि सर्वतः २।१।२७[3]

सर्वत इति तसन्तमव्ययस्यार्थं व्यक्तीकर्तुमाह—अकारान्तादाकारान्ताच्चेति । तस्मिन्नामीति । एतेन तृतीयादौ परादिरिति वचनादामः आगमित्वं दर्शयति । यद्येवम्, आगमिनः आगमसम्बन्धे सति षष्ठ्या निर्देशो युक्तो यथा इडागमो सार्वधातुकस्येति तत्कथमामीति सप्तम्या निर्देशः, उच्यते—नायं नियमः षष्ठ्यैवागमी निर्देष्टव्य इति सप्तम्यापि निर्दिश्यते । यथा सार्वधातुके च रूदादेरिति । आगमो ह्यवयव उच्यते, सः चावयविनः कदाचित् सम्बन्धित्वेन विवक्ष्यते कदाचिदाधेयत्वेन तत्र यदा सम्बन्धित्वेन तदा (वृक्षस्य[4] शाखेतिवत् अवयवी षष्ठ्या निर्दिश्यते तदा चास्यायमागम इति व्याख्यायते । यदा त्वाधेयत्वेन) वृक्षे शाखेतिवत्सप्तम्या निर्दिश्यते तथा च व्याख्यायते अयमस्मिन्नागम इति । एवं चाकारागमस्याधेयत्वविवक्षायामामीति युक्तः

---

१. २।१।२८ (दु० वृ०)
२. अन्यतरस्यैव (मं०)
३. २।१।२९ (दु० वृ०)
४. न्यूनपाठः (मं०)

सप्तम्या निर्देशः। सर्वेषामिति। घुटि बहुत्वे त्वे इत्येत्वम्। येषां केषामिति। यद् तद् किम्, त्यदाद्यत्वम्, किं कः विकल्पः[1]। सर्वासामित्यादि। स्त्रियामादाप्, ततः स्वरागमः। त्वां मां युवामावामित्यत्र स्वरागमो न भवति। अमो चामित्यस्यामो लाक्षणिकत्वात्। नान्यदिति व्यञ्जनान्तमित्यर्थः[2] (अन्यथा[3] हि भवतामिर्यत्रापि स्वरागमः प्राप्नोति, कुतो हेतो व्यञ्जनान्तार्थम्) सर्वग्रहणं न भवतीत्याह—व्याख्यानादिति। किं पुनस्तद् व्याख्यानमित्याह—अविच्छिन्न इत्यादि। अविच्छिन्नः पारम्पर्यक्रमागत इत्यर्थः। स्वरूपेण सर्वशब्दो न गृह्यते तेषां परमिति निर्देशात्। अतएव च निर्देशान्नान्तरस्य विपूर्वादेः सर्वत इति विशेषणं विज्ञायते। ननु लिङ्गग्रहणपरिभाषया आकारान्तादपि सर्वनाम्नः कार्यं विज्ञायते तत्किं सर्वग्रहणेन, सत्यम्। अस्या एव त्वनित्यत्वज्ञापनार्थमिदं सर्वग्रहणम्। तेन सख्युश्च घुटित्वे इत्येत्वे विधीयमाने सखीशब्दस्य न भवतः सखी सख्याविति। अत्र [4]सख्यशिश्व्योश्चेति सखिशब्दादीप्रत्ययः।

जस्सर्व ईम् २।१।२८[5]

ईमित्यस्यागमोऽकारस्यादिलोप इत्यादिना लोपः। परकार्ये विकार्यादिरिति वचनात् जस आदेरीत्वं मा भूदिति सर्वग्रहणम्। ननु क्वचित् पूर्वपराविति सर्वस्य भविष्यतीति। तथा च परन्तु ये इत्याह—अस्त्येतत्, अवैस्पष्ट्यं तु स्यात्। इमिति कर्तव्ये किम् दीर्घोच्चारणेनेत्याह—दीर्घोच्चारणमिति। ननु सर्वे च्छात्राः सर्वे छात्रा इत्यादौ परनिमित्त आदेशः पूर्वस्मिन् स एवेति वचनाद् दीर्घस्य विद्यमानत्वात् दीर्घात्पदान्ताद्वेष्यत इति छकारस्य द्वित्वविकल्पार्थं दीर्घोच्चारणं स्यात्। तत्किं वैचित्र्यार्थं भवेत्, उच्यते—द्विर्भाविमिति भावग्रहणादेव यथेष्टं द्वित्वविकल्पः सिद्ध इति। तेनैतत्प्रयोजनं दीर्घोच्चारणार्थम्।

---

१. न्यूनपाठः (भं०)
२. व्यञ्जनान्तार्थम् (भं०)
३. न्यूनपाठः (भं०)
४. सूत्रोऽयं प्रतीयते।
५. जस सर्व इ २।१।३० (दु० वृ०)

अल्पाद्देर्वा २।१।२९[1]

प्रकारेऽत्रादिशब्दः। प्रकारश्च सादृश्यम्[2]। तच्चेत्वं विकल्पकृतमाहुः। तेनाल्पशब्दस्य यथा जस ईत्वविकल्पस्तथा येषां शब्दानां जस ईत्वं विकल्पेन दृश्यते तेऽल्पादयः। तेन प्रथमचरमतयाल्पार्धकतिपयनेमाः (शास्त्रान्तरपरिदृष्टा[3]) अल्पादिग्रहणेन गृह्यन्ते। व्यवस्थावाचिनि त्वादिशब्दे आश्रीयमाणे अल्पार्धकतिपयनेमानामेव सङ्ग्रहः स्यात्। व्यवस्थारचनासन्निवेश इत्यर्थः। एवञ्च सति पूर्वादेश्चेति योगः प्रपञ्चार्थः। नेमशब्दोऽत्र पठ्यते, तस्य सर्वनामत्वात् प्राप्तो विकल्पः। अन्येषामप्राप्त इत्युभयत्र विकल्पोऽयं तत्रेति पठ्यते। तं तमादित्वाद्विधाय द्वितय द्वितया इत्युदाहार्यम्। द्वावेवयवौ येषामिति विग्रहः।

पूर्वादेश्च २।१।३०[4]

पूर्वादेर्गणादिति विभाज्येते पूर्वादेरित्यत्र पठितत्वात्। पूर्वादिभ्यश्च सप्तभ्यो व्यवस्थायामवाप्तसर्वनामव्यपदेशेभ्योऽयं विधिः। स्वशब्दात् त्वज्ञातिधनाख्यायाम्। अन्तरशब्दाद् बहिर्योगे।

द्वन्द्वस्थाच्च २।१।३१[5]

(विशेषादिष्टः[6] प्रकृतं न बाधत) इति वचनात् सर्वनाम्नः इति वर्तते, नान्तरं पूर्वादिग्रहणमेव। कतर कतम इत्यादि आख्याताच्च तमादय इति किमो डतरडतमौ। द्वन्द्व इति कर्तव्ये स्थाग्रहणं वैचित्र्यार्थम्। इह वस्त्रमन्तरं येषां ते वस्त्रान्तराः, वसनमन्तरं येषां त इति बहुव्रीहौ कृते वस्त्रान्तरवसनान्तरौ इति द्वन्द्वे च कृते सति अन्तरशब्दस्याप्रधानत्वादसर्वनामत्वाद्विकल्पाभावः। ननु वस्त्रान्तरवसनान्तरशब्दौ पर्यायशब्दौ[7] युगपदप्रयोगार्हौ इति कथमनयोर्द्वन्द्वः, समानार्थानां[8] विरूपाणामित्येकशेषो ह्यत्र स्यात्। यथा वक्रदण्डश्च

---

१. २।१।३१ (दु० वृ०)
२. सादृश्ये (वा०)
३. अनेनात्र पाणिनिः निर्दिश्यत इति।
४. न्यूनपाठः (दुर्गवृत्तिः)
५. २।१।३२ (दु० वृ०)
६. विशेषातिदिष्टः प्रकृतं न बाधते (परिभाषासङ्ग्रहः)
७. न्यूनपाठः (वा०)
८. सदृशार्थानाम् (भं०)

कुटिलदण्डश्च कुटिलदण्डाविति । सत्यम्, वसनशब्दस्त्वत्र न वस्त्राभिधायी किन्तु वसन्त्यस्मिन्निति अधिकरणयुडन्तो निवासे वर्तते, तेन भिन्नार्थयोः प्रयोगे सति युज्यते द्वन्द्वः ।

नान्यत्सार्वनामिकम् २।१।३२[1]

अन्यदित्यत्र अन्यादेस्तुरिति तुरागमः । कार्यापेक्षया विशेषणत्वेन नपुंसकेन निर्देशः । सर्वनामप्रयोजकं यस्येत्यादि । प्रयोजकं प्रेरकमित्यर्थः । आदिग्रहणादिति । अर्थान्तरोपसङ्ग्रहादिति शेषः । नस्य तु क्वचिदिति न लोपे कृते इवर्णावर्णयोरित्यकारलोपः ।

नन्वसौ स्वरनिमित्तको नलोपस्यालुप्तवद्भावात्कथमत्र स्यात् । नैतत्, लिङ्गान्तनकारलोपस्यैव हि प्राकरणिकस्यासावलुप्तवद्भावो नान्यस्य । इह सार्वनामिकं कार्यं स्मायादिस्वागमान्तं निषिध्यते, तच्च ङे-प्रभृतेः प्रत्ययस्यैव प्राप्तमिति स एव सार्वनामिककार्यप्रतिषेधभाक्त्वेन विज्ञायत इत्याह—परस्य प्रत्ययस्येत्यादि । पूर्वापरायेत्यादि पूर्वश्चापरश्चेति द्वन्द्वः । अत्र यथाक्रमञ्च सर्वनाम्नः ङसि स्मात् ङि स्मिन् सुरामि सर्वत इत्येते विधयो न भवन्ति सूत्रार्थरचनायाम् । अनभिसम्बध्यमानमन्यग्रहणं मत्वा यश्चोदयति किमर्थमन्यग्रहणमत्र कृतमिति तं प्रत्याह—अन्यत्र ग्रहणमित्यादि । प्रकृतस्मायाद्यादेशापेक्षया यदन्यदक्-प्रत्ययप्रवृत्तिलक्षणं कार्यं तस्यापि निषेधो यथा स्यादित्येतदर्थमन्यग्रहणम् । असति हि तस्मिन्स्मायादेरेव प्रकृतस्य निषेधो विज्ञायेत[2] न तु प्रकरणान्तरविहितस्याक् प्रत्ययस्यापि । केचित्तु प्रकृतमीत्वविकल्पमपेक्ष्य (स्मायादेर्निषेधकमन्यग्रहणं[3] व्याचक्षते) तन्न, चतुरस्रम्, असत्यप्यन्यग्रहणे स्मायादेरेव निषेधो विज्ञास्यते न तु प्रकृतस्य विकल्पस्य, द्वन्द्वस्थाच्चेत्यस्यानर्थक्यप्रसङ्गात् । तस्मात्प्रकृते स्मायाद्यपेक्षया निषेधकमक्प्रत्ययस्यैवेदमन्यग्रहणम् । तच्च वाक्यभेदेन व्याख्यायते । सार्वनामिकं कार्यं स्मायादिकं न भवति । अन्यच्चाग्लक्षणमपि कार्यं न भवतीति वाक्यभेदस्त्वत्रान्यग्रहणसामर्थ्यान्मन्तव्यः । न तु तदर्थं पूर्वसूत्राच्चकारः खेदनीयः ।

यथोक्तमपरेण[4], चकारोऽनुवर्तत इति । क्व पुनरक्प्रत्ययो निषिध्यत

---

१. २।१।३३ (दु० वृ०)
२. विज्ञास्यते (भं०)
३. न्यूनपाठः (भं०)
४. अपरैः (भं०, पाठभेदः)

इत्याह अज्ञाताः कतरकतमा इत्यादि। कतरे च कतमे च कतरकतमाः। अज्ञाताः कतरकतमाः कतरकतमका इति विगृहीते सत्यज्ञातादावर्थे लिङ्गात्क-प्रत्ययो वक्तव्य इत्यस्माद् वक्तव्यात् मकारात् परः क-प्रत्ययः। अत्रान्यग्रहणा-दक्-प्रत्ययो न भवति। अथेत्यादि। सकोपस्यायं प्रश्नः। किल कतरकतमका[1] इत्यत्राकप्रत्ययस्य निषेधार्थमन्यग्रहणं भवता कृतम्। अत्र च क-प्रत्यये कृतेऽपि तदेव सकारकं रूपमायातम्, किमिवात्राकप्रत्ययेनापराद्धम् यदसौ निषिध्यते। तस्यानिषेधे यो दोषः प्राप्नोति। तं प्रदर्शयितुमाह - तन्मध्यपतित इत्यादि। अयं भावः। इह कतरकतमका इति यदन्यग्रहणेनाक्-प्रत्ययो निषिध्यते ततो-ऽसावप्यव्ययसर्वनाम्नः स्वरादन्त्यादिति वचनेन मकारात्पूर्वं प्रवर्तेत, ततश्च तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति सर्वनामग्रहणेन ग्रहणं प्राप्नोति। एवं च सति कतरकतमक-शब्दात्परस्य जसो द्वन्द्वस्थाच्चेति विकल्पेनेत्वं प्राप्नोति, ततश्च कतरकतमे कतरकतमका इत्यनिष्टरूपप्रसङ्गलक्षणो दोषः प्रसज्येत्।

स्यादेतत् क-प्रत्ययेऽपि सत्येष दोषः कस्मान्न प्रसज्यत इत्याह—क-प्रत्यये तु सतीत्यादि। कथं पुनः क-प्रत्यये सति नास्त्येष दोष इत्याह—सर्वनाम्नः परस्येस्यादि। द्वन्द्वस्थात् सर्वनाम्नः परस्य जस इत्व-विकल्पः क्रियते। क-प्रत्यये तु मध्यवर्तिनि सति नास्ति जसः सर्वनाम्नः परत्वम्। तेन क-प्रत्ययेन व्यवधानादिति कुतस्तस्येत्व-विकल्पः प्रवर्तते। तस्मात् कतरकतमका इत्यत्रेत्वविकल्पप्रवृत्तिलक्षणदोषविनिवृत्तयेऽक्-प्रत्यये प्रतिषेधार्थमन्यग्रहणं क्रियते। ननु च सार्वनामिकग्रहणेनैव तस्य प्रति-षेधः सिध्यति, अव्ययसर्वनाम्न इति वचनात् सर्वनाम्नः तस्य[2] प्रयोजकमित्य-सावपि सार्वनामिक एव, तत्किं तन्निषेधार्थेन पृथगन्यग्रहणेनेति मन्यमानः पूर्व-पक्षयति। नन्वकप्रत्ययोऽपीत्यादि। अज्ञातादिरप्यर्थ इत्यादिना पराभिप्रायमा-शङ्क्यते। अथ मन्यसे सार्वनामिकं कार्यं तदुच्यते यस्य सर्वनामैव प्रयोजकं यथा स्मायादेः। यस्य च सर्वनामप्रयोजकमज्ञातादयश्चार्थः सः कथमकप्रत्ययः सार्वनामिकव्यपदेशभाक् स्यात्। ततश्चासत्यन्यग्रहणे तस्य निषेधो न भवेदिति चेत्, तन्न, कथमित्याह—यो हि उभयोरित्यादि। उभयसम्बन्धे सति यस्या-त्मलाभः तमेकेनापि लोके व्यपदिशति। यथा—मातापित्रोः पुत्रः मातुः[3] पुत्रो-ऽयम्, पितुः पुत्रोऽयमिति। एवं चाप्यकप्रत्ययस्य यद्यप्यज्ञातादिनिमित्तक आत्म-

---

१. कतमाः (वा०)

२. तम् (वा०)

३. मातुरयं पुत्रः पितुरयं पुत्रः (भं०)

लाभः तथाप्यसौ सार्वनामिक इति शक्यते व्यपदेष्टुम्। तं प्रति सर्वनाम्नोऽपि प्रयोजकत्वात्। एवं च सिद्ध अकप्रत्ययस्य सार्वनामिकग्रहणादेव निषेध इति किमन्यद्ग्रहणेन। एतत्प्रकरणविहितस्येत्यादि। अथैवं मनुषे। यद्यसत्यन्यद्ग्रहणे सार्वनामिकग्रहणमेतत्प्रकरणविहितस्यैव कार्यस्य निषेधकं स्यात्, प्रकरणानामवच्छेदकत्वात्। यत्तु प्रकरणान्तरविहितं कार्यं तत्कथमिव बुद्धावपरिस्फुरणान्निषेद्धुं शक्येत। ततोऽक्-प्रत्ययस्य सार्वनामिकग्रहणान्निषेधो न भवेदिति तन्निषेधाय युक्तन्यद्ग्रहणमिति। तदपि न। कथमित्याह—एतदपीत्यादि। यदि हि सार्वनामिकग्रहणमेतत्प्रकरणविहितस्यैव स्मायादेर्निषेधकं स्यात्, प्राप्तकार्यनिषेधकारित्वेन प्रतिषेधस्य प्रवृत्तेः। प्राप्तानां स्मायादीनामेव निषेधो विज्ञास्यत इति सार्वनामिकग्रहणमपार्थकं स्यात्। नेत्येवं ब्रूयात्। तस्मात्सार्वनामिकग्रहणात् स्मायाद्यादेशवदक्प्रत्ययस्यापि निषेधो विज्ञास्यत इति किमन्यद्ग्रहणेनेत्याह—एवं तर्हीत्यादि। प्रतिपत्तिगौरवपरिहारार्थमन्यद्ग्रहणं कृतम्, अन्यथा प्राथमकल्पिकानां[1] प्रतिपत्तिगौरव भवेदिति भावः।

तृतीयासमासे २।१।३३[2]

समस्यन्तेऽस्मिन्पदानीति समासः। व्यञ्जनान्ताच्चेत्यधिकरणे घञ्। तृतीयायास्समासः तृतीयासमासः। तृतीयासमासे सतीति। तृतीयान्तस्य शब्दस्य याः विभक्तयो द्वितीयाद्या इत्यादिना समासः तस्मिन्सतीत्यर्थः। मासपूर्वायेत्यादि। यथाक्रमं स्मायादयोऽत्र न भवन्ति, मासपूर्वा इत्यत्र च जस ईत्वं न भवति। वाक्येऽपि नेष्यत इति तृतीयासमासार्थे वाक्येऽपि सार्वनामिकं कार्यं नेष्यते (कथं[3] पुनरनिष्यमाणमपि) लभ्यते, उच्यते—तृतीयासमास इति योगोऽयमावर्तते तेन न केवलं तृतीयान्तस्य समासे सति नेष्यते यावदसमासे वाक्येऽपि किमावृत्तौ प्रमाणमिति चेत्, व्याख्यानात्। यद्येवम्, अज्ञातेन त्वया कृतम्, अज्ञातेन मया कृतं त्वयका कृतं मयका कृतमित्यत्रापि वाक्ये सार्वनामिकस्याक्प्रत्ययस्य निषेधः प्राप्नोति, न भविष्यति। एतत्प्रकरणविहितस्यैव कार्यस्य निषेधविज्ञानात्। न चान्यदित्यभिसम्बध्यते येनाकप्रत्ययोऽपि निषिध्यते। युष्मदस्मद् टा, त्वन्मदोरेकत्व इति युष्मदस्मदोः त्वन्मदोः। एत्वमस्थानिनीत्येवम्। ए अय्, सर्वनामविभक्तेः पूर्वमक्-प्रत्ययो वेष्यत इति वचनादक्प्रत्ययः। महापूर्वस्मै इति। अनुषङ्गलोपे सत्याकारो महतः कार्य इत्या-

१. मन्दमतीनाम् (भं०)
२. तृतीयासमासे च २।१।३४ (दु० वृ०)
३. तत्कथमनिष्यमाणमपि (भं०)

त्वम् ।

बहुव्रीहौ च २।१।३४[1]

येनविधिस्तदन्तस्येति वचनात् सर्वाद्यन्तादपि प्रियसर्व इत्यादेरस्ति सार्वनामिककार्यप्राप्तिरिति प्रतिषेधोऽयमारभ्यते । नन्वन्यपदार्थे प्रधाने बहुव्रीहौ सर्वादीनामप्राधान्यात् प्रधाने च कार्यसम्प्रत्ययात् प्राप्तिरेव सार्वनामिककार्यस्य नास्तीति किमन्येन योगारम्भेण, उच्यते—अज्ञातस्त्वं पिता यस्य सः त्वत्कपितृकः, अज्ञातोऽहंपिता यस्य सः मत्कपितृक—इत्यत्राकप्रत्ययो मा भूदिति योगोऽयमारभ्यते । अत्र हि पदान्तरसन्निधाने सत्यन्यपदार्थविवक्षायां यावद् बहुव्रीहिस्समासः क्रियते तावदन्तरङ्गत्वात्पूर्वपदस्य सर्वनामव्यपदेशनिमित्तकः अकप्रत्ययः प्राप्नोति सोऽनेन निषिध्यते । अप्राधान्यं च[2] सर्वादीनां बहुव्रीहौ सत्यभिधातुं शक्यं न त्वप्रवृत्तेऽपि बहुव्रीहाविति न पूर्वपदस्यास्त्यप्रधानभावो येन तस्याकप्रत्ययो न स्यात् । ननु बहुव्रीहिसंशब्दने यो निषेध उच्यते (सः[3] कथं, शक्यते वक्तुं बहुव्रीहौ पदमात्रस्य स्यात् । एवं तर्हि योगारम्भसामर्थ्याद् बहुव्रीहिशब्देनात्रोच्यते) तेन बहुव्रीह्यर्थे वा वाक्ये सार्वनामिकं कार्यं न भवतीति पूर्वपदस्याकप्रत्ययो न भवति । यद्येवम्, [4]प्रियसर्वायेत्यादीनि अनुदाहरणीयानि स्युः । सत्यम्, किन्तु त्वकत्पितृको मकत्पितृक इत्यत्राकप्रत्ययनिषेधायावश्यमारम्भणीयोऽयं निषेधविधिः । स एतदर्थमारभ्यमाणः प्रियसर्वायेत्यादावपि सार्वनामिककार्यनिषेधायास्तु, किमत्र प्रधाने कार्यसम्प्रत्यय इति वचनोपन्यासेन । अन्ये तु त्वकत्पितृको मकत्पितृक इत्येवं भवितव्यमिति मन्यन्ते, तान्प्रति चानभिमत एव योगारम्भः ।

दिशां वा २।१।३५[5]

दिक्छब्दः ऋत्विगादिसूत्रेण कर्मणि क्विबन्तो निपातयिष्यते । दिग्वाचिनां शब्दानामिति । दिश्यन्ते यैस्तेषां पूर्वादिशब्दानामित्यर्थः । पूर्वेण निषेधे सिद्धे विकल्पोऽयमारभ्यते । योगविभागादिति । योगो विभज्यते ततो दक्षिणशब्दस्य पुंवद्भावः । असति तु योगविभागे अन्या दक्षिणा, अन्या पूर्वेति भिन्नाधिकरण-

---

१. बहुव्रीहि २।१।३५ (दु० वृ०)
२. तु मं०)
३. न्यूनपाठः (वा०)
४. पूर्व (वा०)
५. २।१।३६ (दु० वृ०)

त्वात् तुल्याधिकरणलक्षणः पुंवद्भावो न प्राप्नोति। एवमुत्तरपूर्वस्यै उत्तरपूर्वायै इत्यादीत्यादिग्रहणेन उत्तरपूर्वस्याः, उत्तरपूर्वायाः, उत्तरपूर्वस्याम्, उत्तरपूर्वायामित्येते गृह्यन्ते। अत्रापि पूर्ववत् पूर्वपदस्य पुंवद्भावः ह्रस्वमुकारागमौ च। अत्र[1] पूर्वा एव दिगुत्तरा यस्याः नगर्याः सा पूर्वोत्तरा तस्यै पूर्वोत्तरायै इत्यत्र सार्वनामिककार्यं विकल्पेन कस्मान्न भवति, भवति ह्ययं दिग्वाचिनोः पूर्वोत्तरशब्दयोः बहुव्रीहिः ततश्च पक्षे ह्रस्वमुकारागमौ प्राप्नुयातामित्यनेनाभिप्रायेण पूर्वपक्षयति। इह कस्मान्न भवतीत्यादि। अत्रोच्यत इत्यादिना परिहरति। इह दिग्वाचिनां शब्दानां द्विविधोऽस्ति बहुव्रीहिः, एकः स्यातामित्यादिना, अपरस्तु विदिकुथेत्यनेन। तत्र यः स्यातां यदीत्यादिना बहुव्रीहिः, न तत्रायं दिशाम्वेति विकल्पः। यस्तु विदिकुथेत्यादिना बहुव्रीहिस्तत्र कुतः पुनरेष विशेषोऽवाप्यत इत्याह—गौणमुख्ययोरित्यादि। गुणादागतो गौणः, यथा—गौर्वाहीक इत्यत्र गोशब्दस्य जडत्वादि[2]निमित्तको वाहीकलक्षणोऽर्थः मुखमिव प्रधानत्वान्मुख्यः। तत्र गौणमुख्यबहुव्रीहिः सम्भवति सति[3] गौणमुख्ययोः मुख्ये सम्प्रत्ययः इति मुख्य एव बहुव्रीहिः। विदिकुथेत्येतत्सूत्रविहितो गृह्यते, न तु स्यातां यदीत्येतत्सूत्रविहितः पूर्वपक्षवादिनोऽभिप्रायमाशङ्क्यमानमाह—विदिकुथेत्ययमित्यादि। विदिकुथेत्ययं बहुव्रीहिः मुख्यः, स्यातां यदीत्ययं तु गौण इति यदुक्तं तत्केन प्रकारेण पर्यते[4] इति। यदि पूर्वपक्षवादिभिर्मन्यसे तदत्र युक्तिं ब्रूमः। बहुव्रीहिस्तावदयं दिग्वाचिनां सूत्रद्वयेनापि क्रियते। तत्र विदिकुथेत्यनेन बहुव्रीहिः तेषामेव भवन्मुख्यो भवति। स हि बहुव्रीहिः विदिशि प्रतिपाद्यमानायां क्रियते। सः च विदिग्दिग्वाचिभिरेव पूर्वादिशब्दैः प्रतिपादयितुं शक्यते न त्वदिग्वाचिभिः। अतो विदिशि यो दिग्वाचिनां बहुव्रीहिस्तत्र वस्तुस्थित्या दिग्वाचिन एव समस्यन्त इति सः तेषां न बहुव्रीहिर्मुख्यो भवति शृङ्गग्राहिकतया तेषामेव सः बहुव्रीहिर्विधीयत इति कृत्वा[5] यस्त्वितरः स्यातां यदीत्यनेन बहुव्रीहिस्सोऽन्यपदार्थमात्रविवक्षायामदिग्वाचिनां दिग्वाचिनां च विधीयमानो न दिग्वाचिनां मुख्यो भवति, अतोऽसौ तेषां गौणः स्यातां यदि पदे इत्येतत्पदलक्षणाद् गुणादागतः इति कृत्वा गौणमुख्ययोर्मुख्ये

---

१. अथ (भं०)
२. जाड्यादि (वा०)
३. सम्भवे सति (वा०)
४. घटते (भं०)
५. मुख्यः (भं०)

सम्प्रत्यय इति लौकिकोऽयं[1] न्यायः तस्मात्पूर्वोत्तरायै इत्ययं स्यातां यदीत्येतत्सूत्रविहितो बहुव्रीहिः गौण इति नात्रायं विकल्पः। तेन पूर्वसूत्रेण प्रतिषेध एव भवति।

श्रद्धादाः सिर्लोपम् २।१।३६[2]

श्रद्धा संज्ञकाल्लिङ्गादिति। एतेन विशेषादिष्टपरिभाषया लिङ्गमनुवर्तमानं श्रद्धाग्रहणेन विशेष्यते न तु सर्वनामैवेति। या सा का इति यत् तत् किम्, त्यदाद्यत्वम्। किं कः, स्त्रियामादाप्। कीलालप इति। मनिनादिसूत्रेण च शब्दाद्विट्, अस्त्र्याख्यत्वात् नायं[3] शब्दः श्रद्धासंज्ञः। अत्र सेरकारादेशः कस्मान्न विधीयते। विहिते तस्मिन्परसवर्णलोपे कृते गङ्गेत्यादि सिध्यत्येवेति किं लोपग्रहणेन, अस्त्येतत्, जरा इत्येतत्तु नित्यं न सिध्येत्। जरस्भावस्यापि प्रसङ्गादित्येके।

टौसोरे २।१।३७[4]

श्रद्धाया एत्वं भवतीत्यनेन श्रद्धाया एत्वं न तु टौसोरिति दर्शयति। एतच्च पुरुषे तु विभाषया समुदोर्गणप्रशंसयोरिति निर्देशादनुगम्यते।

सम्बुद्धौ च २।१।३८[5]

हे गङ्गेति। कृते एत्वे ह्रस्वनदीत्यादिना सिलोपः। उत्तरार्थ इति। उत्तरयोगे सम्बुद्धेरेवानुवृत्तिर्यथा स्यात् टौसोर्मा भूत्। समासस्थं पुनस्सम्बुद्धिग्रहणमशक्यं केवलमुत्तरत्रानुवर्तयितुम्।

ह्रस्वोऽम्बार्थानाम् २।१।३९[6]

एत्वस्य बाध इति पूर्वसूत्रप्राप्तस्य हि अम्बेत्यादि। कृते ह्रस्वे पूर्वात्सिलोपः। नन्वम्बार्थानां ह्रस्वो भवन्नकार एव स्थानेऽन्तरतमपरिभाषया भवितुमर्हति। ततश्चाम्बार्थानाम् इत्येव क्रियतां किं ह्रस्वग्रहणेनेत्याह—अ

---

१. न्यायो लौकिकः (मं०)
२. २।१।३७ (दु० वृ०)
३. वायम् (वा०)
४. २।१।३८ (दु० वृ०)
५. २।१।३९ (दु० वृ०)
६. २।१।४० (दु० वृ०)

इति कर्तव्य इत्यादि। ह्रस्व इति संज्ञापूर्वकोऽयं विधिरकारस्तस्य क्वचिदनित्यत्वव्यभिचारो यथा स्यादिति ह्रस्वग्रहणं क्रियते। तेनेत्यादि। अम्बदा, अम्बला अम्बिका इत्येतेषां ह्रस्वाभावे सति पूर्वेणैत्वम्। सेः पूर्ववल्लोपः। अम्बानामिति कर्तव्ये बहुत्वनिर्देशादेवाम्बार्थपरिग्रहे सिद्धेऽर्थग्रहणं प्रतिपत्तिगौरवपरिहारार्थम्।

औरीम् २।१।४०[1]

श्रद्धायाः पर औकार इति। विशेषादिष्ट इति वचनाच्छ्रद्धायाः इति सम्बध्यते। नाम्बार्थानामिति भावः। श्रद्धासंज्ञकाः मध्यपातित्वेन त्वम्बार्थाः सम्बध्यन्त एव। उमा गङ्गेति। द्वन्द्वादिदं प्रथमाद्विर्वचनं तिष्ठत इत्यस्योपयोगात्। माले इति द्वितीयाद्विर्वचनमानयनक्रियायां मालायाः कर्मत्वात्। ईमिति कर्तव्ये किं दीर्घोच्चारणेनेत्याह—दीर्घोच्चारणमित्यादि। जरसीत्ययं प्रयोगः सन्निपातपरिभाषायां सत्यां युक्तो न वेति सूरयः प्रमाणम्।

ङवन्ति यै यास् यास् याम् २।१।४१[2]

ङवन्तीति। ङमन्तमिति वचनापेक्षया नपुंसकेनायं निर्देशः। ङे, ङसि, ङस्, ङि इत्येतेषां ङकारस्यानुकरणोऽयं ङकारः, सः विद्यते येषामिति। तस्यास्तीति वन्तुः, जसो वचनापेक्षया नपुंसकत्वात् जस्शसोरिति शिभावः, घुट्स्वराद् घुटि नुरिति नुकारागमोऽत्र यथा न भवति तथा तद्विधावेवोक्तप्रायमिति तत एवानुगन्तव्यम्। लुप्तशस्कमिति। आदेशानां विधीयमानत्वात्कर्मणि सञ्जातस्य[3] शसः आदिलोप इत्यादिना लोपः।

सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाच्च २।१।४२[4]

निर्देशसामर्थ्यादिति। ससवो[5] योऽयं निर्देशः तद्बलादित्यर्थः। अन्ये तु सहशब्देन समानार्थस्समासविषयः सः शब्दोऽस्ति तस्यायं ससर्व इति निर्देश इति व्याचक्षते। एवञ्च व्याख्यायमाने सत्यस्त्वसहशब्दः पदेन विग्रहः

---

१. २।१।४१ (दु० वृ०)
२. २।१।४२ (दु० वृ०)
३. संज्ञा तत्र (भं०)
४. सर्वनाम्नस्तु ससवो ह्रस्वपूर्वश्च २।१।४३ (दु० वृ०)
५. समासोऽयं निर्देशः तद्बलादित्यर्थः (भं०) ससवो इत्यस्य स्थाने सह सुना इति पाठः (दु० वृ०)

कर्तव्यः, यथा सुसखीत्यत्र शोभनशब्देन ह्रस्वपूर्वस्य येभ्य इत्यादिविग्रह-विशेषं प्रदर्शयन्नादेशेभ्यः पूर्वस्य दीर्घस्य ह्रस्वो भवत्येवं रूपः स्थान्यादेशो भावोऽत्रान्तर्नीयत इति सूचयति। ह्रस्वपूर्वो येभ्य इति तु न विगृह्यते। एवं हि सति आदेशेभ्यः पूर्वो ह्रस्वो भवतीत्येवमपि कश्चित्सम्भावयेत्। सुकारागमयुक्त इति। उकारेणानुबन्धेन तृतीयादौ तु परादिरिति सुकारस्य परावयवत्वादेवमुक्तं यस्मै तस्याः[1] कस्यामिति यद् तद् किम् ङे ङसि ङि इत्यस्य तु किं कः, स्त्रियामादाप्, यै यास् याम् ससवो ह्रस्वपूर्वश्चादेशाः। तुशब्दः पूर्वस्मादस्य विधेरादिकृतम् विशेषं द्योतयति। अथोत्तरत्र स्वागमाधिकारनिवृत्त्यर्थस्तुशब्दः कस्मान्न भवति, न भवति ससवो[2] इत्यस्योत्तरत्रैवानुवृत्तिप्रसङ्गात् नद्या इति च निर्देशः स्वागमाधिकारे सति विरुध्येत। अथ सुरिति कस्मान्न क्रियते, सर्वनाम्नः श्रद्धासंज्ञकात्परेषां ङवतां यै यास् यास् यामादेशाः ह्रस्वपूर्वाः भवन्ति। सुश्चैषामागमो भवतीति चार्थो विज्ञास्यते तत् किं ससवो इत्यनेन अस्त्येतत्, आदेशानां तु स्वागमसम्बन्धे सति षष्ठ्यां व्याख्यायमानायां सुश्चैषामागम इति वाक्यभेदात् प्रतिपत्तिगौरवं स्यात्, ससवो इति तु समानाधिकरण्यनिर्देशे सत्येकवाक्यत्वात् प्रतिपत्तिलाघवं च भवतीति तन्निर्देश एव ज्यायान्। ह्रस्वश्चेति कर्तव्ये पूर्वग्रहणमादेशानां ह्रस्वो मा भूदिति।

द्वितीयातृतीयाभ्यां वा २।१।४३[3]

द्वितीयातृतीयाशब्दाभ्यामिति। एतेन द्वितीयातृतीयाशब्दौ स्वरूपेण गृह्येते न तु द्वितीया तृतीया विभक्तीति दर्शयति। न त्वादेश इति विकल्प्यन्त इतिवचन विपरिणामेन सम्बध्यते। कथं पुनः प्राप्तविकल्पेऽस्यादेशविषये सम्भवति सत्येवमवगन्तुं शक्यत इत्याह—व्याख्यानादिति। तीयाद्वेति न कृतं सुखतीयादेर्मा भूदिति। ननु सुखशब्दात् सुखतो भव इतीय-प्रत्यये कृतेऽन्त्यस्यादिलोपे च सुखतीय इति भवतीति। एवं चायमनर्थकः तीयशब्द इत्यानर्थक्यादेवास्य तीयशब्दस्य ग्रहणमिह न भविष्यति[4]। यस्तु अद्वेस्तीयः त्रेस्तृ वेति पूरणार्थाभिधायी प्रत्ययः स एवार्थवत्वाद् ग्रहीष्यते। ततः तीयाद्वेति क्रियतां किं द्वितीयातृतीयाभ्यां वेति गौरवकरणेन, अस्त्येतत्, अर्थवद्ग्रहण-

१. तस्मै यस्याः (वा०)
२. ससवो इत्ययं पाठः दुर्गवृत्तिमेवाश्रित्य मया स्वीकृतः, न्यासग्रन्थे तु उभयोः प्रत्ययोः ससर्व इति पाठः ससवो इत्यस्य स्थाने वर्तते।
३. २।१।४४ (दु० वृ०)
४. भवति (वा०)

परिभाषायाः त्वनित्यत्वदर्शनान्सुखतीयादेरपि ग्रहणं विज्ञास्यते । तन्मैवं विज्ञायीति यथान्यासकरणमेव ज्यायः ।

नद्या ऐ आसासाम् २।१।४४[1]

ससवो ह्रस्व पूर्व इति निवृत्तमिति नद्या इत्यत एव निर्देशात् इति भावः ।

अम्शसोरादिलोपम् २।१।४५[2]

नद्या परयोरम्शसोरित्यादि । एतेनाम्शसोरादिवर्णो लुप्यते न तु तयोः परयोर्नदीसंज्ञकस्येति दर्शयति । एतच्च नद्या इति पञ्चम्यन्तस्यानुवर्तमानस्य षष्ठी सम्बन्धे कारणाभावादवगम्यते । अल्लोपमिति न कृतं वैचित्र्यार्थम्[3] ।

ईकारान्तात्सिः २।१।४६[4]

ग्रामणीरिति । नायं नदीसंज्ञकः, नित्यस्त्रीविषयत्वाभावात् । लक्ष्म्यादिभ्यस्सेर्लोपो नेष्यत—इति । येभ्योऽनेन सूत्रेण सेर्लोपो न दृश्यते ते लक्ष्म्यादयः । आदिशब्दस्य प्रकारवाचित्वादन्तग्रहणमीकारमात्रात्सिलोपो मा भूदिति । नन्वेवं सति ईदूत्-स्त्र्याख्यौ नदीत्यत्र नदीशब्दात्केवलात्मकेन[5] सेर्लोपः स्यात् । आदिलोप इत्यादिना लोपो भविष्यति ।

व्यञ्जनाच्च २।१।४७[6]

व्यञ्जनेन लिङ्गस्य विशेषणात् तदन्तविधिर्लभ्यत इत्याह – व्यञ्जनान्तादिति । वागिति चवर्गदृगिति गत्वम् । राजेति । घुटि चासम्बुद्धाविति दीर्घः । नन्वित्यादि । चोद्यमित्यादिना परिहरति । अयमर्थः संयोगान्तस्य लोप इत्यत्र लिङ्गाधिकारालिङ्गग्रहणेन संयोगो विशेष्यते, तेन लिङ्गसम्बन्धिनस्संयोगस्य योऽन्तः, तस्य लोपः क्रियते । न च सिप्रत्ययान्तं लिङ्गविभक्तिवर्जमिति लिङ्गसंज्ञानिषेधात् । अतो लिङ्गसंयोगस्य अन्तलोप उच्यमानोऽन्यस्य न प्राप्नोति । न च सम्भवी, सर्वत्र संयोगान्तलोपः । वाग्विद्युदित्यादौ संयोगादेर्घुट—इति

१. २।१।४५ (दु० वृ०)
२. अम्शसोरादिर्लोपम् २।१।४७ (दु० वृ०)
३. वैचित्र्यात् (वा०)
४. २।१।४८ (दु० वृ०)
५. न्यासग्रन्थे तु "केवलात्केन" इत्येव पाठः इति विचारणीयः ॥
६. २।१।४९ (दु० वृ०)

घुटो लोपप्रसङ्गात् राजेत्यादौ च न लोपः न प्राप्नोति संयोगान्तलोपस्यालुप्तवद्भावात्। तस्मात् व्यञ्जनान्ताच्चेति सूत्रं कर्तव्यमेव।

अग्नेरमोऽकारः २।१।४८[1]

परकार्ये विकार्यादिरित्यकारस्यैवावगम्यते। स्थानित्वे सति पुनरकारोपादानं क्वचित्पूर्वपरौ सर्वाविति सर्वस्यामो लोपाशङ्का निवृत्त्यर्थम्।

औकारः पूर्वम् २।१।४९[2]

पूर्वं वर्णमापद्यत इति, न तु पूर्वमग्निसंज्ञकम्, कुतः, वर्णाधिकारात्। यद्येवम्, यौ पूर्वाविदुतौ तावेवौकारस्य स्थाने भवत इति कस्मान्न व्याख्यायते, नैवं शक्यम्। एवं हि व्याख्यायमाने सति बुद्धि वेन्विती दृशे रूपे स्याताम्। ततश्चैवंविधरूपसम्पत्तये औकारो लोपमित्येव कुर्यात्। पूर्वग्रहणं त्वपार्थकं भवेत्। अतः पूर्वग्रहणात्पूर्ववर्णादिकारादेशेऽस्य औकारस्य विज्ञायते। पूर्वोत्तरसूत्रमध्यपातित्वेन प्रतिभिज्ञायमानस्य द्वितीयाद्विर्वचनस्यैवौकारस्य ग्रहणं प्राप्नोति न प्रथमाद्विर्वचनस्य। तदपि च गृह्यते कारप्रत्ययस्याधिकस्य निर्देशात्।

शसोऽकारः सश्च नोऽस्त्रियाम् २।१।५०[3]

अस्त्रियामिति स्त्रीशब्दस्य स्त्री चेति धातुवद्भावादियादेशः शसश्च सकारस्य नत्वम् भवत्यस्त्रियामित्येतेषां अस्त्रियामिति निषेधोऽयं प्रत्यासत्तेर्न तु विधिनैव सम्बध्यते। न तु पूर्ववर्णविधिनेति दर्शयति। अथ किमर्थमकार इत्युच्यते यावता शस इत्यवयवसम्बन्धे षष्ठी व्याख्यायिष्यते, शसोऽवयव इति। एवं च परकार्ये विकार्यादिरित्यवयवादिरकार एव स्थानी विज्ञास्यते। तत्किमकारग्रहणेन, असदेतत्, श्रुतमकारमवयवं विहायाश्रुतस्याकारस्यावयवस्थानित्वेन विज्ञातुमशक्यत्वात्। परकार्ये इत्येषा हि परिभाषा स्थानिनमकारं प्रकल्पयेत्। यदि शसोऽवयवस्सकारः सूत्रे नोपलभ्यते। तदुपलम्भे तु तस्यैव पूर्वो वर्णादेशः प्राप्नोति। नत्वञ्च पाक्षिकं तस्यैव भवेत्। तन्मा भूदेष दोष इत्यकारोपादानम्। पुंसीति कर्तव्ये स्त्रीग्रहणमुत्तरार्थम्। तेनामुना कुलेनेत्ययं स्वरादेशो नपुंसके सिद्धो भवति।

---

१. २।१।५० (दु० वृ०)
२. २।१।५१ (दु० वृ०)
३. २।१।५२ (दु० वृ०)

अदोऽनुञ्च २।१।५१[1]

अद इत्यदश्शब्दात्परस्य जसः आदिलोप इत्यादिना शि-भावे भवितेः[2] लोपे प्रत्ययलोपे आश्रये त्यदाद्यत्वं न भवति साक्षाद्विभक्तौ तस्य विधीयमानत्वात्। तथा च तद्विधौ वक्ष्यति। पुनर्विभक्तिग्रहणं साक्षाद्विभक्तौ त्यदाद्यत्वार्थमिति। स्वरादेशस्य विवेर्बलीयस्त्वात् लोपात्पूर्वमपि न भवति स्वरूपभङ्गभयात्। सति हि त्यदाद्यत्वे मत्वोत्वयोरुदयादमू इति रूपसम्पत्तेः अद इति रूपमदसशब्दस्यावगमकं हीयते। टा इत्यनुवर्तत इति पूर्वसूत्रात्। ततश्चार्थवशात्सप्तम्यन्तमिह विज्ञायते। च-शब्दाट्टा प्रत्ययस्य च नाभाव इति। एतेन च-शब्दोऽत्र नाभावं समुच्चिनोतीति दर्शयति। अन्यथा तु टाप्रत्यये परे लब्धसत्ताको स्वरादेशः कथं सत्यां सन्निपातपरिभाषायां ना-भावं विदध्यात्। नन्वमुनेति रूपम् अदसः पदे मः इति अदसः दस्य मत्वे कृते सत्युत्वम्मादित्युत्वे कृते पूर्वेण च टाप्रत्ययस्य ना-भावे उपजाते सिद्धमिति किं योगारम्भेण, असदेतत्, पर इति वचनाददसः पदकार्ये कृते सति मत्वं विधीयते। न चाकृते नाभावलक्षणे पदकार्ये मत्वं भवितुमर्हति। न चासति मत्वे ना-भावस्यास्ति सम्भवः। मत्वापेक्षमत्रोत्वं तत् सव्यपेक्षत्वात् नाभावस्य। एवञ्चासति ना-भावे लक्षणविहितयोर्मत्वोत्वयोरप्रवृत्तेः कथममुनेत्यस्य सिद्धिः स्यात्, यद्येवम्, ना-भावस्य सूत्रार्थम् अदस इति सूत्रं क्रियताम्, एवञ्चादसः परस्य टाप्रत्ययस्य कृते नाभावे त्यदाद्यत्वोत्तरकालं स्वलक्षणविहितयोर्मत्वोत्वयोस्सत्तोः सिद्धममुनेति। एतन्न सिध्यति, कृते हि नाभावे पदकार्यत्वात् यन्मत्वात् पूर्वं त्यदाद्यत्वं सञ्जातं तस्याकारो दीर्घमिति पदकार्यं दीर्घत्वमाशङ्क्येत्। ततो मत्वे सति उत्वम्मादिति द्विमात्रस्याकारस्यान्तरतम्यात् द्विमात्रादेशे[3] सत्यमुनेत्यनिष्टं भवेदिति तन्निवृत्तये योगारम्भ एव ज्यायान्। अद इति व्यक्तिमात्रं निर्दिश्यते तेनामुनेत्यत्राक्प्रत्ययसहितस्यादसो म-आदेशो न भवति। अदसअव्ययसर्वनाम्न इत्यज्ञातादावर्थे स्वरादन्त्यात्पूर्वोऽक्प्रत्ययः। त्यदाद्यत्वम्, अदसः पदे मः उत्वम्मादित्युत्वम्। अक्प्रत्ययस्य सहितस्यादसो म-आदेशे सत्यज्ञातादयोऽर्थान् प्रतीयेरन्निति चेत्, प्रकरणवशात् प्रत्येष्यन्ते।

इरेदुरोज्जसि २।१।५५[4]

इकारोकारयोरनुकार्येणार्थेनार्थवत्वात् प्रथमा। अनुकार्यौ तु बुद्धिर्धनु-

---

१. २।१।५४ (दु० वृ०)
२. कृते (मं० प्र०)
३. द्विमात्रे तूत्वे (मं०)
४. २।१।५५ (दु० वृ०)

सम्बन्धिनाविकारोकारौ एदौतोस्तु स्वरूपेणार्थेनार्थवत्वादग्निग्रहणेऽनुवर्तमाने इदुद्वचनमस्त्रियामित्यस्य निवृत्त्यर्थम् । तेन बुद्धयः धेनवः ।

सम्बुद्धौ च २।१।५३[1]

अथ हे नदि, हे वधु इत्यत्र नदी-वधूशब्दयोः सम्बुद्धौ ह्रस्व इति ह्रस्वे कृते यौ इदुतौ तयोरप्येदोतावादेशौ कस्मान्न भवत इत्याह—हे नदीत्यादि कुतो न भवतीत्याह – ह्रस्वविधानसामर्थ्यादिति । यदि ह्यत्र कृतेऽपि ह्रस्वे एदोतौ स्यातामपार्थकं ह्रस्वशासनं स्यात् । सम्बुद्धौ ह्रस्व इति ह्रस्वग्रहणमपास्य सम्बुद्धावेदोताविति एवं कुर्यात् । तस्माद् ह्रस्वप्रवृत्तिवचनाद्[2] हे नदि हे वधु इत्यत्रैदोतौ न भवतः । जस्सम्बुद्धेरिति पूर्वत्रैव न कृतं यथासंख्यभयात् ।

ङे च २।१।५४[3]

ङयीति प्राकरणिके विभक्तिनिर्देशे कर्तव्ये ङे इत्यश्रूयमाणसप्तमीको निर्देशो रूपमात्र परिग्रहार्थः । तेन ङे इत्यस्य रूपस्य विभङ्गे[4] सत्येदोतौ न भवतः । बुद्ध्यै धेन्वै, ह्रस्वश्च ङवतीति बुद्धिधेनु-शब्दयोः नदीसंज्ञकत्वात् नद्या ऐ आसासामित्यै-भावः । तस्मिन्कृते स्थानिवद्भावाद् न भवत्ययं ङे-प्रत्यय इत्येदोतौ स्याताम् ।

ङसिङसोरलोपश्च २।१।५५[5]

ङसिङसोः परयो इरेद् भवति उरोत् च भवति इत्येतेनेदुतोः प्रति ङसिङसोः प्रत्येकं निमित्तभावमुपदर्शयन्यथासंख्यभावं सूचयति । एतच्च ङसिङसोरिति ङसोरल्पस्वरस्य लक्षणव्यभिचारसूचनार्थः पर[6]-निपातकरणाल्लभ्यते । एवञ्च कृत्वा छादेर्घ इति षष्ठ्येकवचने परतः इकारस्यैव विधानं न्याय्यम्[7] । तयोश्चाकारलोप इत्येतेनाप्यकारलोपविधौ ङसिङसोरित्यर्थवशात् षष्ठ्यन्ततया विपरिणम्यत इति दर्शयति ।

---

१. २।१।५६ (दु० वृ०)
२. वलात् (भं०)
३. ङे २।१।५७ (दु० वृ०)
४. भङ्गे (वा०)
५. २।१।५८ (दु० वृ०)
६. परि (भं०)
७. ज्यायः (वा०)

गोश्च २।१।५६[1]

गोरिति गोशब्दात् परस्य ङसेरनेनैवाकारलोपसम्भविना शब्देन निर्देशो न्याय्यः इतीतरेतराश्रयदोषः शास्त्रेऽस्मिन्प्रकल्प्यते । द्यौ-शब्दादपीष्यत इति ङसिङसोरकारलोप इति शेषः । अत्र च हेतुः च शब्दः ।

ङिरौस् पूर्वः २।१।५७[2]

औ इति प्रथमायाः द्वितीयस्याः[3] वैकवचनस्य लोपः पूर्वेण वर्णेन इति । वर्णाधिकारात् । अग्नेः परो ङिरित्येतेनाग्नेरिति वर्तते न त्वनन्तरं गो-ग्रहणमिति दर्शयति । एतच्च परो ङः दृतिनाथयोः पशाविति च निर्देशादवगम्यते । अङेर्द्वाविति कृते को दोषस्याद् येनैवं लघुसूत्रं परिहृत्य गुरुः क्रियत इत्याह—ङेर्द्वाविति कृते विंशताविति न सिध्येत् इति । अत्र हेतुमाह—तेविंशतेरित्यादि । तस्माद्विंशतावित्यस्य शब्दस्य सिद्ध्यर्थमुत्तरत्र चानिष्टप्रयोगनिवृत्त्यर्थम् ङेर्द्वाविति न क्रियते ।

ङसिङसोरुमः २।१।५८[4]

ङसिश्च ङसश्चेति द्वन्द्वः । उमित्यग्नेरमोऽकार इत्यमोऽकारलोपः । अ-इत्यकारादनुकार्येणार्थेनार्थवत्वात्प्रथमा । अनुकार्यस्तु ङसिङसोरकारः । ननु सखिपति द्वौ, ङसिङसावपि द्वावेव, ततश्च संख्यासाम्याद् यथासंख्यं प्राप्नोति तत्कस्मान्न भवतीत्याह—यथासंख्यं न भवतीत्यादि । सति हि यथासंख्यसम्बन्धे सख्युरिति सखिशब्दस्य षष्ठ्यन्तस्य निर्देशो विरुध्येतेति भावः । इह निर्दिश्यमानानामादेशिनामादेशाः भवन्तीति सर्वयोर्ङसिङसोरुत्वं प्राप्नोति तन्मा भूदेष दोष इत्यकारग्रहणं किल क्रियते । एतच्चाप्रयोजनं सर्वादेशे ह्युत्वे विज्ञायमाने सख्युश्च पत्युश्चेति निर्देशावनन्वितौ[5] स्याताम् । तस्मादकारस्यैवोत्वं भविष्यतीति किमकारोपादानेन, अत्रोच्यते, अधिकविषयोपसङ्ग्रहार्थमकार उपादीयते । तेन सखी-पती-शब्दयोः लूनी-पूनी-शब्दयोश्च सख्युः पत्युः लून्युः पून्युः इत्यादिसिद्धम् । सह खेन सखः, लून-पून-शब्दौ ल्वाद्योदनुबन्धादिति कृतनत्वौ सखिपति-लून-पून-शब्देभ्य. सखमिच्छत्यात्मनः पतिमिच्छ-

१. २।१।५९ (दु० वृ०)
२. २।१।६० (दु० वृ०)
३. द्वितीयायाः (मं०)
४. २।१।६२ (दु० वृ०)
५. निर्देशाविति न्यूनपाठः (मं०)

त्यात्मनः इत्यादिविग्रहे कृते नाम्न आत्मेच्छायामिति यिन्, सख-लून-पून-शब्दानां यिन्यवर्णस्येतीत्वं पतिशब्दस्य नाम्यन्तानां यिणायीति दीर्घः। ततः सखीय् पतीय् लुनीय् पूनीय् इति स्थिते क्विप्, य्वोर्व्यञ्जन इति य लोपः, ङसिङसोरिति तयोरकारस्योत्वम्, ङसोऽल्पस्वरस्य परनिपातो लक्षण-व्यभिचारं सूचयति। तेन पूर्वनिपातलक्षणवदुत्वलक्षणमपि व्यभिचरतीति। अतिसखेः, सेनापतेरिति च सिद्धम्।

ऋदन्तात् सपूर्वः २।१।५९[1]

ऋदन्तस्येति विग्रहः। तपरकरणमसन्देहार्थम्। असति तपरत्वे रन्ता-दित्युच्यमाने किमयं ऋकारस्य निर्देशः। उत रेफस्येति मधुरमतीनां सन्देहः स्यादिति तन्निवृत्तये तपरकरणम्। तपरस्तत्कालस्येति वचनात् ऋकारादेव विधिर्यथा स्यात् ऋकारान्मा भूदित्येतदर्थं तु तन्न भवति ऋदन्तस्य लिङ्गस्या-सम्भवात्। स्वश्च प्रथन इत्यत्र निर्देशबलादपि शक्यते उत्वभावोऽस्यावमातु-मृकारेण लिङ्गस्य विशेषणाद्विशेषणेन विशेष्यस्य च तदन्तविधिरिति तदन्त-विधौ लब्धेऽन्तग्रहणं विस्पष्टार्थम्।

आ सौ सि लोपश्च २।१।६०[2]

स्वरूपेणार्थेनार्थवत आ इत्येतस्मात् सञ्जातस्य सेरादिलोप इत्या-दिना लोपः। ऋदन्तादित्यनुवर्तमानमर्थवशात्षष्ठ्यन्तं विज्ञायत इत्याह— ऋदन्तस्य लिङ्गस्य। इह सौ सिकारे पर इत्येतेन सावितिं प्रथमैकवचनस्येह ग्रहणं न तु सप्तमीबहुवचनस्येति दर्शयति। एतच्च सिलोपवचनाल्लभ्यते। ननु यथा अस्तेस्सावित्यत्र सावितिनिर्देशे अभिव्यतिसे इति प्रयोगदर्शनात् परस्मैपदात्मनेपदसंज्ञकं सकारादिप्रत्ययद्वयं गृह्यते तथेहापि सामान्येन सका-रादिविभक्तिः कस्मान्न परिगृह्यते, ततश्च सप्तमीबहुवचनेऽप्यात्वं प्राप्नोति। अस्त्येतत्। प्राथम्यात्तु प्रथमैकवचनमेव गृह्यते तत्र च कृत्वार्थं वचनं प्रत्यया-न्तरे नावगाह्यत एव। आस्तेस्सावित्यत्र तर्हि परस्मैपदसकारस्य ग्रहणं प्राप्नोति, प्राथम्यात्, नत्वात्मनेपदसकारस्य। सन्ध्यक्षरे चेत्यतश्चानुवृत्त्या आत्मनेपदसकारेऽपि परे लोपोऽस्तेरन्त्यस्य विज्ञास्यत इत्यदोषः। अन्त्यस्येति। वर्णान्त्यस्य विधिरिति वचनार्थ इह विशेषविधिः सामान्यविधेर्बाधको दृष्टः,

---

१. २।१।६३ (दु० वृ०)
२. २।१।६४ (दु० वृ०)

यथा—दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति तक्रदानं दधिदानस्य । एवं चैतत् सूत्रानारम्भे सति ऋदन्तस्य लिङ्गस्य घुटि च धातोस्तृशब्दस्यारिति योगाभ्यामरारौ सामान्येन प्राप्तौ, तयोरेव प्राप्तयोरिदमात्वमारभ्यमाणं तयोर्बाधकं सम्पद्यत इत्यनेनाभिप्रायेणाह—यस्मिन्प्राप्त इत्यादि । पितेति । अत्रारादेशो बाध्यते । कर्तेत्यत्रापि आरादेशः । अथ सेर्डादेश एव कस्मान्न क्रियते । एवञ्च कृतेऽन्त्यस्वरादिलोप – उपजातेऽपि पितेत्यादि सर्वं सिध्यत्येवेति सेर्डा इति सूत्रं कस्मान्न क्रियत इत्याह – सेर्डा इति न कृतमित्यादि । नन्वेवं सति कृते डानुबन्धे तद्धितप्रत्यये प्रत्यासत्तेर्विधीयमानोऽन्त्यस्वरादिलोपः कथमिहा-तद्धिते परे स्यात्, डानुबन्धकरणसामर्थ्याद् भविष्यति । श्रवणार्थोऽपि डकार-स्स्यात्, यथा—अमन्ताड्डु इत्ययमिति चेत्, एवं हि सति स कर्तेत्येष निर्देशो विरुध्येत ।

अग्निवच्छन्दसि २।१।६१[1]

अग्निवद् भवतीत्यस्यार्थं विवृण्वन्नाह—अग्नेः परस्येत्यादि । यदुक्तमिति शसोऽकार इत्यादिना पूर्वस्वरो नत्वञ्च । स्त्रियां नत्वं न भवतीति अस्त्रिया-मिति निषेधादिति भावः । स्वश्वरित्यत्र पूर्वस्वर ऋकार एव भवति ।

अर्डौ २।१।६२[2]

स्वरो रेफस्य विसर्जनीयो न भवति, स्वरूपभङ्गप्रसङ्गात् । ऋदन्तात् पूर्व इत्यत्र ऋकारमात्रमपेक्ष्यते इति । ननु कथमेतत्, यावता ऋदन्तादिति बहु-व्रीहिरयं तत्र च लब्धोपसर्जनभावमकारग्रहणं च कथं पृथगपेक्षितुमिह शक्यते, उच्यते—न पूर्वकमृदन्तग्रहणं पूर्वत्रैव कृतकृत्यमिहापेक्षितुं शक्यम्, किं तर्हि तत्सदृशमनुमीय मन्यमानात् । तच्च कर्मधारयसमासाविष्टमिह व्याख्यायते । ऋच्चासावन्तः ऋदन्त इति, तेनान्तर्भूतमृकारमात्रमनेन व्याख्याक्रमेणोपेक्षितुं भवतीति लिङ्गसम्बन्धिन ऋकारस्यान्तर्भवतीत्याह—लिङ्गस्यान्त्यस्य ऋकार इति । यदि तु ऋदन्तादिति बहुव्रीहिरेष व्याख्यायेत ततो बहुव्रीहेरन्यपदार्थ-प्रधानत्वाल्लब्धप्रधानभावमृदन्तं सर्वमेव लिङ्गमनेकवर्णस्सर्वस्येति वचनादारा-देशं प्रति स्थानित्वेन विज्ञायते । कर्तरि चेत्येतत्तु ज्ञापकं कर्तृविषयमेव सम्भा-व्यते । उत्तरत्र च ज्ञापकाभावात् सर्वादेशत्वमरः केन वार्येत । ततश्च ऋकार-मात्रमपेक्षते । तन्मात्रस्यैवारादेशः ।

---

१. २।१।६५ (दु० वृ०)
२. २।१।६६ (दु० वृ०)

घुटि च २।१।६३[1]

अङि घुटोरित्यादि। अङि घुटोरित्येव योगे कर्तव्ये योगविभाग उत्तरत्र घुट एव अनुवृत्तिर्यथा स्यात्। ङिप्रत्ययस्य मा भूत् इत्येवमर्थः।

धातोस्तृशब्दस्यार् २।१।६४[2]

आरिति। स्वरूपभङ्गभयाद्विसर्गाभावः। तृ-शब्दस्येति तृन्तृचौ द्वावपि गृह्येते। विशेषाभावात्। अरो बाध इति पूर्वसूत्रेण प्राप्तस्य। यतेर्वृद्धिश्चेति ऋन्प्रत्यय इति। तत्र हि सुञ्यमोर्नृन्नित्यत ऋन्निति वर्तते। ननु ता इत्ययं शब्दः शब्दत्वं न व्यभिचरतीति तुरिन्येव क्रियते किं शब्दग्रहणम्, वैचित्र्यार्थमिति। ननु कृशेः तृचि यद् रूपं तत्तस्य तृन्नन्तस्य घुट्यसम्बुद्धौ स्त्रियामीकारे च यथा स्यादिति अस्य विशेषस्य संशब्दनार्थं ग्रहणं स्यात् तत्कथं तद् वैचित्र्यार्थं भवेत्। तेन क्रोष्टा क्रोष्टारौ क्रोष्टारः, क्रोष्टारम् क्रोष्टारौ क्रोष्टॄन् इति क्रोष्टुशब्दस्य रूपाणि सिद्धानि भवन्ति। क्रोष्ट्रीति। गौरादित्वादीकारः। अत्रोच्यते—घुटि स्त्रियां च क्रोष्टुशब्दस्य एवोत्तरत्र प्रयोक्ष्यते। एवं च पाश्चात्यानि रूपाणि क्रोष्टुशब्दस्यैव भविष्यन्ति। अन्यत्र शसादौ कृशिः तृजन्तस्तुन्नन्तस्तु प्रयुज्यते। क्रोष्टॄन्, क्रोष्टून्। क्रोष्टा, क्रोष्टुना। कृशेर्वुन्-तृचौ इति तृच्। सितनिगमिसनिमध्यविधकृशेभ्यः तुन्निति तुन्-प्रत्ययश्च। एवञ्चेदं शब्दग्रहणं वैचित्र्यार्थम्।

स्वस्रादीनां च २।१।६५[3]

इह आदिग्रहणेन नप्त्रादयस्सप्त वृत्तावुपदर्शिताः परिगृह्यन्ते। तत्रैषां सङ्ग्रहार्थमिदमादिग्रहणं न कर्तव्यम्। यतोऽमी नप्त्रादयः पञ्चपाद्यां नप्तृ-नेष्टृ-त्वष्टृ-क्षतृ-होतृ-पोतृ-मातृ-भ्रातृ-जामातृ-पितृ-दुहितृ-इत्येतत् सूत्रे तृनि तृचि वा निपातिताः। तथा हि नप्तेति नमेस्तृचि मकारस्य पकारादेशो निपात्यते। नेष्टेति, नयतेस्तृचि पकारागमो गुणश्च। त्वष्टेति, त्विषेः तृचि उपधाया अकारादेश इडभावश्च। क्षत्तेति, क्षदेस्तृचि इडभावः। होतृ-पोतृ इत्येतेऽपि रूपे जुहोतिपुनात्योस्तृचि। प्रशास्तेति, शासेः प्र-पूर्वस्य तृन्तृचौ शन्सिक्षदादिभ्यः संज्ञायां चानिटाविति तृचि रूपम्। तदनेन प्रकारेण नप्त्रादयः

---

१. २।१।६७ (दु० वृ०)
२. २।१।६८ (दु० वृ)
३. २।१।६९ (दु० वृ०)

तृ-प्रत्ययान्ताः। ततः तेषामृकारस्य पूर्वसूत्रेण सिद्ध आरादेशः, तदपार्थकमेतत् सङ्ग्रहार्थमादिग्रहणम्। एवं स्वसृ-शब्दार्थः सस्वरिति सूत्रं क्रियतामित्याशयेन पूर्वपक्षयति। ननु नप्त्रादयः इत्यादि। सत्यमित्यादिना परिहरति। सत्यम्, सिद्धो नप्त्रादीनामारादेशः, सिद्धे त्वारम्भः नियमार्थ इति नियमस्वरूपं प्रदर्शयितुमाह— उणादिप्रत्ययान्तानामित्यादि। उणादिप्रत्यये तृन्तृचावत्र विवक्षितौ तेन तदन्तानां एतेषां पूर्वसूत्रेणारादेशः प्रवर्तते, तदा नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृ-इत्येतेषामेव सप्तानां नान्येषाम्, तेन क्व पुनर्भवतीत्याह— तेनेत्यादि। पितरौ पितरः। भवत्ययं पितृशब्दः तृ-प्रत्ययान्तः, नप्त्रादिसूत्रे पा रक्षण इत्यस्य तृचि एत्वे च निपातनात्। तेनास्यारादेशः प्राप्तोपि नियमान्न भवति।

आ च न सम्बुद्धौ २।१।६६[1]

आरादेशो न भवति। पूर्वेतरेण सूत्रेण प्राप्तः। आत्वं चेति न भवति, इत्यनुषज्यते। सावौ सिलोपश्चेत्यनेन प्राप्तः।

ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम् २।१।६७[2]

अर्थवशादिति। प्रयोजनसामर्थ्यादिति। अर्थः प्रयोजनम् तु सम्बुद्धिग्रहणेन प्रथमान्तेन सेस्सामान्येनाधिकरण्येन सम्बन्धः ह्रस्वान्तादि ह्रस्वेन लिङ्गस्य विशेषणाद् विशेषेण च विशेष्यस्य तदन्तविधिविज्ञानादेवमुक्तम्। हे वृक्ष इत्यादि सर्वत्रामन्त्रणे चेति सिः सम्बुद्धौ ह्रस्व इति नदीवधूशब्दयोः ह्रस्वः। सम्बुद्धौ चेति गङ्गाशब्दस्येत्वम्। वृक्ष इति। प्रथमा विभक्तिरित्यनेनात्र सि-प्रत्ययो नायमामन्त्रिते सिरिति सम्बुद्धि-संज्ञो न भवति। नदीग्रहणमुत्तरार्थमिति। ननु हे नदि इत्यादौ नद्याः परस्य सम्बुद्धेः लोपो यथा स्यादिति। इहार्थतायां सम्भवन्त्यां कथमुत्तरार्थत्वं युज्यत इत्याह— हे नदि इत्यादावित्यादि। हे नदि, हे वधु इत्यत्र नदीवधू-शब्दयोः सम्बुद्धौ ह्रस्व इति कृते ह्रस्वे ह्रस्वग्रहणादेव सिद्धः सम्बुद्धिलोप इति नदीग्रहणमिहापार्थकं सदुत्तरार्थं जायते। सन्निपातपरिभाषयेत्यादि। पराभिप्रायमाशङ्क्यते। अथैवेहार्थत्ववादिन्[3] मन्यसे, सम्बुद्धिनिमित्तो यो ह्रस्वः सन्निपातपरिभाषायां

---

१. २।१।७० (दु० वृ०)
२. २।१।७१ (दु०वृ०)
३. अथैवेहार्थवत्वात् (मं०)

सत्यां सम्बुद्धेर्विघातं कुर्यादित्येवं च हे नदीत्यादौ ह्रस्वग्रहणात् कथं सम्बुद्धिलोपो भवेदिति, तन्न, कथमित्याह — वर्णग्रहण इत्यादि। ह्रस्वोऽत्र वर्णः सम्बुद्धिलोपं प्रति हेतुत्वेनोपपत्तेः[1]। वर्णग्रहणे च सम्बुद्धिविघातं प्रति ह्रस्वो निमित्तमेव। सिद्धो हे नदीत्यादौ ह्रस्वग्रहणाल्लोपः सम्बुद्धेरिति। नदीग्रहणमुत्तरार्थम्। इह करणे तस्य किं प्रयोजनमिति चेत्, सन्निपातपरिभाषामपेक्षमाणानां मन्दमतीनां यत्प्रतिपत्तिगौरवमापतति तस्य परिहारः। अत्र श्रद्धायाः सम्बुद्धिलोपे किमुदाहरणम्? हे श्रद्धेत्यादि। नन्वत्र लोपस्वरादेशपरिभाषया सम्बुद्धिलोपात्पूर्वमेत्वे कृते लिङ्गस्य श्रद्धासंज्ञकात्[2] कथं सम्बुद्धिलोपः प्राप्नुयादित्याह—हे श्रद्धेत्यादाविति। यदि पूर्वमेत्वे कृते सम्बुद्धिलोपो न स्यात् श्रद्धाग्रहणं प्रयोजनाभावादनर्थकं स्यात्। अतः श्रद्धाग्रहणसामर्थ्यात् एत्वेऽपि कृते भूतपूर्वकं[3] श्रद्धासंज्ञकत्वमाश्रित्य हे श्रद्धेत्यादौ सम्बुद्धिलोपो भविष्यति। अथ मन्यसे श्रद्धाग्रहणस्यास्त्येव प्रयोजनमुत्तरार्थत्वं नाम, तदेतस्मिन्प्रयोजने सति कथं श्रद्धाग्रहणसामर्थ्यादिति हेतूपन्यासो युक्तः स्यादित्याशङ्क्य परिहर्तुमाह--उत्तरार्थं श्रद्धाग्रहणं स्यादिति चेत्, तन्नेति कथमित्याह--असति हीत्यादि। सूत्रोपात्तस्य पदस्याविद्यमाने प्रयोजने युज्यते उत्तरार्थत्वम्, यथा नदीग्रहणस्य। ननु[4] विद्यमाने स्वसूत्र एव कृतार्थत्वात्कथं तदुत्तरार्थं भवेत्,[5] अस्ति तु प्रयोजनं श्रद्धाग्रहणस्य, हे श्रद्धे इत्यादीनां साधुत्वं यथा स्यादिति, अन्यथा ह्येत्वे नित्यत्वादन्तरङ्गत्वात् स्वरादेशत्वाच्च कृते सति कथं सम्बुद्धिलोपस्स्यात्। तस्मात् स्थितमेतत् हे श्रद्धेत्यादौ श्रद्धाग्रहणसामर्थ्यात् सम्बुद्धिसिलोपो भवतीति। ननु सिप्रत्ययः चेत् सम्बुद्धिग्रहणेनेह विशेष्यते तर्हि सम्बुद्धिग्रहणमेवानुवृत्य सम्बुद्धेर्लोपो विज्ञास्यते तत्किं सिग्रहणेनेत्याह--सम्बुद्धिग्रहणेनेत्यादि। पूर्वं भूतो भूतपूर्वः ताभ्यां भूतपूर्वाभ्यां परस्य सेर्लोपः यथा स्यादिति सिग्रहणं क्रियते। तेन हे अग्ने हे वायो इत्यादौ अग्निवायुशब्दयोः स्वरादेशत्वात् सम्बुद्धौ चेत्येत्वे आत्वे च कृतेऽपि भूतपूर्वौ इदुतौ ह्रस्वौ आश्रित्य सिग्रहणात् सम्बुद्धिलोपः सिद्धो भवति। ननु ह्रस्वग्रहणादेवासौ सेत्स्यति, अन्यथा तस्य किं फलं स्यात्। उत्तरत्रानुवृत्तिफलमिति चेत्, कथमुत्तरार्थत्वे

---

१. हेतुत्वेनापत्तेः (वा०+भं०)
२. संज्ञकत्वात् (भं०)
३. पूर्वम् (भं०)
४. न तु (वा०)
५. न्यूनपाठः (भं०)

सति हे वृक्ष इत्यादौ सम्बुद्धिलोपो भवेत् । इहाद्ग्रहणं करिष्यते ततो भविष्यतीति चेत्, तर्ह्युत्तरत्र ह्रस्वग्रहणं कर्तव्यम् । इहाप्याद्ग्रहणमिति तद् गुरुः भवति, तस्मादिहैव लाघवाय ह्रस्वग्रहणं कर्तव्यम् । तथा च तत एव सम्बुद्धिलोपः, नैतत्, हे वृक्ष इत्यादौ हि तस्य ह्रस्वग्रहणस्य सफलत्वात् । उत्तरत्रापि सप्रयोजनत्वात् । हे अग्ने इत्यादौ सम्बुद्धिलोपविधानं प्रति सामर्थ्यं नास्तीति तदर्थं सम्बुद्धिग्रहणेऽप्यनुवर्तमाने सिग्रहणं क्रियते ।

आमि च नुः २।१।६८[1]

ह्रस्वनदीश्रद्धाभ्यः परस्मिन्नामीत्यनेन तृतीयादौ तु परादिरिति वचनादामः आगमित्वं दर्शयति । नद्यौ इत्यत्र नद्या ऐ आसासाम् इति कर्तव्ये आमादेशे तत्रापि नुरागमः कस्मान्न भवतीत्याह—लक्षणप्रतिपदोक्तयोरित्यादि । लक्षणप्रतिपदोक्तपरिभाषया लक्षणानुसन्धानद्वारेण यदाम् सञ्जातमत्र न भवतीत्यर्थः ।

त्रेस्त्रयश्च २।१।६९[2]

त्रिरिति त्रिशब्दस्य बह्वर्थवृत्तेरपि शब्दमात्रविवक्षायां तात्पर्यात् एकत्वेन निर्देशः एवमुत्तरत्रापि परमत्रयाणामिति कर्मधारयः । प्रियत्रीणामिति कर्मधारयः । प्रियत्रीणामित्यत्र बहुव्रीहेरन्यपदार्थप्राधान्यात् त्रिशब्दस्याप्रधानत्वात् त्रयादेशाभावः । एवमुत्तरेऽपि विधयः प्राधान्ये सति न भवन्ति इति मन्तव्यम् । सार्थकस्य त्रिशब्दस्य ग्रहणमिति । अर्थवद्ग्रहणपरिभाषयेति भावः ।

संख्यायाः ष्णान्तायाः २।१।७०[3]

संख्यानं संख्या । आतश्चोपसर्ग इत्याङ्-प्रत्ययः, आ लोपः, स्त्रियामादाप्, षण्णामिति । षष्, आम्, अनेन नुरागमः । हषश्च्छेति डत्वम्, षडो णो नेति डस्य णत्वं, तवर्गश्चटेति नस्य णः, पञ्चानां दशानामिति नान्तस्य चोपधाया इति दीर्घः । लिङ्गान्तनकारलोपः । विप्रुषां यज्वनामिति । प्रुष्प्लुष् स्नेहनसेचनपूरणेषु वि-पूर्वः, विप्रुष्णातीति क्विप् । इष्टवानिति । यजेः ङ्वनिप् सुयजोरिति ङ्वनिप् । ननु ष्णाभ्यां (लिङ्गसंख्याभ्यां[4]) विशेषयिष्यामः ।

---

१. २।१।७२ (दु० वृ०)
२. २।१।७३ (दु० वृ०)
३. २।१।७५ (दु० वृ०)
४. संख्याम् (मं०)

विशेषणेन विशेष्यस्य च तदन्तविधिरित्यन्तग्रहणमन्तरेणापि संख्याया: ष्णान्तत्वं लभ्यत इति किमन्तग्रहणेन, अष्टानामिति। अष्टनस्सर्वास्विति परत्वादष्टन आत्वे कृतेऽपि भूतपूर्वनान्तत्वमाश्रित्य नुरागमो यथा स्यादित्येतदर्थमन्तग्रहणमिति चेत्, न। आगमादेशयो: आगमविधिर्बलवानित्यागमविधेर्बलवत्वादात्वपूर्वमेवात्र नुरागमो विज्ञास्यते, एवं तर्हि अन्तग्रहणं क्वचिदन्तत्वव्यभिचारार्थं, तेनोत्तरत्राग्निसंज्ञानिषेध: सुसखिना सुसखये इत्यत्र सख्यन्तस्य न भवति। यद्येवम्, अनयैव युक्त्या नरपतिना नरपतये इत्यत्र पत्युरग्निसंज्ञानिषेधो न भविष्यतीति पतिरसमास इत्यत्र व्यक्तीकरणात् समासग्रहणं न कर्तव्यम्। सत्यम्। अस्यैव तदन्तव्यभिचारस्य व्यक्तीकरणार्थं क्रियते तत्।

कतेश्च जस्शसोर्लुक् २।१।७१[1]

का संख्यापरिमाणमेषामिति। किं-शब्दात् तमादित्वाड्डति-प्रत्यय:। षट् तिष्ठन्तीत्यादि। हशषछान्त इति डत्वम्, वा विराम इति ट:। अथ पञ्चेत्यादौ प्रकृत्याश्रयत्वेनान्तरङ्गत्वात् घुटि चासम्बुद्धाविति लुक्पूर्वं दीर्घत्वं कस्मान्न भवति, न भवति, तस्माल्लुक् शब्दोच्चारणार्थ:। तदुच्चारणस्य हि प्रयोजनं लुग्लोपे न प्रत्ययकृतमिति प्रत्ययलक्षणप्रतिषेध: यदि लुक: पूर्वं दीर्घत्वं भवेल्लुग्ग्रहणेन प्रत्ययनिषेधार्थेन किं कृतं स्यात्। लोपग्रहणमेव कुर्यात्, तस्माल्लुग्ग्रहणादवसितमन्तरङ्गमपि प्रकृतिकार्यं बहिरङ्गो लुग्बाधत इति शतानीत्यत्र घुट्स्वरादं घुटि नुरिति न्वागमे कृते जस्शसोरन्यतरस्य लुक् न भवति, नान्ताया: लाक्षणिकत्वात्। घुण्निमित्तता वा नान्तता सन्निपातपरिभाषया कथं घुटो विघातं स्यात्।

नियो ङि राम २।१।७२[2]

क्विबन्तादिति। क्विपं[3] विना नियो धातो: ङि-प्रत्ययसम्भवादिति भाव:, सेनान्याम्, ग्रामण्यामिति सेनां नयति, ग्रामं नयतीति क्विप्। सेनान्यामित्यत्र कृते णत्वे विषये सावकाश: ग्रामादेशो ग्रामण्यामित्यत्र कृते णत्वे न प्राप्नोतीत्याशङ्क्याह—कृते णत्वे इत्यादि गतार्थम्।

भट्टोग्रभूतिकृते शिष्यहितान्यासे शिष्यालोकाभिधाने नामप्रकरणे प्रथम: पाद: ॥

---

१. २।१।७६ (दु० वृ०)
२. २।१।७७ (दु० वृ०)
३. क्विबन्तम् (भं०)

द्वितीयः पादः

न सखिष्टादावग्निः २।२।१

इहायं सखि-शब्दः प्रयोगस्थः सखिशब्दस्यानुकरणत्वेन निर्दिश्यते अतएवानुकरणे स्वरूपविनाशप्रसङ्गं परिहर्तुमग्निसंज्ञा प्राप्तेर्वा[1] प्रदर्शयितुं सख्युश्चेत्यन्नादेशो न कृतः[2]। टा आदिर्यस्येत्यादि। एतेन टादाविति बहुव्रीहिरयं न तु षष्ठीतत्पुरुष इति दर्शयति। षष्ठीतत्पुरुषे हि शसो निमित्तत्वं यथा स्यात्, तथा च शस्-ग्रहणमेव कुर्यात्। आदिग्रहणाच्च नायं कर्मधारयः। नाभाव एत्वं च न भवतीति टा नेति नाभावः प्राप्तः ङे चेत्यनेनैत्वम्, सखीनित्यत्र अग्निसंज्ञाया अनिषेधाच्छसोऽकार इत्यादिना अग्निसंज्ञानिमित्तः पूर्वो स्वरो नत्वं च भवत्येव। इह सुसखिना सुसखय इति सख्यन्तस्यापि तदन्तविधिविज्ञानादग्निसंज्ञानिषेधः कस्मान्न भवतीत्याह—उत्तरसूत्रादित्यादि। ननु पूर्वमन्तग्रहणात् तदन्तत्व-व्यभिचारज्ञापनार्थात् सख्यन्तस्याग्निसंज्ञानिषेधो न भवतीति[3] किमर्थमसमास ग्रहणमिहाभिसम्बध्यते। अस्त्येतत्। ज्ञापकद्वारेण तु य एवं प्रतिपत्तुमसमर्थाः तान्प्रतियुक्तोऽयमसमासग्रहणस्याभिसम्बन्धः।

पतिरसमासे २।२।२

समस्यन्तेऽस्मिन्पदानीति। व्यञ्जनान्ताच्चेत्यधिकरणे घञ्। पत्या पत्ये इति पूर्ववन्नाभावः एत्वं च प्राप्तं न भवति। नरपतिना नरपतये इति नराणां पतिरिति षष्ठीसमासः। येन विधिस्तदन्तस्येति वचनात् समासविषये निषेधः प्राप्नोतीत्यसमास इत्युच्यते। पतिमिति। अग्नेरमोऽकार इत्यमोऽकारलोपः क्लीबेषु पतिते पतावित्यादयस्तु षष्ठ[4]प्रयोगाः नञानिर्दिष्टस्यानित्यत्वात् सिद्धसाधुत्वमित्याहुः[5]।

स्त्री नदीवत् २।२।३

नदीव[6] नदीवदिति। नदीशब्दात् प्रथमान्तात् वतिप्रत्ययः। स्त्रीशब्दस्य

---

१. प्राप्तेश्च विषयम् (भं०)
२. विहितः (भं०)
३. भविष्यतीति (भं०)
४. प्रयोगाः नञा (भं०)
५. साधुत्वार्थमित्याहुः (पाठभेदः भं०)
६. न्यूनपाठः (वा०)

अथमान्तत्वात् उपमाने च य शंसय स उपमेयत्वाद् व्यावर्तते। (उपमाने[1] चेति भिन्नविभक्तिकत्वे सत्युपमानोपमेयभावमसम्भवादिति भावः।) स्त्रीशब्दो नदीवद्भवतीति। एतेन स्त्रीति स्वरूपस्य ग्रहणं न तु स्त्र्यर्थवृत्तेः शब्दस्येति दर्शयति। एतच्चाशिषि च परस्मायिति स्त्र्यर्थवृत्तेराशीशब्दात् परस्याः सप्तम्याः नदीकार्याकरणाल्लभ्यते स्त्रीप्रत्ययान्तोऽपि शब्दः न गृह्यते ह्रस्व-नदीश्रद्धाभ्य इति नदीत्वात् सिद्धे सम्बुद्धिलोपे पृथक् श्रद्धाग्रहणात् नदीवद्-भवतीति विधिमुपदर्शयन्निषेधोऽत्र नाभिसम्बध्यत इति दर्शयति। तच्च स्त्रियामिति नदीकार्यस्य दर्शनात् नदीसंज्ञाविधावस्त्रीत्येवमकरणाच्च लभ्यते स्त्रीणामित्यादि नदीवद्भावादामि च नुरिति नुः। ङवतां च नद्या ऐ आसा-सामित्यैत्वादय आदेशाः स्त्री चेति धातुवद्भावादियादेशः। ननु सिद्धा स्त्री-शब्दस्य नदीसंज्ञा ततश्चोत्तरत्र नदीवदिति क्रियताम् अपार्थकस्त्वस्य योगस्या-रम्भ इत्याह—नदीसंज्ञायां सिद्धायामित्यादि। कालभावयोरित्यनेनैषा भावे सत्तायां सप्तमी स्त्र्याख्याविधुवौ वामि ह्रस्वश्च ङवतीति वक्ष्यमाणं यद्योग-द्वयं तेन य आमि ङवति च नदीवद्भावस्य विकल्पः प्राप्तः तस्य प्राप्तस्य[2] निवृत्तिर्यथा स्यादित्येवमर्थः। सिद्धायामपि स्त्रीशब्दस्य नदीसंज्ञायामयं योग आरभ्यते तेन नित्यमेव स्त्री-शब्दो नदीवद् भवति। अन्ये त्वियुस्थानीयानां मध्ये स्त्रीशब्द एव नदीकार्यभाग् यथा स्यात्। अन्ये श्री-भ्रू-प्रभृतयो मा भूवन्निति नियमार्थमिदं वचनमाचक्षते तथा च हे श्रीः हे भ्रूरित्यादौ नदी-संज्ञानिमित्तौ ह्रस्वसम्बुद्धिलोपौ न भवतः। तदेतन्न चतुरस्रम्। यतस्तुल्य-जातीयविषयव्यावृत्तिकारित्वान्नियमानामियुस्थानीयस्यैव श्रीत्यादेर्व्यावृत्ति-कारी स्यान्न तु उ-स्थानीयस्य भ्रू-प्रभृतेरपि। ततश्च नियमपक्षे हे भ्रूरित्यादि न सिध्येत्। ह्रस्वसम्बुद्धिलोपयोः प्रसङ्गादिति न नियमपक्षो ज्यायान्। असमास इति सम्बध्यते वत्करणाल्लिङ्गात् तेन परमस्त्रीणामित्याद्यपि भवति।

स्त्र्याख्याविधुवौ वामि २।२।४

स्त्र्याख्यावित्यत्र यद्वाच्यं तन्नदीसंज्ञासूत्रम् एवोक्तम्। स्त्र्याख्यावित्य-स्यार्थं स्पष्टीकर्तुमाह[3]—स्त्रीवाचकाविति। स्त्रिया[4] अभिधायकावित्यर्थः।

१. न्यूनपाठः (मं०)
२. न्यूनपाठः (मं०)
३. व्यक्तो (मं०)
४. स्त्रियो (मं०)

कौ पुनस्तौ स्त्रीवाचकावित्याह—इयुवाविति[1] । एवमीकारोकारान्तयोः शब्दयोः स्त्रीवृत्तित्वेन प्रसिद्धत्वात् कथमियुवोः नाम स्त्रीवाचकत्वे स्यादित्याह—ययो इयुव्-इत्येतावादेशौ दृष्टाविति । नन्वियुवादेशावीदूतोः दृश्येते । न च तावपि स्त्र्याख्यौ भवतः । एवं तर्हि स्त्र्याख्याविति विशेषणोपादानसामर्थ्यात् ययोरियुवावादेशौ दृष्टावीदूतोस्तावन्तौ ययोश्शब्दयोस्तयोरिदं स्त्र्याख्याविति विशेषणं विज्ञायते । एवं चेकारोकारान्तौ शब्दौ स्त्र्याख्यौ नदीवद्भवत इत्यर्थो जायते । आमि परत इत्येतेन वामीति[2] संहितासाम्येऽप्यामो ग्रहणं न तु अम इति दर्शयति । एतच्चाविच्छिन्नाचार्योपदेशाल्लभ्यते । अप्राप्तविकल्पश्चायम् । इयुव्-स्थानीयस्य स्त्र्याख्यस्य नदीसंज्ञा नेष्यत इति पूर्वं निषेधस्याभिहितत्वात् श्रीणामित्यादि श्री-शब्दो क्विब्वचिप्रच्छिश्रिद्रुस्रुभ्वां दीर्घो सम्प्रसारणं चेति श्रयतेः क्विपि दीर्घत्वे च कृते साध्यते । तेनास्य क्विबन्तस्य सतो धातुत्वादीदूतोरियुवोः स्वरे इतीयादेशो दृश्यते । भ्रू-शब्दस्यापि भ्रू-धातुवदिति धातुवद्भावादुवादेशोऽत्र दृश्यते । तेन श्री-भ्रू-शब्दयोः दृष्टे इयुवादेशयोर्न नदीवद्भावः । नदीवद्भावपक्षे नुरागम इति आमि च नुरित्यनेन तत्र ह्रस्वनदीश्रद्धाभ्य इत्यतः नदीग्रहणमभिसम्बध्यते । ननु स्त्रियामिति क्रियताम्, एवमपि कृते सति स्त्र्यर्थवृत्तित्वं लभ्यत एवेति किमाख्याग्रहणेनेत्याह—स्त्रियामिति कर्तव्य इत्यादि । नित्यं यः स्त्रीविषयः पदान्तरसन्निधिमन्तरेण तस्यायं नदीवद्भावो यथा स्यादित्याख्याग्रहणं क्रियते । तेन क्व न भवतीत्याह—तेनेत्यादि । यवान् क्रीणन्ति, कटे प्रवन्त इति यव-कट-पूर्वाभ्यां डुक्रीञ् द्रव्यविनिमये प्रु गतावित्येताभ्यां क्विप्, क्विब्वचिप्रच्छीति इत्यादिना प्रु इत्यस्य दीर्घः । नेमौ यवक्री-कटप्रू-शब्दौ नित्यस्त्रीविषयौ क्रियाशब्दत्वेन पुंस्यपि वर्तमानत्वात् । तेनात्रातिदेशाभावात्[3] आगमाभावः । अन्ये तु बहिरङ्गमत्र स्त्रीवृत्तित्वमिति मन्यमानाः चिन्त्यप्रयोजनमाख्याग्रहणमित्याचक्षते[4] । इयुवाविति किमिति ईदूताविति कर्तव्ये इयुवाविति कुर्वतः कोऽभिप्राय इति मन्यमानस्यैष प्रश्नः । यत्रेदूतौ[5] स्तः नत्वियुवौ तत्रातिदेशो मा भूदिति ईदूताविति न कृतमित्याकूतेन प्रत्युदाहरन्ति । शस्त्रीणाम्, जम्बूनामिति । अत्रेयुवौ

---

१. न्यूनपाठः (भं०)
२. वाचीति (वा०)
३. अतिदेशत्वात् (भं०)
४. ग्रहणमित्याहुः (भं०)
५. यत्र तु ईदूतौ (भ०)

न स्तः तयोर्विधावाधातोरघुट्स्वर इत्यतो धातुग्रहणानुवृत्तेः शस्त्री-जम्बू-शब्दयोश्चासाधुत्वात् ।

ह्रस्वश्च इवति २।२।५

विद्यते यस्येति । तदस्यास्तीति वन्तुः । अग्निग्रहणमिह मण्डूकप्लुतिन्यायेनानुवर्तत इति । नन्वियुवावत्र सम्बध्येते ततश्च तयोः सम्बन्धात् तत्स्थान्यपेक्षया ह्रस्वैकारोकारात्मक एव ग्रहीष्यत इति किमग्नि-ग्रहणानुवृत्त्या, नैतत्, नदीवद्भावविधानं[1] प्रत्युपक्षीणयोः इयुवोर्ह्रस्वत्वं प्रत्ययविशेषकत्वात् । स्त्रीवृत्तिः ह्रस्वान्तोऽग्निसंज्ञकश्चेति वृत्तिशब्दं प्रदर्शयन्निवृत्तं ह्रस्वविशेषणं स्याख्यावित्यत्राख्याग्रहणमिति दर्शयति । तन्निवृत्तेस्तु फलमिष्वै इषवे, अशन्यै अशनये, पट्वै पट्वे, स्त्रियै स्त्रिये इत्यादावपि नदीवद्भावस्य विकल्पेन प्रवृत्तिः कथं च न स्यात् । इषु अशनि प्रभृतीनां द्विलिङ्गत्वात् पट्वादीनां च गुणवचनत्वे सति शुक्लादिशब्दात् त्रिलिङ्गत्वात् पदान्तरद्योत्यत्वात् । स्त्रीत्वस्यायमपि पूर्ववदप्राप्त एव विकल्पो ह्रस्वश्चेति तु च शब्दोऽर्थापिते स्त्र्याख्यावित्यादिवाक्ये आख्याग्रहणमनिवृत्तमेव । बुद्धयै इत्यादिनदीवद्भावात् नद्या ऐ आसासामित्यैत्वादयः बुद्धये इत्यादि ङेचेत्यादिनैत्वादयः अग्नये अतिदेशस्याप्रवृत्तावैत्वाभावः । एवं मात्रे इत्यत्रापि ।

नपुंसकात्स्यमोर्लोपोऽपि न च तदुक्तम् २।२।६

उक्तमिति । वचेरुच्यते स्मेति । निष्ठेति क्तः । स्वपिवचीति सम्प्रसारणम् । चवर्गस्य किः । तयोरुक्तं तदुक्तमिति सप्तमीसमासः । नपुंसकलिङ्गादित्येतेन नपुंसकादिति नेदं स्वरूपस्य ग्रहणमिति दर्शयति । एतच्च । न च तदुक्तमिति निषेधारम्भादवगम्यते । अथ स्यमोस्सतोर्यत्कार्यमुच्यते तल्लोपे कृते सत्यसतोस्तयोः[2] कथं प्राप्नुयादित्याह—प्रत्ययलोप इत्यादिना प्रत्ययलक्षणं प्रत्ययनिमित्तमित्यर्थः । प्रत्ययलोप-परिभाषायाश्चास्तित्वम् । अतएव निषेधारम्भादवसीयते । विग्रह इति विशेषेण गृह्यते ज्ञायते समासस्यार्थोऽनेन इति विग्रहो वाक्यमुच्यते । तत्र सख्युश्चेत्यनादेशः प्राप्त इति । सि-निमित्तक इति शेषः । सख्युश्चेत्यत्र हि सूत्रे तु उशनस्पुरुदंसोऽनेहसामित्यतः सावनन्त इति वर्तते । अथामो लोपे किं प्राप्तम् ? न किञ्चित्, घुटित्वे इत्येतद्धि न सम्भवत्यमो नपुंसकविषये घुट्त्वाभावात् । तदभावस्तु जस्शसोः नपुंसक इति नियमात् । नन्वित्यादि ।

१. ग्रहणम् (वा०)
२. सति तयोः (भं०)

इत्यादिना परिहरति । प्रधाने कार्यसम्प्रत्यय इति । यदीदं वचनं नित्यं स्याद् द्युसखि-शब्दयोः बहुव्रीहिसमासान्तर्गतयोरप्राधान्यात् स्यमाश्रयस्य कार्यस्यानादेशादेरप्राप्तिः । न चेदं नित्यम्, अन्यथा प्रियं दधि यस्य सः प्रियदधिः तेन प्रियदध्ना प्रियदध्ने इत्यादौ दधिशब्दस्याप्राधान्यादस्थ्यादिसूत्रेणान्नादेशो न स्यात् तदेव प्रधाने कार्यसम्प्रत्यय (इत्यस्यानित्यत्वादप्रधानत्वात् तयोरपि द्युसखिशब्दयोः स्यमाश्रयं कार्यं प्राप्नोत्येवेति[1]) तत्र च तदुक्तवचनान्निषिध्यते । यद्येवं हे त्रपो इत्यत्र सम्बुद्धौ लुप्तायां तन्निमित्तं सम्बुद्धौ चेत्योत्वं न प्राप्नोति । न चात्र ह्रस्वनदीश्रद्धाभ्य इत्यादिना सम्बुद्धौ लुप्तायां प्रत्यय; लक्षणेनौत्वं भविष्यतीति शक्यते वक्तुम्, परत्वान्नपुंसकलक्षणस्यैव सि-लोपस्य प्रवृत्तेनापि लोपस्वरादेशपरिभाषया लोपात् पूर्वमोत्वं शक्यं विज्ञातुम्, नपुंसकविषये एतत् परिभाषाया प्रवृत्तौ सत्यां यत्तदित्यादावपि सि-लोपात् पूर्वं त्यदाद्यत्वप्रसङ्गात् । अत्रोच्यते नञानिर्दिष्टस्यानित्यत्वात् सम्बुद्धिलोपस्यौत्वस्य निषेधो न भविष्यति । नपुंसकात्स्यमोर्लुगिति कृते कथं स्यमाश्रयं कार्यप्रत्ययलक्षणेन प्रवर्तमानं सन्निवर्तयितुम् शक्यत इत्याह—लुग्लोप इत्यादि । नन्वसति न च तदुक्तग्रहणे नपुंसकादिति स्वरूपग्रहण कथमपाकीर्येत, निर्देशस्यार्थपरत्वादर्थग्रहणं विज्ञास्यते । प्रत्ययलोप-परिभाषायास्तर्ह्यस्तित्वं न ज्ञापितं स्यात् । लुग्लोपपरिभाषा एवास्यास्तित्वे ज्ञापिका भविष्यति ।

अकारादसम्बुद्धौ मुश्च २।२।७

इहोकारमुच्चारणार्थं कृत्वा यद्ययमकारस्य मुरादेश इति व्याख्यायेत कुण्डमित्यादौ अकारो दीर्घमित्यादिना दीर्घत्वमकारस्य प्राप्नोति न चाकारनिमित्तो मकारः कथमकारस्य दीर्घत्वं विदध्यादिति शक्यं वक्तुम्, घोषवतो वर्णस्य मकारस्याकारविघातं प्रति निमित्तत्वात् । तथा चोच्यते वर्णग्रहणे निमित्तमिति । तदेतस्य दीर्घत्वप्रवृत्तिलक्षणस्य दोषस्य परिहारार्थमागमपक्षोऽत्र व्याख्यायते समकारागमो भवतीति । एवं च दीर्घत्वं न सम्भवति मकारस्य विभक्तिसम्बन्धित्वादागमित्वं चार्थवशादवाप्तषष्ठीविभक्तेर्नपुंसकस्यैव, कुतः, नपुंसकग्रहणानुवृत्तेः । तच्च नपुंसकमकारेण विशेष्यते । अकारान्तस्य नपुंसकलिङ्गस्येति । एवं चाकारस्येति षष्ठीनिर्देशो न्याय्यः । तत् कथमकारादिति पञ्चमीनिर्देश इत्याह—अकारादिति षष्ठ्याः स्थाने पञ्चमीति । अय भावः, मुरित्युकारोऽत्रानुबन्धः कार्यार्थमासक्तः आगम उदनुबन्ध

१. न्यूनपाठः (वा०)

इतीमां परिभाषां समुत्थापयति, 'तदुपस्थानाच्च नपुंसकलिङ्गस्याकारान्तस्यान्त्यात् स्वरादकारात् परेण मुकारागमेन भवितव्यम्। एवं च परिभाषासामर्थ्यादकारविषये या पञ्चमी तयाऽत्र निर्देशः कृत इति षष्ठ्याः प्रसङ्गे पञ्चमीनिर्देशो न विरुध्यते। स्यमोः परयोरिति। अर्थवशात्स्यमोरिति सप्तमी एषा कालभावयोरित्यादिना। एवमुत्तरत्रेति उकार आगम उदनुबन्ध इत्यर्थं इत्यनुषज्यते। कुण्डं वनमिति कृते मुकारागमे स्यमो पूर्वेण लोपः। ननु लोपे प्राप्ते मुकारागम आरभ्यमाणः लोपं बाधते, न[1] बाधते। भिन्नविषयत्वात्। आगमे हि प्रकृतेः प्रत्ययस्य च लोप इति कोऽयं बाधप्रकारः। एवं च नायं च-शब्दः लोपस्यानुकर्षणार्थः, किं तर्हि, अकारान्तस्य नपुंसकलिङ्गस्याकारात्परो मुकारागम इति विशेषप्रतिपत्त्यर्थः। हे कुण्ड इति पूर्वेण सि-लोपः।

अन्यादेस्तु तुः २।२।८

तुरिति स्वरूपेणार्थेनार्थवत्त्वाद्विभक्तिः। एवमुत्तरत्र यथासम्भवं वाच्यम्। असम्बुद्धाविति निवृत्त्यर्थमिति तु शब्दस्यात्र सम्बुद्धिनिवृत्तिद्योतनफलत्वात्। अन्यादेर्गणस्येति। आगम उदनुबन्ध इति वचनादन्यादेरागमित्वादेवमुक्तम्।

औरीम् २।२।९

विशेषादिष्ट इत्यादि। अन्यादि विशेषणादिष्टः[2] कथितः प्रकृतं तु नपुंसकं प्रति सूत्रमभिसम्बध्यमानत्वात् नान्तरमन्यादिग्रहणमेवेति। एवकारस्यायमर्थः। आनन्तर्यादन्यादिग्रहणमेव नानुवर्तते। किं तर्हि नपुंसकादिति[3] वर्तते। तदन्तर्गतत्वेन तु यदन्यादिरनुवर्तते कामं तदनुवर्ततामिति। ईमिति। दीर्घनिर्देशो अनकारान्तार्थः। तथा चोदाहरन्ति पयसीति, औ इति रूपसामान्यं गृह्यते न तु प्रथमाद्विर्वचनमेव।

जस्शसोः शिः २।२।१०

कुण्डानीत्यादि। घुट्स्वराद् घुटि नुः घुटि चासम्बुद्धाविति दीर्घः। पयांसीत्यत्र सान्तमहतोरित्यादिना। गोमत इति। अनुषङ्गश्चाक्रुञ्चेरित्यनुषङ्गलोपः, जसा सहचरितस्य शस इति द्वितीया-बहुवचनस्य। शतशो ददाति। तमादि-

---

१. न्यूनपाठः (वा०)

२. विशेषादिष्टः (मं०)

३. नपुंसकग्रहणं च तदनुवर्तते (मं०)

त्वाच्छस्, अव्ययं चैतत् जस्शसोस्स्वरूपोलम्भे शि-भावो यथा अस्य स्यात्। अष्टौ कुलानीत्यत्र औ तस्माज्जस्शसोरित्यत्वे कृते विकारावस्थायां मा भूदिति घुटः शिरिति न क्रियते (औत्[1] विधानसामर्थ्याच्छिभावो न भविष्यतीति नाशङ्कनीयम्) औत्वं तु स्त्रीपुंसयोश्चरितार्थमेव।

घुड् स्वराद् घुटि नुः २।२।११

इह घुट्स्वराभ्यां प्रकृतं नपुंसकं विशिष्यते, विशेषणेन च विशेष्यस्य तदन्तविधिविज्ञानाद् घुडन्तस्य स्वरान्तस्य च नपुंसकलिङ्गस्यागमेन भवितव्यम्। एवं च घुट्स्वरस्येति षष्ठीनिर्देशे न्याय्ये किमर्थः पञ्चमीनिर्देश इत्याह— पञ्चमीयं षष्ठ्याः स्थान इति आगम उदनुबन्ध इति वचनात् घुडन्तस्य घुटः पूर्वेणागमेन भवितव्यम्। स्वरान्तस्य च स्वरात् परेण, एवं च परिभाषासामर्थ्याद् यावेतौ पूर्वपरशब्दौ इहाक्षिप्तौ तदपेक्षयायं पञ्चमी-निर्देशः। एवं च कृत्वा सुवल्गीत्यादौ न भवति। नह्यत्र घुटः पूर्वमागमः क्रियमाणोऽन्त्यात् स्वरात् परः (कृतस्यात्[2] स्वरादन्त्यात् परो वा) क्रियमाणो घुटः पूर्वं कृतो भवति। यद्येवम्, उक्तेन न्यायेन गौराङ्गीत्यादावपि[3] न प्राप्नोति। घुट्सामान्यस्य विवक्षितत्वात् भविष्यति। तदा ह्येक एवान्त्यो घुट् तेन ततः पूर्वमप्ययं भवन्नुरागमोऽन्त्यात् स्वरात् परः सङ्गतो भवति। सामान्यस्य चान्त्यत्वं वर्णव्यक्तिद्वारकं वेदितव्यम्। घुडन्तस्य तावदिति। तावच्छब्दः क्रमद्योतनार्थः। शकुन्ति पयांसीत्यादि। जस्शसोः शिः, अनेन नुरागमः, यशांसीति। सान्तमहतोरिति दीर्घः। अहानीत्यत्र तु घुटि चासम्बुद्धाविति दीर्घः। ष्यादेशमनुवर्तते तेन घुटो विशेषणादिह न भवति, अष्टौ कुलानीति। जस्सोरिति वर्तमाने घुड्ग्रहणं बहूर्जे नपुंसकविषये घुट्यन्त्याद्वर्णात्पूर्वं त्वागमार्थः। तेन बहूंजि कुलानि। ऊर्ज बलप्राणनयोः चुरादित्वादिन्। क्विप्, कारितलोपः जसः शिभावः। अन्ये तु नात्रेष्यत इत्याहुः, तान्प्रति च घुड्ग्रहणं जस्शसोः सप्तमीविपरिणामेन यत्प्रतिपत्तिगौरवमापतति तत्परिहारार्थं क्रियते। सुवल्गीति। वल्ग गत्यर्थः। उख उखोत्यत्र पठ्यते, सु पूर्वः शोभनं वल्गतीति क्विप्, जस्, शिभावः।

नामिनः स्वरे २।२।१२

स्वर पर इति। अविशेषाभिधानेऽपि विभक्तिस्वर इति बोद्धव्यम्।

---

१. न्यूनपाठः (मं०)
२. न्यूनपाठः (मं०)
३. गोरक्षी (वा०)

विभक्त्यधिकारात्। तेनेह न भवति। तुम्बुरुणोः विकारः तौम्बुरवं चूर्णमिति। एवमादेरणिष्यत इत्यण्, उवर्णस्त्वौत्वमापाद्यः दधिनी मधुनीति। औरीम्, एवं कुण्डे इत्यत्र। कुण्ड्योरित्यादौ तु ओसि चैत्वे कृते नुरागमो न भवति। नाम्यन्तत्वस्य गौणत्वात्। लाक्षणिकत्वादित्यर्थः[1]। स्वर इति किमिति। वारिभिरित्यत्र व्यञ्जने परेऽस्तु नुरागमः तस्य च लिङ्गान्तनकारस्येति न लोपो भविष्यतीति तत् किमेतन्निवृत्त्यर्थेन स्वरग्रहणेनेति मन्यमानस्यैष प्रश्नः, विभक्त्यवयवत्वादिनोत्तरयति, एवं मन्यते, लिङ्गान्तनकारस्य लोपः क्रियते। न च वारिभिरित्यत्र नुरागमो क्रियमाणो लिङ्गान्तो भवितुमर्हति, तृतीयादौ तु परादिरिति तस्य विभक्त्यवयवत्वात्। न च विभक्त्यवयवस्य नकारस्यास्ति लोपप्रसङ्गः इति श्रवणमेव तस्य स्यात् तन्मा भूदेष दोष इति स्वरग्रहणं कर्तव्यम्।

अस्थिदधिसक्थ्यक्ष्णामन्नन्तष्टादौ २।२।१३

अक्ष्णामित्यनेनवान्नादेशः। अवमसंयोगादित्यकारलोपः, अन्, इत्यत्र लक्षणस्याप्रवृत्तिः स्वरूपभङ्गप्रसङ्गात्। अन्तः अन्नादेशं प्राप्नोतीति। एतेनान्तशब्द आगमत्वमतो तेन द्योतयति। अक्ष्णामिति निर्देशादिति दर्शयति पूर्वेण नुरागमः प्राप्त इति नामिनः स्वर इत्यनेनास्थीनीत्यादौ जस्शसोः शिः, घुट्स्वराद् घुटि नुः। अस्थ्यादिभिः लिङ्गस्य विशेषणादित्यस्थ्यक्ष इत्याद्यपि भवति। केवलानां तर्हि अस्थ्यादीनां न प्राप्नोति, व्यपदेशिवद्भावाद् भविष्यति। नपुंसक-ग्रहणानुवृत्त्या च नपुंसकानामस्थ्यादीनामिति विज्ञायते, तेन यदेते यदृच्छाशब्दाः अस्थ्यादयो भवन्ति तदेतेषामन्नादेशो न भवति। अस्थिनाम कश्चिद्विप्रः[2] तेनास्थिनेत्यादावनोऽकारकरणमस्थनि[3] दधिनि इत्यादौ ङिप्रत्यये परेऽकारस्य श्रवणार्थमनोऽकारकरणम्। इङ्योर्वेति पाक्षिकोऽकारलोपः अन्तग्रहणमनःसर्वादेशत्वाशङ्कानिवृत्त्यर्थम्। नाम्यनुवृत्त्यान्त्यस्यैव भविष्यतीति चेत् तर्हि विस्पष्टार्थम्।

भाषितपुंस्कं पुंस्वद् वा २।२।१४

भाष् व्यक्तायां वाचि। भाष्यतेस्म, निष्ठेति क्तः, इट्, भाषितः पुमान्येन

---

१. न्यूनपाठः (मं०)
२. विप्र इति न्यूनपाठः (मं०)
३. न्यूनपाठः (वा०)

लिङ्गेन[1] तद्भाषितपुंस्कम्। समासान्तर्गतानामित्यत्रादन्ततेति भावप्रत्ययस्य निर्देशात् ककारः समासान्तः पुंसोऽशब्दस्य लोपः। संयोगान्तलोपस्तु न भवति। पुंसोऽघोषे परे संयोगान्तस्यानित्यत्वाभिधानात् मनोरनुस्वारः पुंवदित्यत्र त्वघोषः परो नास्तीति संयोगान्तो लुप्यते। अन्तर्वर्तिनीं च प्रत्ययलक्षणेन प्रथमां विभक्तिमाश्रित्य पदान्तवृत्तेर्मकारस्य मनोरनुस्वार—व्यञ्जन इत्यनुस्वारः। पुंवद् भवतीत्यस्यार्थं प्रकटीकर्तुमाह—पुंसि यदुक्तमित्यादि। एवमभिहिते पुंसि न कश्चिदाहेत्यकार्यमिह शास्त्रेऽभिहितं यन्नपुंसकार्थवृत्तेर्भाषितपुंस्कस्यातिदिश्येतेति मन्यमानश्चोदयति। किञ्च पुंस्युक्तमिति। न किञ्चित्पुंस्यभिहितमित्यर्थः। पुंवदित्यभावातिदेशोऽयमित्यनेनाभिप्रायेणोत्तरयति। स्वरो ह्रस्वो नपुंसक इत्यादि। अयं भावः, नेह टादौ स्वरे परे किञ्चित्कार्यं विधीयते यन्नपुंसकस्यातिदिश्येत, केवलं पुंसि यत् ह्रस्वत्वस्य प्रवर्तनम् तन्नपुंसकस्यापि न (भवतीत्यर्थादभावातिदेशोऽय[2]) विज्ञायते यथा—उशीनरवन्मद्रेषु यवा इत्यतिदेशे सन्तीति अवगम्यत एव। नामिनः स्वर इति च नुरागमस्येति अभावः इत्यनुषज्यते। नुरागमो हि नपुंसके भवन् पुंसि नोपलभ्यत इति नुर्नपुंसकस्यापि पुंवदतिदेशान्न भवति। नन्वतिदिश्यतां प्राकरणिकस्य बुद्धौ परिस्फुरतो नोरागमस्याभावः। अप्राकरणिकस्तु ह्रस्वाभावः कथमतिदेष्टुं शक्यते, उच्यते—यदि न्वागमाभावमतिदेष्टुमभिप्रेतं स्यात् नामिनः स्वर इत्यतोऽनन्तरं भाषितपुंस्कस्य टादौ वेति कुर्यात्। तदेवमकरणादवसीयते प्रकरणान्नाम्नातोऽपि ह्रस्वाभावोऽत्रातिदिश्यत इति। एवमपि विभक्त्युत्पत्तेः पूर्वमन्तरङ्गत्वात् ह्रस्वस्य प्रवृत्तत्वात् कथमभावपक्षेऽतिदेष्टुं शक्यः, नहि भुक्तवतो मा भुक्ता—इत्यभिहिते किमपि कथितं स्यात्। अस्त्येतत्, अतिदेशं प्रणयन् सामर्थ्यात् त्वनन्तरङ्गस्य बलीयसोऽपि प्राक्प्रवृत्तस्य ह्रस्वस्य विभक्तौ सञ्जातायां पक्षे निवृत्तिर्विज्ञास्यते। तदेतस्मात् पुंवदतिदेशात् ह्रस्वनुकारागमयोरभावो नपुंसके क्रियत इति गतमेतत्, ग्रामणीब्राह्मण इति भाषितपुंस्कत्वप्रदर्शनार्थमेतदुपन्यस्तम्। ग्रामणिकुलमित्येतदपि नपुंसकार्थवृत्तित्वमुपदर्शयितुमधुना ग्रामणी-शब्दस्य भाषितपुंस्कस्य नपुंसकार्थवृत्तेरुदाहरणमाह—ग्रामण्या कुलेन ग्रामणिकुलेनेति पुंवद्भावपक्षे इत्यादि। ग्रामण्या कुलेनेत्ययं पुंवद्भावपक्षे ह्रस्वनकारागमयोरप्रवृत्तेः ग्रामणिना कुलेनेत्ययं तु तत्पक्षो न भवति ततो ह्रस्वनकारागमौ स्तः। एवं मृदुर्ब्राह्मणः मृदुकुलमिति पूर्ववत्—

---

१. न्यूनपाठः (वा०)

२. भवतीत्यर्थः ततो भावातिदेशोऽयम् (भं०)

पुंनपुंसकत्वप्रदर्शनपरमेतदुदाहरणं तु मृदवे कुलाय मृदुने कुलायेति पूर्वत्र ङे चेत्योत्वम् अपरत्र नामिनः स्वर इति नुः। त्रपुण इति त्रपुशब्दोऽयं नपुंसकवृत्तिरिति भाषितपुंस्कत्वाभावादसत्यतिदेशे नित्यं नुरागमः।

कीलालपेन कुलेनेति। कीलालपशब्दो मनिनाद-सूत्रेण च शब्दाद्विडन्तः, टा, स्वरो ह्रस्व इति ह्रस्वः। इन टा, यदि पुंवद्भावः स्यात् स्वरो ह्रस्व इति ह्रस्वो न भवेदिति तच्चाधातोरघुट्स्वरे इत्याकारे लुप्ते कीलालपाकुलेनेत्यनिष्टं प्रसज्येत इति भावः। मृद्वै इति मृदु-शब्दादुदन्ताद् गुणवाचिन इतीप्रत्ययः, ङे, नायं मृद्वीशब्दो नपुंसकवृत्तिरिति पुंवद्भावस्याभावात्। स्त्रीविषयत्वमिति स्त्र्याख्यत्वात् नदीसंज्ञायां सत्यां तन्निबन्धनो नद्या ऐ आसामित्यैभावः। यदि पुनरत्र पुंवद्भावः स्यात् किं स्यादित्याह—पुंवद्भावे सत्यैभावो न स्यादिति। मृदुनीव स्त्री इति औरीम्, अतिदेशाभावान्नुरागमः। स्वरो ह्रस्व इति ह्रस्वः, अतिदेशाभावादिति भावः। अथ पीलुने फलायेत्यत्र पुंवद्भावः कस्मान्न भवति, भवत्ययं पीलुशब्दः पूर्वं वृक्षवृत्तिः सन् भाषितपुंस्को नाम्यन्तः फलवृत्तिवाच्यः नपुंसकार्थवृत्तिः। ततश्च पक्षे नोरागमस्याप्रवृत्तौ सत्यां पीलवे फलायेत्यपि रूपं प्राप्नोति, पीलोर्वृक्षस्य फलं विकारः इत्यस्यां विवक्षायामेवमादेरणिति अणि कृते तस्य फले लुगिति लोकोपचाराल्लुक्, तत्र परिहारमाह—वा शब्दोऽत्रेत्यादि। विविधं नानाप्रकारमवस्थितिमवस्थानं यस्यास्सा। व्यवस्थितविभाषा व्यवस्थिता चासौ विभाषेति विकल्पः इत्युच्यते तां व्यनक्तीति व्यवस्थितविभाषावार्चः। आवश्यकाधमर्ण्ययोरिति णिनिः। तेन क्वचित्पुंवद्भावस्याप्रवृत्तिरपि भवति, पीलुने फलायेति सिद्धम्। अपरे तु पुनरेवं परिहरन्ति इह भाषितपुंस्कशब्देन बहुव्रीहिः, भाषितः पुमान्येन शब्देनेति। न शब्दोऽन्यपदार्थत्वेनाश्रीयते, किं तर्हि, प्रत्यासत्तेः। शब्दप्रवृत्तिनिमित्तभूतो जातिगुणक्रियारूपोऽर्थः शब्दप्रवृत्तिनिमित्तभूतः कारणतां प्राप्तः स शब्दप्रवृत्तिनिमित्तभूत इत्युच्यते। तथाहि गवादेर्जातिशब्दस्य शावलेयादौ अभिधायकत्वेन प्रवृत्तिमतो जातिनिमित्तं गोजातित्वसम्बन्धाद्धि शावलेयादौ गोशब्दः प्रवर्तते। तेन जातिशब्दानां जातिः प्रवृत्तौ निमित्तं भवति। गुणशब्दानामपि गुणः, शुक्लः इति। क्रिया शब्दानामपि क्रियावाचक इति। स च जातिगुणक्रियालक्षणोऽर्थः शब्दस्य प्रत्यासन्नोऽन्तरङ्गत्वात्। तेन तस्यान्यपदार्थत्वाज्जात्यादिरर्थः। इह भाषितपुंस्कः[1] तस्यापि यदभिधायकं शब्दरूपं तदपि तेन भाषितपुंस्केन नपुंसकलक्षणोऽर्थेन योगाद्

१. न्यूनपाठः (मं०)

भाषितपुंस्कमभिधेयधर्मस्याभिधाने उपचारात् । तेनेत्थं योऽर्थो भाषितपुंस्कस्तस्यायमतिदेशः । यथा—ग्रामणी-शब्दस्य । अयं हि शब्दो भाषितपुंस्केन ग्रामनयनकर्तृत्वलक्षणेनार्थेन सम्बद्धं नपुंसकधर्माविष्टमर्थं प्रतिपादयति । ततोऽस्य युक्ता पुंवद्भावस्य प्रवृत्तिः । पीलु-शब्दस्तु नैवं भाषितपुंस्कः । नहि तेन यत्र प्रवृत्तिनिमित्तभूतो वृक्षजातिलक्षणेऽर्थे पुमान्भाषितः । तेन सम्बद्धमसौ नपुंसकमाह—किं तर्हि फलजातिलक्षणेनार्थेन सम्बद्धम् । न च फलजातिलक्षणोऽर्थो भाषितपुंस्कः । नहि तत्र पीलुशब्दः पुमांसं भाषितवान् । यद्यपि तत्रार्थे पीलुशब्दः शब्दान्तरं[1] वा पुमान्सं भाषते तथाऽपि यस्य शब्दस्य पुंवद्भावश्चिकीर्षितः स एव चेत्पुमान्सं तत्र भाषते तदेत्थं भाषितपुंस्कस्य पुंवद्भावः प्रवर्तते । अन्यथा हि सर्वस्यैवं सति भाषितपुंस्कत्वाद् व्यावर्त्यानुपलम्भादपार्थकं भाषितपुंस्कग्रहणं स्यात् । तदेवं तुल्ये प्रवृत्तिनिमित्ते सति भाषितपुंस्कातिदेशविज्ञानात् पीलु-शब्दस्य च पुंसि नपुंसके च वर्तमानस्य वृक्षजाति-फलजाति-लक्षयोः प्रवृत्तिनिमित्तभूतयोरर्थयोरतुल्यत्वान्न भवति । पीलुने फलायेत्यत्र पुंवद्भाव इति ।

दीर्घमामि सनौ २।२।१५

सनाविति सहशब्देन समानार्थस्य समासविषयस्य स शब्दस्यायं प्रयोगः । दीर्घशब्दो ह्रस्वं स्थानिनमाक्षिपतीत्यत्र हेतुमाह—सम्बन्धिशब्दत्वादिति । दीर्घशब्दोप्ययं पित्रादिशब्दवत् सम्बन्धिशब्दः । ये चामी सम्बन्धिशब्दास्ते प्रतियोगिनमनुपात्तमप्याक्षिपन्तीत्यसन्निहितोऽपि ह्रस्व इह स्थानित्वेनाक्षिप्यते । तेन किं सिद्धं भवतीत्याह—तेनेत्यादि । देवानामित्यादि । सर्वत्रापि च नुः नपुंसकग्रहणं चेह निवृत्तम्, गर्गयस्कविदादीनां चेति, अनपुंसकस्यापि दीर्घत्वदर्शनात् । वारिण इति । नामिनः स्वरे इति नुरागमः, सनावित्याभो विशेषणमुत्तरार्थमिति । उत्तरसूत्रे अर्थः, प्रयोजनं यस्य तत् तथोक्तम् । अथेहार्थमपि कस्मान्न भवतीत्याह—इह त्वित्यादिदीर्घशब्देनेह सम्बन्धिशब्दत्वादाक्षिप्तो यो ह्रस्वस्तस्मात्परो य आम्-प्रत्ययः स नुकारागमं सर्वदा प्रवृत्तेर्न व्यभिचरत्येव । तस्माद् अव्यभिचारादामीत्यपि कृते आगमास्तद्ग्रहणेन गृह्यन्त इति सनुकारकेऽप्यामि दीर्घो भविष्यतीति सनाविति विशेषणमिहापार्थकं सदुत्तरार्थं जायते । अथ कृते न्वागमे दीर्घो यथा स्यादितीहार्थमपि कस्मान्न भवति, अन्यथा अग्नीनामित्यादौ अग्नि आम् इति स्थिते नित्यत्वाद् दीर्घत्वे कृते सति न्वागमो न स्यात् । न च तद्विधौ ह्रस्वानुवृत्तिसामर्थ्यात् कृतेऽपि दीर्घे

१. अर्थान्तरम् (भं०)

भूतपूर्व-ह्रस्वाश्रयेण न्वागमो भविष्यतीति शक्यं वक्तुम् । तिसृणां चतसृणां नृणामित्यत्राकृतदीर्घविषये नुकारागमस्य सावकाशत्वात् । नैतदस्ति, आगमादेशयोः आगमविधिर्बलवानिति आगमविधेर्बलवत्वान्नित्यमपि दीर्घं बाधित्वा न्वागमो भविष्यतीति । आदेशात् त्वागमो बलवानिति अवश्यं मन्तव्यम्, अन्यथा गृहीतेत्यादौ परमपि इडागमं बाधित्वा ढत्वमन्तरङ्गत्वात् स्यात् । तस्मात् सनाविति विशेषणमिह फलशून्यं सदुत्तरार्थं क्रियते । उत्तरत्रासम्भवन्नुकारागमे चर्मणामित्यादिविषये दीर्घो मा भूदिति ।

नान्तस्य चोपधायाः २।२।१६

पञ्चानां सप्तानामित्यादि । संख्यायाष्ण्णान्ताया नुरिति[1] नुः, चर्मणामित्यत्र न्वागमाभावः तद्विधौ ह्रस्वनदीश्रद्धाभ्य इत्यस्यानुवृत्तेः । नाम्येति कर्तव्येऽन्तग्रहणमुत्तरत्र लाक्षणिकस्याप्युशना सखेत्यादेर्नान्तस्य घुटि दीर्घत्वप्रतिपत्त्यर्थम् ।

घुटि चासम्बुद्धौ २।२।१७

नान्तस्य लिङ्गस्येत्येतेन नान्तं यल्लिङ्गं तस्यानेनोपधादीर्घ इति व्याचष्टे, तेन जनमित्यादावकारे लुप्तेऽपि जन इत्यस्यालिङ्गत्वादुपधादीर्घो न भवति । न ह्येतल्लिङ्गमर्थवत्वाभावात् । न चात्र स्वरादेशपरिभाषया लोपस्य स्थानिवद्भावादनान्तत्वं शक्यमवमातुम्, दीर्घविधि प्रतिस्थानिवत्वस्य निषेधात् । सामानीति जस्शसोश्शिः, हे राजन्निति, सम्बुद्धिसिकारोऽयमामन्त्रिते सिस्सम्बुद्धिरिति वचनात् । न लोपाभावस्तु न सम्बुद्धाविति निषेधात् ।

सान्तमहतोर्नोपधायाः २।२।१८

नस्योपधा नोपधेति । नस्येतीयं[2] निमित्तनैमित्तिभावलक्षणे[3] सम्बन्धे षष्ठी । नकारो हि निमित्तम् उपधा हि निमित्तिनी, नकारापेक्षया पूर्वस्योपधाव्यपदेशात् । नन्वन्त्याद्वर्णात्पूर्वस्योपधा संज्ञाविहिता । न च सान्तमहतोरन्त्यो नकारस्सम्भवति, यदपेक्षया पूर्वोपधेति व्यपदिश्यते, पूर्ववर्णापेक्षया नकारोऽन्त्य इति चेत् तर्हि ततक्ष इत्यादावपि पूर्ववर्णापेक्षया ककारस्यान्त्य-

---

१. कोष्ठाङ्कितस्य स्थाने "इति नुरागमः, अनेनोपधादीर्घः, लिङ्गान्तनकारलोपः, चतुर्णामिति चतुर ।···(भं०)

२. नस्येत्ययम् (वा०)

३. निमित्तनिमित्ति (भं०)

स्वात् ततः पूर्वस्याकारस्योपधाव्यपदेशादस्योपधेति दीर्घस्स्यात्। तस्मादशक्यं पूर्ववर्णापेक्षयान्त्यत्वं विज्ञातुम् गौणश्चायमुपधासंज्ञाविषयः। एवं तर्हि उपधाग्रहणसामर्थ्यादुपधाग्रहणेनेह नकारसमीपवर्तिदीर्घभाक् पूर्वो वर्ण उपलक्ष्यते। तेन नस्योपधा नकारात् पूर्वो यो वर्णस्तस्य दीर्घो भवति। यद्येवम्, सुमनसावित्यत्रापि दीर्घत्वं प्राप्नोति, न भविष्यति, अन्त्यग्रहणस्य मकारसमीपवर्तिनकारपरिग्रहार्थत्वात्। श्रेयानित्यादि। प्रशस्यशब्दादयमनयोरतिशयेन प्रशस्य इति तसादित्वादीयन्स्-प्रत्ययः। प्रशस्य श्र इति लोकोपचारात् प्रशस्यशब्दस्य श्र-भावः। इवर्णावर्णौ स्वरे प्रत्यये चेत्यकारलोपस्तु न भवति। तद्विधाविष्ठेयन्सो परयोरेकस्वरस्यावर्णस्य लोपो नेष्यत इति वचनात्। अनेन दीर्घः व्यञ्जनान्ताच्चेति[1] सि-लोपः, संयोगान्तलोपः, तस्यालुप्तवद्भावाल्लिङ्गान्तनकारलोपो न भवति। श्रेयांसीति जस्सशोश्शिः। जरसाविति जराजरस्स्वरे वेति जरस्भावः। श्रेयसोति। औरीम्, जस्शसोः नपुंसक इति नियमान्नायं घुट्परमत्यनुषङ्गलोपं बाधित्वा स्वरादेशत्वादत्र दीर्घस्स्यात्। एतच्चानुषङ्गसंज्ञानिमित्तस्य लोपस्य गुरुसंज्ञाकरणेन यद्बलीयस्त्वम् पूर्वमभिहितं तदनपेक्ष्योक्तं महत्साहचर्यात्क्विबन्तस्य धातोस्सान्तस्य न भवति। हिसि हिंसायां सु-पूर्वः। शोभनं हिंनस्तीति क्विप् सुहिन् सुहिंसावित्यादि।

अपश्च २।२।१९

बह्वर्थवृत्तेरप्-शब्दस्य शब्दमात्रविवक्षातात्पर्यादेकत्वेन निर्देशः। अप् इत्यस्य यो ह्रस्व इति दीर्घशब्दस्य सम्बुद्धिशब्दत्वादेवमुक्तम्। आप इति जस्, स्वाम्पीति शि-भावः। समासान्ताभावः, समासान्तविधेरनित्यत्वादपः पश्येति शस्।

अन्त्वसन्तस्य चाधातोस्सौ २।२।२०

अन्तुश्च अस् च अन्त्वसाविति, आच्चेत्यनेन दीर्घः। भवानिति। भवन्तुशब्दः, उदनुबन्धविशिष्टः सर्वनाम्नां मध्ये पठ्यते। गोमानिति। गावो विद्यन्तेऽस्येति मन्तुप्रत्ययः। चन्द्रमाः अप्सरा इति असुन् प्रत्ययान्तावेतौ। एवं सुयशा इत्यपि। न चान्त्वसन्तस्य दीर्घः क्रियमाणो ह्रस्वस्य स्थाने भवन्विशेषानुपादानात् सर्वस्य ह्रस्वस्य प्रसज्येतेत्याह—अन्त्याभाव इत्यादि।

---

१. न्यूनपाठः (भं०)

२. शोभना आपः येषु तडागेषु इति स्वाम्पितडाकानि (टिप्पणी बा०)

वर्णान्त्यस्य विधिरिति वचनात् अन्त्यस्य ह्रस्वस्य दीर्घेण भवितव्यम्। न चान्त्वसन्तस्य लिङ्गस्यान्त्योऽस्ति, ह्रस्वस्यानेन दीर्घस्स्यात्। अतोऽन्त्यस्य ह्रस्वस्याभावे सत्यन्त्यस्य वर्णस्य यः सादेशो निकटदेशो ह्रस्वोऽकारस्तस्यायं दीर्घो विज्ञायते एवमप्यसन्तविषय एवैष परिहारस्स्यात्। अन्त्वत्विषये पुनरनया[1] परिभाषया नकारस्य दीर्घः प्राप्नोति कः पुनस्तस्य दीर्घ इति चेत्, सर्वे पर्यायेण दीर्घाः लृतुलसाः दन्त्या इति स्थानसावर्ण्यात् वा लृकाराः, सत्यम्, असन्त[2]-साहचर्यादन्त्वन्तस्यापि अकारस्य सूत्र-श्रुतस्यैव दीर्घो विज्ञास्यते। पठन्निति। पठन्तु इत्यस्य शन्तृङन्तस्य दीर्घः कस्मान्न भवतीत्याह—उदनुबन्धयुक्तस्येत्यादि। अन्त्वसन्तस्येति कर्तव्ये यो यमन्तुरित्युकारो निर्दिष्टः, स कार्यार्थमनुबन्धसंज्ञकः नोच्चारणार्थः[3]। तेनोकारानुबन्धयुक्तो योऽन्तु-शब्दस्तस्य ग्रहणात् ऋकारानुबन्ध युक्तस्य न भवति। ननु चान्त्वन्ताभ्यां लिङ्गं विशेषयिष्यामः, विशेष्यस्य तदन्तविधिर्भवति, एवं च विनाप्यन्तुग्रहणमन्त्वसन्तस्येति विज्ञास्यते, तदपार्थकम् अन्तुग्रहणम्। नापार्थकम्, लाक्षणिकमन्तत्वप्रतिपत्त्यर्थत्वात्। तेनेहापि दीर्घो भवति। दीर्घाण्यहानि यस्मिन्सः दीर्घाहः निदाघः इति। अह्नः स इति सत्वं ततो दीर्घः। पिण्डाग्र इत्यस्य क्विबन्तस्य कर्तृवाचिनः कथं धातुत्वं येनात्राधातोरिति निषेधो भवतीति यो मन्यते तं प्रत्याह—क्विबन्तो धातुत्वं न जहातीत्यादि। नन्वर्थवद्ग्रहणपरिभाषया पिण्डाग्र इत्यादौ असोऽनर्थकत्वाद् दीर्घो न भविष्यति, यस्त्वसुन्प्रत्ययसम्बन्धी अस् इत्ययं शब्दः स एवार्थवत्वाद् ग्रहीष्यते। यथा मूलोदाहरणे, तदपार्थकमधातोरिति प्रतिषेधकरणम्। अस्त्येतत्। अर्थवदग्रहणपरिभाषायास्त्वनित्यत्वदर्शनादनर्थकस्यासो दीर्घः प्राप्नोति स मा भूदिति निषेधः क्रियते। तथा च दामामीमेत्युभयस्यापि सार्थकादनर्थकाच्च सन्नन्तात्सन् इति सूत्रेण स्त्रीप्रत्ययप्रतिषेधः सिद्धो भवति। यद्येवम्, इहापि धातुत्वान्न भवति। गोमन्तमिच्छत्यात्मनः नाम्नः आत्मेच्छायामिति यिन्, क्विप्, य्वोर्य्वञ्जन इति यलोपः गोमानिति। क्विबन्तो ह्ययं धातुः क्विबन्तो धातुरिति वचनात्। सत्यम्, अधातोरिति प्रतिषेध आनन्तर्यादसन्तस्यैव विज्ञास्यते नत्वन्त्वन्तस्य। गोमानित्यत्र यिनिपरे न लोपश्चेति न लोपो न भवति, अनित्यत्वात्। तस्यानित्यत्वं त्वसन्ध्यक्षरयोः अस्येत्यतो[4] लोप इति अनुवर्तमाने पुनर्लोपग्रहणात्।

---

१. पुनरपि (भं०)
२. असन्त्य (वा०)
३. जतूपचारणार्थः (भं०)
४. अस्यते इत्यतो (वा०)

यद्येवम्, गोमत्यति गोमत्यत इत्यत्रापि न लोपो न प्राप्नोति, नैष दोषः। घुड्विषय एव न लोपस्यानित्यत्वस्मरणात्। गोमन्तमिच्छत्यात्मनः यिन्, गोमानिवाचरति, कर्तुरायिरित्यायिः नलोपश्चेति न लोपः नामि व्यञ्जनान्तादि-त्यायेरादिलोपः ति[1], ते इत्यन्विकरणः।

इन्हन्पूषार्यम्णां शौ सौ च २।२।२१

ई च हा च पूषा च अर्यमा चेति द्वन्द्वनिर्देशे लिङ्गान्ततकारलोपो न कृतः स्वरूपभङ्गभयात्। इन्हन्पूषन्अर्यमनित्येतेषामिति सामान्याभिधानेऽप्येतदन्तानां लिङ्गान्तानामिति बोद्धव्यम्। केवलेभ्य इन्नादिभ्यः परस्य नपुंसकाद्विधीय-मानस्य शेरादेशस्यासम्भवात्। बहुदण्डिनीत्यादि। दण्डो विद्यते येषां ते दण्डिनः तदस्यास्तीतीन् प्रत्ययः। ततो बहुशब्देन बहुव्रीहिः। जस्शसोश्शिः अनेन दीर्घः, एवं बहुवृत्रहाणीति। वृत्रं हतवन्त इति क्विप्, ब्रह्मेत्यादिना क्विप्। बहवो वृत्रहणो येष्विति सर्वत्रैवं प्रकारो विग्रहः। ननु सिद्ध इन्नादीनां घुटि चासम्बुद्धाविति दीर्घः तदपार्थको योगारम्भ इत्याहुः—([2]घुटि चासम्बुद्धा-वित्यादिनियमस्वरूपप्रदर्शयितुमाह—इन्नादीनां शौ भावे वेत्यादि) एतेन यत एवकारस्ततोऽन्यत्रावधारणमितीन्नादयश्शौ सौ दीर्घो[3] नान्तस्येत्येव रूपस्तु नियमोऽयमिति (दर्शयति[4], इन्नादीनामेव शौ सौ दीर्घः नान्ये) परस्तु[5] प्रत्यय-नियमो न भवति व्यञ्जनानीति शावन्यस्यापि दीर्घत्वदर्शनात्। क्विबाश्रयो-ऽपि हन्तेः पञ्चमोपधेत्युपधादीर्घो न भवति नियमविधानसामर्थ्यात्। ननु शौ सौ घुटि नियमः आरभ्यमाणस्तुल्यजातीयविषयव्यावृत्तिकारित्वान्नियमाना-मन्यत्र घुट्येव दीर्घत्वं निवर्तयेत्। वृत्रहाणीत्यादौ तु घुटि क्विबाश्रस्य तस्य[6] केनचिद् विनिवृत्तिस्स्यात्[7]। उच्यते—यदयं हनेः हेर्घिरुपधालोप इत्यघुट्-स्वरादिप्रत्ययनिमित्ते उपधालोपे कृते सति हन्तेर्घत्वमारभते। ततो ज्ञायते, घुटोऽन्यत्रापि निमित्ते क्विबाश्रये दीर्घो न भवतीति। नहि हन्तेः क्विपि दीर्घे

---

१. ति ते अन्विकरणः (वा० + भं०)
२. न्यूनपाठः (भं०)
३. नियत इति अर्थमुपदर्शयन्प्रकृतिनियमोऽयमिति (भं०)
४. कोष्ठांकितो भागः निरस्तः वर्तते (वा०)
५. न्यूनपाठः (वा०)
६. दीर्घस्य (पाठभेदः वा०)
७. केनचिन्निवृत्तिस्स्यात् (भं०)

सत्युपधालोपः सम्भवति । एवमप्येतज्ज्ञापकं स्वरादावघुटि दीर्घत्वं निवर्तयेत् । तत्र स्वरादाववमसंयोगादित्यादिना उपधालोपस्यासम्भवात् । व्यञ्जनादौ तु घुटि दीर्घत्वप्रवृत्तिः केन निवार्येत, एवं तर्हि संज्ञापूर्वकस्य विधेरनित्यत्वाद् हन्तेः क्विपि दीर्घो न भविष्यति । यथा ऋणितृणिघृणीनां ऋतं त्रितं घृतमित्यत्र प्लीहानावित्यादौ तर्हि हनो दीर्घत्वं न प्राप्नोति नियमेन दीर्घस्य व्यावृत्तेः । असदेतत् । अर्थवद्ग्रहणपरिभाषयार्थवतो हनो दीर्घत्वस्य नियमेन व्यावृत्तिः न त्वनर्थकस्यापि प्लीहानावित्यादौ चानर्थको हन्शब्दः प्लीह गतावित्यस्य यान्युपधाया दीर्घत्वे कृते प्लीहशब्दस्य पञ्चपाद्यां निपातितत्वात् । यद्येवम्, इनोऽप्यर्थवत एव नियमस्स्यात् । ततश्चैहैव दीर्घत्वतद्व्यावृत्ती भवेताम् । बहुदण्डीनि बहुदण्डिनावित्यादौ बहुवाग्मीनि बहुवाग्मिनावित्यादौ तु न स्याताम् । ग्मिन्नवयवस्येनोऽनर्थकत्वात् । सत्यम् । अर्थवद्ग्रहणपरिभाषायास्तु यथा लक्ष्यमनित्यत्वं स्मर्यते । तेनेन्विषयेऽस्याः प्रवृत्तिर्न भविष्यति हन्विषये तु भविष्यतीति शेः प्रत्ययविशेषस्योपात्तत्वादनन्तरस्य सेरनुवृत्तिर्न स्यादिति साविति क्रियते । चकारात्तदनुवृत्तिर्भविष्यतीति चेत् चकारात्तदनुवृत्तिर्दौर्गमतमाश्रित्याह[1] निपातानामनेकार्थत्वाच्छावेवेति प्रकृतिनियमद्योतकोऽयं चकारस्स्यात् । अन्यथा त्विन्नादीनामेव शावित्येषोऽपि नियमो भवेत् । व्यञ्जनानीत्यादिज्ञापकाश्रयणेऽपि प्रतिपत्तिगौरवमापद्येत । तस्मात् सेरनुवृत्तिर्न स्यादिति सि-ग्रहणम् । शिस्योरिति न कृतमवैचित्र्यात् ।

उशनस्पुरुदंशोऽनेहसां सावनन्तः २।२।२२

अनेनैवान्तादेशे कृते उशना च पुरूदंसो च अनेहा चेति विग्रहः । अतोऽन्नादेशं प्राप्नोतीति । एतेनान्शब्द आगमित्वमनो न द्योतयति व्याख्यानादिति दर्शयति । सम्बुद्धिविषये इत्यादित्रयाणां रूपाणां समाहारः त्रिरूपमिति पात्रोदराकृतिगणत्वादकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यत इति स्त्रीत्वमत्र न भवति । कानि पुनस्त्रीणि रूपाणीत्याह—नान्तं तथा सान्तमथाप्यदन्तमिति । कथं पुनरनिष्यमाणानि[2] अमूनि त्रीणि रूपाणि लभ्यन्ते सावित्यनुवर्तमाने पुनस्सिग्रहणस्य[3] सिविशेषे सम्बुद्धावुशनसोर्विकल्पेनान्नादेशार्थत्वात् । ननु पूर्वकस्य सेरनुवृत्तौ शिरप्येकयोगनिर्दिष्टोऽनुवर्तेत । तथा च समासस्थानाम्[4]

१. टिप्पणी (वा०)
२. पुनरिष्यमाणानि (मं०)
३. ग्रहणं सविशेष (मं०)
४. समस्तानाम् (मं०)

उशनादीनां नपुंसकार्थवृत्तीनां शावपि[1] परेऽन्त्यस्यान्नादेशः स्यात् । नैतत् । आनन्तर्यात्सेरेवानुवृत्तेः । हे उशनन्नित्यादि । उशनसावन्नादेशो न सम्बुद्धाविति निषेधात् लिङ्गान्तनकारलोपाभावे सत्युशनन् इति नान्तमेकं रूपं तस्यापि निषेधस्य नञा निर्दिष्टत्वेनानित्यत्वात् पक्षे प्रवृत्त्यभावान्नलोपे सति हे उशन इत्यदन्तं द्वितीयं रूपम्, आदेशाभावपक्षेऽपि सकारश्रवणात् सान्तं तृतीयम् । अनोऽकारकरणं तूत्तरार्थम् । सर्वेषामुशनसादीनामन्नादेशनिवृत्त्यर्थमिति[2] आशङ्कामात्रमेतदनो हि सर्वादेशत्वे सति आ इत्यस्य रूपस्य शब्दत्रयविषयेऽपि समानत्वात् कीदृशोऽर्थविशेषावसायः स्यात् । प्रकरणादिजनितो भविष्यति इति चेत् तर्हि प्रतिपत्तिगौरवं स्यात् ।

सख्युश्च २।२।२३

ङसिङसोरूमिति ङस उत्वम् । सखेति । अन्नादेशः घुटि चासम्बुद्धाविति दीर्घः हे सखे इति सम्बुद्धौ चेति एत्वम्, ह्रस्वनदीति सि-लोपः योगविभागः उत्तरार्थः ।

घुटि त्वै २।२।२४

ऐ शब्दात्स्वरूपेणार्थेनार्थवत्वात् द्वितीया, तस्याः आदिलोपः इत्यादिना लोपः । तु-शब्दः इहैव सम्बुद्धिनिषेधो नोत्तरत्रेति विशेषं द्योतयति ।

दिव उद् व्यञ्जने २।२।२५

दिव् इत्यस्येति । अन्त्यवर्णापेक्षयासम्बन्धे एषा षष्ठी । अन्त्यो हि वर्ण उत्वं प्रतिकार्यभाक्, वर्णान्त्यस्य विधिरिति वचनात् । एवमुत्तरयोगयोः द्युभ्यामित्यादि । नन्वत्र कृते उत्वे बहिरङ्गासिद्धपरिभाषया प्रकृत्याश्रयेऽन्तरङ्गे यत्वे कर्तव्ये बाह्यव्यञ्जनादिप्रत्ययापेक्षिणो बहिरङ्गस्योत्वस्यासिद्धत्वाद् यत्वं न प्राप्नोति, उच्यते – इवर्णुवर्णघोनां चेत्युत्वकरणात् स्वरानन्तर्येणास्याः परिभाषायाः न[3] प्रवृत्तिः । तपरकरणमित्यादि । उरिति कर्तव्ये तपरत्वविशिष्टस्योकारस्य यत्करणं तत्तपरस्तत्कालस्यैत्युकारस्यैवादेशभावो यथा स्यादित्येवमर्थम् । किं पुनरसति तपरत्वे स्यादित्याह— स्वरस्सवर्णस्येत्यादि ।

---

१. सावपि (भं०)
२. सादीनां स्थाने आदीनामिति पाठः (भं०)
३. नास्ति (भं०)

असत्वे तपरत्वे स्वरो गृह्यमाणस्सवर्णमपि गृह्णातीति उकारः ऊकारमपि गृह्णीयात् । तथा च ऊकारोऽप्यादेशः स्यात्, स मा भूदुकार एव यथा स्यादिति तपरकरणम् । ननु विधीयमानः स्वरः सवर्णान्न गृह्णातीति उकार ऊकारं न गृह्णीयादिति तथा च सनन्ताशंसिभिक्षामुः इति उकारः ऊकारं न गृह्णाति तदपार्थकं तपरकरणम् । नैतदस्ति । विधीयमानोऽपि स्वरः क्वचित्सवर्णस्य ग्राहको दृष्टः । यथा उत्वम्मादिति उकारः ऊकारस्य । तथा च अमूभ्यामित्याद्यपि सिद्धं भवति । एवं चासति तपरत्वे ऊकारोऽप्यादेशः स्यात्, स मा भूदिति तत्कालार्थं तपरकरणम् (उत्तरार्थम्[1], सर्वेषामुशनसादीनामन्त्यादेशनिवृत्त्यर्थमिति आशङ्कामात्रमेतदनो हि सर्वादेशत्वे सत्या इन्यन्यस्य रूपस्य शब्दमात्रविषयेऽपि समानत्वात् कीदृशोऽर्थविशेषावसायः स्यात् । प्रकरणादिजनितो भविष्यतीति चेत्, तर्हि प्रतिपत्तिगौरवं स्यात् ।) नन्वर्धमात्रापरिमाणस्य व्यञ्जनस्य वकारस्यैकमात्रिक एवान्तरतम्यादुकारो भविष्यति न तूकारोऽपि द्विमात्रस्तत्किं तपरकरणेन, सत्यम् । गुर्वी तु प्रतिपत्तिस्स्यादिति तपरत्वमेव ज्यायः । ननु विभक्ति अधिकाराद्विभक्तिव्यञ्जने[2] उत्वेन भवितव्यम् । तच्च सुकार-भकाराभ्यामन्यत्र न सम्भवति इति सुभोरिति क्रियताम्, अपार्थकं तु व्यञ्जनग्रहणमित्याह—सुभोरिति कर्तव्ये इत्यादि । सामान्यस्य विभक्तिसम्बन्धिनोऽपि व्यञ्जनस्य परिग्रहो यथा स्यादिति व्यञ्जनग्रहणं क्रियते । तेन दिवो भावः द्युता द्युत्वमिति तात्वयोरपि परयोर्दिव उत्वम् सिद्धं भवति । यद्येवम्, दिवि भवं दिव्यमित्यत्रापि प्राप्नोतीत्याह—वाम्येत्यतो वेति सम्बध्यते इति सिंहावलोकितन्यायेनेति भावः । व्यञ्जनमात्रेऽपि तर्हि विकल्पस्स्यादित्याह—सा च व्यवस्थितविभाषा इति । तेन व्यवस्थितविभाषाविज्ञानात् यकारे व्यञ्जने न भवत्यन्यत्र तु व्यञ्जने भवतीति । यद्येवम्, अक्षद्यूभ्यामित्यादौ अक्षैर्दीव्यतीति दिवः क्विपि छोश्शूटो पाञ्चमेति वकारस्य कृते उत्वादेशे एकदेशविकृतस्यानन्यत्वात् दिव्-शब्द एवायमित्यूकारस्य उत्वं प्राप्नोति तत्कस्मान्न भवति । उच्यते—दिवेर्दिविति दिव्शब्दो व्युत्पाद्यते । तस्य लिङ्गस्येह ग्रहणं निरनुबन्धत्वात् । यस्तु क्रीडाद्यर्थ-द्वत्तिस्सानुबन्धको धातुः क्विबन्तः स न गृह्यते निरनुबन्धकग्रहणे न सानुबन्धकस्येति वचनात् । तेनाक्षद्यूभ्यामित्यादौ न भवति ।

---

१. न्यूनपाठः (वा०)

२. अविभक्ति (वा०)

औ सौ २।२।२६

अपीत्यकरणादिति । असन्देहार्थमिति शेषः । प्राथम्याद्वा प्रथमैक वचनमेव गृह्यते । अक्षद्यूरित्यत्र पूर्ववदौत्वं प्राप्तं तत्तु न भवति, दिवः सानुबन्धकत्वात् ।

वाम्या २।२।२७

अमि पर इति । एतेन द्वितीयैकवचनस्य ग्रहणं न तु षष्ठीबहुवचनस्येति दर्शयति । एष च विशेषः । आ निर्देशाल्लभ्यते षष्ठीबहुवचने हि गृह्यमाणे सति आ इति दीर्घनिर्देशो विफलस्स्यात् । अ इत्येवं कुर्यात् एवमपि कृते द्यामिति समानदीर्घत्वे सिध्यत्येव अकारात् पर आम् नुकारागमस्य विषयः, तत् कथं द्यामिति सिध्येदिति चेत्, तन्न, आगमशासनस्यानित्यत्वात् । अत्र विषये नोरागमस्याप्रवृत्तिः । तस्माद् आ इति दीर्घनिर्देशादमो न ग्रहणम् । अमो ग्रहणे तु दीर्घो निर्दिश्येत्, अकारलोपस्य प्रवृत्तिस्स्यात्, सत्यकारलोपे वाकारस्याश्रयणार्थं लोपग्रहणमेव कुर्यात्, किमकारादेशविधानेनेति चेत्, न । ग्रन्थगौरवप्रसङ्गात् । तस्मादमो ग्रहणे सति आ इति दीर्घो निर्देष्टव्य एव ।

युजेरसमासे २।२।२८

क्विबन्तस्येति क्विपं विना धातोर्युजेः धुटोऽसम्भवादिति भावः । क्विबन्तात्तु सम्भवति क्विबन्तो धातुत्वं न जहाति लिङ्गत्वं च प्रतिपद्यत इति क्विबन्तस्य लिङ्गत्वात् नुकारागमो भवतीति । तदनुबन्धेन चिह्नेन आगम उदनुबन्ध इत्यस्याः परिभाषायाः उपस्थानादिति भावः । युङ् युञ्जाविति । युजिर् योगे युनक्तीति क्विप्, सि, औ, जस्, अम्, औ, अनेन नुरागमः सौ परे इति । तिर्यङ्ङित्यादिनिर्देशात् संयोगात् लोपात्[1] पूर्वं चवर्गदृगादीनां चेति जस्य गत्वम्, वर्ग्ये वर्गान्तः संयोगान्तलोपः । अन्यत्र तवर्गश्चटवर्गेति नस्य ञः, अश्वयुक्, अश्वयुजाविति, अश्वान्युनक्तीति कर्मण्यणिति अणि प्राप्ते, वा सरूपविधानात्क्विप्, तस्य तेन समास इति समासत्वादसमास इति निषेधान्नोरभावः । युजेः योगार्थस्य ग्रहणे वेति वर्तत इति हेतुः उक्तः । अन्ये तु युजेरिति इकारेणोपलक्षितस्य योगार्थस्यैव युजेर्ग्रहणं न तु सामान्यस्येत्याहुः[2], तदसारम्, आगन्तुनापि इकारेण निर्देशं कृत्वा युजेरिति निर्देशस्य सम्भवात् सामान्यस्यापि[3] ग्रहणप्रसङ्गत्वात् । योजनमिति क्विबीति भावेऽर्थे कृत्ययुटोऽन्यत्रापी-

१. लोप (भं०)
२. ससाध्यर्थस्य (भं०)
३. साध्यर्थस्यापि (भं०)

त्यनेन ॥

अभ्यस्तादन्तिरनकारौ वा नपुंसके २।२।२६

अभ्यस्तादिति ॥ अभिपूर्वादस्यतेरभ्यस्यतेस्मेति निष्ठेति क्तः । नडीश्वी-तीडभावः । अविद्यमानो नकारो यस्यान्तेरिति । अकाराभावोऽन्तेरिति तु न विज्ञायते । अल्लोपमित्यसन्देहार्थमकरणात् । लोपोऽभ्यस्तादन्तिन इति नित्य-लोपः प्राप्त इति व्याप्तेर्न्यायात् । तत्र शन्तृङ्सम्बन्धिनोऽप्यन्तेग्रहणादिति भावः । लिहन्ति कुलानीति लिह आस्वादने वर्तमाने शन्तृङ्डिति शन्तृङ्, अन्विलुक्[1] । जस्शसांशिः पूर्ववदानशसिति वर्तमाने शन्तृङ्डानशावित्यनेन अन्त्यात् पूर्ववदिति अन्वि, जुहोत्यादेश्चेति लुक् । जुहोत्यादीनां सार्वधातुक इति द्विर्वचनं, ह्रस्वः, द्वितीयचतुर्थयोरिति धस्य[2] दः, अभ्यस्तानामाकारस्येत्या-लोपः, शिः[3], धुट्स्वराद् घुटि नुः घुटि चासम्बुद्धाविति दीर्घः । ददतीकुले इति, औरीमिति, अत्र लोपोऽभ्यस्तादन्तिन इति नित्यं लोपः । एवं ददतौ विप्रौ इत्यत्रापि । ननु नपुंसकविषये शिरेव घुट् नान्यः, ततश्च नपुंसक इत्यपास्य शाविति कस्मान्न क्रियत इत्याह—शाविति कर्तव्य इत्यादि ।

तुदभादिभ्यो ईकारे २।२।३०[4]

भा इत्यनेन भा-सदृशाः भादय इति । एतेन भा-शब्दात्तृतीयां विधाय आदिशब्दोऽयं तृतीयातत्पुरुष इति दर्शयति । तुदादिभ्यो धातुभ्य इति । पिष अवयवे इत्येतदन्तेभ्य आदिशब्दस्य व्यवस्थावाचित्वात् पिषेश्च परं वृत्करणम् समाप्तिचिह्नस्य पठितत्वात् । स्त्रियां कृतस्य ग्रहणमिति कथं पुनः समनन्तर-नपुंसकशब्दश्रुत्या ईकारः स्त्रियां कृतोऽपि गृहीतुं शक्यते[5], एवं मन्यते, निवृत्त-मेव नपुंसकग्रहणम्, ई-इति कर्तव्ये कार-प्रत्ययस्य निर्देशात्, तत् निर्देशं नह्यधिकस्यापि ईकारस्य निमित्तत्वम् ख्याप्यते, एवं चैतत् ख्यापितं भवति । यदि नपुंसकग्रहण[6]-विनिवृत्त्या स्त्रियां कृतेऽपि ईकारो गृह्यते । तुदतीत्यादि । नन्वत्र शन्तृङि परे सार्वधातुकवद्भावादुपजातेनान्विकरणेन व्यवहितस्यान्ते

१. अन्विकरणः अदादेर्लुक् (मं०)
२. तस्य दः (मं०)
३. जसः शिभावः न्यूनपाठः (वा०)
४. २।२।३१ (दु०वृ०)
५. शक्यः (मं०)
६. न नपुंसक (वा०)

कथम् अनकारत्वं[1] स्यात् । उच्यते—विकरणकृतं व्यवधानमव्यवधानमेव, वचनसामर्थ्यात् । असन्ध्यक्षरविधानाल्लुप्तेऽप्यन्तेरकारे[2] अन्तिव्यपदेशः, एकदेशविकृतस्यानन्यत्वात् । स्नातीत्यादि । ष्णा शौचे, धात्वादेष्षस्सः, गात्र-पुरुषयोः स्ना इति निर्देशाण्णस्य नः । अथ याती यान्तीत्यादौ केन विकल्पेनान्ति-नकारलोपः, नह्ययं या प्रापण इति या-धातुः तुदादिर्नापि भादिरित्याशङ्क्याह—आदिशब्द इत्यादि । एतेन या प्रभृतय आदन्ताः धातवः सर्वे भादिग्रहणेनेह गृह्यन्त इति दर्शयति तत् कथम्, उच्यते—भादिशब्दो अयमादिशब्दः । न स व्यवस्थावाची येन क्रमपठितानामेव भादीनामनेनादि-ग्रहणेन सङ्ग्रहः स्यात् । किं तर्हि, प्रकारे, प्रकारश्च सादृश्यम् । तेन भाधातुसदृशाः आकारान्ताः ये धातवः ते सर्वे भादिग्रहणेन गृह्यन्ते तथा च याती यान्तीत्याद्यपि सिद्धं भवति । भवन्ती, देव्यन्ती[3], ब्रूमः, दिवुं[4] क्रीडादौ शन्तृङ्, अन्विकरणः, दिवादेर्यन्, असन्ध्यक्षरविधिः । दिवेर्नामिनोर्वोरिति दीर्घः । उदृकारानुबन्धात्त्वी वा ग्रहणं तत्र सम्बध्यत इति तत्रेत्यनुषङ्गश्चाकुञ्चेरिति सूत्रं परामृशति वा ग्रहणमभिसम्बन्धस्तु वा नपुंसक इत्यस्मात् । सा च व्यवस्थितविभाषेति । अन्यथा सर्वत्रानुषङ्गलोपो वा भवेदिति भावः । स्य-शब्दादित्यादि । शन्त्राणौस्यसंहितौ शेष चेत्येतत् सूत्र-विहितात् करिष्यति करिष्यन्तीति । उदृकारेति ई-प्रत्ययः । औरीमिति वा ।

हनेर्हेर्घिरुपधालोपे २।२।३१[5]

हन हिंसागत्योरित्यस्य । क्विबन्तस्येति । एतदुपधालोपग्रहणाल्लभ्यते । उपधालोपो ह्यघुट्स्वरादिनिमित्तकः । न च विना क्विपं हन्तेर्धातोरघुट्स्वरादिविभक्तिस्सम्भवति इत्यर्थात् क्विबन्तस्येति विज्ञायते । हत्वं हन्तवानिति, क्विबिति, क्विब्ग्रहणेत्यादिना । हनेरिति किम्, द्व्यह्नः । द्वयोरह्नोर्भवः इत्येवमादेरणिष्यत इत्यण् तस्य द्विगोर्लुगनपत्य इति लोकोपचारात् लुक् तद्धितार्थे संख्यापूर्वोऽयं द्विगुः समासान्तगतानामित्यकारस्समासान्तः अवमसंयोगादित्यकारलोपः । हनोऽस्यानर्थकत्वेऽप्यर्थवद्ग्रहणपरिभाषायाः अनित्यत्वदर्शना-

---

१. न्यूनपाठः (भं०)
२. विधिना (भं०)
३. देवन्तीति (वा०)
४. दिव (वा०)
५. २।२।३२ (भं०)

दत्र घत्वं स्यात्। हेरिति किम्, अन्त्यस्य मा भूत्। वृत्रहणावित्यादि। उपधालोपो नास्त्यघुट्स्वरादौ तस्य विधानादल्लोप इति कर्तव्य उपधालोग्रहणं वृत्रहणमाचष्टे वृत्रह्यतीत्यत्रेल्कारितं चेति इनि कृते इनि लिङ्गस्येत्यन्त्यस्वरादिलोपे सति घत्वाशङ्का निवृत्त्यर्थम्, यदि पुनर्न इति क्रियते[1] शक्यमुपधालोपग्रहणमकर्तुम्। नन्वेवं कृते सति स्वरादेशपरिभाषया अल्लोपस्य स्थानिवत्वात् कथं हकारस्य नकारपरत्वं स्यात्। उच्यते - न इति निमित्तसंश्रयणसामर्थ्यात् स्थानिवद्भावोऽत्रानाश्रयिष्यते। नन्वित्यादि। चोद्यम्, न च अलुप्तवद्भावशासनात् कथमत्र लुप्तोपधस्य चेत्यनेन[2] सिद्धिरभिधातुं शक्यम्, अलुप्तवद्भाव-प्राकरणिककार्यनिषेध एव चरितार्थत्वात्। अत्रोच्यत इत्यादिना परिहरति। अयमर्थः, लुप्तोपधस्य चेत्यनेन हन्तेर्धातोः घत्वलक्षणं कार्यमुच्यते। धातोश्च कार्यमुच्यमानं धातुविहित एव प्रत्यये भवति, न तु लिङ्गप्रत्ययेऽपि। एवं च घ्नन्ति, घ्नन्तित्यादावेव तेन सूत्रेण घत्वं युक्तम्। वृत्रघ्न इत्यादौ तु स्यादिप्रत्यये सत्यपि लुप्तोपधत्वे घत्वं न युक्तिमदतस्तत्र अपि तद्यथा स्यादिति योगोऽयमारभ्यते। यदि पुनर्धातुकार्यं लिङ्गप्रत्ययेऽपि परे स्यात्, किं स्यादित्याह—यदि चेत्यादि। वा स्वर इत्यनेन गिरतेः धातोः लत्वं यथा निगिलति निगिरति इत्यत्रान्विकरणे धातुप्रत्यये भवति तथा गिरौ गिर इत्यत्रापि लिङ्गप्रत्यये परे विशेषाभावात् स्यात। धातोः कार्यमुच्यमानं धातुप्रत्यय एव भवतीत्यस्मिन्नर्थे योगारम्भः ज्ञापिते सति न भवति। गृ निगरणे गिरतीति गीः, क्विप्, ऋदन्तस्येरगुण इति इरादेशः, औ, जस्।

गोरौ घुटि २।२।३२[3]

गो-शब्दस्य घुटीति। एतेन गो शब्दस्य यो घुट् गवार्थगत एकत्वादावर्थे सञ्जातः तस्मिन्निदम् औत्वं विधीयत इति दर्शयति। एवं च सति चित्रगुरित्यत्र बहुव्रीहौ कृते स्वरो ह्रस्वो नपुंसक इति योगविभागाद् ह्रस्वत्वे सत्येकदेशविकृतस्यानन्यत्वात् गो-शब्द एवायमिति कृत्वा यदौत्वं प्राप्नोति तदपास्तं भवति। नह्यत्र गवार्थगत एकत्वे[4] सि-प्रत्ययः उत्पन्नः, किं तर्हि, अन्यपदार्थगते, अतोऽत्रौत्वं न भवति। एवं हे चित्रगो हे चित्रगव इत्यत्रापि सम्बुद्धिजसोरौत्वे कृते न भवति। नन्वत्र लाक्षणिकत्वादेवात्र न भविष्यति

---

१. क्रियेत् (मं०)
२. चेत्यन्तेन (वा०+मं०)
३. २।२।३३ (दु० वृ०)
४ एत्वे (मं०)

अशक्या लक्षणप्रतिपदोक्तपरिभाषेहाश्रयितुम्, प्रतिपदोक्तस्य गो-शब्दस्यासम्भवात्। योऽपि ह्ययमौणादिको गो-शब्दस्सोऽपि लाक्षणिक एव। गमेर्डो इति लक्षणेनावयवशस्तस्य निष्पत्तेरिति पूर्वक एवात्र समाधिः। द्यौ-शब्दस्यापीष्यते। गोर्घुट्यावीति कर्तव्ये गुरुसूत्रकरणादिति शेषः[1]।

अम्शसोरा २।२।३३[2]

अम् च शश्चेति विग्रहः। गो शब्दस्य अम् शसि पर[3] इति। गवार्थगत एकत्वादौ यावम्शसाविति पूर्ववद् व्याख्येयः। तेन चित्रगुमानयेत्यत्रात्वं न भवति। आ इति दीर्घोच्चारणकरणम्[4] अकारलोपस्य निवृत्त्यर्थम्। शस्यापि दीर्घनत्वयोः। पुंसि चायं दोषः, न तु स्त्रियाम्, तत्राप्प्रत्ययस्य प्रवृत्तेः। द्यौशब्दस्यापीष्यत इति अम्शस्या इति कर्तव्ये गुरुसूत्रकरणादिति शेषः। अम्शसी चायं समाहारे द्वन्द्वः।

पथिमथिऋभुक्षीणां शौ २।२।३४[5]

पन्थाः मन्थाः ऋभुक्षाश्चेत्यनेनैव कृतात्वानां द्वन्द्वः। सूत्रनिर्देशे व्यञ्जने चैषां निरिति न-लोपो न भवति। स्वरूपभङ्गभयात्।

अनन्तो घुटि २।२।३५[6]

अन्नादेशं प्राप्नोतीत्येतेनान्तशब्द आगमत्वमनो न द्योतयतीति दर्शयति। पन्थानावित्यादि। अन्नादेशः, घुटि चासम्बुद्धाविति दीर्घः पथिषु मथिषु। व्यञ्जने चैषां निरिति नलोपः।

अघुट्स्वरे लोपम् २।२।३६[7]

अघुडिति लुप्तसप्तमीकमिति। आदिलोप इत्यादिना। यदघुट्स्वरः, न घुट्स्वरः अघुट्स्वरः – इति समासो न क्रियते। समासे हि सति स्वर-

---

१. करणादिति शेषः (मं०)
२. च परतः २।२।३४ (दु० वृ०)
३. परतः (मं०) अन्तादेशं (मं०)
४. न्यूनपाठः (बा०)
५. २।२।३५ (दु० वृ०)
६. २।२।३६ (दु० वृ०)
७. २।२।३७ (दु० वृ०)

व्यञ्जनयोरुभयोरघुडित्यत्रादिश्यमानं[1] न स्यात्। स्वरादावघुटि पर इति मन्तव्यम्। पथ इत्यादि। शस्, टा, ङे, अनेनान्तलोपः। व्यञ्जने चैषां निरिति न लोपः। अघुट्स्वरग्रहणमुत्तरार्थम्। अथेहार्थमपि कस्मान्न भवतीत्याह—इह त्वित्यादि। अत्र[2] हेतुमाह—घुटि अन्नादेशस्य विहितत्वादिति पूर्वसूत्रेणेति शेषः।

व्यञ्जने चैषां निः २।२।३७[3]

एषामिति। इदं षष्ठीबहुवचनम्। त्यदाद्यत्वम्। अकारे लोपम्, सुरामि सर्वतः, अद् व्यञ्जनेऽनक इतीदमौत्वम्, घुटि बहुत्वे त्वे चैत्वम्, स्वरपरे व्यञ्जनान्ते चेति। अनेन च-शब्दात् स्वरो यत्र निमित्तमिति सूचयति। ननु तस्मिन्परे पूर्वेणान्ते लुप्ते सिद्धे उत्तरसूत्रेणैवानुषङ्गलोप इति किं स्वरग्रहणस्यानुकर्षणार्थेन चकारेण, अस्त्येतत्, स्वरादेशपरिभाषया त्वन्तलोपस्य स्थानिवद्भावोऽस्ति तत्कथं उत्तरसूत्रेण सिद्धिस्स्यात्। अघुट्ग्रहणमुभयोर्विशेषणमिति उभयोस्स्वरव्यञ्जनयोर्पथिभ्यामित्यादि सर्वत्रानेन लोपः। पथा पथेत्यादि। पूर्वेणान्तलोपः, पन्थानौ पन्थान इति। अनन्तो[4] घुटीत्यन्, घुटि चासम्बुद्धाविति दीर्घः। पन्थाः मन्थाः, पन्थिमन्थीत्यात्वम्। अथैषां ग्रहणं किमर्थं यावता पथ्यादीनां तदनुकर्षणार्थं क्रियते। न च सर्वेषां तेषां[5] नकारस्सम्भवति, किन्तर्हि, द्वयोरेव एवं [6]चानयोरिति वक्तव्यम् अथवा तदपि न वक्तव्यम्, अनुवृत्तिवशादेव पन्थिमन्थिशब्दयोः यो नकार इति प्रतिपत्तेः। तत् किमर्थमेषां ग्रहणमित्याह—एषां ग्रहणमित्यादि। विभक्त्यधिकाराद्विभक्तावेव परस्यां न लोपः स्यादविभक्तावपि तु यथा स्यादित्येषां ग्रहणम्। एषां हि ग्रहणे सति बहुत्वनिर्देशेन सकललक्ष्यसङ्ग्रहात् अविभक्तावपि लोपसिद्धो भवति। तेनेत्यादि। तेनैषां ग्रहणेनेत्यर्थः। पथितेत्यादि। पथो भावः पथितेति। ता त्वौ भाव इति ता-त्वौ प्रत्ययौ।

---

१. उपदिश्यमानम् (भं०
२. अत्रैव (भं०)
३ २।२।३८ दु०वृ०)
४. अनन्तो घुटीत्यन्तादेशः (भं०)
५. एषां (भं०)
६. पक्षयोरिति वक्तव्यम् (भं०)

अनुषङ्गश्चाक्रुञ्चेः २।२।३८[1]

कृतव्युत्पत्तिपूर्वमनुषङ्गशब्दः । विदुष इत्यादि । विद् ज्ञाने वर्तमानेः शन्तृङ्, अन्विलुक्, वेत्तेश्शन्तुवन्सुरिति शन्तुवन्सुरादेशः[2], शस्, टा, ङे, अनेनानुषङ्गलोपः । अघुट्स्वरस्येति उत्वम् । अघोषे प्रथम इति सस्य तत्वम्, क्रुङ्भ्याम्, क्रुङ्भिष्वति । क्रुञ्च गतीत्यस्मात् क्विप्, भ्याम्, सुप् । तिर्यङ्ङित्यादि । निर्देशात् संयोगान्तलोपं बाधित्वा चवर्गदृगिति गत्वम्, वर्ग्ये वर्गान्तः संयोगान्तलोपः । अथ किमर्थं अक्रुञ्चेरिति निषेधः क्रियते, यावता क्रुञ्चेरित्यादौ प्रत्ययोत्पत्तिमनपेक्ष्य प्रकृत्याश्रयत्वेनान्तरङ्गत्वात् धातूपदेशावस्थायामेव वर्ग्ये वर्गान्तनकारस्य वर्गान्तेन भवितव्यम् । कृते च वर्गान्ते क्रुञ्चेर्नकारोऽनुषङ्गो न सम्भवति, अतः प्राप्त्यभावादपार्थकमक्रुञ्चेरिति प्रतिषेधकरणमिति पूर्वपक्षयति । नन्वन्तरङ्गत्वादित्यादि । सत्यमित्यादिना परिहरति । सत्यम्, उक्तेन न्यायेन न कर्तव्यः । क्रुञ्चेः प्रतिषेधः । निषेधकरणात्तु ज्ञायते वर्ग्ये वर्गान्त इति क्वचिदनित्योऽयं विधिरिति नित्ये हि तस्मिन्क्रुञ्चिनिषेधो विफलः स्यात् । तस्मात् क्रुञ्चेरवस्थितो नकारस्तस्य लोपप्राप्तावक्रुञ्चेरिति निषेधः क्रियते । वर्गान्तत्वान्नित्यत्वज्ञापने[3] किं सिद्धं भवतीत्याह— तेनेत्यादि । आदिग्रहणेन प्रशान्भ्यामित्यादि[4] गृह्णाति[5] । शमु उपशमे प्रपूर्वः, प्रशाम्यतीति क्विप्, पञ्चमोपधेति दीर्घः । मनोधातोरिति मस्य नत्वम्, भ्याम् । अत्र स्यादि घुटि परे तकारस्य वर्गान्तो मकारो न भवति, वर्गान्तस्यानित्यत्वात्, तदुक्तम्, अपरेणाप्यन्यत्र स्यादि घुटि पदान्तवदिति । एवमपार्थकः क्रुञ्चेः प्रतिषेधः । क्विपि परतोऽनिदनुबन्धानामित्यादिना घुट्स्वरव्यञ्जनोत्पत्तेः पूर्वमेवानुषङ्गलुप्तत्वात् प्राप्त्यभावादाशङ्क्याह— अतएवेत्यादि । अतो अस्मादेव क्रुञ्चेर्निषेधादेतदवगम्यते क्विपाश्रयो क्रुञ्चेरनुषङ्गलोपो न भवति । अनुषङ्गलोपोऽपीत्यपि शब्दो भिन्नक्रमः अनिदनुबन्धानामित्यस्यानन्तरं द्रष्टव्यः । अनिदनुबन्धानामित्यनेनाप्यनुषङ्गलोपो नास्तीति । विद्वानिति । सान्तमहतो दीर्घः । सुकन्सः सुकन्भ्यामित्यादावपि अनुषङ्गलोपः कस्मान्न भवतीत्याह— लक्षणप्रतिपदोक्तयोरित्यादि । सुकन्स इत्यादावनुषङ्गलक्षणद्वारेण सञ्जातः

---

१. २।२।३९ (दु०वृ०)
२. शन्तृप्रत्ययस्य वन्सुरादेशः (भं०)
३. वर्गान्तात् (भं०)
४. सुकन्भ्याम् (वा०)
५. गृह्यते (भं०)

इति लाक्षणिकत्वात् तस्य लोपाभावः। अन्यत्रापीति। अविभक्तौ, विद्वत्ता विद्वत्त्वमिति विरामव्यञ्जनादिषु इति सस्य दत्वम्। अघोषे प्रथमः। वैदुषमिति वृद्धिरादौ सनीति वृद्धिः अघुट्स्वरादावित्युत्वम्।

पुंसोऽनूशब्दलोपः २।२।३९[1]

पुंभिः पुंस्वितिसंयागान्तलोपः। पुमानित्यादि। सान्तमहतोरिति दीर्घः। शब्दग्रहणमित्यादि। अल्लोप इति कर्तव्ये यच्छब्दग्रहणं क्रियते तस्यैतत् प्रयोजनमन्यत्राविभक्तावप्यल्लोपस्य संशब्दनं यथा स्यादिति अनूशब्दस्येति कर्तव्ये पुनर्लोपग्रहणं पुंस्यति पुंस्यते इत्यत्र यिन्नाय्योरप्यन्शब्दस्य लोपो यथा स्यादिति कथं न च स्यात्, न लोपश्चेति नियमेन कार्यान्तराणां व्यावृत्तेः। पुमांसमिच्छत्यात्मनः नाम्न आत्मेच्छायां यिन्। पुमानिवाचरति, कर्तुरायिरित्यायिः, नाम्नि व्यञ्जनान्तादित्यायेरादिलोपः। आय्यन्ताच्चेत्यात्मनेपदम्।

चतुरो वा शब्दस्योत्वम् २।२।४०[2]

उत्वं भवतीति। एतेन ह्रस्वोऽयमादेशो न तु दीर्घः। चतुर इति निर्देशादिति दर्शयति। चतुर इति शस्, चतुर्णामिति चतुर इति नुरागमः। उदिति कर्तव्ये त्व-प्रत्ययनिर्देशः किमर्थ इत्याह—त्वप्रत्ययनिर्देशादिति। चत्वारः इति जस्, प्रियचत्वार इति प्रथमैकवचनम्, वा इति लुप्तषष्ठीके निर्देशे कर्तव्ये शब्दग्रहणं चतुर्यति चतुर्यत इत्यत्र यिन्नाय्योरपि वा शब्दस्योत्वं संशब्दनार्थम्। नन्वसति शब्दग्रहणे वोत्वमिति निर्देशः स्यात् ततश्च सन्देहो भवेत् किमयं वा-शब्दो विकल्पार्थः अन्त्यस्य चोत्वमिति, आहोस्वित् वा शब्दस्योत्वमिति। नास्त्येष सन्देहः चतुर इति निर्देशात्।

अनुडुहश्च २।२।४१[3]

च शब्दो यिन्नाय्योरप्युत्वार्थः। अनुडुह्यति, अनुडुह्यते। उत्वानुवृत्तेरविभक्तावप्युत्वम्। अनुडुहोर्भावः आनुडुह्यमिति चतुरनडुहो वा शब्दस्योत्वमित्येकयोगे कर्तव्ये योगविभाग उत्तरार्थः।

सो नुः २।२।४२[4]

नुरागमो भवतीति स्वरादन्त्यात् परः कथमागम उदनुबन्ध इति वचनात्।

---

१. २।२।४० (दु०वृ०)
२. २।२।४१ (दु० वृ०)
३. २।२।४२ (दु० वृ०)
४. २।२।४३ (दु० वृ०)

अनड्वानिति संयोगान्तलोपः। अनड्वाह इति जस्।

सम्बुद्धावुभयोर्ह्रस्वः २।२।४३[1]

हे प्रियचत्वारिति। प्रियचत्वारित्यतो बहुव्रीहेस्सिः अनेन ह्रस्वः, व्यञ्जनान्ताच्चेति सिलोपः। रेफस्य विसर्गः। हे अनड्वन्[2] इति सो नुरिति नुरागमः, अनेन ह्रस्वः। ननु ह्रस्वेन नुकारागमो बाध्यते, न बाध्यते। चानुवृत्त्या द्वयोरपि समावेशात्। अदिति कर्तव्ये ह्रस्वग्रहणं चतुरनडुहोरन्त्यस्य स्थानिवत्वनिवृत्त्यर्थम्।

अदसः पदे मः २।२।४४[3]

अदस इति रूपमात्रविवक्षातात्पर्यात् त्यदाद्यत्वाभावः। त्यदाद्यत्वे हि सति अमुष्येति रूपं स्यात्, ततश्चादस इति रूपं हीयेत। पदे कार्ये कृते सति। एतेन पदार्थकार्यं स्मायादिलक्षणं इह तादर्थ्यात् पदशब्देनोच्यत इति दर्शयति। भवति हि तादर्थ्यात्ताच्छब्द्यं यथेन्द्रार्था स्थूणाः। इन्द्र इति मुख्यं तु पदं प्रयोगार्हपदशब्देन चाभिधीयते योगारम्भवैफल्यप्रसङ्गात्। ननु पदे सति विभक्तौ सत्यां मत्वमदस इत्यर्थः कस्मान्न व्याख्यायते, अशक्यमेवं व्याख्यातुम्। एवं हि व्याख्यायमाने (न[4] न्यायेन प्रतिलब्धस्थानिभावः स्यात्) सति विभक्तिप्रकरणादेव विभक्तिग्रहणस्य लब्धत्वादपार्थकं पदग्रहणं स्यात्। विभक्ताविति्येवं वा सन्देहापनोदाय कुर्यात्, तस्मात्पदे सति विभक्तौ सत्याम् इति नायमस्य योगस्यार्थः। वक्ष्यमाणेन न्यायेन प्रतिलब्धस्थानिवद्भावस्यादसो दकारस्यैव मत्वं विज्ञायत इत्याह—दस्य मत्वं भवतीति। अमुष्मै इत्यादि। अदस्, ङे, ङसि, ङस्, ङि त्यदाद्यत्वमकारे लोपं स्मै सर्वनाम्न इत्यादयो विधयः। अनेन दस्यमत्वमुत्वम्मादित्युत्वम्, पत्वम्[5]। इदानीमदसो वर्णान्तराणि परिहृत्य यतो हेतोर्दकारस्य मत्वं भवति तं हेतुं दर्शयितुमाह — अथेत्यादि। अथेत्ययमाक्षेपे निपातः। मत्वमिदमदसस्सामान्येनोच्यमानं वर्णान्त्यपरिभाषया मकारस्य कस्मान्न भवतीत्याह — नैवं शक्यमिति कुतो हेतोरित्याह—पदग्रहणं ह्यपार्थकम् स्यादिति। अर्थशब्दः प्रयोजनवचनः। अपार्थ-

१. २।२।४४ (दु० वृ०)
२. अनडुन् (वा०)
३. २।२।४५ (दु० वृ०)
४. न्यूनपाठः (वा०)
५. न्यूनपाठः (भं०)

कमपगतप्रयोजनमित्यर्थः । अयं भावः नान्त्यस्य मत्वं व्याख्यातुं शक्यते तथा हि यद्यनेनान्त्यस्य मत्वं स्यात् पदग्रहणमप्रयोजनं स्यात् । तस्य ह्येतत् प्रयोजनम्, पदकार्ये कृते सति मत्वं यथा स्यादिति । यदि चान्त्यस्य मत्वं क्रियते, पदकार्ये कृते सति इति वाचो युक्तिरियमनन्विता स्यात् । पदकार्यस्य कस्यचिदसत्वात् । त्यदाद्यत्वलक्षणे पदकार्ये कृते त्यदाद्यकारस्यैवान्त्यस्य मत्वं भवतीति[1] चेत् किमेवं सति त्यदाद्यत्वेन कृतं स्यात् । अकारान्ततानिमित्तं स्मायादिकार्यमिति चेन्न, त्यदाद्यत्वमनन्तरमन्तरङ्गत्वात् अत्राकारलोपे प्रवृत्ते नित्यत्वान्तरङ्गत्वाभ्यां दोऽद्वेर्म इत्यादिना मत्वोत्वयोस्सतोरकारान्ततायाविघातात् कथमकारान्ततानिमित्तं स्मायादिकं स्यात् तदेवं त्यदाद्यत्वलक्षणे पदकार्ये कृते सति तस्यैव मत्वमित्यशक्यमेवं व्याख्यातुम् । तस्माद् दकारस्य मत्वे व्याख्यायमाने पदग्रहणमफलं स्यात् । पदकार्यस्यासत्वादिति पदग्रहणान्नादसोऽन्त्यस्य मत्वं विज्ञायते । नाप्यन्तभावेऽन्त्यसदेशस्येति[2] मकारात् पूर्वस्याकारस्य पदकार्यानुपलम्भात् । पदग्रहणवैयर्थ्यप्रसङ्गादेव नाप्यादेरकारस्य । अतएव हेतोरित्यर्थाद् दकारस्यैव मत्वम् । अतएव च पदग्रहणादमुमिच्छत्यात्मनः असौ इवाचरति अदस्यते अदस्यति इत्यादावविभक्तौ विध्यर्थमिदं न भवति । यद्येवं दोऽद्वेर्म इति सिद्धे मत्वे वचनमपार्थकमित्याह—दोऽद्वेर्म इत्यादि सिद्धे मत्वे नियमार्थमिदं वचनमारभ्यते । पदकार्ये कृते पश्चान्मत्वं यथा स्यादिति वचनारम्भे हि सति अमुष्मै इत्यादि उदाहरणेषु स्मायादीनादेशान् बाधित्वा परत्वात् प्रकृत्याश्रयत्वेन चान्तरङ्गत्वान्मत्वमुत्वं च प्राप्नुयात्। तथा च स्मायादयो न भवेयुः । तस्मात् सिद्धस्यापि मत्वस्य अवृत्तिकमाख्यापनार्थमिदमारभ्यते । पूर्वं स्मायादीनां पदकार्याणां प्रवृत्तिः ततो मत्वोत्वयोरिति । तस्मात् पदकार्ये कृते मत्वं यथा स्यादिति नियमार्थमिदं वचनम् । वेति वर्तते सा च व्यवस्थितविभाषा, तेनाद्र्यादेशविषये मतभेदः सिद्धः । तत्र हि केचित् द्वयोरपि दकारयोर्मत्वमिच्छन्ति । अमुमुयङ् । अन्ये तु अन्त्यदकारस्यैव, अदमुयङ् । अपरे तु त्यदाद्यत्वविषय एवादसो मत्वमिति व्याचक्षाणा नैव । अदद्र्यङ्, अदस्शब्दपूर्वादञ्चतेः क्विप् अनुषङ्गलोपस्याभावः । तद्विधौ जिघ्रतेर्वा इत्यतो वा शब्दस्य व्यवस्थितविभाषारूपस्यामिसम्बन्धात् विश्वग्देवतयोरित्यादिना कृतेऽन्त्यस्वरादेरद्र्यादेशे दकारद्वयस्य मत्वात् अकाररेफयोरुत्वम्मादित्युत्वम् । यत्ववर्गान्तसंयोगान्तलोपाः ।

---

१. भवत्विति (वा०)
२. नाप्यन्त्यभावे (मं०)

अघुट्स्वरादौ सेट्कस्यापि २।२।४५[1]

सेट्कस्येति कृते बहुव्रीहौ समासान्तर्गतानामिति ककारः समासान्तः। वन्सेरिति विदेः शन्तृङ्क्वादौ शस्य क्वन्सोश्च यत्साधारणं वन्स इति रूपं तद्वन्सिग्रहणेन गृह्यते। इकार उच्चारणार्थः। पेचुष इत्यादि। पेचिवन्स् शस् टा अनुषङ्गलोपः। विदुष इत्यादि वर्तमाने शन्तृङ्क्विति शन्तृङ्, तस्य वन्सुरादेशः। घोषवन्त्योश्चेतीडभावः, विद्वद्भ्यामिति विरामव्यञ्जनादिष्विति सस्य दः। यस्मिन्विधिस्तदादौ तत्कार्यमिति तदादित्वे लब्धे यदघुट्स्वरादावित्यादिग्रहणं कृतं ततः किं फलं भवतीत्याह—अविभक्तावपीष्यत इति तद्धिते यकारे इष्यते इति वस्येति कर्तव्ये शब्दग्रहणादिति शेषः। एवमुत्तरत्रेति तद्धितेऽपि यकार इष्यत इति सम्बध्यते। ननु निमित्ताभावपरिभाषया वन्सियकारविनिवृत्ताविटोऽपि विनिवृत्तिर्भविष्यतीति किं सेट्कस्यापीत्यनेन, अन्त्यादिसूत्रेण विधीयमानस्येटो वन्सिनिमित्तं न तु यकार इति चेन्न, मूलप्राप्त्या यकारस्यापि निमित्तत्वात्। तथाहि[2] अर्तीण्ध्वसैकस्वरातामिड्वन्सौ पच्यादिभ्यः सामान्यविहितस्येटः पचिवचीत्यादिना निषिद्धस्य क्रादिनियमात् पुनः प्राप्तिमतो घोषवत्योश्च कृतीति निषिद्धस्य पुनरन्त्यादिसूत्रेण विहितस्य प्रथमाप्राप्तिनिरूपणाय भवति व्यञ्जनयकारो निमित्तम्। एवं सिद्धावकारविनिवृत्तौ इटोऽपि निवृत्तिः[3] तत्र केचिदाहुः—अन्तरङ्गायामिण्निवृत्तौ क्रियमाणायां बाह्याघुट्स्वरादिप्रत्ययाश्रयस्योत्वस्यासिद्धत्वात् यकारस्य निमित्तस्याभावो नास्तीति कथमिटो निवृत्तिस्स्यात्। अन्ये तु निमित्ताभावपरिभाषया अनित्यत्वज्ञापनाय[4] सेट्कग्रहणं कृतमिति व्याचक्षते। तथा च कार्यत इत्यादौ कारितनिवृत्तावपि तन्निमित्ता वृद्धिर्न निवर्तते ह्रस्वोऽयमादेशो व्याख्यानात्।

श्वयुवमघोनां च २।२।४६[5]

मघोनामित्यनेनैवात्वम् बहिरङ्गासिद्धपरिभाषा स्वरानन्तर्येनोपतिष्ठते। अस्ति चात्र स्वरयोरकारोकारयोरानन्तर्यम्, इह कस्मान्न भवतीति। उपशुनमित्यविभक्तिस्वरेऽप्युत्वदर्शनाच्छोवनमित्यादावप्युत्वं प्राप्नोतीति मन्यमानस्य

---

१. २।२।४६ (दु० वृ०)
२. तेषाम् (मं०)
३. निष्पत्तिः (मं०)
४. ख्यापनाय (मं०)
५. २।२।५७ (दु० वृ०)

प्रश्नः, अनभिधानादिति परिहारः। अयमर्थः सतां शब्दानामिदमन्वाख्यानं नासतामिति कृतोत्वस्य[1] शोवनादेशस्य प्रयोगासम्भवात्। अणादौ तद्धिते परे उत्वं न भवति। तथा च मघवतेत्यत्रापि न भवति। यद्येवम्। समीपं शुनमुपशुनमित्यकारेऽपि समासान्ते कृते न प्राप्नोतीत्याह—यत्र त्वित्यादि। उत्वाभावेऽनभिधानं हेतुर्यत्र पुनरभिधानमस्ति तत्रोत्वं भवत्येव। स्त्रियां विषयेऽपीष्यत इति च शब्दात्। नन्वित्यादि लिङ्गस्यार्थवतश्शब्दरूपस्य यत्र ग्रहणं[2] तत्र तस्य लिङ्गविशिष्टस्य स्त्रीत्वेन युक्तस्यापि ग्रहणमुपादानं भवति। तद्यथा भवतोर्बदेरिति भवत उत्वम्। हे भो ब्राह्मणीत्यत्र भवतीशब्दस्यापि प्रवर्तते एवं च युवन्नित्यस्माद् यूनस्तिरिति ति-प्रत्यये उत्पन्ने तदन्ताच्छसि युवतीः पश्येत्यत्र युवती-शब्दस्याप्युत्वं प्राप्नोतीति कस्मान्न भवतीत्याह—उच्यत इत्यादि। परिहार इति शेषः। लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्येतदनित्यं वचनम्, सखी-शब्दस्य सख्यशिश्वोश्चेति ई-प्रत्ययान्तस्य सख्युश्चेत्यन्नादेशस्यादर्शनात्। तेनास्य वचनस्यानित्यत्वात् युवतीरित्यत्रोत्वाभावः। युवतिशब्दाच्छस्, शसोऽकार इत्यादिना पूर्वस्वरः तेन धुटि त्वै इत्यादि तेनानित्यत्वेन हेतुनेत्यर्थः।

वाहेर्वाशब्दस्यौत्वम् २।२।४७[3]

वह प्रापण इत्यस्य विण्प्रत्ययान्तस्येति। अस्योपधायाः कृतदीर्घस्येति शेषः। वाह्यप्रयत्न इत्ययं तु बहिर्न गृह्यते ततः परस्याघुट्स्वरादेः विनाक्विपमसम्भवात्। क्विबप्यनभिधानात् ततो न भवतीत्याहुः—असन्देहार्थं वा बहुरिति निर्देशं कुर्यात्। यो वा शब्दस्तस्येति। एतेन वा इत्ययं शब्दो वकाराकार समुदायोऽत्र स्थानी न तु वर्णान्त्यपरिभाषया वा शब्दस्यान्त्य इति दर्शयति। एतच्च शब्दग्रहणाल्लभ्यते। प्रष्ठौह इत्यादि। औत्वम्, सन्धिकार्यम्, प्राष्ठौह्यमिति। यण् च प्रकीर्तित इति यण्, यद्येतच्छब्दस्याभिधानमस्ति वाहेर्हिच्छन्दो[4] विषय एव वाहिति रूपं स्मरन्ति। कथं शाल्यूह इत्यादि। उच्यते—ऊहेः क्विप्येतत् भविष्यति। अनकारान्ते उपपदे तु विदुहे:[5] न दृश्यते, अनभिधानात्। या च पुनरत्र प्रयोगे वह्यर्थावगतिः सा धातूनामनेकार्थत्वात्,

१. कृतोऽन्यस्य शौ वनादेशशब्दस्य (भं०)
२. उच्चारणम् (वा०)
३. २।२।४८ (दु० वृ०)
४. वहेर्हिच्छन्दोविषय एव वाहिति (भं०)
५. वहेर्वि न (भं०)

अनेकार्थत्वे कुर्द गुर्द गुद क्रीडायामेवेत्येव कारकरणादवसीयते। प्रष्ठवाडित्यादि। हशषच्छेति डत्वम्। ननु वा शब्दस्य प्रकृतमुत्वं विधाय तस्य विण्णाश्रये गुणे कृते च सन्धौ प्रष्ठौह इत्यादि सिध्यत्येवेति किमौत्वादेशविधानेन नैवं शक्यम्, बहिरङ्गासिद्धपरिभाषायाः विण्-मात्राश्रयेऽन्तरङ्गे गुणे कर्तव्ये बाह्याघुट्-स्वरादिप्रत्ययस्यापेक्षस्योत्वस्यासिद्धत्वात्। गुणस्याप्रवृत्तेः। न चात्रान्तरङ्गस्य गुणस्य स्वरद्वयानन्तर्यम् अव्यपेक्षा[1]-प्रवृत्तिर्येन स्वरानन्तर्ये बहिरङ्गपरि-भाषायाः प्रवृत्तिर्न स्यात्।

अञ्चेरलोपः पूर्वस्य च दीर्घः २।२।४८[2]

पूर्वस्य च ह्रस्वस्य दीर्घो भवतीति दीर्घशब्देन ह्रस्वस्य स्थानित्वेना-क्षिप्तत्वादेवमुक्तम्। अतएव गोचा रैचेत्यादौ सन्ध्यक्षरस्य दीर्घो न भवति। दीर्घेण स हि निर्दिष्टो लोपोऽपि तर्हि न स्यादिति चेन्न, अन्वाचीयमानस्य दीर्घस्य प्रवृत्तावपि लोपस्य प्राधान्यात् प्रवृत्तेः पूर्ववदी-प्रत्यय इति नदाद्यञ्चि-वाह्वचन्स्यन्तृसखिनान्तेभ्य ई २।४।५० इत्यनेन। अथ यथा प्रत्यङ्भ्यामित्य-त्राञ्चेः क्विप्यनुषङ्गलोपो भवति तथा प्रत्यञ्चावित्यत्रापि कस्मान्न भवती-त्याह—अत्रानुषङ्गलोपो न भवति इति, कुत इत्याह—तत्रेत्यादि। तत्रेत्य-नेनानुषङ्गलोपविधिं परामृशति। अनिदनुबन्धानामित्यत्रानुषङ्गलोपविधौ यज्जिव्रतेर्वेत्यतो वा ग्रहणमभिसम्बध्यते। सा च व्यवस्थितविभाषा, तेनाञ्चे-र्पूजायामर्थेऽनुषङ्गलोपस्य प्रतिषेधो नान्यत्र गतावर्थान्तरे च। स च प्रतिषेधो घुङ्विषय एव व्यवस्थितविभाषाविज्ञानात्। तेन प्रत्यञ्चावित्यादावेवानुषङ्ग-लोपो न भवति। पूर्वस्येति किम्, अञ्चेरेव पक्षे दीर्घो मा भूत्। गोचा रै-चेति। गामञ्चतीति रायमञ्चतीति क्विप्, अनुषङ्गलोपः, टा, अञ्चेरलोपः।

तिर्यङ्तिरश्चि २।२।४९[3]

अञ्चु गतीत्यस्मात्तिरश्शब्दपूर्वात्तिरोऽञ्चतीति क्विप्, सहसन्तिरसां सध्रिसमितिरय इति तिर्यादेशः, तिर्यञ्च इति स्थिते, सिः। अतएव निर्देशात् संयोगान्तलोपात् पूर्वं गत्वं ततो वर्गान्तसंयोगान्तलोपः एवमुत्तरत्रेति। अनु-षङ्गलोपाभाव इति सम्बध्यते। तिरश्चीति, पूर्ववद् ई-प्रत्ययः। तैरश्च्यमिति भावेऽर्थेऽण्। तिर्यञ्चौ तिर्यग्भ्यामिति। पूर्ववदनुषङ्गलोपस्य भावाभावौ मन्तव्यौ।

---

१. अन्त्यापेक्षा (मं०)
२. २।२।४९ (दु० वृ०)
३. २।२।५० (दु० वृ०)

उदङ्कुदीचि २।२।५०[1]

उद् ईदिति कृतेऽञ्चेति ग्रहणानुवृत्त्या अञ्चतेरकारस्य ईत्वे विज्ञायमाने सति सत्यम् उदीच इत्यादि सिध्यति किन्तु क्वचित् पूर्वपरौ सर्वौ इति सर्वस्याञ्चतेः स्थानित्वाशङ्का स्यादिति तन्निवृत्तये यथान्यासकरणमेव ज्यायः।

पात्पदं समासान्तः २।२।५१[2]

पादिति। पादशब्दो लुप्ताकारो[3] गृह्यत इति। कथं पुनर्लुप्ताकारत्वमित्याह—हस्त्यादिवर्जितादित्यादि। समासान्तगतानामित्यत्र हस्त्यादिवर्जितादुपमानात् परस्य बहुव्रीहावन्त लोप इति वक्ष्यति, तेन पादशब्दस्यान्तलोपः। यदि बहुव्रीहावन्तलोपः तर्हि समासान्तग्रहणमपार्थकम्। न च पदशब्दे[4] समासान्तपदशब्दोऽस्ति यः समासान्तग्रहणस्य[5] व्यावृत्त्या स्यात्, नापि पादयतिः क्विबन्तः। पदेरिन्नन्तात् क्विपः सन्दिग्धत्वात्। नापि पादेन क्रीतं पादो वास्यास्तीति पादिकमित्येतद् व्यवच्छेद्यमकारलोपस्य स्थानिवद्भावात् पादिति रूपाभावात्। एवं तर्हि मधुरमतीन्प्रतिपत्सूननुग्रहीतुं सिद्धस्यैवार्थस्यानुवादार्थं समासान्तग्रहणं क्रियते। वैयाघ्रपद्यमिति यण् च प्रकीर्तित इति यण्।

अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ २।२।५२[6]

युजिर् योगे सम्पूर्वः। संयुज्यन्तेऽस्मिन्वर्णा इति व्यञ्जनान्ताच्चेत्यधिकरणे घञ्। आधाराधेयभावोऽत्र बुद्धिपरिकल्पितः। यथा वने कुसुमिताः वृक्षा इति। वृक्षा एव हि वनं तत्कीदृशोऽत्राधाराधेयभावः। बुद्ध्या तु परिकल्प्यते। राजन्नित्यादीनामेकदेशानुकरणभूतोऽन्शब्दः। ततोऽनुकार्येणार्थेनावर्थवत्वात् विभक्तिः विधीयत इति विधः, उपसर्गे दः किः, वश्च मश्च वमौ वमाभ्यां संयोगः वमसंयोग इति ताभ्यामारब्धो यः संयोगः स एवमुच्यते वमसंयोगात्तु न परस्य न भवतीति। एतेन प्रसज्यप्रतिषेधोऽयमिति दर्शयन्नवमसंयोगादित्ये-

---

१. उदङ्कुदीचिः २।२।५१ (दु०वृ०)
२. २।२।५२ (दु० वृ०)
३. लुब्धाकारो (वा०)
४. पादशब्देन समानार्थः पाच्छब्दोऽस्ति (भं०)
५. ग्रहणस्याव्यावर्त्यः (भं०)
६. २।२।५३ (दु० वृ०)

तद्वाक्यभेदेन सम्बध्यत इति दर्शयति । अलुप्तवद् भवतीति । अस्यार्थं व्यक्तीकर्तुमाह—अकारलोपे कृत इत्यादि । नकारे व्यञ्जने परे गत्वं प्राप्तमित्येवं वदन् सामान्यव्यञ्जननिमित्तकत्व गत्वस्य दर्शयति । ननु तद्विधौ चवर्गेण लिङ्गस्य विशेषणाच्च लिङ्गान्तस्य[1] गत्वं विधीयते । ततश्च कथं लद्राज्ञ इत्यादौ प्राप्नुयात्, अस्त्येतत्, विशेषण-विशेष्यभावं प्रति तु कामचारो दृश्यते । ततो यस्य लिङ्गेन चवर्गो विशेष्यत इति प्रतिपत्तिस्तन्मतेन यत्र-तत्रस्थस्यापि चवर्गस्य गत्वं प्राप्नोति, षत्वस्य डत्वम् प्राप्तमिति धुटां तृतीय इत्यनेन शेषः । नकारे घोषवति परे इति इसुस्दोषाः घोषवति र इत्यतो धुटां तृतीय इत्यत्र घोषवद्ग्रहणानुवृत्तेरेवमुक्तम् । ननु दध्नेत्यादावन्नादेशो लाक्षणिकस्तत् कथं तस्याल्लोपः[2] स्यात् स्थादोश्चेत्यारभ्याल्लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वात् भविष्यति । यद्यलुप्तवद्भावो विधीयते तदा प्रतिदीव्न इत्यत्राल्लोपे कृते यथा च्छ्वोश्शूटो पञ्चमे चेति वकारस्य ऊडादेशो न भवति एवं नामिनो र्वोरिति नकारस्य परभूतत्वात् व्यञ्जननिमित्तकं दीर्घत्वमपि[3] न प्राप्नोति । नैष दोषः । अनस्सन्निधानात् तमपेक्ष्य यः पूर्वः तस्य विधौ अलुप्तवद्भावो विज्ञायते, प्रतिदीव्न इत्यत्र च यस्य दीर्घत्वलक्षणं कार्यं विधीयते, नासावनः पूर्वमिति न तस्य विधौ कर्तव्ये लुप्तवद्भावस्यास्ति प्रसङ्गः । अनर्थकोऽप्यन् गृह्यते । अर्थवद्ग्रहणपरिभाषायाः अनित्यत्वात् । तेन सीम्न इति सीमन्शब्दो-व्युत्पन्नं लिङ्गम् । अल्लोप इति तपरकरणमनस्सर्वस्यान्त्यस्य वा लोपाशङ्का-निवृत्त्यर्थम् । नन्वलुप्तवद्भावश्रवणादकारस्य लोपोऽवगम्यत इति । अन इति क्रियताम्, किम् लोपग्रहणेन, उच्यते—संज्ञापूर्वकत्वेन क्वचिदकारलोपानित्य-त्वार्थं लोपग्रहणम्, तेन सामनो वैमन इत्यादौ तस्येदमित्यणि परे लोपो न भवति । क्वचित्तु भवत्येव, औक्ष्णः भ्रौणघ्नः धृतराज्ञ[4] इति उक्षन्[5], भ्रूणहन्, धृतराजन् एभ्यो वाणपत्ये इत्यण् यदि स्यात् नकारस्य जकारेण योगो न स्यादिति, अकारेण व्यवधानादिति भावः । नन्वलुप्तवद्भावातिदेशेन यत्साध्यं तत्स्वरादेशपरिभाषयैव सिद्धम् । तथाहि—स्वरस्याकारस्य य आदेशो लोपः परमघुट्स्वरादिनिमित्तमाश्रित्य सञ्जातः सुपूर्वस्य राज्ञ इत्यादौ जकारादेर्ग-

---

१. वर्गान्तस्य लिङ्गस्य (भं०)
२. तस्य लोपः (भं०)
३. अत्र इति अपि इत्यस्य स्थाने (भं०)
४. धार्तराज्ञः (भं०)
५. उक्षण् (वा०)

त्वादिलक्षणे कार्ये कर्तव्ये स्थानिवद्[1] भवति एवं चाकारलोपस्य स्थानिवद्-भावादिष्टं सिध्यत्येव, तत्किमनेनालुप्तवद्भावातिदेशेनेत्याह—स्वरादेश इत्यादि अनित्यत्वज्ञापने सति सिद्धं[2] भवतीत्याह—तेन युञ्जन्ति विषन्ति इत्यादि सिद्धमित्यादि किं पुनरत्र[3] सिद्धम्, नकारस्य वर्गान्तानुस्वारो, अन्यथा तु विकरणान्तलोपस्य स्थानिवद्भावान्निमित्तमव्यपेक्षयोस्तयोरप्रवृत्तिस्स्यात् इत्यादि । इत्यादिग्रहणाज्जक्षतुः जक्षुरित्यत्राप्युपधालोपस्य स्थानिवत्वात् अघोषनिमित्तं घस्य कत्वं सिद्धं भवति । तस्मादनित्यत्वं स्थानिवद्भावस्य ज्ञापयितुमारभ्यतेऽतिदेशः । भुज पालन-अभ्यवहारयोः शिष्लृ विशरणे[4] । अन्त्यस्वराद्[5] रुधादेः परो[6] न शब्दः, रुधादेर्विकरणान्त लोपः ततो वर्गान्तानु-स्वारो । जक्षतुः जक्षुरिति । अद् भक्षणे अतुस् उस्, वा परोक्षायामदेः घस्लृ-भावः, द्विर्वचनाभ्यासकार्ये, गमहनेत्युपधा लोपः, अघोषेष्वशिडामिति घस्य कः शासिवसिघषीनां चेति षत्वम् ।

ईड्योर्वा २।२।५३[7]

प्राप्तविकल्पोऽयमिति पूर्वेण नित्यं प्राप्तत्वात् । यज्वनी कर्मणीति, औरीम्, ङिप्रत्ययेनेत्यादि । औरीमित्यनेन य ईकारादेश औकारस्य स्थाने विहितः सः ङिप्रत्ययेन सहचरितः विभक्त्यादेशत्वात् तस्य विभक्तिव्यपदेशप्रवृत्तेरिति तस्येह ग्रहणम् । यस्तु ऋन्नेभ्यस्त्वीत्यनेन[8] विहितः ईकारः सः न गृह्यते तेनेयं राज्ञीत्यत्र पूर्वेण नित्यमल्लोपः । ननु पृथग्योगारम्भाद्विकल्पः सिद्धः[9] तत् किं वा ग्रहणेन, असदेतत्, पृथग्योगारम्भे हि वमसंयोगविषयेऽप्याशङ्क्येत पूर्वत्र वा विकल्पः इह तु नित्यमित्येवमपि कश्चित् सम्भावयेदिति वेति कर्तव्यमेव ।

---

१. स्थानिवद्भावः भवति (मं०)
२. न्यूनपाठः (वा०)
३. सिद्धम् (वा०)
४. विशेषणे (मं०)
५. अन्ति (वा०)
६. इति (वा०)
७. २।२।५४ (दु० वृ०)
८. इत्येतत् सूत्र (मं०)
९. लब्धः (मं०)

अधातोरघुट्स्वरे २।२।५४[1]

आ इति लुप्तषष्ठीकं घुट्स्वरोऽघुट्स्वरः ततो नञ्समासः। वेति निवृत्तमिति अनपेक्षणात्। धातोराकारस्येति। अश्राव्य प्रत्ययान्तस्येति मन्तव्यम्। कीलालपेत्यादि। कीलालप-शब्दो मनिनादिसूत्रेण च शब्दाद्विट्-प्रत्ययान्तः। टा, ङे, अनेनालोपः। मालाः पश्य इति। शस् क्त्वो यबित्यादौ त्वालोपः। आ अघुट्स्वर इति योगविभागात्समासो भाविन्यनञः क्त्वा इति सूत्रनिर्देशाद्वा अघुट्स्वर इति किमिति, अनन्तरयोः ईङ्योस्तावदर्थनिवृत्त्यर्थमघुट्स्वरग्रहणं न भवति, तथाहि ईकारस्तावदयं नपुंसकादवाप्तसत्ताक आ तदन्ताद्धातोः परो न सम्भवतीति नासावनुवर्तते तत्साहचर्यात् ङिरपि नानुवर्तिष्यते तत् किमघुट्स्वरग्रहणेन, नाप्यवमसंयोगादित्यस्य विनिवृत्तये लिपिसिचिह्वः पाघ्राध्मा इति च निर्देशात् तन्निवृत्तेस्सिद्धत्वादित्यघुट्स्वरादिग्रहणानुवृत्त्या तस्यैव निमित्तभावो विज्ञास्यते इति मन्यमानस्यैष प्रश्नः, प्रत्यय-सामान्ये आलोप आशङ्क्येत इत्युत्तरयति। कीलालप इति जसन्तमेतत्।

ईद्ऊतोरियुवौ स्वरे २।२।५५[2]

स्वरे पर इति। स्वरादौ पर इत्यर्थः। यस्मिन्विधिस्तदादौ तत्कार्यमिति वचनात् स्वरमात्रे तु परतो विधिराद्यन्तवद्भावात्। नियावित्यादि। णीञ् प्रापणे, लूञ् छेदने नयतीति लुनातीति क्विप्, तपरकरणमसन्देहार्थमिति। असति तपरत्वे ख्वोरिति निर्देशः स्यात् ततश्च किमिदं यवयोर्ग्रहणमुत स्विदीदूतोरिति सन्देहो भवति। स मा भूदिति तपरकरणम्। नीभ्याम्, लूभ्यामिति नीलूभ्यां क्विबन्ताभ्यां भ्याम्-प्रत्ययः। नियोऽर्थः न्यर्थः, लुवोऽर्थः ल्वर्थ इत्यत्र तु न भवति। विभक्तिग्रहणानुवृत्तेः। एवमुत्तरेऽपि विधयो विभक्तिस्वर एव मन्तव्याः। स्वायम्भुव इत्यत्र तर्हि स्वयम्भू-शब्दस्यापत्यार्थविहितेऽणि परतः उवादेशो न प्राप्नोति। अवमसंयोगादित्यतश्चानुवृत्तेर्भविष्यति, पुनस्स्वरग्रहणमित्यादि सामान्यस्य स्वरस्य घुट्सम्बन्धिन इतरस्य च परिग्रहो यथा स्यादित्यनुवर्तमानेऽपि स्वरग्रहणे पुनः स्वरग्रहणं क्रियते अन्यथा ह्यघुट्स्वर एव स्यात्।

सुधीः २।२।५६[3]

अतएव निर्देशात् सम्प्रसारणमिति। ननु ध्याय्योस्सम्प्रसारणं चेत्यस्यैव

१. २।२।५५ (दु० वृ०)
२. २।२।५६ (दु० वृ०)
३. २।२।५७ (दु०वृ०)

सम्प्रसारणस्य विधानम्, तत् कथम् अयं निर्देशः सम्प्रसारणस्य निमित्तं स्यात्। सत्यम्, अस्ति विधानं तु तत्र पञ्चपाद्याम्, इह तु यदि निर्देशबलात्सम्प्रसारणम् अनुगन्तुं शक्यते किं लक्षणान्तरानुसरणेन (धीङो[1] वा धारणार्थस्य) रूपमेतत् षष्ठ्येकवचनान्तं चैतदिति ईकारापेक्षया सुधीशब्दस्य सम्बन्धषष्ठीविज्ञानात्, यदि तु सुधीशब्दः प्रथमान्तो व्याख्यायेत स एवेयादेशं प्रति कार्यत्वेन विज्ञायेत तथा च तस्य सर्वस्यानेकवर्णः सर्वस्येति ईयादेशः प्रसज्येत, ईकारोऽनुवर्तत इति न तूकारः। सुधीशब्दस्य तदसम्भवादिति भावः। इयादेशश्चेत्यनुवर्तत इत्यनुषज्यते उवादेशस्तु नानुवर्तत अनान्तरतम्यात्। अनेकाक्षरयोरिति यत्वं प्राप्तमिति तस्य बाधनार्थसिद्धेऽपीयादेशे योगारम्भ इति शेषः।

भूरवर्षाभूरपुनर्भूः २।२।५७[2]

पदत्रयं षष्ठ्येकवचनान्तमिति पूर्ववद् एतद् व्याख्येयम्। अकारोऽनुवर्तत इत्यादावपि पूर्ववद्-व्याख्याक्रमः। भूशब्दस्येति केवलस्य भूशब्दस्य सिद्धे उवादेशे इति कृत्वा भू-शब्दस्येत्यविशेषाभिधाने भू-शब्दान्तस्येति मन्तव्यम्। अनेकाक्षरयोरिति वत्वं प्राप्तमिति तेन सिद्धेऽपि उवादेशे योगारम्भ इति शेषः। वर्षाभ्वावित्यादि। वर्षासु भवतीति पुनर्भवतीति क्विप्। औ जस्। अनेकाक्षरयोरिति वत्वम्। अथ किमर्थाविमौ प्रतिषेधावुपादीयेते न एक एवोपादीयेतेत्याह—प्रतिषेधकरणादित्यादि। द्वौ वारौ द्विः, तसादित्वान्मुः प्रत्ययः, प्रतिषेधशब्देन चात्र प्रतिषेधाभिधायी नञुच्यते। तेनायमर्थः द्वौ वारौ प्रतिषेधाभिधायिनौ नञौ यत्करणं ततो हेतोः कारभू-शब्दस्याप्युवादेशो न भवति, प्रतिषेधाधिक्यकरणादन्यस्यापि उवादेशनिषेधप्रवृत्तेरिति भावः।

अनेकाक्षरयोः त्वसंयोगाद् यवौ २।२।५८[3]

क्षर् संचलने नञ्पूर्वः न क्षरतीति पचादित्वादच्। इयुवोर्बाध इत्येतेन सिद्ध्योरपि सामान्येन यत्ववत्वयोर्योगारम्भः। इयुवोर्बाधनार्थ इति दर्शयति। यद्येवम्, नेति क्रियताम्। एवमपि कृते इयुवोर्बाधनार्थाद् यत्ववत्वे भविष्यत इति किं यव-ग्रहणेन, सत्यम्, विचित्रा सूत्रस्य कृतिः शर्ववर्मणः। अथानेकाक्षरयोरनेकस्वरयोरिति कथं व्याख्यातम्, यावता क्षर-शब्दो वर्णेषु प्रसिद्धः

१. धीङो आदरार्थस्य (६)
२. २।२।५८ (दु० वृ०)
३. २।२।५६ (दु० वृ०)

तत्कथमसावत्र स्वराणामभिधायकस्स्यादित्याह—न क्षरतीति न चलतीत्यादि। एतेनान्वर्थोऽयमक्षरशब्दः स्वराणां वाचक इह गृह्यते न पुनः[1] सामान्यवर्णवाचक इति दर्शयति। परवर्णं नानुगच्छतीति व्यञ्जनम्। उच्चारणवेलायां नानुसरतीत्यर्थः। यथा हि व्यञ्जनमुच्चारणं प्रति प्रायेण स्वरमपेक्षते न तथा स्वरो व्यञ्जनम्। अतो व्यञ्जनानुयायित्वेन तेषां स्वराणां लक्ष्ये प्रयोगादन्वर्थेनाक्षरशब्देनोपपद्यते व्यपदेशः, यदि पुनः सामान्यवर्णवाच्यक्षरशब्दो गृह्येत नियौ लुवावित्यत्रापि यत्ववत्वे प्राप्नुयाताम्। इयुवोस्तर्हि कोऽवकाश इति चेत् विधानसामर्थ्यात् तयोरप्यस्तु पाक्षिकी प्रवृत्तिः तस्मादक्षरशब्देन स्वर उच्यते। प्रध्यौ प्रध्य इति। ध्यै चिन्तायां प्रपूर्वः प्रध्यापयतीति क्विप्, ध्याय्योस्सम्प्रसारणमिति सम्प्रसारणम्, तद्दीर्घमन्त्यमिति दीर्घः। ग्रामण्यावित्यादि। ग्रामं नयति, यवांल्लुनातीति क्विप्। नियौ लुवौ इति नी लू शब्दावेकस्वराविति यत्ववत्वे न स्तः, धातुना संयोगो विशेषयितव्य इति। आधातोरघुट्स्वर इत्यतो धातुग्रहणमपेक्ष्यते, तेन संयोगो विशेष्यते (धातोर्यस्संयोग[2] इति) तेन किं सिद्धं भवत्याह—तेनेत्यादि। उन्यौ उन्य इति उदोदस्य पदान्ते धुटामिति प्रथमः पञ्चमे पञ्चमानिति नत्वम्। अत्रोपसर्गसाहित्येन संयोगोपसञ्जात इति धातुसंयोगाभावादसंयोगादिति निषेधो न भवति। अव्ययकारके यदा पूर्वे इति अव्ययपूर्वकत्वं प्रध्यावित्यादौ प्र-शब्दस्य अव्ययत्वात्। ग्रामण्यावित्यादौ कारकपूर्वकत्वं ग्रामस्य कर्मणः कारकत्वात्। परमनियाविति। परमश्चासौ नीरिति कर्मधारयः। परमशब्दोऽत्र नयतिक्रियाकर्तृविशेषणभूतो नाव्ययं न च कारकमिति यत्वाभावः। यद्यपि च परमादीनामपि क्रियां प्रति कर्तृत्वं तथापि (तु[3] तेषां न साक्षात्) किं तर्हि, गौणम्, विशेषणद्वारेण।

भ्रूर्धातुवत् २।२।५९[4]

धातुवदिति। प्रथमान्ताद्वतिः। भ्रू-शब्दस्य प्रथमान्तत्वात्। अतिदेशस्यार्थं व्याचक्षाणः आह—अथेत्यादि। उवादेश उक्त इति ईदूतोरियुवौ स्वर इत्यनेन, स हि धातोरुक्तः। तद्विधावाधातोरघुट्स्वर इत्यतो धातु-ग्रहणानु-

---

१. तु (मं०)
२. न्यूनपाठः (मं०)
३. न तत्तेषां साक्षात् (मं०)
४. २।२।६० (दु० वृ०)

वृत्तेः। अथोवादेशवद् वत्वमपि कस्मान्नातिदिश्यते, तदपि ह्यनेकाक्षरयोरित्यादिना धातोराकारान्तस्योक्तमेव, नैतत्, सामान्येन हि धातोरुकारान्तस्य यदुक्तं तस्यायमतिदेशो न तु यदनेकाक्षरयोरसंयोगादिति विशेषेणोक्ते, तस्यापि कुतः सामान्यातिदेशे विशेषस्यानतिदेशात्। नहि ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमिति सामान्यब्राह्मणनिबन्धनकार्यवत् कौण्डिन्यब्राह्मणनिबन्धनमपि कार्यं क्षत्रिये सामर्थ्यमन्तरेणातिदेष्टुं शक्यते तस्मादूकारान्तधातुमात्रनिबन्धनस्य कार्यस्य भ्रू-शब्देऽतिदेशाद्वत्वं नातिदिश्यते। नापीयादेशः अनान्तरतम्यात्[1]। ननु परार्थे शब्दप्रयोगादन्तरेणापि वतिमतिदेशोऽवगम्यत एव। यथा—सिंहो माणवकः, गौर्वाहीकः इति तदपार्थकम् वत्करणम्, नैतत्, असति हि वतौ धातुसंज्ञार्थमिदं वचनमित्यपि सम्भाव्यते। ततश्च भ्रू-शब्दाद् यादयोऽपि भवेयुः अप्राकरणिकत्वान्न भविष्यन्तीति चेत्, न। प्रतिपत्तिगौरवं स्यादिति वत्करणमेव ज्यायः। उविति कर्तव्ये धातुवद्ग्रहणं वैचित्र्यार्थम्। उत्तरत्रापीयिति शक्यते एवं कर्तुम्।

स्त्री च २।२।६०[2]

स्त्री-शब्दो धातुवद् भवतीत्येतेन स्त्रीति स्वरूपस्येह ग्रहणं न तु स्त्रीप्रत्ययान्तस्य शब्दस्य नापि स्त्र्यर्थवृत्तेरिति दर्शयति। एतच्च नद्या ऐ आसाम् जातेरयोपधादिति च नदी जातिशब्दयो धातुवद्भावनिबन्धनस्येयादेशस्याकरणादवगम्यते। योगविभाग उत्तरार्थ इति। उत्तरत्र स्त्रीशब्द एवानुवर्ततां भ्रू-शब्दस्तु नानुवर्ततामित्युत्तरार्थो योग-विभागः।

बाम्शसोः २।२।६१[3]

अमि शसि च पर इत्येतेन शस्प्रत्यासत्त्या द्वितीयैकवचनं गृह्यत इति दर्शयति।

भवतो वादेरुत्वं सम्बुद्धौ (च[4]) २।२।६२[5]

भवन्त् इत्यस्य सम्बुद्धौ परस्यां आदेरुत्वं वा भवतीति नायमस्य योग-

---

१. नान्तरतम्यात् (मं०)
२. २।२।६१ (दु० वृ०)
३. २।२।६२ (दु०वृ०)
४. च इत्यधिको पाठः (दु० वृ०)
५. २।२।६३ (दु० वृ०)

स्यार्थः वाग्रहणानर्थक्यप्रसङ्गात् । हे भो इति, भवन्त् हे शब्द-पूर्वः सि, अनेन वन्तु-शब्दस्योत्वम् । अथोत्वे कृते ह्रस्वलक्षणः सम्बुद्धिलोपः कस्मान्न भवति, सम्बुद्धिनिमित्तमुत्वं कथं सन्निपातपरिभाषायां सत्यां सम्बुद्धिं विहन्तुमलमिति चेत्, न । वर्णग्रहणेऽस्याः परिभाषाया अनुपस्थानात् ह्रस्ववर्णाश्रयश्च सम्बुद्धिलोपः स्वरादेशत्वात् सन्धिकार्यमुत्वञ्च बलीय इति चेत्, अस्तु तत्, परलोपं तु बाधित्वा परत्वात् सम्बुद्धिलोपः स्यात् । अत्रोच्यते—नित्यत्वादन्तरङ्गत्वाच्च परलोप एव भवति । कृते तस्मिन्ह्रस्वाभावात् सम्बुद्धिलोपाभावः । ज्ञापकाच्च यदयमाभोभ्याम् एवमेव स्वर इति भो-शब्दात् परस्य विसर्जनीयस्य लोपमारभ्यते । ततोऽवगम्यते सत्युत्वे सम्बुद्धिलोपो न भवतीति भगवन्त् अघवन्त् इत्येतयोरपि वादेरुत्वं वा वक्तव्यम् । सम्बुद्धौ परस्यामिति । उदिति कर्तव्ये त्वप्रत्ययनिर्देशात् हे भो ब्राह्मणीति भवन्तु-शब्द उदनुबन्धविशिष्टः सर्वनाम्नां मध्ये पठ्यते । उकारः उदृकारेत्यर्थः (उदृकार[1]-इतीकारः) अनुषङ्गश्चाक्रुञ्चेरिति अनुषङ्गलोपः, सम्बुद्धौ परस्यावती-शब्दस्य उत्वम्, हे भवति ब्राह्मणीति । सम्बुद्धौ ह्रस्व इति ह्रस्वः । यदि भवतः सम्बुद्धावुत्वम् विधीयते भो ब्राह्मणौ ब्राह्मणा इति द्वित्व-बहुत्वविषये उत्वं न प्राप्नोति, उच्यते—नेदं भवतः उत्वं किं तर्हि निपातोऽस्ति यो भो शब्दस्तस्यैव प्रयोगः । यद्येवम् एकत्वेऽपि स एव प्रयोक्ष्यत इति किं योगारम्भेण, भगो अघो शब्दावपि निपातौ स्त इति तदर्थोऽपि यत्न आस्थेय इति चिन्त्यप्रयोजनं योगारम्भस्य ।

अव्ययसर्वनाम्नः स्वरादन्त्यात्पूर्वोऽक् कः २।२।६३[2]

नञ् वि-पूर्वादिणो न व्येतीति पचादित्वादच्, यच्चात्र वक्तव्यं तदव्ययसंज्ञा सूत्र एव उक्तम् । अज्ञाते कुत्सित इत्यादि । अज्ञातो विशेषणरूपेणावबुद्धः । कुत्सितः निन्दितः, अल्पोपचितपरिमाणः, दीर्घः प्रतियोगी ह्रस्वः कारुण्येन परानुग्रहोऽनुकम्पा । तत्र संज्ञानुकम्पयोः गम्यमानत्वात् । अज्ञातादीनां तु प्रकृत्यर्थविशेषणत्वात्[3] सर्वनामविभक्तेरित्यादिसर्वनाम्नो या विहिता विभक्तिः तस्याः यः स्वरः ततः पूर्वः क्वचिदक्-प्रत्ययो वेष्यते । त्वयका त्वयकि, मयका मयकि इति युष्मद् अस्मद् टा ङि त्वन्मदोरेकत्व इति त्वन्मदी आदेशौ, एत्वमस्थानिनीत्येत्वम्, विभक्तेः पूर्वमक्-प्रत्ययः क्वचिदिति वचनात् क्वचिद्विभक्तेः पूर्वमक्-प्रत्ययो न भवति, युष्मकाभिः अस्मकाभिः, युष्मकासु

१. उकारानुबन्धात्त्वीति ई-प्रत्ययः (मं०)
२. २।२।६४ (दु० वृ०)
३. विशेषणत्वम् (मं०)

अस्मकासु । युवकयोः आवकयो इति युष्मदस्मदोरक्-प्रत्ययः भिस्, सुप् आत्वं व्यञ्जनादौ इत्यात्वम् । ओसि पूर्ववदेत्वम् । आख्यातविभक्तेरपीति स्वरात्-पूर्वोऽक्-प्रत्ययो वेष्यत इति सम्बध्यते । कुत्सितः अश्वः अश्वक इति । कुत्सितायां क-प्रत्ययः । कथं तर्हि कुत्सितकः, अनुकम्पायां कः-प्रत्ययः । अथवा कुत्सितस्यैव या कुत्सा तस्याः, यथा च प्रकृष्टतम इति प्रकृष्टस्य प्रकर्षे तम-प्रत्ययः । नायमस्य कुत्सितत्वमिति । यदा तु कुत्सितत्वमेव कुत्स्यते तदा कुत्सायां कुत्सितक इति क-प्रत्ययः । संज्ञायां देवदत्तक इति ह्रस्वे कुत्सायां वा संज्ञायां क-प्रत्ययो न संज्ञामात्र इत्याहुः ।

के प्रत्यये स्त्रीकृताकारपरे पूर्वोऽकार इकारम् २।२।६४[1]

प्रतिपूर्वादिणः प्रत्यायन्त्यनेनार्थमिति पुंसि संज्ञायामिति घः । के ककारे प्रत्यये प्रत्ययस्थे पर इति । अयं भावः । इह क इति ककारमात्रं निमित्तम् । अकारस्तूच्चारणार्थः । न च ककारमात्रं प्रत्ययोऽस्ति इति सामर्थ्यात्प्रत्ययस्थः ककारः प्रत्ययशब्देनेह निर्दिश्यते । भवति हि तात्स्थ्यात्ताच्छब्द्यम्, यथा मञ्चाः क्रोशन्ति इति । यदि पुनः क इति संघातो गृह्यते प्रत्यय-शब्देन च सामानाधिकरण्येन स एव विशिष्येत ततो दन्तिकेत्यादावेव स्यात् । ककारस्या-प्रत्ययत्वात् । तस्मात् ककारो वर्णः प्रत्ययस्थत्वात् प्रत्यय इत्युच्यते पूर्वमकार इति क-इत्यस्य सन्निहितत्वात् ततः पूर्व इति मन्तव्यम् । सविका विश्विकेति । अज्ञातादावक्प्रत्ययः । कारिका, हारिकेति । करोतीति वुण् अस्योपधाया इत्यादिवृद्धिः ननु सर्वत्रैवात्राकारेण व्यवधानादाकारपरः[2] ककारो न भवतीति कथमित्वं स्यात् । समानदीर्घत्वे सति अव्यवधानमिति चेत्,[3] न । स्वरादेश-परिभाषया स्थानिवद्भावाद् व्यवधानमेव । एवं तर्हि वचनसामर्थ्यात् स्थानि-वद्भावकृतं व्यवधानमाश्रीयत एव । यद्येवम्, अनेकवर्णजनितमपि व्यवधानं कस्मान्नाश्रीयते—ततश्च पुत्रकाम्यया[4] इत्यादावपि इत्वं त्रशब्दाकारस्य प्राप्नोति एकवर्णव्यवहिते विषये वचनं चरितार्थमनेकवर्णव्यवहितं विषयं नावगाहत इति चेत्, तन्न, यतो वचनेन तावदङ्गीकृतो व्यवहितो विषयः तत्र च व्यामूढं तद्व्यवहितविषयावगाहित्वेन प्रवर्तमानमिदमेकवर्णव्यवधानमनेक-वर्णव्यवधानमिति विवेकं नापेक्षत एव ततश्चानेकवर्णव्यवधानेऽपि तस्य प्रवृत्ति-

---

१. २।२।६५ (दु० वृ०)
२. पूर्वः (भं०)
३. इत्यत्र "न" इति न्यूनपाठः (भं०)
४. काम्येत्यादावपि (वा०)

स्स्यात्। अत्रोच्यते—स्त्रीकृताकारपर इति सप्तमीनिर्देशे सप्तम्यानिर्दिष्टे पूर्वस्येति परिभाषोपतिष्ठते। तत्र निर्दिष्टग्रहणस्यानन्तर्यार्थत्वात् अनन्तरे अकारे परे य ककारः तत्र परत इत्वेन भवितव्यम्। न चासावनन्तरोऽस्तीति वचनबलाद् व्यवधानमाश्रीयते तच्चैकेनैव वर्णेन कुतः अनेकवर्णव्यवधानमित्यपेक्षया एकवर्णस्य व्यवहिते विषये आकारस्यानन्तर्यार्थस्त्वनेकवर्णव्यवहितस्तु यो विषयः तत्राकारस्यातिविप्रकृष्टत्वान्निर्दिष्टपरिभाषाया बाधप्रसङ्ग इति नासावस्य विषयः। यद्यपि चासौ परिभाषान्यत्र सावकाशा तथापि व्यक्तिपक्षावलम्बनेनेह विषये तस्या अप्रवर्तमानायास्तावद्बाध उच्यते। तस्माद् वचनादेकवर्णव्यवधानमेवाश्रीयते, तत्र चेत्वमिति गतमेतत्। तस्मादिन्नन्तादिति। हेत्विन्नन्तात्। पुत्रकाम्येति काम्यप्रत्ययान्तात् शन्सु प्रत्ययाद् इत्यकार-प्रत्ययः। अस्य च लोपः, आम्-प्रत्ययः। भवत्ययं कात्पर आकारो न तु स्त्रियां कृतः। कृत-ग्रहणमप्याम्प्रत्ययस्यापि कस्यचित् ककारस्य परिग्रहार्थं तेन मामिका नारिका इति च सिद्धं भवति। ममेयमित्यस्मात् तस्येदमित्यण्, तवकममकावेकवचन इति लोकोपचारान्ममकादेशः, आदिवृद्धिः, अजादिदर्शनादाप्प्रत्ययः। नरान्कायतीति कै गै इत्यस्मादातोऽनुपसर्गाड्डः, न तु कीर्तिषडनुबन्धात्स्त्रीस्त्रीकृताकारपरे इति सप्तम्यैव परत्वे लब्धे परग्रहणं विभक्तेः परस्मिन्नाकारे परे मा भूदिति। बहूदका नदी, उदक्शब्दाद् या प्रथमाविभक्तिः बहुव्रीहौ कृते लुप्ता तां प्रत्ययलक्षणेनाश्रित्य विभक्तेः परोऽयमाकार इति इत्वं न भवति। पूर्वग्रहणं श्रूयमाणपूर्वत्व-परिग्रहार्थं तेनेहापि भवति बहूनि चर्माण्यस्यां बहुचर्मिकेति। समासान्तगतानामिति। ककारस्समासान्तः, न लोपस्यालुप्तवद्भावात् क-पूर्वोऽकारो न भवतीति, न प्राप्नोति, श्रूयमाणपूर्वत्वपरिग्रहार्थात्तु पूर्वग्रहणादत्रापि भवतीति। केचित् कारवचनं तपरस्तत्कालस्य कारशब्दपरश्चेति तत्कालार्थं स्वरस्सवर्णस्य ग्राहक इति वचनाद्राकेत्यादौ[1] प्राप्तमप्याकारस्येत्वं न भवति। रा आदान इत्यस्मात् [2]कृदाधारान्विकलिभ्यः क इति क-प्रत्ययः। वेति वाम्शसोरित्यतः। सा च व्यवस्थितविभाषेति अन्यथा सर्वत्रेत्वविकल्पो भवेदिति भावः। यका सकेति यत् तद् पूर्वसूत्रेणाक्प्रत्ययः, सि, त्यदाद्यत्वम्, तस्य चेति सत्वम्। सूतिका पुत्रिकेति। स्वार्थे कः प्रत्ययः, आप्, वा इत्वम्। वृन्दारिकेति। वृन्दमस्यास्तीति। तदस्यास्तीति[3] आरक्-प्रत्ययः। तारकेति। तरतेः वुण्-प्रत्ययः वृद्धिः अन्य-

१. वचनाद्धाकेत्यादौ (वा०)
२. कृदाधारार्थिभ्यः कः (भं०)
३. तदस्यासन्त्वाद्या इत्यकारप्रत्ययः (भं०)

त्रेति। ज्योतिषोऽर्थात्। अष्टकेति। अशूङ् व्याप्तौ इष्यशिभ्यां तकन्निति तकन्। छशोश्चेति षत्वम्, टवर्गः, अष्टिकेति। अष्टौ परिमाणमस्या इति तमादित्वात् क-प्रत्ययः।

सखिपादो द्वितीयः[1]।

तृतीयः पादः

युष्मदस्मदोः पदं पदात्षष्ठीचतुर्थीद्वितीयासु वस्नसौ २।३।१

युषि-असिभ्यां मदगित्यत्र यौ सिद्धौ युष्मदस्मच्छब्दौ तयोरनुकरणत्वेन युष्मदस्मदी इह निर्दिश्येते। ताभ्यामनुकार्येणार्थेनार्थवत्वात् विभक्तिमुत्पाद्य शब्दरूपापेक्षया नपुंसकलिङ्गतामाश्रित्य युष्मच्च अस्मच्च ते युष्मदस्मदीति विग्रहे कृते युष्मदस्मदोरिति निर्देशः। ओसि परतो लक्षणानुप्रवृत्तिरनुक्रियमाणरूपविनाशप्रसङ्गात्। पदशब्दो गोचरादिसूत्रेण च शब्दात् घ-प्रत्ययान्तः। षण्णां पूरणी षष्ठी संख्यायाः पूरणे इति डः। अन्तस्थो डेर्वोरिति थकारागमः टवर्गः, नदादित्वादीकारः प्रत्ययः। चतसृणां पूरणी चतुर्थी, पूर्ववद्ङ-प्रत्ययः थकारागमः ईकारश्च। द्वयोः पूरणी द्वितीया, द्वेस्तीयः। वश्च नश्च तौ वस्नसौ स्वरूपेणार्थेनार्थवत्वाद् द्वितीयाद्विवचनान्तमेतत्। विसर्गाद्यभावः, स्वरूपभङ्गप्रसङ्गात्। बाम्शसोरित्यतो वेति वर्तत इति। तेन व्यवस्थितविभाषावाचित्वादन्वादेशविषयादन्यत्र विकल्पः। यथा वृत्तावुदाहृतम्। अन्वादेशे नित्यो विधिः। अथो वो ग्रामस्स्वम्, अथो नो ग्रामस्स्वम् इति। कः पुनरन्वादेशः। एकस्याभिधेयस्य पूर्वं क्रियादिसम्बन्धे शब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेशः। (विद्यमानपूर्वात् प्रथमान्तत्वादन्वादेशेऽपि[2]) विकल्पः। अथो ग्रामे कम्बलो वः स्वम्, अथो ग्रामे कम्बलो नः स्वम्। अथो ग्रामे कम्बलो युष्माकं स्वम्, अथो ग्रामे कम्बलोऽस्माकं स्वम् इति तस्य यथासंख्यं वस्नसावित्येतावादेशौ वा भवतः इति वस्तुमात्रव्याख्यानमेतत्। अन्यथा पदशब्दस्य प्रथमान्तत्वात् वस्नसोश्च प्रत्ययान्तत्वात् पदं वस्नसौ वा प्राप्नोतीति युक्तं व्याख्यानं स्यात्। रुद्रो वः प्रभुरित्यादि। युष्मद्-अस्मद्-षष्ठी-

---

१. इति भट्टोग्रभूति कृते शिष्यहितान्यासे शिष्यालोकाभिधाने नामप्रकरणे द्वितीयः पादः। (पुष्पिका भं०)

२. न्यूनपाठः (भं०)

बहुवचनम् । एषां विभक्तावन्तलोपः । ([1]स्वरागमः सामाकम्, अनेन युष्माकमस्माकमित्यनयोः पदयोः वस्नसावादेशौ वा भवतः । रुद्रो वो दास्यतीत्यादि । युष्मदस्मद्-चतुर्थीबहुवचनम्, पूर्ववदन्तलोपः) भ्यसो भ्यम्, पूर्ववद् वस्नसौ । शिवो वो रक्षतीत्यादि । युष्मदस्मद्[2]-द्वितीया-बहुवचनम्, अन्तलोपः, आन्शसः, ततो वस्नसौ । गृहे यूयं वने वयमिति युष्मदस्मद्-प्रथमा-बहुवचनम्, यूयं वयं जसीति यूयं वयमादेशौ षष्ठीचतुर्थीद्वितीयास्विति व्युत्क्रमनिर्देशात् 'एकं दृष्ट्वा धनुष्पाणिं मानुषं समुपस्थितम्, राक्षसं बलमुत्सृज्य किं वो भीताः इवास्थिताः ।" इत्यत्र यूयं-शब्दस्य वसादेशः सिद्धः, युष्मदस्मत्पदमिति कर्तव्ये युष्मदस्मदोरिति विभक्तिनिर्देशः श्रूयमाणविभक्तिकृत-पदत्व-परिहारार्थः । तेनेह न भवति, इह युष्मत्पुत्रो ददाति इहास्मत्पुत्रो ददाति । इह एतौ वस्नसौ द्वित्वैकत्व-विषये परिहृत्य कस्माद् बहुत्वविषयमेव एवावगाहेते इति यो मन्यते तं प्रत्याह—उत्तरत्रेत्यादि । वां नौ द्वित्वे त्वन्मदोरेकत्वे इत्यादिना च द्वित्वैकत्वविषये वांनावादीनामादेशानामभिधास्यमानत्वादर्थाद्वस्नसौ इमावादेशौ बहुत्वविषयमेवावगाहेते द्वित्वैकत्वयोर्बाधकं वांनावादीनां[3] विद्यमानत्वादिति भावः ।

वां नौ द्वित्वे २।३।२

इति लुप्त-द्वितीया-द्विर्वचनम् । वस्नसौ तु निवृत्ताविति विधेयान्तरनिर्देशात् षष्ठी-चतुर्थी-द्वितीयासु द्वित्वे स्थितमित्येतेन स्थानिनः पदस्य यद् द्वित्वे इति विभावेन विशेषणं तस्य षष्ठीचतुर्थीद्वितीयास्वित्येतदाधारभावेन विशेषणमिति दर्शयति । वा भवत इति पूर्ववत् सर्वत्र विकल्पसम्बन्धो योज्यः । शिवो वां स्वामीत्यादि । युष्मदस्मत् षष्ठी-द्विर्वचनम्, युवावौ द्विवाचिनोरिति युवावौ, एत्वमस्थानिनीत्येत्वम्, अनेन[4] (वांनावादेशौ युवयोरावयोरिति युवावादेशौ) । शिवो वां दास्यतीत्यादि । युष्मदस्मद्, चतुर्थीद्विर्वचनम्, पूर्ववत् युवावौ, आत्वं व्यञ्जनादाविति आत्वम् । ततो वां नौ शिवो वो रक्षतीत्यादि । युष्मदस्मद्, द्वितीयाद्विर्वचनम्, पूर्ववत् युवावौ, अमो चाम् इत्यकारस्याम्भावः । ततो वांनौ कीदृशौ युवां शोभनौ आवाम् इति प्रथमाद्विर्वचनस्यामादेशः ।

---

१. न्यूनपाठः (मं०)
२. न्यूनपाठः (मं०)
३. नावित्येवमादीनाम् (मं०)
४. युवयोरावयोरित्येतयोः पदयोः वांनावादेशौ (मं०)

त्वन्मदोरेकत्वे ते मे त्वा मा तु द्वितीयायाम् २।३।३

त्वन्मदोः स्वरूपेणार्थेनार्थवत्वाद्विभक्तिमुत्पाद्य शब्दस्वरूपापेक्षया नपुंसकत्वात् त्वच्च मच्च, ते त्वन्मदीति विग्रहः। त्वदित्यस्य पदान्ते घुटामिति प्रथमः, पञ्चमे पञ्चमानिति नत्वम्, ते मे इति लुप्तद्वितीया-द्विर्वचनम्। एत्वं। त्वा मा इत्यपि। अत्रैकस्मिन् सूत्रे त्रीणि सूत्राणीति सूत्रार्थभेदादिति[1]। तथा च सूत्रभेदद्योतनफलस्तु शब्द उपादीयते। अत्रेत्यादि। त्वन्मदोरेकत्व इत्येतत् सूत्रे युष्मदस्मदी एवाभिसम्बध्येते। पदं पदादित्यादिनिवृत्तम्, एकत्वावग्रहणे त्वन्मदोरविशेषेणेष्यमाणत्वात्। यद्येवम्, विधीयमानत्वात् तयोः प्राधान्यमिति विधीयमानस्य विभक्त्या प्रथमया[2] निर्देशो न्याय्यः। तत् कथं त्वन्मदोरिति भूतविभक्त्या षष्ठ्या निर्देश इत्याह—त्वन्मदोरिति चेयं षष्ठीत्यादि। सत्यम्, प्राप्ता प्रथमा, तस्यास्तु प्रसङ्गे विचित्रा सूत्रस्य कृतिराचार्यस्येति वृत्तिशब्दाध्याहारेणायं त्वन्मदोरिति षष्ठ्यानिर्देशः। तेन युस्मदस्मदोः स्थाने त्वन्मदोः प्रवृत्तिर्भवतीति सूत्रार्थो जायते। यत्तु युष्मदस्मदोर्यथासंख्यं त्वद्-मद्-इत्येतावादेशौ भवत इति सूत्रार्थ-रचना-भावस्तु मात्रकथन-परत्वेनेत्यदोषः। अर्थैकत्व-विषये त्वन्मदोः [3]पदं ते मे आदेशौ प्राप्नुतः इति कस्मान्न व्याख्यायते, नैवं शक्यम्। त्वन्मदोरलब्धसत्ताकत्वात् शास्त्रान्तरात् तयोस्सत्ता प्रतिलम्भ इति चेत्, न। तत्र [4]तयोरकारान्तयोरादेशत्वेनाश्रीयमाणत्वात्। तथा चोक्तम्, त्वमावेकवचन इति इहैव वृद्धकुमारीवरन्यायेन युष्मदस्मदोः एकत्वे त्वन्मदो कल्प्येते इति चेच्छब्दान्तरकल्पनापि त्वन्मदोः सम्भाव्येत्। ततश्च तद्विषये युष्मदस्मदर्थानन्वयान्मध्यमोत्तमव्यवस्था न घटते तस्मात् त्वन्मदोरेकत्वे इत्येतावता सूत्रेणावश्यमेकत्वे युष्मदस्मदोः त्वन्मदी विधातव्ये त्वां मामिति। अमि परे त्वन्मदी, अन्तलोपः। अमो चाम्, त्वदीय इति इदमर्थे ईय-प्रत्ययः। एवमतिक्रान्तो त्वाम् अतित्वाम्, अतिमाम्, अमो चामित्योकारस्याम् भावः। अतिक्रान्तं त्वामतित्वाम् अतिमाम्, पूर्ववदाम् (अतिक्रान्तो[5] त्वाम्, अतित्वाम् अतिमाम्। द्वितीयाद्विर्वचनस्याम्भावः) अतिक्रान्तान् त्वाम्, अतित्वान्। अतिक्रान्तान् माम्, अतिमान्। आन्शसः, अतिक्रान्तेन त्वाम्, अतित्वया। अतिमया। एत्वमस्थानिनीत्येत्वम्। अतिक्रान्ताभ्याम् त्वाम्,

१. मावादिति भावः (वा०)
२. प्रथमायाः (वा०)
३. पदान्ते मयावादेशौ (मं०)
४. तयोर्मकारान्तयोरादेशत्वेनाश्रूयमाणत्वात् (मं०)
५. न्यूनपाठः (मं०)

अतित्वाभ्याम्, अतिमाभ्याम्। आत्वं व्यञ्जनादावित्यात्वम्। अतिक्रान्तैस्त्वाम् अतित्वाभिः अतिमाभिः। पूर्ववदात्वम्। अतिक्रान्ताभ्याम् त्वाम् अतित्वाभ्याम्, अतिमाभ्याम्। चतुर्थीद्विर्वचनमेतत्। अतिक्रान्तेभ्यः त्वाम् अतितुभ्यम्, अतिमभ्यम्। भ्यस्भ्यम्। अतिक्रान्तात् त्वाम् अतित्वत्, अतिमत्। अत्पञ्चम्यद्वित्व इति ङसेरत् आदेशः। अतिक्रान्ताभ्यां त्वाम् अतिस्वाभ्याम् अतिमाभ्याम्। अतिक्रान्तेभ्यस्त्वाम् अतित्वत् अतिमत्। पूर्ववद् भ्यसोऽदादेशः। अतिक्रान्तयोस्त्वाम् अतित्वयोः, अतिमयोः। अतिक्रान्तानां त्वाम् अतित्वयाम्, अतिमयाम्। अतिक्रान्ते त्वाम् अतित्वयि, अतिमयि। अतिक्रान्तयोः त्वाम् अतित्वयोः अतिमयोः। अतिक्रान्तेषु त्वाम् अतित्वासु अतिमासु। इत्थं सर्वत्रैकत्वे त्वन्मदी भवतः। यत्र पुनर्बाधकः विषयः तत्र बाधकैः त्वमहमादिभिः बाध्यमाने मती सत्यप्येकत्वेन प्रवर्तन्ते। अतिक्रान्तस्त्वाम् अतित्वम् अत्यहम्। अतिक्रान्ताः त्वामतियूयम् अतिवयम्। अतिक्रान्ताय त्वाम् अतितुभ्यम् अतिमह्यम्। अतिक्रान्तस्य त्वाम् अतितव अतिमम। युष्मदीयः अस्मदीय इति पूर्ववदीय-प्रत्ययः। त्वन्मदी न भवतौ युष्मदस्मदोर्बह्वर्थवृत्तित्वात्। रुद्रस्ते स्वामीत्यादि। युष्मदस्मद् ङस् तव मम ङसीति युष्मदस्मदोस्सविभक्तिकयोः तव ममादेशौ तयोरप्यनेन ते मे यौ रुद्रस्ते दास्यतीत्यादि। युष्मदस्मद् ङे। तुभ्यमह्यौ ङ्यीति तथैव तुभ्यं मह्यमादेशौ सविभक्तिकयोस्तयोरपि तेमयौ, रुद्रस्त्वां रक्षतीत्यादि। युष्मदस्मद् अम् त्वन्मदोरेकत्वे इति युष्मदस्मदोः त्वन्मदी, अन्तलोपः, अमो चाम् अनेन त्वामा आदेशौ।

न पादादौ २।३।४

पादशब्दः पद गतावित्यस्य, पदरुजेति कर्तरि घञ्-प्रत्ययान्तः। पादस्य, श्लोकपादस्येति। एतेनास्य लक्षणस्य प्रायेण भाषाविषयत्वात्पादशब्दः श्लोकपादस्य ग्राहकः न तु ऋक्पादस्येति दर्शयति। तस्य वस्नसादयः आदेशाः न भवन्तीति। एतेन पादादौ सर्वे वस्नसादयो निषिध्यन्ते न त्वनन्तरो त्वमावेति[1] दर्शयति। एतच्च त्वामा (तु द्वितीयायां[2] न पादादावित्येक)योगकरणाल्लभ्यते। यद्येवम्, त्वन्मदोरपि पादादौ निषेधः स्यात्। भवेद् यदि पदग्रहणमिह नाभिसम्बध्यते तस्मिंस्तु अभिसम्बध्यमाने यत् कार्यं प्राप्नोति तन्निषिध्यते। न च त्वन्मदी पदस्य प्राप्ते इति तयोर्निषेधो न भविष्यतीति। भूयादित्यादि। अत्र युष्माकमस्माकमित्येतयोरष्टाक्षरस्य श्लोकपादस्यादौ वर्त-

१. त्वामावेति (ए)
२. द्वितीयायामपादादावित्येक (मं०)

मानयोः वस्नसौ निषिध्येते । एवं प्रणमामीत्यादावपि श्लोकत्रये युवयोरावयो-रित्यादेः पदस्य वां नावादयो निषिध्यन्ते । हरस्येत्यादि । अत्र पान्तु वो वितत्विष इति यः पादः तस्यादौ युष्मानित्येतत् पदं नावस्थितमिति तस्य वमादेशौ निषिध्येते । आमन्त्रितमित्यादि । कथं पुनरेतल्लभ्यते, नेति योग-विभागात् । तथा च नाना-वाक्येऽपि निषेधः । ओदनं पच युष्माकं भविष्यति, ओदनं पच अस्माकं भविष्यति । अत्र ओदनं पच इत्येतदेकं वाक्यम्, युष्माकं भविष्यतीति द्वितीयम्, एवमस्मद्विषयेऽपि नाना-वाक्यता कृता ।

चादि योगे च २।३।५

योगशब्दो युजेर्भावधञन्तः, युष्मदस्मदोः पदस्य चादिभिर्योगो इत्येतेन युष्मदस्मदोः पदस्य यदा चादिभिर्योगो भवति तदा निषेधोऽयम् । यदा चादि-युक्तेन[1] केनचित्पदेन युष्मदस्मदोः पदं[2] युज्यते, तदा न निषेध इति दर्शयति तेन ग्रामश्च ते स्वम् । नगरं च ते स्वम् । अत्र ते-मयौ न निषिध्येते । नह्यत्र युष्मदस्मदोः पदं च शब्देन युक्तं किं तर्हि ग्रामनगरे तयोस्समुच्चीयमानत्वात् । च शब्दयुक्ताभ्यां तु युष्मदस्मत्पदं युक्तमिति निषेधो न भवति । युष्माकम-स्माकमिति सामाकम्, युष्मभ्यम्, अस्मभ्यम् । भ्यस्भ्यम् । युष्मान् अस्मान् ।

आन्शसः २।३।६

युवयोरावयोरिति । एत्वमस्थानिनीत्येत्वम्, युवाभ्याम् आवाभ्यामिति । आत्वं व्यञ्जनादावित्यात्वम्, युवाम् आवामिति । अमो चाम् । च वा ह अह एवेत्यादि । एतच्च चादिभिरिति कर्तव्ये योग-ग्रहणात् अभीष्टचादियोगपरि-ग्रहार्थाल्लभ्यते । नान्यैरिति नो प्रभृतिभिः । दर्शनार्थे धातुभिरित्यादि दर्शनं ज्ञानमर्थो येषां धातूनामीक्षिप्रभृतीनां तैः पदस्य योगे वस्नसादयो नेष्यन्ते एतच्च च-शब्दाद्विषयान्तरेऽपि निषेधार्थात् लभते । यद्येवम्, यत्र दर्शनार्थैः धातुभिः पदान्तरं युक्तं तेन च युष्मदस्मत्पदं तत्र युक्तयुक्ते कथं प्रतिषेधः । ग्रामस्तव स्वमीक्षते, ग्रामो मम स्वमीक्षत इति । अत्र हि ज्ञानार्थेन[3] ईक्षिणा संयुक्तम् । तेन युष्मदस्मदोः पदमुच्यते, नेत्यस्य स्वातन्त्र्येणाभिसम्बन्धात् । युक्तयुक्तेऽपि प्रतिषेधो विज्ञास्यते ।

---

१. योगेन (भं०)
२. पादो (भं०)
३. ज्ञानार्थेनाक्षिणा (?)

एषां विभक्तावन्तलोपः २।३।७[1]

एषां ग्रहणेन युष्मदस्मदी त्वन्मदी च परामृश्येते, त्वन्मदोरेव ह्यानन्तर्यादनुवृत्तिस्स्यात्। विभक्त्यधिकार इत्यादि। तस्मात्परा विभक्तय इत्यतो विभक्तिग्रहणादिह विभक्तिप्रस्तावे यत्पुनर्विभक्तिग्रहणं क्रियते तच्च श्रूयमाणविभक्तिप्रतिपत्त्यर्थं, तेन समासविषये विभक्तौ लुप्तायां यत्र प्रत्ययलोपपरिभाषया विभक्तिसत्ता तत्रान्तलोपो न भवति। नन्वसति विभक्तिग्रहणे षष्ठीचतुर्थीद्वितीयानामनुवृत्तिस्स्यात्। ततश्च विभक्त्यन्तरे लोपो न प्राप्नोति। नायं दोषः। विशेषादिष्टपरिभाषया विभक्तिग्रहणस्यैवानुवृत्तेः। यद्येवम्, त्वत्तो मत्तो युष्मत्तो अस्मत्तो इत्यत्रापि प्राप्नोति, भवति ह्ययं तस्प्रत्ययो विभक्तिः विभक्तिसंज्ञा विज्ञेया इति वचनात्, नैतत् अस्ति। तसादीनां हि विभक्तिसंज्ञा सर्वनाम कार्यं एवेति वक्ष्यते न चायमन्तलोपः सर्वनामकार्यम् असर्वनामत्वेऽपि अतित्वदित्यादौ तस्य दर्शनात्। अतिक्रान्तात् त्वाम् अतित्वत्, अतिमदिति। ङसेरत्पञ्चम्यद्वित्वे इति अदादेशः नात्रोत्तरपदं सर्वनाम, कुतः, अप्राधान्यात्। अप्रधानत्वञ्चातिक्रान्तार्थस्य प्राधान्यात्। अप्राधान्येन च सर्वादीनामसर्वनामत्वमित्युक्तं प्राक् तस्मात् त्वत्त इत्यादिविभक्तिपरत्वं नास्तीत्यन्तलोपो न भवति। अन्तग्रहणं विस्पष्टार्थमिति परिभाषातोऽन्तत्वावबोधे सत्यवैस्पष्ट्यं स्यादित्यर्थः। त्यदाद्यत्वेन सिद्धत्वात् योगारम्भो द्विपर्यन्ताः त्यदादय इत्यस्यार्थस्य ज्ञापनार्थः। तेन भवानित्यादौ त्यदादित्वं न भवति।

युवावौ द्विवाचिनौ २।३।८[2]

इह केचिद् द्विवाचिष्विति पठन्ति। तत्रैव पाठं परिहृत्य कस्माद् द्विवाचिनोरिति पठन्तीति पृच्छति। अथेत्यादि। नैवं शक्यम् इत्युत्तरयति। कथं न शक्यमित्याह—इह हीत्यादि। यदि द्विवाचिष्वित्येव पठ्येत ततो बहुवचनान्तमेतत् युष्मदस्मदी परिहृत्य प्रत्ययविशेषणे स्यात् ततश्च युवामतिक्रान्तैरतियुवाभिः[3] अत्यावाभिरित्यादौ युवावौ न भवेताम्, विभक्तेर्द्विवाचिन्याः परस्यासम्भवात्। कस्य पुनरत्र प्रयोगद्वये द्विवाचित्वं येनात्र युवावौ प्रवृत्तावित्याह—अत्र हीत्यादि (युवामतिक्रान्तैरावामतिक्रान्तैरिति वाक्यावस्थायां यत् युष्मदर्थस्य द्वित्वमगम्यते। तेनात्र युष्मदोद्विवचनाच्चित्वात्। ततोऽत्र प्रयोगद्वये

---

१. २।३।६ (दु० वृ०)
२. २।३।७ (दु० वृ०)
३. न्यूनपाठः (भं०)

युवावौ भवतः विभक्तिस्तु न द्वित्वार्थमभिवर्तते। बहुत्वार्थवाचिनीत्वात्तस्याः तस्माद् द्विवाचिनोरित्ययमाचार्यस्य पाठः। किमेवं सतीष्टं सिध्यतीत्याह—तस्मादित्यादि। यस्माद् द्विवाचिनोरित्येवं पाठः तस्माद् युष्मदस्मदोरेतद्विशेषणं जायते। तेन द्वयोर्द्विवाचित्वे सति सर्वत्रैकत्व-द्वित्व-बहुत्वाभिधायिन्यपि प्रत्ययपरतो युवावौ भवतः। अतिक्रान्तो युवामतियुवामत्यावाम्। अतिक्रान्तं युवामतियुवामत्यावाम्। अतिक्रान्तान् युवान् अतियुवान् अत्यावान् अतिक्रान्तेन युवामतियुवया, अत्यावया, अतिक्रान्ताभ्यां युवामतियुवाभ्याम् अत्यावाभ्याम्। अतिक्रान्तेभ्यः युवाम् अतियुवभ्यम् अतिआवभ्यम्। अतिक्रान्ताद्युवाम् अतियुवत्, अत्यावत् अतिक्रान्ताभ्याम्[1] युवामतियुवाभ्याम् अत्यावाभ्याम्। अतिक्रान्तेभ्यो युवामतियुवत् अत्यावत्। अतिक्रान्तयो युवामतियुवयोरत्यावयोः अतिक्रान्तानां[2] युवामतियुवयाम् अत्यावयाम्। अतिक्रान्ते युवामतियुवयि अत्यावयि। अतिक्रान्तयोः युवामतियुवयोः अत्यावयोः (अतिक्रान्तेषु युवामतियुवयोरत्यावयोः[3] अतिक्रान्तानां युवामतियुवायाम् अत्यावयाम्। अतिक्रान्ते युवामतियुवयि अत्यावयि। अतिक्रान्तयोः युवामतियुवयो अत्यावयोः) अतिक्रान्तेषु युवामतियुवासु अत्यावसु। किं सर्वत्र युवावौ भवतः, न इत्याह—त्वमहम्, यूयं वयम्, तुभ्यम् मह्यम्। तव मम इत्येतानादेशान्वर्जयित्वेति। सिप्रभृतौ विभक्तिविशेषे विधीयमानाः त्वमहमादयो बाधकाः भवन्तीति बाधकविषयत्वात् युवाभ्यामेषां विषयो वर्जितः[4] इत्यर्थः। विभक्तावित्येव युवयोः पुत्रो युष्मत्पुत्रः। एवमस्मत्पुत्र इति। तु-शब्दो विशेषद्योतनार्थोऽनुवर्तते तेन युवावाद्यादेशेषु सञ्जातेषु पश्चाद् अक्-प्रत्ययः। युवकामावकामिति।

अमौ चाम् २।३।९[5]

अमाविति लुप्तषष्ठी-द्विर्वचनम्। त्वाम्मामिति। त्वन्मदोरेकत्व इति युष्मदस्मदोः त्वन्मदी, एषां विभक्तावन्तलोपः ततश्च प्रथमाद्विर्वचनस्यौकारस्य द्वितीयाद्विर्वचनस्यैव स्यादिति। अमा साहचर्यादिति शेषः। ततश्च प्रथमाद्विर्वचने आम्-भावो न प्राप्नोतीत्याह—व्याप्तेर्न्यायादित्यादि। आम्भा-

---

१. न्यूनपाठः (भं०)
२. न्यूनपाठः (भं०)
३. प्रमादात् पुनरुट्टङ्कितः।
४. वर्ज्येत् (भं०)
५. २।३।८ (दु० वृ०)

वेन प्रथमा-द्विर्वचनमपि लक्ष्ये व्याप्तमिति लक्ष्यमूलत्वाद् व्याकरणस्य, तदपि गृह्यते तन्त्रेण वा न्यायेन द्वौ ओकारौ निर्दिष्टौ, च-शब्दाद्वा प्रथमाद्विर्वचनमपि ग्रहीष्यते ।

आम्शसः २।३।१०[1]

आनो नकारस्य लक्षणाप्रवृत्तिः स्वरूपभङ्गभयात् युष्मानस्मानित्यनयोः रूपयोरन्तलोपे कृते शसि[2] च सस्य नः इत्यनेनैव सिद्धिरस्तीति, अपार्थको योगारम्भ इति यो मन्यते तं प्रत्याह—शसि सस्य च न इत्यनेनैव सिद्धिरिति कुतो हेतोरित्याह - युष्मान्कुलानीत्यादि । असत्यारम्भे यदा युष्मदस्मदोर्नपुंसकाप्रवृत्तित्वं तदा जस्शसोश्शिः इति ताभ्यां परस्य विशेषेणोच्यमानश्शिभावः प्राप्नोति ततस्तस्य निवृत्त्यर्थोऽयमारम्भस्स्यात्, नैतत्, नित्यत्वाच्छिभावस्य प्रवृत्तेः । स हि कृतेऽप्येत्वे प्राप्नोत्यकृतेऽपि । एत्वं तु नित्यं तस्य शिभावे सत्यप्रवृत्तेः । अथापि नित्यं शिभावं बाधित्वा प्रकृत्याश्रयेणान्तरङ्गत्वात् एत्वप्रवृत्तिरुच्यते । तर्ह्येत्वेऽपि प्रसक्ते शिभावो नपुंसकाद्विधीयमानो न निराकर्तुं शक्यत इति तत्प्राप्तिलक्षण एवासत्यारम्भे दोषः उक्त इति शिभावनिवृत्त्यर्थ आरम्भः । ननु युष्मदस्मदोः स्त्रियां पुंसि नपुंसके च विशेषादर्शनादलिङ्गत्वं स्मर्यते, यथा चाहुः—अलिङ्गे[3] युष्मदस्मदी । इत्येवञ्च कथं ताभ्यामुत्तरस्य शसोः नपुंसकविषयो विधीयमानः शिभावः प्राप्नुयात् तदाहुः—लिङ्गविशेषादर्शनादलिङ्गत्वमनयोर्लिङ्गसामान्ये तु नपुंसकेन योगः केन विनिवार्यते, द्रव्यवचनत्वाद् द्रव्यस्य च लिङ्गसम्बन्धात् । अत पूर्वाचार्यैरन्यत्र नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशविप्रतिषेधेनेति अभिधाय युवां ब्राह्मणकुले इत्यादौ नपुंसकनिबन्धनम् औकारस्येत्वं बाधित्वा परत्वादामादेशो व्याख्यातः, तच्चैतदसति नपुंसकत्वयोगेन घटते । तस्मादस्त्येव सत्यारम्भे शिभावस्य प्राप्तिः । ननु युष्मानित्यादि रूपं शसो नकार एवादेशे कृते घोषवन्निमित्ते च दीर्घत्वे सति सिद्धमिति किमाकारविधानेन, नैतत्, यस्मिन्विधिस्तदादाविति वचनाद् घोषवदादौ दीर्घत्वमुच्यमानं कथं घोषवन्मात्रे स्यात् आदिवद्भावाद् भविष्यतीति चेत्, तर्ह्येवंविधो घोषवदादिर्गौण इति गौणत्वाशङ्कापि स्यादित्यकारो विधीयते । अन्निति कर्तव्ये दीर्घोच्चारणमकारलोपबाधनार्थम् । अकारोच्चारणं त्वादेशनिवृत्त्यर्थमित्यपि कश्चित् सम्भावयेत् ।

---

१. २।३।९ आम्शसः (दु० वृ०)

२. न्यूनपाठः (भं०)

३. अलिङ्गी (वा०)

त्वमहं सौ सविभक्त्योः २।३।११[1]

त्वमहमिति लुप्तप्रथमाद्विर्वचनम्। एवमुत्तरत्रापि वाच्यम्। सविभक्त्योरित्यत्र नुरागमो न भवति, भाषितपुंस्कं पुंवद्वेति वचनात् श्रूयमाणविभक्तिप्रतिपत्त्यर्थेन विभक्तिग्रहेणेहाभिसम्बध्यमानेन सिविशेष्यते सौ विभक्ताविति। तथा च त्वं प्रधानं यस्य सः त्वत्प्रधानः मत्प्रधान इत्यत्राश्रूयमाणाविमौ त्वमहमौ न भवतः। एवमुत्तरत्रापि ज्ञेयम्। अन्ये तु—श्रूयमाणविभक्तिके मुख्ये विषये वचनं चरितार्थं विषयान्तरं नावगाहत इति मन्वानः किं किं विभक्तिग्रहणानुवृत्त्येति व्याचक्षते। सिनेति कर्तव्ये सविभक्तिग्रहणं वैचित्र्यार्थम्। उत्तरत्रापि जसीत्यादिः करिष्यते।

अत्पञ्चम्यद्विर्त्वे २।३।१२[2]

अद्विर्त्व इत्यनेन श्रूयमाणा पञ्चमी विशेष्यते न त्वनुवर्तमाने युष्मदस्मदी तेन तयोः द्वयर्थाभिधायित्वेऽपि अदादेशः। अतिक्रान्तात् युवामतियुवदत्यावदिति। ननु तकार एवादेशः क्रियतां स च क्वचित्पूर्वापरो सर्वाविति सर्वादेशो विज्ञास्यते। तत्किमकारोच्चारणेन, सत्यम्, बहुत्वविषये घुट्येत्वाशङ्का स्यात्। ङसिभ्यसोरदिति कृते प्रकरणक्रमेण सविभक्तिकयोः युष्मदस्मदोरयमादेश इति कश्चित् सम्भावयेत्।

भ्यस्भ्यम् २।३।१३[3]

चतुर्थी बहुवचनमित्यन्यस्य भ्यसोऽदादेशेनावष्टब्धत्वादिति भावः। अथादादेशविषयस्यैव भ्यसः पाक्षिकोऽयमादेशः कस्मान्न भवति, न भवति। विभक्त्युच्चारणक्रमप्रत्यासत्त्या चतुर्थीबहुवचनस्यैव पूर्वं बुद्धौ परिस्फुरतो भ्यसादेशेन सम्बन्धात्। युष्मभ्यमित्यादि घुट्येत्वप्रवृत्तेरुक्तः तद्विधौ परिहारः।

सामाकम् २।३।१४[4]

अर्ह प्रत्ययनिर्देशादिति। अर्हेऽर्थे यो लोप्य[5] इति य-प्रत्ययेन निर्देशः तस्माल्लोपार्हस्य युक्तशब्दस्यापि लोपः। अथ किमर्थं सामिति सकार उपादीयते, नहि युष्मदस्मद्भ्यां कृतान्तलोपाभ्यां पर आम्प्रत्ययः सकारागमं

---

१. २।३।१० (दु० वृ०)
२. २।३।१४ भ्यसभ्यम् पाठः।
३. २।३।१५ (दु० वृ०)
४. २।३।१६ (दु० वृ०)
५. लोप्या इत्यर्ह (भं०)

व्यभिचरति । अतो व्यभिचारादाकमित्यत्रापि कृते आगमस्तद्ग्रहणेन गृह्यन्ते इति वचनात् स सकारागमस्यैवायमः आकमादेशो विज्ञास्यत इति किं सकारोपादानेन, प्रिययुष्माकमित्यादावपि[1] प्राप्नोति इति चेत्, न । भविष्यति, प्रत्यासत्तेः युष्मदस्मद्गत एव बहुत्वे य आम्प्रत्ययः तस्यैव स्थानित्वं विज्ञास्यते । प्रिययुष्मायामित्यादावित्यत्र चान्यपदार्थगत बहुत्वावग्रहेणायमाम्प्रत्यय इत्यत्र न भविष्यतीत्याकलय्य पूर्वपक्षयति—ननु चेत्यादि । उच्यत इत्यादिना परिहरति । अयं भावः । सागमस्याकमादेशः । सत्यम् । लभ्यते, किन्तु तस्य स्थानिवद्भावादाम्ग्रहणेन ग्रहणमस्तीति पुनरपि सकारागमो यावत्सम्भवः तावद्विधिरिति वचनात्प्राप्नोति, स प्राप्नुवन्सामिति विशेषणोपादानान्निवृत्त्यर्थं वर्त्यते । कथम् उच्यते—आदेशप्रवृत्तेः पूर्वं स्थान्यवस्थायां य आम्प्रत्ययः तस्य सागमस्याकमादेशार्थं पूर्वोक्तयानीत्यनेनेदं विशेषणोपादानम् । आदेशात् किं तर्हि उत्तरकालं यः सकारागमः प्राप्नोतीति सः स्थानिसहभावेनोपादीयमानस्सन् स्थानिविनिवृत्तौ भाव्यपि निवर्तते । विफलं हि अन्यथा सामिति विशेषणं स्यात् । तस्मादाकमादेशे कृते पुनः स्वरागमो भवन्नपि माश्रावीति सामिति क्रियते । ननु कृतेऽपि आगमे पुनस्तत्प्रवृत्तावतिप्रसङ्गः, नैष दोषः, तेषां द्वौ द्वाविति ज्ञापकात् श्रूयमाणागमे आयि परे पुनरागमस्याप्रवृत्तेः । आकमो दीर्घोच्चारणमकारलोपनिवृत्त्यर्थम् । नासावकारोच्चारणसामर्थ्यात् भविष्यतीति चेत्, न । धुट्येत्वनिवृत्त्यर्थमकारोच्चारणं स्यात् । अकारलोपस्तु भवेदेव, एत्वविधावेत्वपरिहारानुसरणे तु प्रतिपत्तिगौरवं स्यात् ।

एत्वमस्थानिनि २।३।१५[2]

स्थितिस्स्थानमिति भावेऽर्थे युट्, आदेशस्य स्थानं विद्यते यत्र स स्थानीति । तदस्यास्तीति सप्तम्यर्थे पीतिकरणादिन्प्रत्ययः । अथादेशस्येत्येतत् कुतः, आ आदेशसम्बन्धेनैव शब्दस्य स्थानित्वव्यपदेशप्रवृत्तेः । अविद्यमानस्थानी यस्येति बहुव्रीहिः । कस्य च विद्यमानः स्थानी यस्यादेश इत्येष व्यपदेशो न सम्भवति । यथा, टा प्रत्ययस्यान्यस्य वा यस्य पुनरादेशव्यपदेशसम्भवः । तस्यावश्यं स्थानिना भवितव्यम् । तेन स्थानिनीत्यस्याकृतादेश इत्यर्थो जायते । त्वया मयेति त्वन्मदोरेकत्व इति त्वन्मदी अकारस्यानेनैत्वं त्वत् मत् इत्यादि आदेशस्यात्र स्थानी विद्यत इति न भवति विभक्तावप्युच्यमानमेत्वं स्थानिद्भावात् स्यात् । त्व प्रत्ययनिर्देशोऽसन्देहार्थः ।

---

१. प्रिययुष्मायामित्यादावपि (?)

२. २।३।१७ (द्रु० वृ०)

आत्वं व्यञ्जनादौ २।३।१६[1]

एत्वस्य बाध इति पूर्वसूत्रेण प्राप्तस्य युष्मभ्यमस्मभ्यमिति भ्यस्भ्यम्। स्व-प्रत्ययनिर्देशः आकारस्योत्तरत्र यथा श्रुतरूपप्रतिपत्त्यर्थः। तेनाष्टनो नकारस्यान्तरतम्यात्सानुनासिकमात्वं न भवति। यस्मिन्विधिस्तदादौ तत्कार्यमित्यादिग्रहणे लब्धे तदुपादानं विस्पष्टार्थम्, श्रूयमाणव्यञ्जनादिविभक्तिपरिग्रहार्थं तु न भवति विभक्तिग्रहणानुवृत्तेरेव लुप्तायां व्यञ्जनादौ विभक्तावात्वनिवृत्तेस्सिद्धत्वात्। युष्माभिः कृतं युष्मत्कृतं, अस्माभिः कृतं अस्मत्कृतमिति।

रैः २।३।१७[2]

लुप्तषष्ठीकमेतत्, रायमतिक्रान्ताभ्यामतिराभ्यां कुलाभ्यामित्यत्र कृतेऽपि नपुंसकह्रस्वत्वे आत्वं भवति, एकदेशविकृतस्यानन्यत्वात्। यद्येवम्, रायमतिक्रान्तेनातिरिणा कुलेनेत्यत्रापि नामिनः स्वर इति त्वागमे कृते प्राप्नोति सन्निपातपरिभाषया न भविष्यति। कथं हि नामिनिमित्तं व्यञ्जनादित्वं नामिनमात्वे कृते विहन्यात्। रायमतिक्रान्तं कुलमतिरीत्यत्र तु सौ लुप्तेऽपि विरामव्यञ्जनादावुक्तमिति वचनात्प्राप्तमप्यात्वं न भवति साक्षाद् व्यञ्जनादेः विभक्तेरभावात्।

अष्टन् सर्वासु २।३।१८[3]

अष्टानामिति संख्यायाः ष्णन्तायाः इति नुः, अनेन नस्यात्वं सर्वग्रहणं सर्वासु शब्दव्यक्तिपरासु। यथादर्शनमात्वार्थम्। तेनाष्टसु कपालेषु संस्कृतमष्टाकपालं हविः। अष्टावक्र इत्यादि सिद्धम्। नन्वसति सर्वग्रहणे व्यञ्जनादिग्रहणमभिसम्बध्यते तथा च प्रिया अष्टौ ययोस्तौ प्रियाष्टावित्यादौ स्वरादावित्यात्वम् न प्राप्नोति। नैतत् अस्ति, उत्तरसूत्रेणाष्टनः कृतात्वपरयोः जश्शसोरौत्वविधानात् ज्ञापकात् स्वरादावप्यात्वं भविष्यति।

औतस्माज्जश्शसोः २।३।१९[4]

जस्शसोरौकारादेशो भवतीति क्वचित्पूर्वापरौ सर्वाविति सर्वयोः। अष्टौ

१. २।३।१८ (दु० वृ०)
२. २।३।१९ (दु० वृ०)
३. २।३।२० (दु० वृ०)
४. २।३।२१ (दु० वृ०)

तिष्ठन्ति अष्टौ पश्य इति । अष्टन् जस् शस् पूर्वेणात्वम् (अनेन[1] जस्शसोरौत्वं) नन्वानन्तर्यादनुवर्तत एवाष्टन्शब्दः इति किं तत्परामर्शार्थेन तस्माद् ग्रहणेनेत्याह—तस्माद् ग्रहणेनेत्यादि । विशिष्टस्य कृतात्वस्याष्टनः परामर्शार्थं तस्माद् ग्रहणमित्यर्थः । एतद्विघटयितुमाह—नन्वित्यादि । नानित्यमात्वविधानादष्टनः कृताकारत्वमव्यभिचारीत्यनुवर्तमानोऽसौ विशिष्ट एवानुवर्तिष्यत इति नार्थः । एतदर्थेन तस्माद् ग्रहणेनेति भावः, उच्यत इत्यादिना परिहरति । ज्ञापनार्थं तस्माद् ग्रहणमेतदनेन ज्ञास्यते[2] यथा विकल्पेनाष्टन आत्वं भवतीति नित्ये ह्यात्वे सति तस्माद् ग्रहणमपार्थकं स्यात् । एवं च कृतात्वात् तस्मादष्टन औत्वं यथा स्यात् । अष्ट तिष्ठन्तीत्यादावकृतात्वान्मा भूदिति तस्माद् ग्रहणं विकल्पेनात्व-ज्ञापनार्तिक सिद्धमित्याह— तेनेत्यादि । नन्वसति तस्माद् ग्रहणे प्रतिलब्धस्थानिभावस्याष्टन एवौत्वं विज्ञायेत । ततश्च तस्माद् ग्रहणं तस्मादष्टन उत्तरयोर्जस्शसोरौत्वं प्रवृत्त्यर्थं भवत् कथमष्टनो विकल्पेनात्वं ज्ञापयेत् । एवं मन्यते—वर्णपाठक्रमप्रत्यासत्त्या औकार एव विधातव्ये यत्परमौकारं विदधाति ततो ज्ञायते औ-जस्शसोरित्यपि श्रूयमाणे जस्शसोरेवाष्टनः परयोरौत्वं भवतीति । तथा चातिरिच्यमानं तस्माद् ग्रहणमात्वविकल्पज्ञापनायैव सम्पद्यते ।

अर्वणस्त्रसावनञः २।३।२०[3]

अथेत्यादि अनुषङ्गलोपः, अर्वद्भ्यामित्यादौ धुटां तृतीय इति दत्वम् । अविभक्तावपीष्यत इति विभक्तावित्यस्यानपेक्षणात् ।

सौ च मघवन् मघवा वा २।३।२१[4]

मघवन्निति । उकारान्तोऽयमादेशः तत्रास्यान्त्वसन्तस्येति दीर्घो न भवति । तद्विधावुदनुबन्धविशिष्टस्यान्ते तदुपादानात् । अस्य चादेशस्यानुदबन्धत्वात् । तेन संयोगान्तलोपे कृते मघवन्नित्यस्य कनिन्-प्रत्ययान्तस्य मघवन्नित्यमादेशो निर्दिश्यते प्रत्ययान्तरेऽपि परत इति विभक्तिग्रहणापेक्षयैतदुक्तं मघवता मघवद्भ्यामित्यादौ पूर्ववदनुषङ्गलोपः, तृतीयश्च माघवत-

---

१. न्यूनपाठः (भं०)
२. ज्ञाप्यते (भं०)
३. २।३।२२ (दु० वृ०)
४. २।३।२३ (दु० वृ०)

मिति, तस्येदमित्यण्, माघवत्यमिति यण्प्रत्ययः। मधोन इत्यादि श्वयुवेत्युत्वम्।

जरा जरस्वरे वा २।३।२२[1]

जृष् वयो हानौ। जीर्यतेऽनया इति जरा, षानुबन्धत्वादङ्। अतएव निर्देशात् गुणः स्वरे परे इति सामान्याभिधानेऽपि विभक्तिस्वर इति[2] मन्तव्यम्, तेन जराया इदं जरामित्यणि परे न भवति। जरयेति। टौसो रे। अतिजरांसीति। जरामतिक्रान्तानीति जराशब्दस्य स्वरो ह्रस्व इति ह्रस्वः, जसः शि भावः अनेन जरसभावः। अतिजराणीति। घुटि चासम्बुद्धाविति दीर्घः। इह तु जरायाः समीपमुपजरसमित्यकारे समासान्ते कृते नित्यं जरस्भावः, वा शब्दस्य व्यवस्थितविभाषाविज्ञानात् वा ग्रहणमिहैव विकल्पो नोत्तरत्रेत्यवधारणार्थम्।

त्रिचतुरोः स्त्रियां तिसृचतसृ विभक्तौ २।३।२३[3]

त्रिश्च चत्वारश्चेति द्वन्द्वः शब्दप्रधानत्वान्निर्देशस्य षष्ठीद्विर्वचनम्, तिसृचतसृ इति समाहारे द्वन्द्वः। द्वन्द्वैकत्वमिति नपुंसकत्वमिति नपुंसकत्वम्। नपुंसकात्स्यमोरिति सिलोपः त्रिचतुरित्येतयोः स्त्रियां वर्तमानयोरित्येतेन स्त्रियामिति एतत् त्रिचतुरोर्विशेषणमिति दर्शयति तेन तयोः स्त्रीवृत्तित्वे सत्यन्यपदार्थस्य पुंनपुंसकवृत्तित्वेऽपि सर्वत्र तिसृचतसृ-आदेशौ भवतः। प्रियास्तिस्रो ब्राह्मण्यो यस्येति प्रियतिस्रः, प्रियचतस्रः ब्राह्मण्यः। प्रियास्तिस्रो ब्राह्मण्योऽस्य प्रियतिसृ प्रियचतसृकुलमिति। अत्र नित्यत्वात् सिलोपः प्राप्तोऽपि न भवत्यन्तरङ्गत्वात् तिसृ-चतसृभावस्य प्रवृत्तेः। ककारस्तु समासान्तो न भवति, समासापेक्षिण्यन्तरङ्गे समासान्ते कर्तव्ये विभक्त्याश्रयस्य बहिरङ्गस्य तिसृभावस्य सिद्धत्वात् तिस्रः चतस्रः इति जस्शसोरन्यतरः। तौ रं स्वरे इति रत्वं त्रयः चत्वार इत्यादि त्रिचतुरोरत्र स्त्रीवृत्तित्वं नास्ति इत्यादेशाभावः। एवं प्रियाः त्रयो भावाः अस्य ब्राह्मण्याः प्रियत्रिः प्रियत्री प्रियत्रय इति। प्रियाणि वा त्रीणि यस्याः (सा[4] प्रियत्रिः प्रियत्री प्रियत्रयः) इत्यत्रापि न

---

१. २।३।२४ (दु० वृ०)
२. एव (मं०)
३. २।३।२५ (दु० वृ०)
४. न्यूनपाठः (बा०)

भवति, अन्यपदार्थो ह्यत्र स्त्रीवृत्तित्रिचतुःशब्दौ तु पुंसि नपुंसके च वर्तेते। विभक्ताविति किमिति, विभक्त्यधिकारात् विभक्तिग्रहणं लभ्यत इति भावः अविभक्तावपि क्वचित् कार्यस्येष्यमाणत्वात्तत्रापि प्राप्नोतीत्यभिप्रायेण प्रत्युदाहरति तृतीयाचतुर्थीति ज्ञापकद्वारेण त्वादेशभावगतो गुर्वी प्रतिपत्तिः स्यात्।

तौ रं स्वरे २।३।२४[1]

स्वरे परतो रत्वसिद्धिं मन्यमानं प्रत्याह—ङिघुटोररादेशः प्राप्त इति अर्ड्डौ घुटि चेत्यनेन शस्याग्निवद्भावः प्राप्त इति अग्निवच्छसीत्यनेन ते बाध्यन्ते इति बाधकबाधनार्थत्वादस्य योगस्येति शेषः। तिसृचतसृग्रहणेऽनुवर्तमाने तौ ग्रहणं त्रिचतुरोः स्थानित्वनिवृत्त्यर्थम्, चतुरोऽन्त्यस्य रेफादेशप्रयोजनं नास्तीति चेत् मा भूदन्त्यस्य, अन्त्याभावपरिभाषयात्वन्तसदेशस्य प्राप्नोति। इह तु तिस्रोऽतिक्रान्ते कुले चतस्रो अतिक्रान्ते कुले अतितिसृणी अतिचतसृणीति रत्वं न भवति। आगमादेशपरिभाषया नामिनः स्वर इति पूर्वं नुरागमस्य प्रवृत्तेः।

न नामि दीर्घम् २।३।२५[2]

न-युक्त आम् नाम् इति। स पुनर्नकारः आमि च नुरित्यनेन विहितः। लोप्य इति अर्ह-प्रत्ययनिर्देशात् युक्तशब्दस्य लोपः। [3]नन्वव्यभिचारादामः सनकारस्य निमित्तभावो विज्ञास्यत इति किं नामीति नकारोपादानेन, अस्त्येतत्। किन्त्वनुपात्ते तस्मिन्नामि दीर्घमिति निर्देशे सति सिद्धस्यैव दीर्घस्य नियामकमिदं वचनं स्यात्। नाप्येव तिसृचतस्रोः। दीर्घो नान्यत्रेति। ततश्च तिस्रोऽतिक्रान्ताप्यतितिसृणीत्यादौ दीर्घो न भवेदिति नकारोपादानम्। आमि न दीर्घमिति क्रियतामिति चेत् किमेवं सति कृतं स्यात्। अर्धमात्रापरिहारजनितो लाघवमिति चेदेवं सूक्ष्मेक्षिकया स्याताम्, यदीत्यादौ किं वाच्यमन्यपदार्थो बहुव्रीहिरित्येवावगतत्वात् [4]इत्यवधारणमेव ज्यायः। दीर्घस्यैव प्राप्तस्य निषेधो विज्ञास्यत इति दीर्घग्रहणं तिसृचतसृभावस्य प्राकरणिकस्य नामि निषेधाशङ्का निवृत्त्यर्थम्।

---

१. २।३।२६ (दु० वृ०)
२. २।३।२७ (दु० वृ०)
३. नन्वभिधानादामः (मं०)
४. इत्यवधीरणमेवात्र (मं०)

नृ वा २।३।२६[1]

दीर्घमामि सनाविति प्राप्तो दीर्घो विकल्प्यते। ननु नित्ये विधौ विज्ञायमाने विफलोऽयमारम्भस्स्यात्। निषेधोऽपि नानुवर्तिष्यते। नृ चेति पूर्वत्रैवाकरणादित्यर्थाद्वेति लब्धमिति किं वा ग्रहणेन, नैतत्, नुर्नाम्येव दीर्घ इति नियमोऽपि सम्भाव्येत, ततश्च नृन्यतिक्रान्तानि अतिनृनि कुलानीत्यत्र दीर्घत्वं न भवेदिति वा ग्रहणम्।

त्यदादीनाम विभक्तौ २।३।२७[2]

एषां त्यदादीनामिति। द्विपर्यन्तानाम्, कुत एषां विभक्तावन्तलोपारम्भात्। अन्यथा हि त्यदाद्यत्वे सिद्धत्वादनारम्भणीयो अन्तः[3] लोपः स्यात्। अन्त्यस्येति वर्णान्त्यस्य विधिरिति वचनात् स्यः सः यः एष इति तस्य चेति सत्वम्, तच्छब्देन समानार्थो अयम्। त्यच्छब्दस्तथा च भगवतो वाल्मीकेः प्रयोगः "न मे दुःखं प्रिया दूरे, न मे दुःखं हृतेति सा। एतदेवानुसोचामि वयस्तस्यातिवर्तते[4]॥" इति। भवन्तौ भवन्त इति भवन्तुशब्दः त्यादिर्न भवति। द्वि-शब्दात् परं पठितत्वात्। यद्येवम्, त्यमतिक्रान्तः अतित्यत् अतित्यदौ अतित्यद इत्यादौ कस्मान्न भवति, न भवति। उपसर्जनीभूतानां त्यदादीनामसर्वनामत्वात्। त्यदादयश्चैते सर्वनाम(गणान्तः[5]पातिनो) गृह्यन्ते तेषामेव बुद्धौ परिस्फुरणात्। यत्र तूपसर्जनीभूताः एते न भवन्ति तत्र त्यदाद्यत्वं भवति। परमसः परमतौ परमते इति पुनर्विभक्तिग्रहणमित्यादि। नन्वसति विभक्तिग्रहणे नामीत्येतदभिसम्बध्येत, न सम्बध्येत, येन क्रियत इत्यादिनिर्देशात्। उत्तराण्यपि कार्याणीत्यादि। तेषां विधौ श्रूयमाणविभक्तिप्रतिपत्त्यर्थस्य विभक्तिग्रहणस्यानुवृत्तेरिति भावः।

किं कः २।३।२८[6]

विभक्तावित्येव। कस्येदं, किमीयं, ईयस्तुहित इति तु शब्दादीयप्रत्ययः। साक्-प्रत्ययस्यापि किमं कत्वं तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति वचनात्।

---

१. २।३।२८ (दु० वृ०)
२. २।३।२९ (दु० वृ०)
३. योगारम्भः (भं०)
४. वयोस्त्यस्यास्ति (वा०)
५. गणमध्यान्तवर्तिनो (भं०)
६. किमः कः २।३।३० (दु० वृ०)

बोऽद्वेर्मः २।३।२९[1]

त्यदादीनां दकारस्येति । न यस्य कस्यचिद् दकारस्य किन्तु अनन्त्यस्य, कुतः, अद्वेरिति पर्युदासाश्रयणात् । अद्वेरिति चायं नञा निर्देशः, यच्चार्चितं द्वयोरिति मत्वा करणादिदमेव द्विशब्दस्य मत्वाभावे ज्ञापकं भविष्यतीत्यद्वेरिति किमनेन निषेधेनेति, चेत्, न । ओस्व्यतिरेकेण द्विर्वचनान्तरेऽपि मत्वप्रसङ्गात् । तस्मादद्वेरिति पर्युदासाश्रयणात् अनन्त्यदकारस्य मत्वं विज्ञायते । यद्यद्वेरिति पर्युदासः तर्हि द्विशब्द दकारं वर्जयित्वेति कथमिदं वाक्यभेदेन व्याख्यातम्, द्विशब्ददकारसदृशस्य त्यदादीनां दकारस्येत्येकवाक्यतया व्याख्यानमुचितं स्यात्, अस्त्येतत्, वस्तुमात्रकथनपरत्वेन व्याख्यानाददोषः । इमौ इमे इमम्, इमान् इति इदम् औ जस् अम् शस् । त्यदाद्यत्वम्, अकारे लोपम् । जस्सर्वं ईम्, शसि सस्य च नः । अनेन मत्वम्, द्वौ द्वाभ्यामिति । त्यदाद्यत्वम्, अकारो दीर्घमिति दीर्घः ।

सौ सः २।३।३०[2]

असाविति अदस्, सावौ सिलोपश्चेत्यौत्वम्, सेश्च लोपः ।

तस्य च २।३।३१[3]

योगविभागः । वैचित्र्यार्थः ।

इदमियमयं पुंसि २।३।३२[4]

इदमिति । से व्यञ्जनाच्चेति सि-लोपः । रूपमात्रविवक्षायां त्यदाद्यत्वाभावः । त्रिचतुरोः स्त्रियामित्यतः स्त्रियामिति वर्तत इति । इयमादेशस्य स्त्रीविषये प्रवृत्त्यर्थम्, मण्डूकप्लुतिर्न्यायेन[5] स्त्रीग्रहणमनुवर्तते, अन्यथा हि इयमयमादेशौ द्वावपि पुंस्येव भवेतामिति भावः । तेनेदमियमयमित्यत्र वाक्ये स्त्रीग्रहणानुवृत्त्या इदं शब्दस्य स्त्रियां विषये सौ परे इयमादेशो भवतीत्यर्थो जायते । अयं पुंसीत्यत्र तु वाक्ये इदमो वेक्षणादिदं शब्दस्य पुंसि विषये सौ परे अयमादेशो भवतीत्यर्थो घटते, नपुंसके त्वियमयमोरप्रवृत्तेरिदं शब्द एवाव-

---

१. २।३।३१ (दु० वृ०)
२. २। ।३२ (दु० वृ०)
३. २।३।३३ (दु० वृ०)
४. २।३।३४ (दु० वृ०)
५. प्लुत्या न्यायेन (मं०)

तिष्ठत इतीदं वचनमिति नपुंसकात्स्यमोरिति सि-लोपः न च तदुक्तमिति निषेधात् त्यदाद्यत्वाभावः।

अद्व्यञ्जनेऽनकः २।३।३३[1]

अनक इति बहुव्रीहावपि स्वरेऽक्षरविपर्ययः। तत्र हि तत्पुरुषग्रहणं समासस्योपलक्षणमिति व्याख्यास्यते। अकारादेशो भवतीति सर्वस्य नत्वन्त्यस्य। एषां विभक्ताविति निर्देशात्। अन्त्यस्य त्यदाद्यत्वेन सिद्धत्वात् वचनानर्थक्यभयात्। एवं सर्वस्य भविष्यति, नैतत्, त्यदाद्यत्वेन सिद्धावप्यनक इति निषेधकरणाय वचनमर्थवत् स्यात्। तथा च इमकैरित्यत्राक्प्रत्ययसह तस्येदमः अन्त्यस्य त्यदाद्यत्वम् व्याहन्यते अथवा त्यदाद्यत्वेन सिद्धत्वादनेनान्त्यस्यात्वं मा भूत्, अन्त्यवद्भावपरिभाषया त्वन्त्यस्य सदेशस्य दकाराकारस्य प्राप्नोति। किमत्वेन तस्य प्रयोजनमिति। अकारे लोपमित्यस्य विधेर्विनिवृत्तिः। तस्मादेषामित्ययमेव निर्देशः सर्वादेशत्वहेतुः। आभ्यामिति। अकारो दीर्घमिति दीर्घः। इदं वानिति। इदं विद्यते यस्येति, तदस्यास्तीति वन्तु-प्रत्ययः। अन्त्वसन्तस्येति दीर्घः। इमकैरिति। अव्ययसर्वनाम्न इत्यक्प्रत्ययः, भिस् त्यदाद्यत्वम्, दोऽद्वेर्मः। नन्विदमोऽत्वमुच्यमानमक्प्रत्ययसहितस्य शब्दान्तरत्वात् न प्राप्नोतीति नार्थोऽनक इति प्रतिषेधेनेत्याह—तन्मध्यपतित इत्यादि। अस्याश्च परिभाषाया अस्तित्वे निषेधकरणमेवेदं ज्ञापकम्, अन्वादेशे त्वनक इति निषेधो नञ्रानिर्दिष्टस्यानित्यत्वान्न भवति इति। इमकाभ्यां छात्राभ्यां रात्रिरधीता अथो[2] आभ्यामहरप्यधीतमिति (इदकम्[3] आभ्याम् अत्वम्, अकारो दीर्घमिति दीर्घः। अदिति तपरकरणम् व्यञ्जने निषेधाशङ्कानिवृत्त्यर्थम्।

टौ सोरनः २।३।३४[4]

अन्वादेशविषय इत्युक्तम्, तत्र को नामायमन्वादेशः इत्याह—यत्रैकस्येत्यादि। एकस्य कस्यचिद् देवदत्तादेर्वेदाध्यापनादिकं विधाय यदा पुनरन्यद् व्याकरणाध्यापनादिकमुपदिश्यते तदासावन्वादेशः इत्युच्यते। तेनात्र एनादेशो

---

१. २।३।३५ (दु०वृ०)
२. अथ (मं०)
३. इदम् भ्याम् (मं०)
४. २।३।३७ (दु० वृ०)

न भवति। अयं दण्डो हरानेनेति। दण्डनिर्देशमात्रं[1] कृत्वा हरानेनेति (विधानस्यैकत्वात्) टा[2] इत्युपलक्षणपरत्वेनोक्तम्। आभ्यां छात्राभ्यां रात्रिरधीता अथो एनाभ्यामहरप्यधीतमिति षष्ठी-सप्तम्योर्द्विवचनं परिगृह्यते, व्याप्तेर्न्यायात्।

तस्माद्भिभिसः २।३।३५[3]

एभीरितीदम्, भिस्, त्यदाद्यत्वम्, अद् व्यञ्जनेऽनकः, भिसोभिभावः। घुटित्वे त्वै रूपविशेषलक्षणस्य कार्यस्यादर्शनात् भिसोभिस्वचने किं प्रयोजनमित्याह—भिसोभिस्वचनमित्यादि। भिसः श्रवणं यथा स्यादात्वे कृते तस्यैस्मावो मा भूत् इति स एव भिसादेशो विधीयते, भिरयमदेशो रेफान्तः। रेफस्तु विधानसामर्थ्यात् विसर्गं न प्रतिपद्यत इति तु न व्याख्यायते। नानिष्टार्थशास्त्रप्रक्लृप्तिरिति वचनात्। तस्माद् ग्रहणं वैचित्र्यार्थम्। ननु कृताकारमिदं परामृष्टुं तस्माद् ग्रहणं कृतमिति कस्मान्न व्याख्यायते, इदमेव हि तस्माद् ग्रहणमत्वं विकल्पेन संसूचयेत् तथा च इमैरित्यत्रात्वाभावपक्षे भिसादेशो[4] न भवति। नैतत्, नित्यमत्वस्य स्मरणादिमैरित्यस्य चासाधुत्वात्।

अदसश्च २।३।३६[5]

अमीभिरित्यत्र अदस्, भिस्, त्यदाद्यत्वम्, भिसो भिर्-भावः, अदसः पदेमः, घुटि बहुत्वे त्वे ए, बहुत्वे त्वीत्येकारस्येत्वम्। अमुकैरिति। अदस्, अज्ञातैरमीभिरित्यक्प्रत्ययः, पूर्ववन्मत्वम्। उत्वम्मादित्युत्वम्। चकारेणानक इत्यनुकृष्यते, उत्तरत्र तस्यानुवृत्तिर्माभूदिति चानुकृष्टमुत्तरत्र नानुवर्तत इत्याहुः।

सावौ सि लोपश्च २।३।३७[6]

अन्त्यस्यौत्वं भवतीति। त्यदाद्यत्वं बाधित्वेति शेषः। असाविति। सौ स

---

१. न्यूनपाठः (वा०)
२. न्यूनपाठः (मं०)
३. २।३।३८ (दु० वृ०)
४. भिरादेशो (वा०)
५. २।३।३९ (दु० वृ०)
६. २।३।४० (दु० वृ०)

इति दस्य मत्वं असकाविति पूर्ववदक्प्रत्ययः। साविति किम्, विभक्तिमात्रे मा भूत्, सि-लोपवचनं तु अन्वाचीयमानमपि स्यात्। अथौत्वं सेः कस्मान्न विधीयते। एवमस्य साविति सिध्यत्येवेति किं सिलोपवचनेन, नैवं शक्यम्। हे असाविति। अत्र हि सेरौत्वे कृते त्यदाद्यत्वे च सति ह्रस्वान्तलक्षणस्सम्बुद्धिलोपः प्रसज्येत्, यद्वात्रैव प्रयोगे स्त्रीत्वविवक्षायामाम्प्रत्यये सञ्जाते सम्बुद्धौ चाकारस्येत्वं स्यात्। अथवा औरीमिति औकारस्येत्वम्, असकावित्यत्र च के प्रत्यय इतीत्वं भवेत्। तदेते दोषाः मा भूवन्निति सि-लोपः चेति कर्तव्यम्, न कर्तव्यम्। सत्यौत्वे स्थानिवद्भावेनैव व्यञ्जनाच्चेति सिलोपस्य सिद्धत्वात्। एवं तर्हि एतदेव सि-लोप वचनं ज्ञापयति वर्णाश्रये विधौ नास्ति स्थानिवद्भावः इति तेन द्यौरित्यत्र औ सावित्यौत्वे कृते स्थानिवद्भावस्याभावात् सि-लोपो न भवति। ननु लोपविधेर्बलवत्वादौत्वात् पूर्वं सिद्धस्सिलोपः, भवेदेतदेवं यदि लोपस्वरादेशपरिभाषा न स्यात्।

उत्वम्मात् २।३।३८[1]

वर्णस्य उत्वं भवतीति। वर्णाधिकारात्। उक्तं हि पूर्वं वर्णसमाम्नायस्योत्तरत्रानुवृत्त्यर्थं तत्र ग्रहणमिति। अमुम्, अमू अमूनीति, अदस् अम्, औ, शस्, त्यदाद्यत्वम्, अकारे लोपम्, शसि सस्य च न इति दीर्घे नत्वे, अदसः पदे मः, अनेनात्वम्, स्थानान्तरतमपरिभाषया द्विमात्रस्य द्विमात्र उकारः। ननु विधीयमानः स्वरः सवर्णं न गृह्णातीति कथमूकारः स्यात्। उसिति कर्तव्ये त्व-प्रत्ययनिर्देशाद् भविष्यति। अमुष्मै इत्यादि। अदस्, ङे, ङसि, ङस् ङि, अन्यत्पूर्ववत्। अमुकाभ्यामिति। अदस्, अव्ययसर्वनाम्न इत्यक्, भ्याम्, त्यादाद्यत्वम्। अकारो दीर्घमिति दीर्घः।

ए बहुत्वे त्वी २।३।३९[2]

बहुत्वविषयस्यैकारस्येति सति यः [3]बहुवचने न (सञ्जातः तस्येत्यर्थः, अमी अमीभ्यः अमीषामिति, अदस्, जस्, भ्यस्, आम्, त्यदादीत्यादि मादित्येव, अमुकेभ्यस्तुशब्दो वैचित्र्यार्थः अपां भेदः शब्दमात्रेऽस्य कार्यत्वेन विवक्षितत्वादेव वचननिर्देशे न्याय्ये) बहुवचननिर्देशो अप्शब्दस्य प्रयोगभेदेन बहुत्वा-

१. २।३।४१ (दु० वृ०)
२. २।३।४२ (दु० वृ०)
३. न्यूनपाठः (वा०)

विष्टत्वात्। तथा च अद्भिः कृतम्, अद्भ्यो देहि, अद्भ्य आगत इति सर्वत्र दत्वं दृश्यते, अब्भार इति नायं विभक्तिभकार इति दत्वाभावः। व्यञ्जनान्तस्य यत्सुभोरित्यनेनापि न भवति। सुभोः युगपदुक्तस्य कार्यस्य तेनास्य विधानात्।

विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च २।३।४०[1]

विरतिर्विरामः भावे घञ्, विरमतेऽनेन वा विरामः, व्यञ्जनान्ताच्चेति करणे घञ्, तत्र पूर्वस्यां व्युत्पत्तौ वर्णोच्चारणाभावो विरामः। अपरस्यां तु येनान्येन वर्णेन विरम्यते सः वर्णो विरामः। अनड्वाहशब्दः, अनसि डश्चेति विण्प्रत्ययान्तः। उपानह्, इत्यस्यैकदेशानुकरणभूतो नह्-शब्दः शन्तृङ्डादेशस्य वन्सोः क्वन्सोश्च वन्सि-ग्रहणेन ग्रहणम्। विरामे व्यञ्जनादौ च सतीति कालभावयोरित्यनेनैषा विरामव्यञ्जनादिष्विति सप्तमी। तत्रैकाऽप्येषा सप्तमी यथायोगं विभज्यते। विरामादिविषये व्यञ्जनादौ च परभूते इति। नहि विरामस्याभावस्यानडुह् तदादिशब्दसम्बन्धिनो वा वर्णान्त्यस्य परत्वं सम्भवति अतो विराम इति विषयसप्तमी, व्यञ्जनादेस्तु प्रत्ययस्य परत्वं सम्भवतीति व्यञ्जनादाविति पर-सप्तमी, अतएवोभयरूपोऽप्येषः सप्तम्यर्थः सामान्यशब्देन सतीत्यनेन निर्दिष्टः। विरामविषये सति व्यञ्जनादौ च परभूते सति स्वनडुत् इति शोभना अनड्हो यत्र नगरे तत्स्वनडुत् इति। यदा अभावो विरामः तदा विरामविषये दत्वं विज्ञायमानमनडुदादीनां वर्णान्त्यस्य विधिरिति वचनादन्त्यस्य भवति। यदाप्यन्त्यो वर्णो विरामः तदा विरामविषये दत्वं प्रवर्तमानमनडुदादीनामन्त्य एव वर्णो प्रवर्तते। तस्यैव विरामविषयत्वात्। अनडुद्भ्याम्, अनडुत्स्विति। अनडुहश्चेत्युत्वम्, उपानदित्यादि। णह् बन्धने उपपूर्वः, उपनह्यतीति क्विप् ह्रस्वस्य दीर्घतेति। उपसर्गस्य दीर्घः। अनेन हस्य दत्वम्। सुविद्वदिति। विरामव्यञ्जनादावित्यनुषङ्गलोपः, अनेन सस्य दः। विद्वद्भ्यः, विद्वांल्लिखति, अनुषङ्गश्चाक्रुञ्चेरित्यनुषङ्गलोपः। अनड्वानित्यत्र सोऽनुरिति स्वागमे कृते संयोगान्तलोपेन हकारे लुप्ते नकारस्यानेन दत्वं कस्मान्न भवति, आह—नुकारागमविधानसामर्थ्यादिति। यद्येवम् अनडुहस्तत्रेति[2] दत्वमपि न स्यात्, यं विधिं प्रत्युपदेशोऽनर्थकः सः विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ विधिस्तेन बाध्यते। नुकारागमविधानसामर्थ्यादिति च सन्निहितनुकारागमापेक्षया परिहार उक्तः। अन्यथा

१. २।३।४३ (दु० वृ०)
२. अनड्वांस्तत्र (मं०)

संयोगान्तलोपस्यालुप्तवद्भावादेवानड्वानित्यत्र दत्वं न प्रवर्तयिष्यते, नकारस्यानन्त्यत्वादन्त्यस्य च वर्णान्त्यपरिभाषया[1] दत्वविज्ञानात्। तथा च विद्वान्, पेचिवान्[2] इत्यादौ नकारस्य न भवति, ननु तस्य मा भूत्, सकारस्य तर्हि कस्मान्न भवति, लुप्तत्वादिति चेत्, न, यस्मिन्प्राप्ते यो विधिरारभ्यते सः तस्य बाधको भवतीति संयोगान्तलोपं बाधित्वा विशेषविधानेन दत्वमेव स्यात्। अत्रोच्यते, नृ वेत्यतो वेत्यपेक्षते तस्य व्यवस्थितविभाषात्वान्न भविष्यति, विद्वांसाविति। सान्तमहतोरिति दीर्घः। ननु विभक्त्यधिकारादिभक्तिव्यञ्जने दत्वं विज्ञायमानं सुभोरेव सम्भवत्यतः[3] स्भ-ग्रहणमेव कर्तव्यम् किं व्यञ्जनग्रहणेनेत्याह—स्भ-ग्रहणमित्यादि। अविभक्तिसम्बन्धिन्यपि व्यञ्जने यथा स्यादिति व्यञ्जनग्रहणम्। तमादित्वात् इति। आख्याताच्च तमादयः। (२।६।४०) इति वचनात्। वेत्यन्तः व्यञ्जनं वर्तते, नृ वेत्यतः। एवमुत्तरत्रेति तद्धितयकारं विना सामान्यव्यञ्जननिमित्तक उत्तरत्र सर्वो विधिरित्यर्थः।

स्रसिध्वसोश्च २।३।४२[4]

स्रस्-ध्वस् इत्येतयोरिति। स्रन्सुध्वन्सु अवस्रन्सन इत्येतयोर्लुप्तानुषङ्गयोरित्यनिदनुबन्धनामित्यादिना योगविभागो वैचित्र्यार्थः।

हशषच्छान्ते जादीनां डः २।३।४३[5]

यजेः स्वपिवचीति सम्प्रसारणे कृते इजिति रूपमिति। एतेन रेज [6]गति-कुत्सनयोः इत्ययमत्र सन्दिग्धश्रावि प्रत्ययो न गृह्यत इति दर्शयति। यद्येवम्, कृतसम्प्रसारणस्य युजेः परिग्रहादुपयुज्यत इत्युपयट् इत्यत्र विडन्तस्य तस्य डत्वं न प्राप्नोति, सत्यम्, चानुवृत्तेर्भविष्यति। अन्तशब्दः प्रत्येकमभिसम्बध्यत इत्यन्ते प्रयुज्यमानत्वादिति भावः। इजादयो लक्ष्यमूलत्वाद् व्याकरणस्य परिव्राट्छब्दपर्यन्ताः वृत्तौ उपदर्शितार्थाः परिगृह्यन्ते। मधुलिट् पाश इति। तमादित्वात् पाशप्रत्ययः। सुविडित्यादि। नन्वेवमादौ छश्शोश्चेति शस्य षत्वे कृते षान्तत्वादेव डत्वं भविष्यतीति किं शकारोपादानेन। अत्रोच्यते—छशोश्चेति

---

१. वर्णान्त्यस्यविधिरिति वचनात् (भं०)
२. पपिवान् (वा०)
३. सम्भाव्यते (भं०)
४. २।३।४५ (दु० वृ०)
५. २।३।४६ (दु० वृ०)
६. गतिकम्पनयोः (?)

यत्वत्वं तदाख्यातप्रकरणे विहितम् । तत्र प्रत्यासत्तेराख्यातप्रकरणविहित-प्रत्ययविषय एव पदान्ते घुटि च तद्विधीयते, एवं च सति स्यादिपदान्तविषये स्यादिघुटि च छश्शोश्चेत्यनेन शस्य षत्वं नास्तीति सुविडित्यादि सिध्यतीति तत्सिद्धये शकार उपादीयते । तथा च छग्रहणं कृतम्, अन्यथा तस्यापि छशोश्चेति षत्वे कृते षान्तत्वादेव शब्दप्राडित्यादौ डत्वं भविष्यतीति विफलं छकारोपादानं स्यात् । नन्वेवमप्यतिरिच्यते छ-ग्रहणं च्छोश्शूडावित्यादिना क्विपि छस्य षत्वे उपजाते सति शग्रहणेनैव सिद्धत्वात् । अस्त्येतत् । लाक्षणिकस्तु तदा शकार इत्येवमाचार्यो मन्यते । षडिति षष् जस्कतेश्चेति लुक्, अनेन डत्वम् । ननु षकारस्य विरामविषये ऋटुरषाः मूर्धन्या इति स्थानसावर्ण्यात् वा विराम इत्यनेन प्रथमतृतीयाभ्यां धत्वडत्वाभ्यां भवितव्यम् । अघोषेऽपि । अघोषे प्रथम इति प्रथमेन घोषवत्यपि धुटां तृतीय इति तृतीयेन । तथा च सुविडित्यादि सिध्यतीति किं षकारोपादानेन, अस्त्येतत्, ते एवं विधय एव प्रपञ्च्यन्ते । अप्रसारणे चेति । प्रसारण सम्प्रसारणमाहुः, तत्तु प्रच्छेः ग्रहिज्यावयीति प्राप्तं, शब्दप्राडित्यादौ च कृतद्विर्भावस्य ककारस्य डत्वं तथा भूतस्यैव तस्य सूत्रे उपादानात् । कृत[2]द्विर्भावोपादानसामर्थ्याच्च वर्णान्त्यपरिभाषया नान्त्यस्य ककारस्य डत्वं विज्ञायते । अनर्थके वा वर्णान्त्यपरिभाषाया नास्त्युपस्थानम् । नानर्थके वर्णान्त्यविधिरिति वचनात् । अनर्थकश्चायं कृतद्विर्भावश्छकारः । विराट् विराड्भ्याम् विराट्त्वम्[3], राजृ दीप्तौ विराजत इति क्विप्, भ्राजृ, विभ्राट् विभ्राड्भ्याम्, विभ्राट्त्वं, भ्राजृ दीप्तौ, विभ्राजत इति क्विप् । भ्रस्ज, धानाभ्रज् धानाभृड्भ्याम्, धानाभृट्त्वम् । भ्रस्ज पाके धानाभृज्जतीति क्विप् । स्कोः संयोगाद्योरन्ते चेति सि-लोपः । व्रश्च, मूलवृट्, मूलवृड्भ्याम्, मूलवृट्त्वम्, ओव्रश्चू छेदने । मूलानि वृश्चतीति क्विप्, संयोगान्तलोपः । परिव्राज् परिव्राड्भ्याम् परिव्राट्त्वम् । व्रज् गतौ परिपूर्वः, परिव्रजतीति क्विप् । कृत्ययुटोऽन्यत्रापीति वचनात् दीर्घः । करोतीति करणम् इति वृद्धिः परौ व्रजे षः पदान्त इत्येतत्तु दीर्घविधायकं लक्षणं यथाकथंचित् स्वलक्षणसम्भवे सति नाद्रियते । वर्णग्रहणे तदन्तविधिरित्यन्त्यग्रहणे लब्धेऽन्तग्रहणमादिशब्दस्य हकारादिभिः प्रत्येकं सम्बन्धनिरासार्थम् ।

---

१. विधेन (पाठभेदः वा०)
२. कृतद्विर्भावो (वा०)
३. विराड्त्वम् (मं०)

दादेर्हस्य गः २।३।४४[1]

धात्ववयवस्य दादेर्हकारान्तस्येति । एतेन ह-चतुर्थान्तस्येति । अतो धातु-ग्रहणानुवृत्त्या धातोरवयवस्य दकारादेर्हकारान्तस्य गत्वं भवतीति दर्शयति । तेन दामलिडित्यादौ दामलिह् इत्यस्य दादेर्हकारान्तस्यापि धात्वनवयवत्वाद् गत्वं न भवति । हकारान्तस्येति हकारेण धात्ववयवस्य विशेषणादेवमुक्तम् । गोधुगित्यादि । अत्र गोधुगित्यस्य क्विबन्तस्य धातोर्यो दकारादिर्हकारान्तो दुह् इत्ययमवयवः तस्यान्त्यस्य गत्वम् ।

चवर्गदृगादीनां च २।३।४५[2]

दृगादिर्येषां ते दृगादय इत्येतेनादिशब्दोऽयमन्ते प्रयुज्यमानोऽपि व्याख्यानात् दृशिनैव सम्बध्यते न तु चवर्गेणापीति दर्शयति । विरामव्यञ्जनादि-विषयाभावात् दृगादीनां चेति निर्देशे कथं गत्वमित्याह—व्यञ्जनान्तस्येति । दृगित्यादि । दृशिः क्विबन्तः । स्पृश् घृतस्पृग्भ्याम् घृतस्पृक्त्वम्, घृतं स्पृशतीति क्विप् । ऋत्विगादयः पञ्च ऋत्विगादिसूत्रेण सिद्धसाधुत्वात् । ऋत्विक् ऋत्विग्भ्याम्, ऋत्विक्त्वमित्यादि च सर्वेषामुदाहरणम् ।

मुहादीनाम् वा २।३।४६[3]

अन्येषां त्वप्राप्तमिति, अदादित्वात् । एवं च चोभयत्र प्राप्ते अप्राप्ते च विकल्पोऽयम् । उन्मुगित्यादि पदान्ते धुटामित्युदो दस्य तत्वम् । पञ्चमे पञ्चमानिति पञ्चमः । उन्मुडित्यादि । हशषेति पक्षे डः । शत्रुध्रुगित्यादि । शत्रवे द्रुह्यतीति[4] क्विप् ।

हचतुर्थान्तस्य धातोस्तृतीयादेरादिचतुर्थत्वमकृतवत् २।३।४७[5]

धात्ववयवस्य हकारान्तस्येत्यादि । एतेन पदत्रयमेतन्न, सामानाधिकरण्येन सम्बध्यते, किं तर्हि धातोरवयवो यो तृतीयादेर्हचतुर्थान्तस्यादेश्चतुर्थमिति वैयधिकरण्येन दर्शयति तथा गर्दभमाचष्ट इन्कारितं चेति गदर्भशब्दात्, इनि

---

१. २।३।४७ (दु० वृ०)
२. २।३।४८ (दु० वृ०)
३. २।३।४९ (दु० वृ०)
४. ध्रुह्यतीति न्यूनपाठः (वा०)
५. २।३।५० (दु० वृ०)

कृते तदन्तात् क्विप्, अर्धट्[1] अर्धड्भ्यामित्यादावपि। गर्दभ इत्यस्य क्विबन्तस्य धातोर्योऽवयवः तृतीयादिश्चतुर्थो दभ्-शब्दस्तस्याप्यादिर्चतुर्थत्वं प्रवर्तते। सामानाधिकरण्येन सम्बन्धे सति गर्दभो गकारस्य चतुर्थत्वं स्यात् दामलिडित्यत्र तत्केन वार्यते तस्माद् धातोरवयवस्य तृतीयादेर्हचतुर्थान्तस्येत्ययमत्र व्याख्याक्रमः। स्ववर्गादिति। न परवर्गात् कुत इत्याह—प्रत्यासत्तेरिति। अकृतवद्भवतीति। कृतस्य चाकृतत्वं वचनशतेनाप्यशक्यमभिधातुमित्यकृतधर्मापत्तिरत्रातिदिश्यते तेन किं सिद्धं भवतीत्याह—तेनेत्यादि। गोधुगित्यादि। गोपूर्वात् दुहेः क्विप्। अत्र गोधुह् इत्यस्य क्विबन्तस्य धातोर्यो दुह् इत्ययं तृतीयादिर्हकारान्तो अवयवः तस्यादिर्यो दकारः तस्य चतुर्थो धः। एवं च काष्ठधुगित्यादावपि योज्यम्। निधुडित्यादि हशषेति डः। अर्थभुद्भ्याम् इति धुटां तृतीय इति दत्वम्, एवं विधब्भ्यामित्यत्रापि। सुगण् इत्यादि। गण संख्याने, अदन्तः, चुरादेश्चेतीन्, अस्य च लोपः तस्य स्वरादेशपरिभाषयास्थानिवद्भावादुपधादीर्घाभावः। ततः क्विप् कारितलोपः, अन्तग्रहणं विस्पष्टार्थम्। धात्ववयवस्येति किं, दामलिडित्यादि। दामलिह् इत्ययं शब्दो भवति तृतीयादिः हकारान्तश्च। न च धातोरवयव इति नात्र चतुर्थत्वं प्रवर्तते अथ किमर्थमकृतवदिति क्रियते। यावता गोधुगित्यादौ यदि कृतेऽपि चतुर्थत्वे गत्वं न स्यात्, ततो दादेर्हस्य ग इति योऽस्य सूत्रस्यारम्भः सः विषयाभावाद्विफलः स्यात्। अतो मा भूत् तस्य वैफल्यमिति तद्बलादेव कृतेऽपि चतुर्थत्वे दकाराश्रयं हकारस्य गत्वं प्रवर्तिष्यत इति नार्थो कृतवद्ग्रहणेनेति मन्यमानः पूर्वपक्षयति, नन्वित्यादिना। असत्येत्यादिना परिहरति। अयमर्थः। यथा हि दादेर्हस्य ग इति सूत्रारम्भबलात्कृतेऽपि चतुर्थत्वे गत्वं भवति। एवं च तद्बलाद् दादेर्धातोरादिचतुर्थत्वमेव न भवेत्, ततो गोधुगित्यादि प्रयोगजातकृतचतुर्थत्वं यथा स्यात्। तन्मा भूदेष दोष इत्यकृतवद्ग्रहणं कर्तव्यम्।

सजुषाशिषो रः २।३।४८[2]

जुषी प्रीतौ[3] सहपूर्वः सहजुषतीति क्विप् सह-शब्दस्य निर्देशबलात् सभावः। आङः शासु इच्छायाम्। आङ्पूर्वः आशासनम् आशीः, कृत्ययुटोऽन्यत्रापीति भावे क्विप्, अतएव ज्ञापकादित्वम्। शासिवसीति षत्वम्। सजुश्च आशीश्च ते सजुषाशिशे। अत्र घोषवत् स्वर पर इति कृते रेफे रोरे लोपमिति

१. न्यूनपाठः (वा०)
२. २।३।५१ (दु० वृ०)
३. प्रीतिसेवनयोः (भं०)

रेफलोपः। पूर्वस्वरस्य च दीर्घो न भवति, तस्य नित्यदीर्घत्वाद्रेफो भवतीति। एतेन यण् परोक्षाशीष्विति निर्देशाद्रेफो द्रादेशो न त्वाकार इति दर्शयति। सजुरित्यादि रेफादेशः, इरूरोरीरूरौ, आशीःशब्दस्य आङ् उपसर्गो न प्रधानमिति कुतः शब्दान्तर-पूर्वस्यापि शासे रेफादेशदर्शनात् किमर्थः तर्ह्याङुपात्त[1] इति चेत्, केवलाच्छासेः क्विपोऽसम्भवात्। एवं चावश्यं कस्मिंश्चिच्छब्दे शासेः पूर्वमुपदेशे[2] कामचारादाङ्उपात्तः नत्वस्यास्ति प्रधानभावः। तेनेत्यादि। तेनाङो प्रधानभावेनेत्यर्थः। मित्रशीः, आर्यशीरिति क्विपो लोपात्पूर्वं शासेरिदुपधाया इतीत्वम्, शासिवसीति षः अनेन रत्वम्। पूर्ववदीरादेशः। अथ शिष्लृ विशरण इत्यस्याङ्पूर्वस्य क्विपि यदाशिष इति रूपं तस्यापि रत्वं कस्मान्न भवति, न भवति क्विपोऽत्र विषये सन्दिग्धत्वात्। अथवा सजुषधातुना आत्मनेपदिना क्विबन्तेन साहचर्यादाशीश्शब्दोऽपि तथाभूत एव गृह्यते यः आङ्शास्वित्यनेनात्मनेपदिना धातुना व्युत्पादितः (स[3] परिह्रियत इत्याशिषि शिडित्यादौ रत्वाभावः चवर्गदृगादीनां चेत्यतः चकारः) अत्रानुवर्तते। तेनेहापि रत्वं भवति। पिपठीः, पिपठीभ्याम्, पठेः सनि (द्विर्वचनेऽभ्यास-[4]) कार्ये इटि च कृते पिपठिष इति यद्रूपं ततः क्विप्, अस्य च लोपः, अनेन षस्य रत्वम्। पूर्ववदीरादेशः। नन्वत्रातो लोपस्य स्थानिवद्भावाद्विरामव्यञ्जनादिविषयत्वमसदिति कथं रत्वं स्यात्। भविष्यति, क्वौ लुप्ते न स्थानिवदिति स्थानिवत्वनिषेधात्।

इरूरोरीरूरौ २।३।४९[5]

ईश्च ऊश्च तौ ईरूरौ, कृत्ययुटोऽन्यत्रापीति क्विबिति कर्तरि कृदिति वचनात्कर्तर्युच्यमानः क्विब्भावो न प्राप्नोति इत्येवमुक्तम्। गृणाति धूर्वति इति। कर्तर्येवात्र क्विबिति। अपरे मन्यन्ते। सर्पिर्भ्याम्, धनुर्भ्याम् इति। नेमाविरूरौ सम्बन्धिनौ, सर्पिष् धनुष् इत्येतयोरधातुत्वात्। गिर् धुर् इत्येतौ धातू क्विबन्तो धातुत्वं न जहाति लिङ्गत्वं च प्रतिपद्यत इति स्मरणात् दीर्घ इति कर्तव्ये ईरूरोर्वचनं यिन्नाय्योरपि तौ यथा स्यातामिति। गिरमिच्छत्या-

---

१. तर्ह्यु[ङु]पादत्ते (भं०)
२. पूर्वमुपादातव्ये (भं०)
३. यस्त्वन्यः आशिष इत्ययं शब्दः विशेषणार्थे परस्मैपदिनाशिषिणा। (पाठभेदः भं०)
४. द्विरुक्तावभ्यास (भं०)
५. २।३।५२ (दु० वृ०)

त्मनः गीर्यति, गीरिवाचरति, गीर्यते एवं धूर्यति, धूर्यते। न लोपश्चेति वा नियमाद्धि न स्याताम्।

अह्नः सः २।३।५०[1]

अहरिति सौ लुप्ते सत्वम्। सस्य विसर्गः। अहनी अहानीति, औरीम् जस्शसोः शिः शौ घुटि चासम्बुद्धाविति दीर्घः। लिङ्गग्रहणाद् धातोर्न भवति। अहन्, वृत्रहन् इति हन्तेर्ह्यस्तनी दि, अद्धात्वादिः, अन्विकरणः अदादेर्लुक्, व्यञ्जनादिश्योरिति दि-लोपः।

संयोगान्तस्य लोपः २।३।५१[2]

महान् विद्वान् प्रशानिति सान्तमहतोरिति दीर्घः। पुंभिः पुंस्विति पुंसोऽशब्दलोपः, वेति वर्तत इति मुहादीनां वेत्यतः, सा च व्यवस्थितविभाषेति ([3]तेनासर्व-विषयो) विकल्प इति भावः। ऊर्क् ऊर्ग्भ्यामिति च चुरादित्वादूर्जेरिन्। ऊर्जनमिति क्विप् कारितलोपः। तथेति व्यवस्थितविभाषात्वम् अत्र प्रकारः शिड्वर्जित इति शिट्शषसहा शिडिति शादय इति वचनात्। तद्रहित इत्यर्थः। अघोषे परेऽपीति न भवतीत्यनुषज्यते। पुंस्कोकिल इत्यादयस्त्रय एते कर्मधारयः।

पुंसोऽशब्दलोपः २।३।५२[4]

सकारस्य विसर्गः तस्य च ककारे परतो अनव्ययविसृष्ट इति सत्वम्। एवं पुंस्फलमित्यत्रापि।

संयोगादेर्धुटः २।३।५३[5]

संयोगान्तलोपे प्राप्ते वचनम्। यूपतदिति। यूपं तक्षतीति। क्विप् तदादेर्धुट इति कर्तव्ये तच्छब्देन पूर्वत्र लब्धोपसर्जनभावस्यापि संयोगग्रहणस्य बुद्ध्या प्रविभज्य प्रत्यवमर्शः सिद्धे यत्पुनः संयोगग्रहणं तत् क्वचिदादेर्धुटो लोपो मा भूदित्येवमर्थम्। तेन मांसंपिपगित्यत्रापि धुटो लोपो न भवति। पूर्वेण संयोगान्तलोप एव प्रवर्तते।

---

१. २।३।५३ (दु० वृ०)
२. २।३।५४ (दु० वृ०)
३. तेनायं विषयो (मं०)
४. एतत् सूत्रं दुर्गवृत्तौ शिष्यहितायां वृत्ताविति उभयत्र नोल्लिखितम्।
५. २।३।५५ (दु० वृ०)

लिङ्गान्तनकारस्य २।३।५४[1]

लिङ्गप्रकरण इत्यादि । लिङ्गाधिकाराल्लिङ्गग्रहणस्य प्रकरणे प्रस्तावेऽपि यत्पुनरिह लिङ्गग्रहणं तदुत्तरत्र क्वचिद् धातोरपि कार्यं यथा स्यादित्येवमर्थम्, अन्यथा लिङ्गप्रकरणत्वाल्लिङ्गस्यैवोत्तरत्र कार्यं स्यात्, धातोस्तु न भवेत् । पुनर्लिङ्गग्रहणाद् धातोरपि भवति । तेन मज्जति भृज्जतीत्यादिसिद्धमिति, किं पुनरत्र सिद्धम्, धुटां तृतीय इति सकारस्य तृतीयो दः । नकारेण लिङ्गस्य विशेषणात तदन्तत्वे लब्धे पुनः अन्तग्रहणं विस्पष्टार्थम् । विशेषणविशेष्यभावं प्रति हि कामचाराल्लिङ्गेनापि नकारो विशेष्यते तथा च सति लिङ्गस्य यो नकारो यत्र तत्रस्थः तस्यापि लोपाशङ्कायामवँस्पष्ट्यं स्यात् ।

न संबुद्धौ २।३।५५[2]

ननु हे राजन्नित्यादौ सौ लुप्तेऽपि प्रत्ययलक्षणेन विभक्तिवर्जमिति लिङ्गसंज्ञानिषेधप्रवृत्तेः लिङ्गान्तनकारस्य लोपः उच्यमानः सम्बुद्धौ नैव प्राप्नोतीत्यपार्थकमिदं वचनम्, अस्त्येतत्, अस्मादेव तु वचनात् ज्ञायते प्रत्ययलक्षणे विभक्तिवर्जमित्येव निषेधो लिङ्गसंज्ञायाः न भवति इति, तेन राजपुरुष इत्यादौ न लोपः सिद्धो भवतीति ।

न संयोगान्तलोपोऽलुप्तवत् २।३।५६[3]

दीर्घो न भवतीति [4]अलुप्तवद्भावादनकारात् । इत्थं राजभिः राजस्वित्यत्र ऐसः एत्वस्य चाभावः । गोमानिति । अन्त्वसन्तस्येति दीर्घः । न लोपाभाव इति नकारस्यालिङ्गान्तत्वात् । यद्येवम्, हस्त्यश्वम् दण्डिषु इत्यादौ यत्वषत्वे न सिध्यत इत्याशङ्क्याह—सन्धिकार्ये षत्वे[5] चेत्यादि । यदयं स्वामोश्वराधिपतीत्यत्र (स्वामीशब्दस्येश्वर[6]शब्दे परतः समानदीर्घत्वं शास्ति, तच्छीलतद्धर्म इत्यत्र तत्साधुकारिष्विति च तत्कारिशब्दादुत्तरस्य सप्तमीबहुवचनस्य षत्वं, ततो ज्ञायते सन्धिकार्ये षत्वे च कर्तव्ये नास्त्यलुप्तवद्भाव इति । ननु

---

१. २।३।५६ (दु० वृ०)
२. २।३।५७ (दु० वृ०)
३. २।३।५८ (दु० वृ०)
४. अलुप्तवद्भावादनुकारान्तत्वात् एवं (वा०)
५. यत्वे (वा०)
६. न्यूनपाठः (वा०)

विभक्तिप्रकरणत्वाद् विभक्तिनिमित्ते कार्येष्वलुप्तवद्भावो विज्ञास्यते, न च सन्धिकार्यं षत्वं च विभक्तिनिमित्तं कार्यम्, अतः तद्भविष्यत्येवेति किमत्र ज्ञापकाश्रयणेन, अस्त्येतत्, किन्तु विभक्त्यधिकारस्य क्वचित् क्वचिद्विच्छिन्नत्वादविभक्तिनिमित्तेऽपि सन्धिकार्यादौ स्यादलुप्तवद्भावाशङ्केति ज्ञापकाश्रयणं ज्यायः। अलुप्तवद्भावश्रवणान्न संयोगान्तयोरित्यपि कृते तयोर्लोपोऽवगम्यत एव इति लोपग्रहणं सूत्रस्य वाचकत्वप्रतिपत्त्यर्थम्। परार्थे शब्दप्रयोगमन्तरेणापि वतिमतिदेशावगमाद्वतिकरणं विस्पष्टार्थम्।

इसुस्दोषां घोषवति रः २।३।५७[1]

घोषवति पर इति अविभक्तिसम्बन्धिन्यपि इति मन्तव्यम्। विभक्त्यधिकारस्यानपेक्षणात्, तथा च सर्पिर्मधुरम्, धनुर्मूलम्, दोर्मूलम् इत्याद्यपि सिद्धम्। ननु सकारस्य विसर्गे कृते तस्य च रेफे सति सर्पिर्भ्यामित्याद्यपि सिध्यतीति किं योगारम्भेणेत्याह—षत्वस्य बाध इति विसर्गस्यावकाशः, गीः वृक्षः षत्वस्यावकाशः, अग्निषु वायोषु सर्पिर्भ्यामित्यादौ तूभयप्रसङ्गे विसर्गं बाधित्वा परत्वात् षत्वं स्यादिति तद्बाधनार्थो योगारम्भः। न च बह्वपेक्षत्वेन बहिरङ्गं षत्वं बाधित्वा रेफसकार(मात्रापेक्षत्वेन[2]) अन्तरङ्गत्वाद्विसर्ग एव भविष्यतीति शक्यं वक्तुम्, विसर्गस्यापि घोषवन्तमघोषं विरामविषये चापेक्षमाणस्य सतो बहिरङ्गत्वात्।

धुटां तृतीयः २।३।५८[3]

अग्निमद्भ्याम्, ज्ञानभुद्भ्याम्[4] इति, मथ विलोडने, बुध अवगमने। अग्निं मथ्नाति, ज्ञानं बुध्यतीति क्विप् हचतुर्थान्तस्येति वस्य भः, अनेन तृतीयो दः, लृतुलसाः दन्त्या इति तु-शब्देन पूर्वाचार्यप्रसिद्ध्या तवर्ग उच्यते। लृश्च तुश्च सश्च ते लृतुलसाः ते दन्त्याः। दन्ते भवाः दन्त्याः दन्तस्थाना इति यावत्। तेनैषां स्थानितुल्यत्वात् सस्य तृतीयो क्रियमाणे तृतीयो दकारः प्रवर्तते। पयस्वीत्यादौ तु न भवति। वा-शब्दस्य व्यवस्थितविभाषावाचिनोऽभिसम्बन्धात् पयो विद्यते यस्य, तदस्यास्तीति विन्प्रत्ययः।

---

१. २।३।५९ (दु० वृ०)
२. मुण्ड-पेक्षत्वेन (वा०)
३. २।३।६० (दु० वृ०)
४. ज्ञानभुद्भ्याम् (मं०)

अघोषे प्रथमः २।३।५६[1]

अग्निमत्सु ज्ञानभुत्स्विति मथिबुधी विवबन्तौ पूर्ववद् भत्वम्। प्रियपुंस्क इत्यादौ सकारस्य प्रथमस्तकारो न भवति। भाषितं पुंस्कमिति निर्देशात्।

वा विरामे २।३।६०[2]

विराम अवसाने वर्तमानानामिति विरामव्यपदेशभाजामन्तभूतानामित्यर्थः। तृतीयग्रहणानुवृत्त्या, पक्षे तृतीय इति तेन प्रथमाभावपक्षे घुटः स्वरूपेणावतिष्ठन्त इति भावः।

रेफसोर्विसर्जनीयः २।३।६१[3]

रेफश्च सश्चेति द्वन्द्वः, यथादर्शनमिति प्रयोगानुसारेण गीर्धूरिति गृ निगरणे धुर्वी हिंसायाम्। गृणातीति क्विप्, ऋदन्तस्येरगुण इतीरादेशः व्यञ्जनाच्चेति सि-लोपः। इरूरोरीरूरौ। पयः यमः इति नपुंसकात् स्वमोरिति सिलोपः व्यवस्थितविकल्पानुवृत्तेरिह न भवति। गीर्षु धूर्षु। नन्वत्रास्तु विसर्गः। रत्वं तस्य भविष्यति। भवेदेतदेवम् यदि घोषवत् स्वर पर इति नियमो न स्यात्। इह नृकुट्यां भवो नार्कुटः इत्येवमादेरणिष्यत इत्यणि कृते आदिवृद्धौ च सञ्जातायां रेफस्य विसर्गो न भवति। अन्तरङ्गे विसर्गे कर्तव्ये बाह्यतद्धितापेक्षिण्याः बहिरङ्गायाः वृद्धेरसिद्धत्वे सति रेफाभावात्। श्रेयानित्यादावपि सकारस्य न भवति, संयोगान्तलोपस्य बलीयस्त्वात्।

विरामव्यञ्जनादावुक्तं नपुंसकात्स्यमोर्लोपेऽपि २।३।६२[4]

विरामव्यञ्जनादाविति बहुव्रीहिगर्भो द्वन्द्वः। उक्तमिति वचेः क्तप्रत्यये स्वपिवचीत्यादिना सम्प्रसारणमित्यनेन कार्यमात्रं निर्दिश्यते, तेन कार्यमात्रं विधीयमानं नपुंसकविधिभाक्, कार्यमात्रस्य विशेषणविशेष्यभावेन विरामव्यञ्जनादाविति स्यमोर्लोप इति सत्सप्तमी स्यमोर्विशेषणमवधित्वेन नपुंसकादित्यपि शब्दः कार्यव्यभिचारार्थः। सूत्रार्थस्तु वृत्तावेवोक्तः। लोपे कृते सति भवतीति कस्येत्याह—नपुंसकस्यैवेति। तस्यैव प्रकृतत्वेनावस्थितत्वात्।

---

१. २।३।६१ (दु० वृ०)
२. २।३।६२ (दु० वृ०)
३. २।३।६३ (दु० वृ०)
४. २।३।६६ (दु० वृ०)

अन्यस्य चाश्रूयमाणत्वादिति भावः। सुद्यु इति। अत्र दिव्-शब्दस्य द्युभ्यामित्यादौ दिव उद्व्यञ्जन इत्युत्वम्। यद् व्यञ्जनादावुक्तं तल्लुप्तयोरपि स्यमोरप्राप्तमप्यस्माद् वचनाद् भवति। सुपथीति पन्थि-शब्दस्य व्यञ्जने चैषां निरिति नलोपः। पथिभ्यामित्यादौ व्यञ्जनादावुक्तः। स्यमोर्लोपेऽप्यत्र भवति, विरामव्यञ्जनादाविति किम्, शोभनाः विद्वान्सो यत्र कुले सुविद्वत्, अघुट्स्वरादौ सेट्कस्येत्यघुट् स्वरादौ सेट्कस्योत्वमुक्तम् तत् स्यमोर्लोपे सति न भवति। विरामव्यञ्जनग्रहणस्य प्रयोजनं न विद्मः। विरामविषये हि यत् कार्यमुक्तं तत् स्यमोर्लोपे सति केन विनिवारितम्, यदनेन विधीयते। यद्वा विरामव्यञ्जनादौ यौगपद्येन यदुक्तं तद्व्यञ्जनादावप्युक्तमिति व्यञ्जनादिग्रहणादेव तस्य विधानं भविष्यतीति किं विरामग्रहणेन, विभक्तिप्रकरणाद्विभक्तिव्यञ्जने विधिरयमिति मन्यमानः यश्चोदयेत्। नन्वपास्य व्यञ्जनग्रहणं स्भ इति विभक्तिव्यञ्जनपरिग्रहणार्थं स्भ-ग्रहणं कस्मान्न क्रियते इति तं प्रत्याह—स्भ-ग्रहणमित्यादि व्यञ्जनशब्दं स्वरूपेणोपादाय यत्कार्यमुक्तम्, यथा दिवउद्व्यञ्जन इत्याद्युक्तं तस्य स्यमोर्लोपे सति विधानं यथा स्यादित्येवमर्थं व्यञ्जनग्रहणं क्रियते, तेन यद् तद् इत्यत्र त्यदाद्यत्वम् व्यञ्जनशब्दम् अनुच्चार्य विधीयमानं न भवति यत्क्रियते तत् कर्मेति ज्ञापकं सि-लोपविषय एव त्यदाद्यत्वाभावं विदध्यात्। अमो लोपे तु त्यदाद्यत्वं स्यादेव। एतत् कुलमित्यत्र तु वाच्यं किमिति ज्ञापकालम्भनं न ज्यायः। यद्येवमित्यादि। यदि व्यञ्जनशब्देन [1]उच्चारितस्य कार्यस्य प्रतिपत्त्यर्थं व्यञ्जनग्रहणं तदा इदं कुलमित्यत्र अद्व्यञ्जनेऽनक् इतीदमोऽकारादेशो व्यञ्जन)शब्दोच्चारणेन विधीयमानः प्राप्नोति, स कस्मान्न भवतीत्याह --सत्यमित्यादिना गतार्थम्।

"इति भट्टोग्रभूतिकृते शिष्यहितान्यासे शिष्यालोकाभिधाने नामप्रकरणे युष्मत्-पादस्तृतीयः।"

चतुर्थः पादः

अव्ययीभावादकारान्ताद्विभक्तेर्नाममपञ्चम्याः २।४।१

अव्यय-शब्दोऽव्ययसंज्ञासूत्रे-सुविस्तारं[2] कृतव्युत्पत्तिः। भाव-शब्दोऽपि भवतीति भाव इति। भवतेर्णप्रत्ययान्तः। ण-प्रत्ययस्तु ज्वलादिर्दुनीभ्यो ण

१. न्यूनपाठः (मं०)
२. सुविस्तरम् (मं०)

इत्यत्र वक्ष्यमाणे भवतेरनुपसर्गे वा णौ वक्तव्य इति वचनेन। अनव्ययमव्ययं भवतीत्यव्ययीभावः। तमादित्वादव्ययशब्दात् च्विप्रत्ययः, अतएव निर्देशात् च्वेर्लोपः, ईत्वं चावर्णस्य, विभक्तीनां स्थानेऽमादेशो भवतीति। ननु चोपकुम्भादव्ययीभावः पूर्वपदार्थप्रधानः, पूर्वपदार्थस्य चासत्त्वभूतत्वात्क्रियासम्बन्धो नोपपद्यते, तदनुपपत्तें च कर्मादिभावोऽव्ययीभावस्य न सम्भवतीति तत् कथं कर्मादिकारकविषयाः विभक्तयः स्युः। सत्यम्, अस्त्येतत्। किन्तु यद्यपि पूर्वपदार्थः सामीप्यादिलक्षण उपकुम्भमानयेत्यादिवाक्ये आनयनादिक्रिया साक्षान्न सम्बध्यते, तथापि कुम्भाद्यपेक्षया यः समीपः तस्य क्रियया सम्बन्धात् तद्द्वारेण सामीप्याद्यपि क्रियया सम्बध्यत इत्येवमुपकुम्भादेः कर्मादिभावोऽस्त्येवेति सन्त्यव्ययीभावात् कर्मादौ विभक्तयः। सनपुंसकलिङ्गस्यादिति वा नपुंसकलिङ्गताविधानात् ज्ञापकादव्ययीभावस्यावसितं सत्त्ववाचित्वमिति क्रियया तस्य सम्बन्धो युज्यत एवेति पञ्चमीविभक्तिं वर्जयित्वेति भिन्नवाक्यताप्रदर्शनेनापञ्चम्या इति प्रसज्यप्रतिषेधोऽयं न तु पर्युदास इति दर्शयति तथा च विभक्तिग्रहणं क्रियते, पर्युदासे हि विभक्तिग्रहणमपार्थकं स्यात्। अव्ययीभावस्याव्ययत्वात्सेरव्ययाच्चेति लुकि प्राप्ते वचनम्। समीपं कुम्भस्य उपकुम्भमिति पूर्वं वाच्यमित्यादिना अव्ययीभावसमासः। तिष्ठति पश्य देहिस्वमित्येतदुपन्यासः[1] प्रथमा-द्वितीया-चतुर्थी-षष्ठीनां प्रदर्शनार्थः। तासामम्भावः, अकारलोपम्, यद्येवममोऽकारकरणमपार्थकं स्यात्, नैतत् असति हि अकारकरणे घोषवन्निमित्तमकारो दीर्घमिति दीर्घत्वमाशङ्क्येत। राजपुरुष इति तत्पुरुषोऽयं न त्वव्ययीभावः। समीपं वध्वा उपवधु इति भवत्ययमव्ययीभावः नत्वकारान्तः, सः नपुंसकलिङ्गस्यादिति नपुंसकत्वात् स्वरो ह्रस्व इति ह्रस्वः। अकारेणाव्ययीभावस्य विशेषणात् ([2]अकारान्तोऽयमिति तदन्तग्रहणे) लब्धे पुनरन्तग्रहणं लाक्षणिकाकारान्तत्वार्थम्, तेन समीपं शरदामुपशारदमित्यादावकारे समासान्तेऽप्यम्भावः सिद्धो भवति। उपकुम्भतेति। तात्वौ भावे इति ता-प्रत्ययः।

वा तृतीयासप्तम्यौ २।४।२

प्राप्तविकल्प इति पूर्वसूत्रेण नित्यं प्राप्तत्वात्, यद्येवम्, पृथगारम्भसामर्थ्याद्विकल्पो विज्ञास्यते तत् किं वा ग्रहणेन, असदेतत्। पृथगारम्भो हि

१. स्वमित्येषामुपन्यासः (वा०)
२. अकारान्तादिति तदन्तत्वे (वा०)

पूर्वयोगे विकल्पं विदध्यात्, अयं तु विधिर्नित्यो विज्ञायेत[1] अनव्ययीभावार्थो वेति वा ग्रहणं ज्यायः ।

अन्यस्माल्लुक् २।४।३

अन्यस्मादनकारान्तादव्ययीभावादिति । एतेन विशेष्यत्वाल्लब्धप्रधानभावोऽव्ययीभावोऽन्यग्रहणेन विशेष्यत इति दर्शयति, यदि पुनः विशेषणमकारान्तादित्येतद् विशेष्यते ततोऽन्यस्मादकारान्तादिति व्याख्यायमाने राजपुरुषादेरपि लुकं प्रत्यवधित्वं विज्ञायते । विभक्तीनां लुग्भवतीति । नत्वनन्तरयोतृतीयासप्तम्योरेव, कुतः, विभक्तिग्रहणस्यानपेक्षणात् । उपवधु कृतमिति कृतशब्दः तृतीयायाः लुक्प्रदर्शनार्थः । उपवध्वाः[2] स्वमिति स्वशब्दोऽपि षष्ठ्याः । अधिस्त्रीति । स्वरो ह्रस्व इति ह्रस्वः । अनेन सेर्लुक् । अन्यस्मादिति किमिति, उत्तरत्र लुग्ग्रहणं कियतामनकारान्तत्वादव्ययीभावादव्ययत्वादेवोत्तरसूत्रेण लुग्भविष्यतीति किमनेन योगारम्भेणेति मन्यमानस्यैष प्रश्नः, इतरोऽप्यनकारान्तादेवाव्ययीभावाद्विभक्तीनां लुग्यथास्यादकारान्तात् मा भूदिति नियमार्थोऽस्य योगस्यारम्भः इत्यभिप्रायेण प्रत्युदाहरति उपकुम्भेन उपकुम्भ इति ।

अव्ययाच्च २।४।४

अव्ययात्परमासां विभक्तीनामिति । नन्वेकत्वादिष्वर्थेषु विभक्तयः स्मर्यन्ते, न च तैरव्ययस्यास्ति योगः, अलिङ्गसंख्यमव्ययमिति वचनात् । ततश्चाव्ययात्परा विभक्तयो नैव सन्तीति किमर्थमिदमुच्यते, अस्त्येतत् । अस्मादेव तु लुग्विधानारम्भाद्विज्ञायते सन्त्यव्ययाद्विभक्तय इति । तेन तासां श्रवण-निवृत्तये वचनम् । ननु रूपविशेषलक्षणकस्य फलस्य विभक्त्युत्पत्तावप्यनुपलभ्यमानत्वात् किं विभक्तिभिरुत्पन्नाभिः प्रयोजनमिति पृच्छति, यदि तासामित्यादि । पद-संज्ञा यथा स्यादित्युत्तरयति । केवलानां चादीनामसञ्ज्ञातायां विभक्तौ पदसंज्ञा न स्यादिति तत्सिद्धये तेभ्यो विभक्तय उत्पद्यन्त इति[3] भावः । किं पुनः सत्यां पदसंज्ञायां फलमित्याह—सत्यां तस्यामित्यादि । ग्रामश्च ते स्वमित्यादि । युष्मदस्मद्, ङस्, तवममावादेशौ तयोः[4] उपपदात्

१. विज्ञायते (भं०)
२. उपवधु (भं०)
३. इत्यर्थः (भं०)
४. तयोः पदात् (वा०)

च शब्दात् परयोः त्वन्मदोरेकत्व इत्यादिना ते मे इत्येतावादेशौ। यद्येवम्, पदत्वसिद्धये प्रथमैकवचनमेवास्तु किं वचनान्तरोत्पत्त्या, अतो विभक्तीनामित्ययुक्तो बहुत्वनिर्देशः, सत्यम्, प्रकृतिभेदेन यद् भिन्नं प्रथमैकवचनं तद्भेदादेष बहुत्वनिर्देशः।

रूढानां बहुत्वे स्त्रियामपत्यप्रत्ययस्य २।४।५

रूहेः गत्यर्थाकर्मकेत्यादिना कर्तरि क्तः प्रत्ययः, हो ढ इत्यादिना ढत्वादिकार्यं, पतनं पत्, कृत्ययुट इति क्विप्, नपत् अपत् अपतिसाधु अपत्यम्। तत्र साधौ च य इति यः। प्रत्ययशब्दः इणो घ प्रत्ययान्ताः ये शब्दा इत्यादि। एतेन जनपदसमानशब्दात् क्षत्रियवाचिनो रूढशब्देनेह परिगृह्यन्त इति दर्शयति। तथा च पाञ्चालस्य विप्रस्य[1] अपत्यानि बहूनि पाञ्चाला इत्यत्र लुक् च न भवति अपत्य-प्रत्ययस्य बहुत्व उत्पन्नस्येति। एतेन बहुत्व इत्येतत् सन्निहितस्यापत्यप्रत्ययस्य विशेषणम्, न तु बहुत्वाभिधायिनो बहुवचनस्यायं निमित्तभाव इति दर्शयति। यदि हि एवं भवेत् तत आङ्ग्य इत्यादावपत्यप्रत्ययस्य स्त्रीप्रत्ययेन व्यवहितत्वाद् बहुत्वविषयं बहुवचनं परं न सम्भवतीति प्राप्त्यभावादस्त्रियामिति निषेधं न कुर्यात्। तस्मादपत्यबहुत्वे य उत्पन्नः प्रत्ययस्तस्यालुगित्यपत्यप्रत्ययः बहुत्व इत्यनेन विशेष्यते। स्त्रीविषयं वर्जयित्वेत्येतेन व्याख्यानात्। अस्त्रियामयं निषेधो न तु विधिरिति दर्शयति। वृद्धेरभाव इति वृद्धिरादौ सणीत्यनेन प्राप्तायाः वङ्गः कलिङ्ग इति अनपत्यप्रत्ययेऽप्यणो लुक्, पुरोरपत्यानि बहूनि पौरव इति पुरुशब्दोऽयं राजविशेषाभिधायी। जनपदेन समानशब्दो न भवतीत्यपत्यार्थं[2] विहितस्याणो लुग्न भवति। प्रियवाङ्ग इत्यादावपि न भवति, प्रत्ययस्यात्रैकत्वविषये उत्पन्नत्वात्। बहुत्वार्थावगतिस्तु अन्यपदार्थत्वात्। ननु चायमपत्यस्येति[3] क्रियताम्, अपत्यशब्देन चाण्णन्तेनापत्यार्थे भावः प्रत्ययः च[4] व्यपदेक्ष्यत इति किं प्रत्ययग्रहणेन, अस्त्येतत्, उत्तरत्र क्वचिल्लुगभावार्थं प्रत्ययग्रहणम्, तेन "गोपवनं शिस्नुविन्दुः भाजनः, अश्वावतारः श्यामाकः श्यामपर्णं" इत्येतेभ्यो विदाद्यनुवृत्तेभ्योऽप्यणो लुग्न भवति। गोपवनस्यापत्यानि बहूनि गौपवना इत्यादौ[5]।

---

१. न्यूनपाठः (भं०)
२. भवतीत्याह (भं०)
३. चापत्यस्येति (भं०)
४. एव (भं०)
५. इत्यादीनि (भं०)

गर्गयस्कविदादीनां च २।४।६

द्वन्द्वगर्भो बहुव्रीहिरित्येतेनादिशब्दस्य प्रत्येकं सम्बन्धं दर्शयति। यदि पुनः बहुव्रीहिगर्भो द्वन्द्वः स्यादादिशब्दस्य विदशब्देनैव सम्बन्धः स्यात्, एवं तु न विज्ञायते, विदादिगर्गयस्कानामित्येवमकरणात्। तमेव प्रत्येकमभिसम्बन्धं दर्शयितुमाह—गर्गादीनां यस्कादीनां विदादीनां चेति आरूढार्थं वचनम्। तेन पूर्वेण सिद्धे सत्ययमारम्भ इति भावः। अणो लुगिति वाणपत्यय इत्यनेन विहितस्य, अन्येभ्यस्तु यस्कादिगणपठितेभ्यः कम्बलहारादिति अणो लुक्। ([1]विश्रिप्रभृतिभ्योऽप्येण एवं यस्कादिभ्यो यथा प्रत्ययप्रयोगेनोत्पन्नस्यापत्यप्रत्ययस्य लुग्बोधकः अणो लुगिति) अपत्यार्थविहितस्य चकारोऽनुक्तसमुच्चयार्थः। ([2]एकत्वद्वित्वे चोत्पन्नस्य तत्पुरुषे समासे लुक्प्रवर्तते इति) तेन गर्गस्य गार्ग्ययोः कुलमिति विगृह्य गार्ग्यकुलं गर्गकुलमित्यादावपि षष्ठीतत्पुरुष एकत्वे द्वित्वे च ण्यस्य वा लुग्भवति। एवं च वैदस्य वैदयोर्वा कुलं वैदकुलम्। विदकुलमित्यादावण्यणः, अन्ये तु यत् गार्ग्यस्य गार्ग्ययोर्वा कुलं तत् गर्गस्यापि कुलं भवत्येवेति व्याचक्षते, एवं च गर्गकुल-शब्दे गर्गशब्द एव षष्ठ्यन्तः समस्यते न तु गार्ग्यशब्दः। तत्किमेवमर्थेन समुच्चयकथनेन, तत्तु पूर्वसूत्रापेक्षया गर्गादिविषयमित्याहुः। तन्न चतुरस्रम् इत्यपरे[3] मन्यन्ते। यतो यद् गर्गस्य गार्ग्ययोर्वा कुलं तद् गर्गस्यापि कुलं भवत्येवेति केनापह्नुतं विशेषविवक्षायां त्वेकत्वद्वित्वविषये गर्गकुलमित्येतदिष्यमाणं न प्राप्नोतीति तत्संसिद्धये समुच्चयकथनमेव ज्यायः।

भृग्वङ्ग्यङ्गिरस्कुत्सवसिष्ठगोतमेभ्यश्च २।४।७

इदमप्यारूढार्थं वचनम्। भार्गव इति, उवर्णस्त्वोत्वमापाद्य इत्योत्वम्, पूर्ववदणिति—तस्येदमित्यनेन।

यतोऽपैति भयमादत्ते वा तदपादानम् २।४।८

भीतिः भयम्, इति अच्[4]प्रत्ययः। अप आदीयते यस्मादित्यपादानम्। कृत्ययुट इति युट्, अप एतीति द्वे पदे इति, तत्र अप इति प्रथमान्तम्, एतीत्या-

---

१. न्यूनपाठः (मं०)
२. न्यूनपाठः (मं०)
३. इत्यन्ये (मं०)
४. अल् (मं०)

ख्यातपदम्, पूर्ववदवर्णस्य लोप इण एकारे निषिद्ध इति न भवति। तथा आदत्ते इति द्वे पद इति सम्बध्यते। आदत्ते इति डुदाञ् दाने. आङ् पूर्वः, ततः सेरध्ययाच्चेति सिलोपः, ते अन्-विकरणः, जुहोत्यादेश्चेति लुक्, जुहोत्यादीनां सार्वधातुक इति द्विर्वचनम्, ह्रस्वः। अभ्यस्तानामाकारस्येत्यालोपः। अघोषेष्वशिडामिति दस्य तत्वम्। तदिति संज्ञी, अपादानमिति संज्ञा, शिष्टं संज्ञिनो-विशेषणं, इत्थमवयवार्थं उत्तरत्र बोद्धव्यः। समुदायार्थं व्याख्यातुमाह - अपैति इत्यादिना। विश्लेषं प्राप्नोतीत्यपक्रामतीत्यर्थः। यतो भयमिति। भयमाकुलीभावः। ग्रामादागच्छतीति ग्रामस्यापादानसंज्ञायां शेषात् कर्मेत्यादिना अपादाने पञ्चमी, ग्रामादागमिष्यतीत्येतेनापैतीति वर्तमाननिर्देशो अत्र न विवक्षितोऽपायमात्रस्य विवक्षितत्वादिति दर्शयति। तेन भविष्यत्यपायभूते चासौ संज्ञा भवति यथा च वर्तमाननिर्देशस्याविवक्षा, तथैकत्वसंख्याया अपि। तेन ग्रामादागताविद्यापि भवति। एवमुत्तरत्राप्यविवक्षा संख्याकालयोः। इह च न केवलं कार्यसम्प्राप्तिपूर्वकोऽपायो गृह्यते, यावत् बुद्धिसंसर्गपूर्वकोऽपि इत्यभिप्रायेणोदाहरति— अधर्मान्निवर्तत इत्यत्र ह्यपायो बुद्धिसंसर्गपूर्वकः। तथाहि य एष मनुष्य इष्टानिष्टयोगं भाविनमभिसमीक्ष्य[1] प्रवर्तते सः पूर्वं स्तेयादिकमधर्मप्रकारं बुद्धौ[2] तावत्परिगृह्णाति ततोऽधर्मस्य दुःखहेतुतां पश्यंस्ततो बुद्धिं निवर्तयति, एवं चात्रापायो विद्यत एव गौणमुख्यपरिभाषा चेह प्रकरणे लक्ष्यानुरोधान्नाश्रीयते। एवमधर्माज्जुगुप्सते, अध्ययनाद्विरमति[3], अध्ययनात् पराजयते, आलस्योपहतो दुःखमेतदध्ययनमिति मत्वा ततः पराजयते न्यूनीभवतीत्यर्थः। उपाध्यायादन्तरत्वे मा माम् उपाध्यायोऽद्राक्षीदिति निलीयत इत्यर्थः। उपाध्यायादधीते, उपाध्यायात् शृणोति, उपाध्यायमुखान्निष्क्रामतः शब्दान्नादत्ते इत्यर्थः। यद्येवम्, उपाध्याये शब्दानां सम्भवो न स्यात्। नैतत्। नदीस्रोतोवत्तेषां सन्ततं प्रतीतेर्मूलदेशादपसर्पणं नास्त्येव। नटस्य शृणोतीत्यादावपि तर्ह्यपादानसंज्ञा प्राप्नोति, न भविष्यति, क्रियाश्रुतावपि कारकत्वपरिहारेण सम्बन्धस्यात्र विवक्षितत्वात्। यथा च "अनुचकार भगवतो नारायणस्य" "न माषाणामश्नीयात्" इत्यादौ। एवं शृङ्गाच्छरो जायते, शरः शृङ्गादपक्रामतीत्यर्थः। ननु चापायो विश्लेषः, स च द्वयमपेक्षते, यतो विश्लेषः यच्च विश्लिष्यति। एवं च शिरो यदि संस्तुतोऽभूतप्रादुर्भावलक्षणं जन्म तस्य

१. समीक्ष (पाठभेदः वा०)
२. बुद्ध्या (मं०)
३. अधर्माद्विरमति (मं०)

नोपपद्यते । अथासंस्तुतोऽपि जनिक्रियायाः कर्ता न कश्चिदिति जायमानस्यैवासम्भवात् । कथमुभयकर्तृकोऽपायो भवेद् येन शृङ्गादेरपादानसंज्ञा स्यात् । सत्यम् । किन्तु बहिरसत्यपि बुद्धिस्थेऽर्थे शब्दः प्रयुज्यते । एवं च बुद्धिसत्तासमाविष्टं वस्तु बहिरसदपि बाह्यादभेदेनावसीयमानं जायत इत्यनेन निर्दिश्यते । तथा च निर्वर्त्यस्यापि कर्मणो घटादेर्बहिरसतोऽपि बुद्धिसत्तासमाविष्टस्य सतः कारकत्वमुपपद्यते । एवं हिमवतो गङ्गा प्रभवति निस्सरतीत्यर्थः । सन्तत्या तु सरित्स्रोतसो मूलदेशान्नास्ति विच्छेदः । बलाहकाद्विद्योतते विद्युत् बलाहकान्निष्क्रम्य तेजो विद्योतत इत्यर्थः । कथमेतत्, उच्यते—इह यदा मेघाद् व्यतिरिक्तं तेजो विवक्ष्यते निस्सरणगर्भं च, विद्योतने विद्युतिवर्तते तदा भेदस्य विवक्षितत्वाद् बलाहकादिति प्रयोगः । यदा पुनः बलाहकान्तःपातित्वेन तेजो विवक्षितं भवति तदा तद् बलाहकान्नान्यदिति कृत्वा बलाहको विद्योतत इति प्रयुज्यत[1] एव, यदापि तेजसो बलाहकस्य च भेदविवक्षा निष्क्रमणञ्च तेजसो बलाहकान्न[2] विवक्ष्यते तदाधिकरणतया[3] बलाहकस्य निर्देशाद् बलाहके विद्योतत इति । एवं कुसूलात्पचतीत्यादौ आदानार्थे[4] पाके पचेर्वृत्तिः कुसूलादादाय पचतीत्यर्थावगमात् । कुसूलादिति पञ्चमीप्रयोगः एवं माथुराः पाटलिपुत्रेभ्य आढ्यतराः विभागक्रियामपेक्षमेतदपादानम्, यो हि माथुराणां पाटलिपुत्रकाणां च केनचिद् धर्मयोगेन साम्यमवगत्य पुनराढ्यतरत्वेनासाधारणेन धर्मेण तेषां विभागमवगच्छति स एवं वाक्यं प्रयुङ्क्ते । तदुक्तम्, पाञ्चालेभ्यः कुरवः आढ्यतराः इत्युदाहरणम् बुद्धावभिसन्धाय भर्तृहरिणान्यत्र बुद्ध्या समीहतैकत्वान्पाञ्चालान्कुरुभिः सह यदा विभजते वक्ता तदा अपायः प्रवर्तते । वृक्षस्य पर्णं पततीत्यत्र तु वृक्षस्य विशेषणत्वमात्रं विवक्षितुं न तु अवधित्वविवक्षेत्यत्रापादानसंज्ञा न भवति । चौरेभ्यो बिभेतीति चुरेरिन्नन्तात् चोरयतीति पचाद्यच्, चोर एव चौरः, वाणपत्ये इत्यतो वा शब्दाद् बहुलार्थाद् स्वार्थेऽण् प्रत्ययः । यथा रक्ष एव राक्षसः, वणिगेव वाणिज इति । उपाध्यायाद् विद्यामादत्ते इति । उपाधिपूर्वादिङ्, उपेत्यधीयते यस्मादितीङाभ्याञ्चेति घञ् । अत्र हीत्यादि । ततश्च ग्रामस्यापायेनायुक्तत्वादपादानसंज्ञा न सिध्यतीति भावः । सत्यमित्यादि । अयमर्थः, ग्रामान्नागच्छतीत्यादौ प्रतिषेधविषये प्रदर्शनार्थमपायविवक्षापूर्विका पूर्वमपादानसंज्ञा प्रवर्तते ततश्च

१. प्रसज्यत (भं०)
२. न्यूनपाठः (भं०)
३. तदधिकरणाद् (भं०)
४. आदानाङ्गे (वा०)

प्रतिषेधस्य विषयभूतायां तस्यां पूर्वं प्रदर्शितायां पश्चात् प्रतिषेधेन सम्बन्धः क्रियते । तेनापादानसंज्ञापूर्वकः प्रतिषेधः न सम्बद्धः इत्यदोषः । एवमुपाध्याय गां न ददातीत्यादावपि वाच्यम् । आदत्ते ग्रहणं प्रपञ्चार्थमित्युक्तम् । अन्ये तु भयमादत्ते इति भयग्रहणसम्बद्धमेतदादत्ते ग्रहणं कृतम्, न त्वनेन पृथगपादानसंज्ञा क्रियत[1] इत्याहुः । तदसारम्, यतो भयं तदपादानमित्येतावतैवार्थस्यावगतत्वाद् भयग्रहणसम्बन्धेनादत्ते ग्रहणस्यानुपयुज्यमानत्वात् । तथा भयग्रहणमपीति प्रपञ्चार्थमित्यनुषज्यते । अत्रैव कारणमाह—तथा हीत्यादि । बुद्धिसंसर्गपूर्वकोऽपायो अत्रास्तीति मन्यते । तथा हि य एष मनुष्यः प्रेक्षापूर्वकारित्वेन क्वचित् प्रवर्तते स निरूपयति, यदि मां चौरा पश्येयुः ततो ध्रुवं वधबन्धनादिकं कुर्युरिति बुद्ध्या तान्प्राप्नोति, प्राप्य च तेभ्यो निवर्तत इति स्फुट एवात्रापायः । गुरुसंज्ञाकरणमवधिभूतस्यैव ग्रामादेः संज्ञाप्रतिपत्त्यर्थम् । इतरथा हि योऽपैति सोऽप्यविशेषादपादानसंज्ञः स्यात् । नहि यतो—अपैतीत्यत्र यच्छब्देन वाच्येऽर्थेऽस्ति विशेषः । यदवधिरेवापादानसंज्ञो न त्वपैति क्रिया कर्तेति । तस्मादपैति क्रियाकर्तुः संज्ञा मा भूदवधेरेव यथा स्यादिति गुर्वी संज्ञा क्रियते ।

ईप्सितं च रक्षार्थानाम् २।४।९

अभिप्रेतवचनमिह व्युत्पन्न ईप्सितशब्दः । रक्षणं रक्षा, गुरोश्च निष्ठायामिति अकारप्रत्ययः, श्रुतानुमिताध्याहारैरित्यादि । इह सर्वत्र त्रिभिः प्रकारैः सूत्रार्थः कल्प्यते । क्वचिच्छ्रुतेन यथेह ईप्सितशब्देन, क्वचिदनुमितेन यथात्रैवापादानशब्देन, स हि पूर्वसूत्रे कृतकृत्यत्वादिहानुवर्तयितुं न पार्यते, तत्सदृशं तु यदनुमितमुत्तरत्रानुरोधादपादानमिह शब्दान्तरं तदिह सम्बध्यते, तेनापादानमित्येतदनुमितम् । क्वचित्तु, अध्याहृतेन, यथा अत्रैव भवति शब्देनापादानसंज्ञा भवतीति । एवं श्रुतेनानुमितेनाध्याहृतेन च शब्देन सर्वत्र सूत्रार्थस्य कल्पनादिह सप्तम्यन्तः प्रयोगशब्दः सूत्रार्थबलादध्याह्रियते । अन्यथा रक्षार्थानामितीयं षष्ठी किमपेक्ष्य स्यात् । प्रयोगशब्दाध्याहारात्किं सिद्धं भवतीत्याह—तेनेत्यादि । यवेभ्यो गाः रक्षतीत्यादि । अत्र यवानामात्मीयत्वेनेप्सितत्वादपादानसंज्ञा । यत्रापि परकीयाः यवा आत्मीयास्तु गावस्तत्रापि यवा ईप्सिता एव, तेषु गोभिः भक्ष्यमाणेषु गोस्वामिना राजभयोत्पादात् । यद्येवम्, गवामपीप्सितत्वादपादानसंज्ञा स्यात्, न भविष्यति, यवेषु[2] सावकाशायाः

१. विधीयते (मं०)
२. सवेषु (मं०)

तस्याः परत्वात्कर्मसंज्ञया बाध्यमानत्वात् । यतोऽपैतीत्यनेन सिद्धत्वादित्यस्य हेतोः दृढीकरणार्थमाह—अस्तीत्यादि ।

यस्मै दित्सा रोचते धारयते वा तत्सम्प्रदानम् २।४।१०

दातुमिच्छा दित्सा । ददातेर्धातोर्वा कर्मण इति सन्, द्विर्वा[1] सनिमीमेत्यादिना स्वरस्येत्वम् । अभ्यासस्य च लोपः । सस्य से सार्वधातुके त इति सस्य तः । शन्सु प्रत्ययादः अस्य च लोपः स्त्रियामादाप्, वृङ् अनवस्थाने ध्रियमानं प्रयुङ्क्ते, धातोश्च हेताविती्, सम्यक्[2] प्रदीयते यस्मै इति कृत्य युट इति युट्, यस्मै दित्सा दातुमिच्छेति यं विप्रादिकमुद्दिश्य दातुः दातुमिच्छा सोऽत्र यच्छब्देन निर्दिश्यते । ननु इच्छाशब्दे वाच्येऽर्थे विशेषो नावभाषते, ततो यथायं विप्रादिकमुद्दिश्य दातुः वितरितुमिच्छा प्रवर्तते, तस्याः विप्रादेः सम्प्रदानसंज्ञा (भवत्येव[3] यस्य दानविषये इच्छा दातुस्तस्य सता प्राप्नोति । अत्रोच्यते, सम्प्रदानमिति पूर्वाचार्यसंज्ञा) श्रवणान्न भविष्यति, तेन गवादिलक्षणेन कर्मणाभिसम्बध्यमानस्य विप्रादेरेवायं संज्ञा न तु दित्सावतः । यस्मै रोचत इति । पूर्ववन्मोदकादिना तर्प्यमाणस्य देवदत्तादेरनेन संज्ञा, न तु अभिलाष्यमाणस्य मोदकादेः । एवं यस्मै धारयते इत्यनेनाप्युत्तमर्णस्य संज्ञा न त्वधमर्णस्य । दित्सेति । ददात्यर्थो गृह्यते, तेन गुरवे ताम्बूलं वितरतीत्यत्रापि भवति । रोचते इत्यत्रापि रुच्यर्थाश्रयणाद् देवदत्ताय स्वदत इत्याद्यपि सिध्यति । दित्सेति किमिति । ददातीति कर्तव्ये दित्सेति किमर्थः सना निर्देशः इति भावः । दातुम् इच्छायां सत्यां यथा स्यात् । सत्यपि दाने तदिच्छायामसत्यां माभूदित्याकूतेन प्रत्युदाहरति । राज्ञो दण्डं ददाति । यद्येवम्, रजकस्य वस्त्रं ददातीत्यादावपि कस्मान्न भवतीत्याह—विशिष्टे विषये इत्यादि । तमेव विषयविशेषं प्रदर्शयितुमाह—तेनेत्यादि । दित्सेति । ददातेरर्थोपादानम् । तेन यत्र दाने दीयमानेन वस्तुनाभिसम्बध्यमानस्य परस्य स्वाम्य ममेदमित्यध्यवसायः उत्पद्यते । तत्रेयं संज्ञा प्रवर्तते । न च रजकस्य वस्त्रविषये स्वामित्वापादानमस्ति इति तस्य संज्ञा न भवति । देवताभ्यो बलिं ददाति पितृभ्यो जलं ददातीत्यादौ तु यद्यपि स्वाम्यत्वापादानमशक्यं कर्तुं देवतानामतीन्द्रियविषयत्वात्, पितृणां च नितान्तमसन्निधानात् । तथाप्यशक्येऽपि स्वामित्वापादाने संज्ञाः प्रवर्तन्त एव, कुतः यस्मिन्दाने शक्याधानमशक्याधानं वा परस्य स्वाम्यभिसम्बन्धीयते तद्

१. द्विर्वचनम् (भं०)
२. सम् (भं०)
३. न्यूनपाठः (वा०)

दानमित्येवं तूपादानलक्षणार्थाङ्गीकारेणास्याः पूर्वाचार्यसंज्ञाया इष्यमाणत्वात् । वा शब्दोऽनेकार्थत्वान्निपातानाम् अन्यत्रापि संज्ञा समुच्चिनोति, तेन श्लाघह्नुङ्-स्थाशप् इत्येतेषां प्रयोगे बोधयितुमभिप्रेतस्य सम्प्रदानसंज्ञा भवति । चैत्राय श्लाघते । चैत्रं श्लाघमानः तां श्लाघां तामेव बोधयितुमिच्छतीत्यर्थः । बोधयितुमनभिप्रेतस्य तु न भवति । चैत्रं श्लाघत इति । एवं चैत्राय ह्नुते, चैत्राय तिष्ठते, चैत्राय शपते, तथा क्रुधद्रुहेर्ष्यासूयार्थानां प्रयोगे यं प्रति कोपः तत्रापि[1] भवति । चैत्राय क्रुध्यति, चैत्राय द्रुह्यति, चैत्रायेर्ष्यति, चैत्रायासूयति । अथेर्ष्यासूययोः को भेदः, उच्यते — गुणान्प्रति द्वेषः ईर्ष्या इति । दोषोद्घोषणमसूया । चौरं द्वेष्टि, औषधं द्वेष्टि इत्यादौ द्विषिरनभिनन्दने वर्तते । तेन कोपविवक्षा नास्तीति संज्ञा न भवति । पूर्वाचार्यसंज्ञाप्रसिद्धिवशेन च वा शब्दस्य संज्ञा समुच्चयार्थत्वात् । सोपसर्गयोः क्रुधद्रोहयोः प्रयोगे सम्प्रदानसंज्ञाविषये कर्मसंज्ञा स्मर्यते । चैत्रमभिक्रुध्यति, चैत्रमभिद्रुह्यति । राधीक्ष्योः प्रयोगे यत्सम्बन्धेन शुभाशुभं पृच्छते तत् सम्प्रदानम् । चैत्राय राध्यति, चैत्रायेक्षते । ([2]नैमित्तिकश्चैत्रस्य दैवमालोचयतीत्यर्थः) एवं चैत्राय गां प्रतिशृणोति । चैत्राय गामाशृणोति । प्रत्याङ्भ्यां परः शृणोतिरभ्युपगमे वर्तते । ननु चैत्राय श्लाघत-इत्यादि सर्वं तादर्थ्यचतुर्थ्यैव सिद्धम्, असदेतत् । एवमुच्यमाने हि यस्मै दित्सेति वचनम्, अपार्थकम् स्यात् । अस्त्वेवमिति चेत्, कथं दाशगोघ्नौ सम्प्रदान इत्यादि व्यवहारो घटते, राज्ञो दण्डं ददातीत्यादावपि चतुर्थी स्यात् तादर्थ्यस्य विद्यमानत्वात् । श्लाघादिप्रयोगे च बोधयितुमनभिप्रेतस्यापि केन तादर्थी चतुर्थी न भवेत्, सोपसर्गयोश्च क्रुधद्रुहोः प्रयोगे तादर्थ्यमव्याहतमेवेति तत्रापि चतुर्थी स्यात् । न च सूत्रकारमते तादर्थ्यचतुर्थीविधायकं लक्षणमस्ति, यूपाय दारुत्यादौ तर्हि का गतिरिति चेत्, शेषाः कर्मत्यादौ चानुवृत्त्या सम्प्रदानादन्यत्रापि चतुर्थी समुच्चयनादेवमादौ यथाप्रयोगं चतुर्थी विज्ञास्यते । श्लाघादिप्रयोगेऽप्येव भविष्यतीति चेत्, न । बोधयितुमनभिप्रेतादपि चतुर्थीप्रसङ्गात्, तस्माद्वा ग्रहणमेव पूर्वाचार्यसंज्ञाविशेषप्रदर्शकत्वेन व्याख्येयम् ।

य आधारः तदधिकरणम् २।४।११

निपातनाद् घञ्, घृङ् अनवस्थाने इत्यस्मात् दध्नि घृतमिति अस्थिदधि इत्यन्नादेशः । अवमसंयोगादित्यकारलोपः । एतद् व्यापकमधिकरणम्, दध्नो घृतं व्याप्यावस्थानात् । पर्यङ्के शेत इति । एतच्चौपश्लेषिकम्, आधेयेन सह

१. तस्यापि (भं०)
२. नैमित्तिचैत्रस्यादेवमालोचयति इत्यर्थः (वा०)

संयोगलक्षणस्य उपश्लेषस्य सम्भवात् । दग्धस्तु घृतेन सह समवायेऽपि देश-विभागाभावादुपश्लेषस्य व्यवहारो न घटते इत्यौपश्लेषिकाद् व्यापकं पृथगेव । जले मत्स्या इति वैषयिकमेतत् । विषयो नान्यत्र भावः । यदा चक्षुरादीनां रूपादयो विषया इति । एवं गुरौ वसति, गङ्गायां घोष इत्यादि । यदि आधारस्याधिकरणसंज्ञा तर्हि क्रियां प्रत्याधारयोः कर्तृकर्मणोरप्यधिकरणसंज्ञा प्राप्नोति । देवदत्तः तु स्वपिति तण्डुलान् पचतीति कर्तृकर्मसंज्ञयोरनवकाशयो-रयं विषयस्ततो न भविष्यतीति चेत्, न । यत्र कर्तृकर्मसमवेते क्रिये तत्र यथा-क्रमं तयोः सावकाशात् । यथा कुसूलं भिनत्ति, ग्रामं गच्छतीति, नह्यत्र भेत्तरि देवदत्ते ग्रामे वा कर्मणि काचित्क्रिया समवेता येनात्राप्यधिकरणसंज्ञा कर्तृकर्म-संज्ञयोर्बाधिका स्यात् । अत्रोच्यते यत्र क्रियाधारभूते कर्तृकर्मणी तत्र कर्तृकर्म-संज्ञाभ्यामधिकरण संज्ञा बाध्यते, परत्वात् तस्यास्त्ववकाशः, यत्र क्रियाधारभूते कर्तृकर्मणी वद्धास्पदे यथा कटे देवदत्त आस्ते स्थाल्यामोदनं पचतीति । एवं च देवदत्तः स्वपिति, तण्डुलान्पचतीत्यत्र क्रियाधारत्वमनुप्राप्तयोरपि कर्तृकर्मणो-रधिकरणसंज्ञा बाधिता सती न प्रवर्तते । यत्राप्याधाराधेय भाव इति । वन्ध्यासुतो यातीत्यादिव्यवहारोऽन्यथानुपपत्त्या बुद्धिव्यवस्थापितस्यार्थस्य क्रियाकारकरूपत्वोपगमात् । बौद्धेऽप्याधाराधेयभावेऽधिकरणसंज्ञानिबन्धनं भव-तीति भावः । गौणमुख्यन्यायश्च कारकप्रकरणे नाश्रीयते तथा च गङ्गायां घोष इत्यादौ यदा देशधर्म आधारत्वं श्रोतस्युपचर्यते तदा गौणस्याप्याधारस्याधि-करण संज्ञा प्रवर्तते । अतएव गौणमुख्यभेदभिन्नस्य सर्वस्याधारस्य परिग्रहार्थो यत्तदोः निर्देशः । अन्यथा आधारोऽधिकरणमित्येवं ब्रूयात् ।

येन क्रियते तत्करणम् २।४।१२

येन क्रियते तत्करणसंज्ञं भवतीति । यद्येवं कर्त्रापि क्रियत इति तदपि करणं स्यात् । नैतत्, इह हि पूर्वाचार्यसंज्ञापरिग्रहात् कर्तृपरतन्त्रस्य क्रियां प्रति प्रत्यासन्नव्यापारतया[1] विवक्ष्यमाणस्येयं करणसंज्ञा विज्ञास्यते । यथा काष्ठैरोदनं पचतीत्यत्र काष्ठानाम् । तेषां हि प्रज्वलनजनितोष्णस्पर्शानुप्रवेश-लक्षणः यो व्यापारः तदनन्तरमेव क्रियासिद्धिरिति तेषां करणत्वम् । दार्व्या पचतीत्यादावपि दार्व्यादीनां पाकेन द्रव्येण सहोपकारविशेषात्मिका प्रत्यासत्ति-रिति तेषामपि करणभावः । उपकारविशेषलक्षणमपि हि प्रत्यासत्तिरित्युच्यते एवं लोके यथा—अयमस्य प्रभोः[2] प्रत्यासन्न इति । एवं च साधन-सामग्री

१. व्यापारस्य (मं०)
२. विभोः (मं०)

समवधानेऽपि यस्य यस्योपयोगातिशयाद् व्यापारप्रत्यासत्तिर्विवक्ष्यते, तत्सर्वमेव करणम्। तथा बहूनामपि व्यापारातिशयविवक्षायां करणत्वमुपपद्यते। अश्वेन पथा दीपिकया यातीति। अतएव विवक्षानिबन्धनत्वात् कारकभावस्य, स्थाल्यां पचतीत्यधिकरणमपि करणमिति व्यपदिशन्ति। स्थाल्यास्तून्नततर-कपालावयवत्वाद् व्यापारप्रत्यासत्तेर्विवक्षितत्वात्। न चेत्थं करणसंज्ञानिबन्धनं निमित्तं कर्तुरन्यस्य वा कारकस्य विद्यते। कर्त्रादिव्यापारादेवानन्तरं क्रियाया अनिष्पत्तेरिति न कर्त्रादयः करणव्यपदेशभाजः। दात्रेण लुनातीति। एतेन क्रियासामान्यवाचिना करोतेर्निर्देशात् क्रियाविशेषाभिधायी लुनातीति धातु-प्रयोगविषयेऽपि संज्ञेयमिति दर्शयति। यदा त्वित्यादि। पुरुषव्यापारपरतन्त्राः दात्रादयः कारणव्यपदेशभाजः यदा पुनस्तेषां क्रियां प्रति स्वातन्त्र्यं विवक्ष्यते तदा दात्रं लुनातीति करणसंज्ञा न भवति। स्वातन्त्र्यस्य स्वतः कर्तृसंज्ञाप्रव-र्तते। वेति वर्तते। स दीव्यति प्रयोगकरणसंज्ञा विषये कर्मसंज्ञां समुच्चिनोति, अक्षान्दीव्यति अक्षैर्दीव्यति, न च कर्मविवक्षात्रोपपद्यते, दिवः[1] क्रीडार्थस्या-कर्मकत्वात्। न चानुपपद्यमानं कर्म विवक्षितुं शक्यते, शेते इत्यादेरपि विवक्षायां सकर्मकत्वात् ग्रामं शेते इति प्रयोगप्रसङ्गात्। वेतनादिस्वीकरणे तु सम्प्रदान-संज्ञापि शताय परिक्रीतः, शतेन परिक्रीतः।

यत्क्रियते तत् कर्म २।४।१३

यत्क्रियते तत् कर्मसंज्ञः भवतीति। करोतेः क्रियासामान्यवाचित्वात् (यदपि[2] पठ्यते) यद्वा दृश्यते तत्सर्वं क्रियमाणत्वात् कर्मेति मन्तव्यम्। कटं करोतीति। तथाविधं वस्तु करोति यस्य निष्पन्नस्य सतः कट इति व्यपदेशो भवतीत्यर्थः। ओदनं पचतीत्यत्रौदनलक्षणस्य विकारविशेषस्य प्रतिपत्त्यर्थम्। ओदनार्थास्तण्डुला ओदनशब्देनोच्यन्ते। तत्र विक्लित्त्युपसर्जने विक्लेदनेऽत्र पचिः वर्तते। तेन विक्लिद्य तण्डुलान् विक्लेदयति इत्यर्थावगमात् ओदन-विक्लेदनक्रियायां कर्म भवतीति कर्मणि द्वितीया भवति। ननु पच्यते ओदनः स्वयमेवेति पचेः विक्लित्तिरेव [3]प्रधानभूतेत्यर्थः। यत्तु विक्लेदनं तदङ्गभूत-त्वादप्रधानभूतम्। प्रधानाप्रधानसन्निधौ च प्रधानशक्तेरुल्लासादोदनस्य विक्लित्तावाप्तकर्तृभावस्यासति कर्मत्वे कथं कर्मणि द्वितीया स्यात्।

---

१. दिवेः (मं०)
२. यदपदिश्यते (मं०)
३. प्रधानभूतोर्थः (वा०)

अस्त्येतत्[1], यत्तु यद्यपि पचेर्विक्लित्तिरर्थः प्रधानं तथापि पचतिशब्दापेक्षया पचिः विक्लित्त्युपसर्जने विक्लदने वर्तते। एवं शाब्दव्यापारमपेक्ष्य विक्लेदनमेव प्रधानम्, ओदनं पचतीत्यत्र सञ्जातमिति भवति। तत्र ओदनस्य कर्मत्वात्कर्मणि द्वितीया। अधिपूर्वाणामित्यादि। शीङ् स्वप्ने ष्ठा गतिनिवृत्तौ, आस् उपवेशने इत्येतेषामधिशब्दपूर्वाणां प्रयोगे आधारस्याधिकरणसंज्ञां बाधित्वा कर्मसंज्ञा वक्तव्या। न चैतदपूर्वं वक्तव्यम्। वेत्यस्यैवानुवर्तमानस्य संज्ञान्तरसमुच्चयार्थत्वेनावगतत्वात्। उपलक्षणपरत्वेन चैतदुक्तम्। तथा च अभिनिपूर्वस्यापि विशेः प्रयोगे आधारस्य कर्मत्वमिष्यते। ग्रामभिनिविशते। लक्ष्यानुरोधेन च कर्मसंज्ञासमुच्चयात्[2] कल्याणेऽभिनिवेश इत्याद्यपि भवति। एवमुपान्वध्याङ्पूर्वस्यापि वसतेः प्रयोगे आधारः कर्मसंज्ञः। ग्राममुपवसतीत्यादि भोजननिवृत्तिवाचिनि तूपवसतावधिकरणसंज्ञैव स्मर्यते। अकर्मकस्य धातोः प्रयोग इति यस्मिन्धातौ प्रयुज्यमाने सति किमित्याकाङ्क्षा कर्मविषया नोपजायते। सः सामान्येनाकर्मको धातुरुच्यते यथा —आस्यादिः। नह्यास्ते स्वपितीति वा प्रयुज्यमाने सति किमिति प्रश्नो भवति। तस्य धातोरकर्मकस्य प्रयोगे कालभावाध्वदेशानां कर्मसंज्ञाभिधातव्या तत्रेयत्तापरिच्छिन्ना क्रिया क्रियान्तरस्य परिच्छेदिका। कालः मासमास्ते इति परिच्छिन्नपरिमाणो मासः। आसनादिक्रियान्तरस्य परिच्छेदकः काल इति व्यपदिश्यते। भावो धात्वर्थ इति क्रियात्मकः। गोदोहमास्ते इति। यावता कालेन गौः दुह्यते तावन्तं कालमास्त इत्यर्थः। क्रोशमास्त इति। यावत् क्रोशः तावदयं सार्थमध्वगत आस्ते। अध्वशब्देन चेह परिमाणवतोऽध्वविशेषस्य क्रोशादेरेव द्वितीया स्मर्यते। तेन अध्वशब्दान्न भवति। कुरून् स्वपितीति शसोऽकार इत्यादिना पूर्वस्वरो नत्वं च। खट्वादिशयितः कश्चिन्नीयमानः कुरुमण्डलं यावत् स्वपीतीत्यर्थः। सूत्रोपात्तमेव च कालादीनां कर्मत्वमुक्तं यतो मासमास्त इत्यादावस्त्यादयो धातवः सकर्मक[3]व्यापारादिलक्षणधात्वर्थाङ्गाः आसनादावर्थे वर्तन्ते। तथा ह्ययम् अत्रार्थः। मासमासनक्रियया व्याप्नोतीत्येव चास्यादीनामिह विषये सकर्मकत्वात्सिद्धत्वात् कर्मण्येव द्वितीया। एवं च सति सकर्मकधातुप्रयोगेऽपि कालादयः कर्मत्वं भजन्त इति। मासं पचतीत्याद्यपि सिद्धं भवति। यत्तु एषामास्यादीनामकर्मकत्वाभिधानं तदासनादिमात्रवृत्तीनां सतामनङ्गीकृतसकर्मकव्यापारादिलक्षणधात्वर्थानामवगन्तव्यम्।

---

१. सत्यम् (भ०)
२. समुच्चयनात् (भं०)
३. व्यापनादि (वा०)

क्रियाविशेषणं चेति कर्मसंज्ञा वक्तव्येति सम्बध्यते, तेषां कर्मत्वं सूत्रसिद्धमेव, कुतः, क्रियायाः साध्यत्वात् तद्विशेषणस्यापि कर्मत्वायोगात् ।

यः करोति सः कर्ता २।४।१४

यः करोति सः कर्तृसंज्ञो भवतीति पूर्वाचार्यसंज्ञापरिग्रहात् स्वतन्त्रो भूत्वा क्रियासिद्धौ यः व्याप्रियते सः कर्तृसंज्ञो भवतीत्यर्थः । नन्वनेकसाधनसाध्यायां क्रियायां साधनानां परस्परापेक्षत्वात् कस्य स्वातन्त्र्यं यः स्वतन्त्रः सः कर्तेति व्यपदिश्यते । अन्ततः करणं सर्वत्रापेक्षणीयम् । तथा हि असिः च्छिनत्तीत्यत्र तैक्ष्ण्येनेत्यपेक्ष्य तैक्ष्ण्यं [1]च्छिनत्तीत्यत्राप्यात्मने इति । चैत्र आस्त इत्यत्रापि (वृत्तेः[2] इति) स्वतन्त्रस्य कर्तृसंज्ञायां स्थाली पचतीति स्थाल्यादीनामत्यन्तपराधीनवृत्तीनां स्वातन्त्र्यानुपपत्तेः कर्तृसंज्ञा न प्राप्नोतीति । अत्रोच्यते—इह विवक्षापराधीनवृत्तित्वात् कारकभावस्य स्वातन्त्र्येण विवक्षितो योऽर्थः तस्य कर्तृसंज्ञा । तत्र यद्यप्यनेकसाधनसाध्या सर्वा क्रिया, तथापि शब्दव्यापारापेक्ष्यैकसाधनसाध्यापि क्रिया भवति । नह्यसिः च्छिनत्तीत्यादौ शाब्दे व्यापारे अस्यादीनां स्वातन्त्र्यं प्रतिसाधनान्तरं विवक्षितम्, तेन विद्यमानायां अपि साधनान्तरापेक्षायाः अनुसञ्जनात् अस्यादीनामव्याहतमेव कर्तृत्वम् । इत्थं स्थाल्यादयोऽपि तण्डुलग्रहणधारणलक्षणे स्वव्यापारे अनुभूतस्वातन्त्र्य एवेति तेऽपि कर्तारः । तथा वृक्षः पततीत्यादौ पातादिव्यापारे वृक्षादयः । रुद्रेण कृतमिति । कर्तरि चेति तृतीया ।

कारयति यः सः हेतुश्च २।४।१५

यः कर्तारं कारयतीति । ननु यथा कर्तृसन्निधौ करणादीनां नास्ति स्वातन्त्र्यम्, एवं प्रयोजकव्यापारसन्निधावपि प्रयोज्यस्य पारतन्त्र्यं नास्ति । स्वातन्त्र्यमिति । कथं स्वतन्त्रता व्यपदेशे निबन्धनस्तस्य कर्तृव्यपदेशो येन यः कर्तारं कारयतीत्युच्यते । अस्त्येतत् । किन्तु प्रयोजकव्यापारसन्निधावपि प्रयोज्यस्य करणादिसाधनविनियोगादिना स्वव्यापारे स्वातन्त्र्यमस्त्येव । चशब्दात् कर्तृसंज्ञा चेति । तेनेङ्यजादेरिति कर्तरि विधीयमानं परस्मैपदं सिद्धम् ।

तेषां परमुभयप्राप्तौ २।४।१६

उभाववयवौ यस्येति । तसादित्वादुभशब्दाद्यः प्रत्ययः । परिभाषेयम् ।

---

१. छिन्नन्ति (वा०)

२. वृत्यति (व०) भ० ग्रन्थेऽपि नोपलभ्यतेऽयमंशः ।

परं कारकं परिभाष्यमाणम् उभयप्राप्ताविति सति सप्तमी। तेषामिति। निर्धारणे षष्ठी। समुदायार्थस्तु वृत्तावुक्तः। उभयोः प्राप्तिः उभयप्राप्तिरिति। ननु समासे उभयशब्दः श्रूयते, तत्कथं शब्दान्तरेणोभशब्देन विग्रहः क्रियत इत्याह—यद्यपीत्यादि। समासे तावदुभयशब्द एव स्मर्यमाणप्रयोगो न तूभशब्दः। उभयप्राप्तावित्यस्य च कारकद्वयप्राप्तावित्ययमर्थः। तं च द्वित्वलक्षणमर्थं प्रतिपादयितुमुभशब्देनैव द्वित्वार्थाभिधायिना विग्रहो न्याय्यः। स्यादेतत्, उभयशब्देनैव द्वित्वार्थाभिधायिना विग्रहः क्रियताम्, किमुभशब्दापेक्षयेत्याह—द्वित्वविषय इत्यादि। कथं पुनर्द्वित्वविषय उभशब्दस्य प्रयोगो न सम्भवतीत्याह—उभयशब्दो हीत्यादि। उभयो मणिः, उभये देवमनुष्याः इत्येकत्वबहुत्वे चोभयशब्देन द्वित्वलक्षणार्थाभिधायकेन विग्रहः कर्तुं न शक्यते, स्यान्मतम्, उभ इत्ययं शब्दो न द्वित्वमाह—तत्कथमनेनापि विग्रह इत्याशङ्क्याह—द्वित्वे तूभशब्द इति। तु-शब्दः उभयशब्दस्य विशेषं द्योतयति। उभयशब्द एकत्वबहुत्वयोः प्रयुज्यते। द्वित्वे पुनरुभशब्द एव समर्थो वक्तुमिति तेनैव विग्रहः। यथा शोभनलक्षणमर्थं प्रतिपादयितुं सुसखीत्यत्र शोभनशब्देन। कथं पुनर्वाक्यकाले प्रयुज्यमानस्योभशब्दस्य सम्बन्धिनं द्वित्वलक्षणमर्थम् उभयशब्दो वक्तुं समर्थः। उभाववयवौ यस्येति व्युत्पत्त्योभयशब्दोऽयमवयविनि सङ्घे वर्तते। उभ इत्ययं तु नैवमिति कथमुभशब्दप्रतिपाद्यमर्थमुभयशब्दोऽभिदध्यात्। सत्यम्। किन्तु यावतावुभावयवौ तावेव समुदितो सङ्घो भवति इत्यभेदव्यवहारोऽपि लोके सङ्घसङ्घिनोर्दृश्यते, तेन सङ्घधर्मेणोभयत्वेन द्वावेवात्र प्रतिपादितौ भवत [1]इत्यदूरविप्रकर्षेण शक्तो वोभयशब्द उभशब्दार्थं द्वित्वमभिधातुम्। उभयस्य प्राप्तिः उभयप्राप्तिः। यद्यप्येवं विग्रहः सम्भवति तथा ([2]उभयोः उभयशब्दयोः) विशेषः परिज्ञानार्थमुभयोः प्राप्तिरुभयप्राप्तिरिति विगृह्यते। एवं सति यद्यपीत्यादिना वृत्तिग्रन्थेन विषयविशेष उभयोभयशब्दयोः परिज्ञातो भवति। तेषामपादानादीनां कारकाणां मध्यादिति। ननु करोतीति कारकम्। कारकशब्दोऽयं कर्तृपर्यायः। कर्ता च स्वतन्त्रः उच्यते। न चापादानादीनां कर्तृपरतन्त्राणां क्वापि व्यापारे स्वातन्त्र्यकर्तृत्वमस्ति यन्निबन्धन एषां कारकव्यपदेशः स्यात्। उच्यते—अस्त्येव, तेषां निजव्यापारः, तदनुष्ठानद्वारेण तानि कर्तृव्यपदेशं भजन्ते। निजव्यापाराभिनिवर्तनद्वारेण च प्रधानक्रियायामुपयुज्यन्ते। अकिञ्चित्-

१. अस्पष्टोऽयमंशः।
२. उभयोभय (वा०)

करस्य पारतन्त्र्ययोगात्। कः पुनरेषां निजो व्यापारः उच्यते—अपादानस्य तावदवधित्वेनावस्थानमस्ति व्यापारः। यदि हि ग्रामादिरवधित्वेन नावतिष्ठते देवदत्तादीनामपायं प्रति कर्तृत्वमेव न स्यात्। सम्प्रदानस्यापि प्रेरणादिलक्षणः, त्रिविधं हि तत्, प्रेरकम्, अनुमन्तृ, कर्तुश्च निराकर्तृ। यथा—विप्राय गां ददाति, उपाध्याय गां ददाति, देवेभ्यो बलिं प्रयच्छतीति। अधिकरणस्यापि स्थाल्यादेः तण्डुलादिग्रहणधारणलक्षणः, करणस्यापि काष्ठादेर्ज्वलनादिक्रियालक्षणः, कर्मणोऽपि घटादेर्निवृत्तस्य सङ्कल्पविषयतापत्तिलक्षणः सङ्कल्पविषयतामनापद्यमानस्य घटादेः क्रियमाणत्वेनानभिसम्बन्धात्। विकार्यस्यापि काष्ठादेः विकारं प्रति प्रकृतिभावगमनम्। आदित्यं पश्यतीत्यादावपि आदित्यादेः प्राप्यस्य कर्मणो दर्शनादिविषयोपगमनलक्षणः। कर्तुरपीन्धनादिविनियोगलक्षणः। एवमेषामपादानादीनां निजव्यापारविषयः सम्भवति। कर्तृत्वमिति युज्यते कारकव्यपदेशः। कर्तृसंज्ञा तर्हि तेषां प्राप्नोति, न भविष्यति। प्रधानकर्तृव्यापारापेक्षया तेषां व्यापारस्य न्यक्कृतत्वात्। व्याप्यते हि प्रधानकर्तरि नाप्रधानानि सनिबन्धनं कार्यमारभन्ते "प्रभुसन्निधाविवामात्याः" तस्मात् ग्रामादागच्छतीत्यादौ ग्रामादेः स्वव्यापारं प्रति कर्तृत्वेऽपि न कर्तृसंज्ञाप्रसङ्गः। यत्परं कारकं[1] तदेव भवतीति। एतेनानियमेन प्राप्ते नियमार्था परिभाषेयमिति दर्शयति[2]। कः पुनरत्र नियमः प्राप्नोति, उच्यते—व्यक्तौ पदार्थे विषयान्तरे लब्धावकाशयोरपि संज्ञयोः स्पर्धाविषये[3] संज्ञाविधायकस्य लक्षणस्याप्रवृत्तौ सत्यां लक्षणानर्थक्यप्रसङ्गात्। पर्यायेण संज्ञाद्वयं प्राप्नोतीत्येष प्राप्नोत्यनियमः। पूर्वोक्तपरोक्तपरिभाषयेत्यादि। तस्याः पूर्वोक्तपरोक्तपरिभाषायाः एवायं प्रपञ्चः। अन्ये तु ब्रुवते क्वचित्परापरविधानेन[4] पूर्वोक्तविधिः प्रवर्तते इत्येतदनेन योगारम्भेण ज्ञास्यत इति। तेन अध्यैयाताम्[5] इत्यादौ परामपि स्वरादिलक्षणां वृद्धिं बाधित्वा पूर्वमियमादेशः प्रवर्तते। इङ्, अधिपूर्वः ह्यस्तनी, आताम्, अन्विकरणः अदादेर्लुगिति लुक्, स्वराविवर्णोवर्णान्तस्य धातोरियुवाविति इय्-स्वरादीनां वृद्धिरादेरिति ऐकारः।

प्रथमाविभक्तिर्लिङ्गार्थवचने २।४।१७

लिङ्गस्यार्थो लिङ्गार्थ इति। यदव्यभिचारितया लिङ्गात् प्रतीयते सः

---

१. कार्यम् (मं०)
२. न्यूनपाठः (भं०)
३. सामान्य (मं०)
४. परविधिर्बाधनेन (मं०)
५. अध्यायताम् (वा०)

सर्वो जात्यादिकोऽर्थो लिङ्गार्थ इत्युच्यते प्रथमा विभक्तिर्भवतीति । का पुनरसत्यां प्रथमायां प्राप्ता विभक्तिः, उच्यते—कर्तरि तृतीया । वृक्षादयो ह्यस्तिक्रियायां कर्तारः । क्रियापदश्रवणे ह्यस्तिक्रियानुषज्यते, तथा चाहुः—यत्रान्यत् क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयोक्तव्या इति । भवन्तीति वर्तमाना या आख्या । ननु प्रथमादयः शब्दाः स्यादीनां संज्ञात्वेन प्रसिद्धाः, ते च स्यादयः, तस्मात्परा विभक्तय इत्यनेनैव सिद्धाः, तत्किमर्थमिदं प्रकरणमारभ्यत इत्याह—तस्मात् परा इत्यादि । सत्यम्, सिद्धाः किन्तु विवक्ष्यमाणमिदं प्रकरणं तेषामेव स्यादीनामर्थं कथनार्थमारभ्यते । लिङ्गार्थे प्रथमा, कर्मणि द्वितीया, इत्यादिना प्रकारेण, यद्येवम्, इदमेव प्रकरणं स्यादीनां विधायकमस्तु,-किंत स्मात्परा इत्यनेन, असिदेतत्, एवं हि सति लिङ्गसंज्ञाविधायकात् सूत्रादनन्तरमुत्तरत्र लिङ्गाधिकारार्थं तदिति सूत्रं कर्तव्यं स्यात् । पञ्चादौ धुडित्यत्र चावश्यकं पञ्चादादित्येतद् भवेत्, ततश्च स्यादयः पञ्चप्रत्ययाः साक्षात् पठितव्याः स्युः । अकारो दीर्घमित्यादौ यद्विभक्तिप्रकरणमिदमिति प्रतिपत्तये विभक्तिग्रहणं कर्तव्यमापतति । प्रथमादिविभक्तीनां च लिङ्गं प्रकृतिरित्यावेदयितुमिह सूत्रे लिङ्गादिति वक्तव्यं स्यात्, न लोपविधौ हि लिङ्गग्रहणाद् धातोरपि परे प्रथमादय आशङ्क्येरनिति । तस्मात् परा इत्याद्यपि कर्तव्यमेव । वृक्ष इत्यादि । अत्र वृक्षादेरर्थस्यैकत्वादेकत्वेऽर्थे प्रथमैकवचनम्, द्विवचनबहुवचने तु द्वित्वबहुत्वयोः । कुत एतत्, एकोऽर्थ उच्यते येन तदेकवचनमित्यादिना क्रमेणैकवचनादि संज्ञानामनर्थकत्वात् । यद्येवम्, अव्ययानामसंख्यत्वादेकत्वादयो न सन्तीति तेभ्यः प्रथमा न प्राप्नोति । अव्ययाच्चेति इत्यस्य सूत्रारम्भसामर्थ्याद्भविष्यति । सम्पन्नो यवा इत्यादौ त्वेकवचनं जातिप्राधान्यस्य[1] विवक्षितत्वात् । एका च जातिः व्यक्तिप्राधान्यत्वे विवक्षिते सम्पन्नाः यवा इति बहुवचनम् । वयं तु ब्रूम इत्यादौ त्वेकत्वेपि बहुवचनं मनोवागात्मादिगतं बहुत्वमाश्रित्य प्रयुज्यते । लिङ्गाधिकाराल्लिङ्ग्यस्यैवार्थे वचने प्रथमा भविष्यतीति लिङ्गग्रहणं क्वचिद् व्यभिचारिण्यपि लिङ्गार्थे यथा स्यात् इति । तथा चोदाहरति । कुमारीकुण्डं द्रोणः आढकमिति । एवं कुमारः, कुण्डी कुण्डः तटी तटः तटम्, आढक इत्याद्युदाहार्यम् । कुमार्यादौ हि स्त्रीत्वे लिङ्गार्थो न भवति । विनापि तेन कुमारो देवदत्त इति कुमारशब्दस्य प्रयोगदर्शनाद् व्यभिचारित्वात् स्त्रीत्वस्य पुंनपुंसके चापि कुण्डादौ नियमेन विभक्त्यैव प्रतिपाद्येन हि तया विना किं कुण्डशब्दः पुंवृत्तिरुताहो नपुंसकवृत्तिरिति सन्देहो विनिवर्तते । जीवति च भर्तरि परेण जाते वर्तमानः पुल्लिङ्गः कुण्डशब्द इत्यस्त्येव सन्देहः

१. प्राधान्ये त्वविवक्षितत्वात् (वा०)

द्रोणादिभ्योऽपि परिमाणवृत्तिभ्यः सिद्धा प्रथमा, यदा तु ते द्रोणादिपरिमाण-प्रसङ्गे[1] व्रीह्यादौ वर्तन्ते तदा सा न सिध्यतीति लिङ्गग्रहणाद् भवति। अथ वचनग्रहणं किमर्थम्, न लिङ्गार्थे (इत्येवोच्यते[2] सत्सप्तमी चैषा विज्ञास्यते लिङ्गार्थे सतीति यत्र च लिङ्गार्थस्सन्) तत्रासाववश्यमुच्यत एवेति किं वचन-ग्रहणेनेत्याहुः—लिङ्गार्थे इति कर्तव्य इत्यादि। एकत्वादिष्वर्थेषु प्रथमाया एकवचनादीनि विधीयन्ते यत्र ते अर्था एकादिभिः प्रकृतिभिरुक्ता तत्र तानि न प्राप्नुवन्ति, उक्तार्थानामप्रयोग इति कृत्वा तस्मात् तत्रापि विषये तेषां वचन-मभिधानं यथा स्यादिति वचनग्रहणम्। द्वाविति, औ त्यदाद्यत्वम्, प्रथमायाः विभक्तित्वव्यभिचारात् किं (भक्तिग्रहणेनेत्याह[3]—विभक्तिग्रहणमित्यादि। प्रथमादीनां) विभक्तिव्यपदेशोऽप्यस्तीति। एतावन्मात्रमस्त्येव प्रयोजनम्। विभक्तिग्रहणस्य दृढप्रयोजनाभावात् तेन तथा प्रयोजनवदित्युच्यते। इतरथा कथमाचार्यः प्रयोजनशून्यं पदमभिदध्यात्।

आमन्त्रणे च २।४।१८

मन्त्रि गुप्तपरिभाषण इत्यस्मात् कृतनकारागमात् चुरादीन्नन्तादामन्त्रित-मामन्त्रणमिति युट्। आमन्त्रणेऽर्थे इति। आभिमुख्यकरणमामन्त्रणम्, तत्र वाच्य इत्यर्थः। हे शङ्कर इत्यादि। ह्रस्वनदीत्यादिना सिलोपः। आमन्त्र-णस्य लिङ्गार्थतां मन्यमानः पूर्वेण सिद्धिरस्तीति मन्वानः पूर्वपक्षयति। नन्वि-त्यादि। असदित्यादिना परिहारमाह—आमन्त्रणं हि क्रियारूपत्वाल्लिङ्गार्थे नान्तर्भवति। ततश्च तेनाधिको लिङ्गार्थे हे शङ्कर इत्यादौ प्रतीयमानः कथं पूर्वेण प्रथमां विदध्यादिति तद्विधानार्थो योगारम्भः। शुद्धस्येति। प्रतीयमाना-धिकामन्त्रणार्थशून्यस्येत्यर्थः। अथ यत्र शन्तृङ्डानश्यामामन्त्रणमभिहितं तत्र कथं प्रथमा, हे पचन्, हे पचमानेति, उच्यते, पूर्वेण भविष्यति।

शेषात्कर्मकरणसम्प्रदानापादानस्वाम्यधिकरणेषु २।४।१९

शिष असर्वोपयोग अस्मात् चौरादिकात्। आधृषाद्वेति विकल्पिते प्रत्य-याच्छिष्यते शेष्यत इति वा विगृहीते कर्मणि यथा(रूपं[4] घञणौ) भवतः, विभक्तिसामानाधिकरण्यात् स्त्रियामादाप्, लिङ्गस्याशिष्यत्वाल्लोकत एव

१. प्रसृते (मं०)
२. न्यूनपाठः (वा०)
३. न्यूनपाठः (वा०)
४. क्रमं घनलौ (मं०)

क्वचित्कर्मादिघञाद्यन्तस्याप्यभिधेयवल्लिङ्गता दृश्यते। यथा निवरा कन्येति। अन्ये तु शते धार्यमाणे अशीतौ दत्तायां विंशतिः शेष इत्यादि प्रयोगदर्शनाच्छेषशब्दस्यात्र द्वितीयादिशब्दवाच्याः प्रत्ययाः एव प्रतिपाद्या इति शेषशब्दः पुंवृत्ति इत्येव प्रयुक्त इत्याह—स्वमस्यास्तीति स्व-शब्दामन्त्वादित्वादामिन्प्रत्ययः येषां शब्दानामिति यैर्योगे षष्ठी दृश्यते, समूहविकारावयवादिशब्दैस्तेषामित्यर्थः। इह कर्मादयोऽर्थाः विभक्तीनां वाच्यत्वेन निर्दिश्यन्ते, षष्ठ्या च न वाच्याः स्वाम्यादयः। नहि देवदत्तस्येत्युक्ते स्वाम्यादयोऽर्थाः प्रतीयन्ते। किन्तर्हि सम्बन्धमात्रम्। तेन स्वाम्यादिसम्बन्धे सति षष्ठी विज्ञायते। एवं च स्वाम्यादिशब्दानन्तर योगशब्द सप्तम्यन्तमुदाहृत्य स्वाम्यादिशब्दयोगे सतीति व्याख्यायते। इत्यनेनाभिप्रायेणाह—स्वाम्यादिशब्दयोग इत्यादि। सम्बन्धग्रहणमेव तु न कृतं, वैचित्र्यात्। विभक्तिप्रकरणेऽस्मिन्प्रथमायाः उपयुक्तत्वादन्या द्वितीयाद्याः विभक्तयः शेषशब्दवाच्या इत्याह—शेषाः द्वितीयाद्याः विभक्तय इति कर्मणि द्वितीयेत्यादिना कर्मादिभिः सह द्वितीयादीनां यथासङ्ख्यमुपदर्शयति। अभिहिते कर्मणि द्वितीया न भवतीत्यत्र कारणमाह—उक्तार्थानामित्यादि। अर्थावगमाय शब्दः प्रयुज्यते। यत्र च कर्मलक्षणोऽर्थः पदान्तरादवगम्यते तत्र तदवगत्यर्थं किं द्वितीयाप्रयोगो नेति भावः। क्रियते कट इति। यणाशिषोर्ये इति इकारागमः। अत्रात्मनेपदेनाभिहितं कर्मेति। आत्मनेपदानीत्यादिना कर्मण्यात्मनेपदस्य विधानात्। कृतः कट इति। निष्ठेति क्तप्रत्ययः। अत्रापि क्तप्रत्ययेनेति। अभिहितं कर्मेति सम्बध्यते। कृतः, भावकर्मणोः कृत्यक्तखलर्थाः इत्यत्र कर्मणि, अत्र क्तप्रत्ययस्य प्रवृत्तेः करणे तृतीयेति। यद्येवम्, दात्रेण लुनातीत्यादौ (काष्ठेन[1] करणस्याभिहितत्वात्) तृतीया प्राप्नोति, उच्यते—दात्रादयोऽमी रूढिशब्दाः न्यग्भाव[2]करणादिशक्तिकं वस्तुमात्रं प्रतिपादयति। दात्र्यनेनेत्यादि कर्तृ[3]क्रिया केवलमेषां व्युत्पत्त्यर्थमुपादीयते। तत्रावश्यं करणादिशक्तीनामुद्भवं प्रतिपादयितुं दात्रादयो विभक्तीरर्थयन्ते तथा चासने आस्ते इत्यासनशब्दादधिकरणयुङन्तादपि सप्तमी सिद्धा। दातृ लवने, करणमित्यादौ तु तृतीयादयो न भवन्ति यतो यदा दात्रादीनां क्रियां प्रति व्यापारादेशो विवक्ष्यते। तदा करणभावः कारकव्यवहारस्य क्रियानिमित्तत्वात्। (अन्यथा अत्र) योग्यतामात्रे विवक्षिते प्रथमैव[4]

१. ष्ठ्वेन कर्मणास्याभिहितत्वात् (वा०)
२. न्यग्भूत (भं०)
३. धातु (भं०)
४. अन्यदाऽत्र (वा०)

प्रवर्तते। तथा च करणतृतीया (सिद्धौ[1] सत्यां) हेत्वर्थ इति वचनमारभ्यते। उभयसर्व इत्येतयोरित्यादि। सम्बन्धषष्ठी बाध्यते। हा धिक्शब्दप्रयोगेऽपि इति द्वितीया वक्तव्येत्यपेक्षते। तत्र हाशब्दः शोकार्थः, धिक्शब्दश्च निन्दार्थ इति तयोर्योगे षष्ठी प्राप्नोति। हा शब्दयोगेऽपि प्रथमा दृश्यते इति। आमन्त्रणविषयेऽन्तरङ्गत्वात्सम्बुद्धिः प्रवर्तते इति भावः। अभितः परित इत्यादि। षष्ठ्यपवादो द्वितीया भवतीति शेषः। अतिपरिभ्यामुभयार्थे सर्वार्थे च तसिति वक्तव्यात् अभिमुख्यवृत्तिरप्यभितः शब्दो निपातोऽस्तीति सोऽपि इह गृह्यते इति। एतेषां प्रयोगेऽपि इत्यपि शब्दात् प्रतिशब्दयोगेऽपि कार्यविघ्नं[2] न "कार्यव्यग्रं न प्रतिभाति किञ्चित्"। षष्ठ्याः बाधः। पक्षे सापि भवति। प्रतिशब्दोऽत्र क्रियाविशेषकः उपसर्गो न तु कर्मप्रवचनीयः। अन्तरान्तरेणेत्येतयोः प्रयोगेऽपीति षष्ठ्यपवादो द्वितीयेति शेषः। तत्रान्तरेण शब्देनास्त्रीप्रत्ययान्तेन साहचर्यादन्तरा शब्दोऽप्यस्त्रीप्रत्ययान्त एव निपातो गृह्यते। न त्वाप्प्रत्ययान्तः। तेन च साहचर्यान्तरेण शब्दस्यापि निपातस्यैव ग्रहणं न तु तृतीयान्तस्य ग्रहणम्, अन्तरशब्दश्चायं मध्यमाधेयप्रधानमाचष्टे। अन्तरेण शब्दस्तु तच्च विनार्थञ्च। त्वां च मां चेति युष्मदस्मदोः त्वन्मदोरेकत्वे त्वन्मदी अमो चाम्। घटात्तु द्वितीया न भवति। उपपदविभक्तेर्कारकविभक्तिर्बलीयसीत्यस्ति क्रियाकर्तुः घटात्प्रथमायाः बलीयस्त्वात्। प्रकृत्यादीनां सन्निवेशेन पाठसमत्वाय[3] यश्चोदयेत्, अथ के पुनः ते प्रकृत्यादय इति तं प्रत्याह—येभ्यश्शब्देभ्य इत्यादि। कर्तृकरणाभ्यां विनेति कर्तृकरणयोस्तृतीया स्मर्यते। न च प्रकृत्या दर्शनीय इत्यादौ ते स्तः, तयोः क्रियापेक्षित्वात्, क्रियायाश्चात्र प्रवृत्तेः[4] सम्बन्धमात्रं ह्यत्र षष्ठीनिमित्तं प्रतीयते। अतो विना कर्तृकरणे येभ्यः तृतीया दृश्यते ते प्रकृत्यादयः। अन्ये त्वाहुः—प्रतीयत एवात्र क्रिया, तथा हि प्रकृत्या दर्शनीय इत्यत्र प्रकृत्या स्वभावेन कृतो दर्शनीयो न तु वस्त्रालङ्कारादिनेत्यर्थोऽवगम्यते। प्रतीयमानापि च क्रिया कारकाणां निमित्तं भवत्येव। यथा—प्रविश पिण्डीमित्यत्र भक्षणक्रिया पिण्डीलक्षणस्य कर्मणः। अत्र प्रविश गृहं पिण्डीं भक्षयेत्यर्थोऽवगम्यते। एकः चकारोऽर्थभेदस्य प्रतीतेस्तदपेक्षया प्रकृत्येति सिद्धा कर्तरि करणे वा तृतीयेति नापूर्वत्वेनैतद् वक्तव्यम्।

---

१. सिद्धावसत्याम् (वा०)
२. व्यग्रम् (वा०)
३. पाठसमत्वा (वा०)
४. प्रतीतेः (भं०)

एवं च प्रायेण याज्ञिक इत्यत्रापि एतत् तत्र देशे विद्याप्रचारस्य बाहुल्यात् येन कारणभूतेनासौ याज्ञिकः ततः करण एवैषा तृतीया। गोत्रेण गार्ग्य इत्यत्र ज्ञाने भवने वा गोत्रस्य करणभावः। पृथग्विनानानाभिरित्यादि। असहायार्थवृत्तीनां पृथगादीनां भेदेनोपादानं पर्यायनिवृत्त्यर्थम्, तेन हिरुग्देवदत्तस्येत्यादौ न भवति। पृथग्देवदत्तमित्यादि क्रियापदस्याश्रवणाद् द्वितीयादीनामप्राप्ति मन्यते। शपेर्धातोरित्यादि बोधयितुमभिप्रेतो योऽर्थः तस्मादेवेयं चतुर्थी स्मर्यते। देवदत्ताय शपत इत्यादि। वाचा शरीरस्पर्शने च शपिरयं रुचादिः। रुद्राय स्पृहयति। इति स्पृहेरदन्तत्वात् चुरादित्वादिन्। अस्य च लोपः। रुद्रं स्पृहयतीत्यपि विवक्षावशाद् भवत्येव। तादर्थ्य इति। तस्मै इदं तदर्थं तदर्थस्य भावः तादर्थ्यम्। तच्छब्देन चतुर्थ्यन्तस्य यूपादेरर्थो निर्दिश्यते। यूपाय दारुति। अथ दारुशब्दाद् हेत्वर्थ इति तृतीया कस्मान्न भवति, हेतुहेतुमद्भावस्य चतुर्थ्यावगमितत्वात्। एवमेवेभ्यः[1] व्रजति, भिक्षाभ्यो व्रजति स्वागतमतिथये इत्याद्यपि मन्तव्यम्। क्त्वान्तस्येत्यादि। क्त्वाप्रत्ययादेशो अन्तो यस्येत्यर्थः। पञ्चमी वक्तव्ये द्वितीया सप्तम्योरपवादः। अर्हप्रत्ययनिर्देशादिति। तत्र साधौ च य इति च शब्दादर्हेऽर्थे योऽयं प्रत्ययः तस्य निर्देशादित्यर्थः। आरुह्योपविश्योरिति क्त्वान्तानुबन्धकरणाभ्यामिदं[2] षष्ठी, द्विर्वचनम्, लोप इति। लक्षणद्वारेण एतदुक्तम्। वस्तुतस्तु गम्यमानार्थत्वादनयोरप्रयोग एव लोपः। निमित्तादित्यादि। क्रियाफलमिह निमित्तत्वेन विवक्षितं तेन यत्क्रियायाः प्रयोजकं यदर्थं क्रियारम्भः ततो हेतुतृतीयां तादर्थ्यचतुर्थीं बाधित्वा सप्तमी वक्तव्या, कर्मण यदि निमित्तस्य संयोगस्स्यात्, तथा च वेतनेन धान्यस्य संयोगात्। चर्मणि द्वीपिनं हन्ति इत्यत्र द्वीपिहननिमित्तं चर्म, तस्य च द्वीपिना कर्मणा संयोगः सम्बन्धः। निमित्त प्रयोग इति। निमित्तार्थस्य शब्दस्य प्रयोग इत्यर्थः। तथा चाह—निमित्तेत्यत्रार्थो गृह्यते अर्थपरत्वान्निर्देशस्य तेन तस्यार्थस्य यो वाचकच्छब्दस्तस्य सर्वस्य सङ्ग्रहात् कारणप्रयोजनादिशब्दसम्बन्धेऽपि सिध्यति। सर्वं चेदं वक्तव्यजातं पूर्वसूत्राच्चकारानुवृत्त्यैवावगतमिति नापूर्वत्वेन वक्तव्यम्, दिङ्मात्रप्रदर्शनञ्चैतत्। तथा चोपर्यध्यधसां कृतद्विर्वचनानां प्रयोगेऽपि द्वितीया भवति। उपर्युपरि ग्रामम्, अध्यधि ग्रामम्, अधोधो ग्रामम्, द्विश्च पदमिति योगविभागादुपर्यादीनां द्विर्वचनम्, दूरान्तिकार्थेभ्योऽपि, दूरं ग्रामस्य, अन्तिकं ग्रामस्य। तृतीयापञ्चमीसप्तम्योऽपि। दूरेण ग्रामस्य, दूरात् ग्रामस्य, दूरे ग्रामस्य। एवम् अन्तिकादप्युदाहार्यम्। द्रव्य-

---

१. एवं देवेभ्यः (मं०)

२. करणानामिदम् (मं)

वृत्तिभ्यस्तु दूरादिभ्यो यथायथं विभक्तयः। दूरो ग्रामः, दूराय पथे देहीति। दूरान्तिकार्थैरपि योगे षष्ठीपञ्चम्यौ। दूरं ग्रामस्य, दूरं ग्रामादित्यादि। सम्पूर्वस्य जानातेः प्रयोगे कर्मणि विकल्पेन तृतीया। पित्रा सञ्जानीते, पितरं सञ्जानीते। एवं श्राद्धाय निगल्यते[1], निन्दतीत्यर्थः। युद्धाय सन्नह्यते, युद्धे निश्चयं करोतीत्यर्थ.। पत्ये शेते, पतिमुपसृत्य शेत इत्यर्थः। एवं प्रश्नाख्यानयोः पञ्चमी, कुतो भवान् ? स्रुघ्नात्। क्रियाया अनुपादानान्नात्रापादानमस्ति, प्रतीयमानं (गमिक्रिया[2]पेक्षं वैतदपादानम्)। ये तु प्रश्नाख्यानयोः पञ्चमीवक्तव्येत्याचक्षते तान्प्रति। कस्यायमश्वो ? देवदत्तस्य, इत्यत्रापि स्यात्। एवमधिकप्रभृतिशब्दप्रयोगेऽपि। तस्मादधिकम्, ततः प्रभृति। अधिकशब्दप्रयोगेऽपि सप्तम्यपि स्मर्यते, यस्मिन्नधिकमिति। कारकयोः मध्ये यौ कालाध्वानौ ताभ्यां पञ्चमी। अद्य भुक्त्वा देवदत्तो द्वयहे भोक्ता द्वयहाद्वा भोक्ता।

इहस्थोऽयं धानुष्कः क्रोशाल्लक्ष्यं विध्यति। सप्तम्यपि दृश्यते। पूर्वोदाहरणे कर्तृभोक्त्र्योर्मध्ये कालः, अपरोदाहरणेऽपि कर्तृकर्मणोर्मध्ये क्रोशः। एवं जानातेः ज्ञानार्थस्य प्रयोगे करणे षष्ठी, सर्पिषो जानीते प्रवर्तते इत्यर्थः। प्रवृत्तिवचनो ह्यत्र जानातिः। ज्ञानार्थस्येति किं, स्वरेण पुत्रं जानाति। तथा कृत्वोऽर्थप्रत्ययप्रयोगे कालवाचिनोऽधिकरणे पञ्चकृत्वोऽह्नो भुङ्क्ते, वारगणनेऽर्थे, तसादित्वात् कृत्वम्, एवं द्विरह्नो भुङ्क्ते। अत्रापि तसादित्वात्सु-प्रत्ययः, अधिकरणत्वविवक्षायां च पञ्चकृत्वोऽह्न्यधीत इत्याद्यपि भवति। एवं क्तप्रत्ययान्तो यः इन्नन्तः तस्य प्रयोगे कर्मणि सप्तमी। अधीती व्याकरणे। अधीतमनेनेति तसादित्वादिनिः। अत्र व्याकरणस्य कर्मत्वाद् द्वितीया प्राप्नोति। अधिकरणविवक्ष्यैतत् सिध्यतीति[3] चेत् कर्मविवक्षायां द्वितीयापि स्यात्। ननु[4] च निष्ठायाः कर्मणोऽभिहितत्वात् द्वितीयात्र न प्राप्नोति, नैष दोषः, निष्ठायाः हि सामान्यकर्माभिहितं न विशेषं कर्म। कटादिको ह्यभिसम्बन्धोऽयं कारयते-रुत्पद्यमाना निष्ठा कटादिशब्दवाच्यकर्माचक्षीत यथा कृतपूर्वी कटमिति। यद्येवम्, मासमधीती-व्याकरण इति कालादिकर्मणः सप्तम्यपि स्यात्। अधीती[5] व्याकरण इत्यत्र यद्यपि कर्मण्येव क्तः विहितः तथापि तद्धिते उत्पन्ने

१. निगर्हते (भं०)
२. गतिक्रियापेक्षं चैतदपादानम् (भं०)
३. सेत्स्यतीति (भ०)
४. न्यूनपाठः (भ०)
५. न्यूनपाठः (भ०)

अधीतव्याकरणयोरभिसम्बन्धो निवर्तते। अस्ति च धात्वर्थस्य व्याकरणेन सम्बन्ध इति द्वितीया न भविष्यति, कालादिलक्षणस्य कर्मणो बहिरङ्गत्वादिह ग्रहणात्।

पर्यपाङ्योगे पञ्चमी २।४।२०

परिस्रुघ्नाद् वृष्टो देवः इति वर्जनमत्रार्थः। एवमपकान्यकुब्जादित्यत्रापि। आकुरुक्षेत्रादित्यत्रापि। मर्यादाभिविधिरिति। विना तेनेति मर्यादा, सह तेनेत्यभिविधिः। ननु पर्यपाङ्भिरिति क्रियताम्, योगशब्दाध्याहारेण च पर्यपाङ्भिर्योग इत्यर्थो विज्ञास्यते तत्किम् योगग्रहणेनेत्याह—पर्यपाङ्भिरिति कर्तव्य इत्यादि। पर्यादीनां कर्मप्रवचनीयसंज्ञकानां योगे पञ्चमी यथा स्यात् इति विशिष्टयोगप्रतिपत्त्यर्थं योगग्रहणं क्रियते। केषां पुनर्योगे मा भूदित्याह—उपसर्गाणां मा भूदिति परिभ्रमणमित्यादि। अत्रोपसर्गाः पर्यादयः। कथमेतत् ज्ञायत इत्याह—क्रियायोगे सतीत्यादि। उपसर्ग इति पूर्वाचार्यसंज्ञा परिग्रहात्, पर्यादीनां क्रियायोगे सत्युपसर्गत्वम्। परिभ्रमणमित्यादौ च भ्रमणादिक्रियायोगादुपसर्गाः पर्यादयो न कर्मप्रवचनीयाः इति तैर्योगे पञ्चमी न भवति। यद्येवम्, वृक्षं परि विद्योतत इत्यत्र परिणा कर्मप्रवचनीययोगे पञ्चमी कस्मान्न भवतीति पृच्छति, इह कस्मान्न भवतीत्यादि। उच्यत इत्यादिना परिहरति। वर्जनेऽर्थे इति। वर्जन एवार्थ इत्यर्थः। तेनेति अपशब्देन वर्जनस्य ग्रहणमिति वर्जनार्थस्यैवेत्यर्थः। लक्षणमर्थं द्योतयतीति। वृक्षं प्राप्य विद्युत् विद्योतत इति प्राप्तिक्रियाजनितं लक्ष्यलक्षणसम्बन्धं द्योतयतीति भावः।

दिगितरर्तेऽन्यैश्च २।४।२१

दिक्च, इतरश्च, अन्यश्च, ऋते चेति विग्रहः। दिगिति गत्वं व्यञ्जनान्तस्य यत्सुभोरिति वचनादितरशब्दादवर्णस्य ऋवर्णे अर्, अवयवार्थावसरे योगशब्दाध्याहारेण दिगितरर्तेऽन्यैर्योग इति पञ्चमी[1] व्याख्यायते, एवमुत्तरयोगयोरपि दिक्शब्दैर्योग इत्येतेन व्याख्यानादिति दिगित्यत्र दिग्वृत्तयः पूर्वादिशब्दाः दिग्ग्रहणेन गृह्यन्त इति दर्शयति। यद्येवम्, इयमस्याः पूर्वा दिगित्यत्रैव पञ्चमी प्राप्नोति यत्र पूर्वादयो दिशि वर्तन्ते। देशकालवृत्तिभ्यस्तु योगे कथं पञ्चमी। पूर्वो ग्रामाद् देशः, पूर्वो ग्रीष्माद्वसन्तः इति। सत्यम्, चानुवृत्तेर्भविष्यति। इतरो देवदत्तात् पण्डितः इति क्रियायां गुणे वा निर्दिश्यमानस्यैकस्य यो द्वितीयः प्रतियोगी स इतरशब्देनोच्यते। ऋते शम्भोरिति। ऋते

१. सप्तमी (वा०)

इत्ययं शब्दो वर्जनेऽर्थे वर्तते, अन्य इत्यत्रार्थो गृह्यत इति। तेनान्यस्यार्थस्य वाचकैरर्थान्तरादिशब्दैरपि योगे पञ्चमी भवति। च-शब्दात् क्वचित् दिक्-शब्दयोगे षष्ठीप्रवृत्त्यर्थः। तेन पुरो ग्रामस्य, पुरस्ताद् ग्रामस्य, पुरतो ग्रामस्य, दक्षिणतो ग्रामस्य, उत्तरतो ग्रामस्य इत्यादयः।

द्वितीयैनेन २।४।२२

एनेन एन-प्रत्ययान्तेनेति। एन-प्रत्ययस्य केवलस्यासम्भवात् दक्षिणेन ग्रामं वसतीति, पुरो ग्रामस्य इत्यादिवत् षष्ठ्यपि प्राप्नोतीति सा बाध्यते। यद्येवम्, दक्षिणेन ग्रामस्येत्यादि कथमित्याह—षष्ठ्यपीष्यत इति। चानुवृत्तेरिति भावः।

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि २।४।२३

चेष्टनं चेष्टा, गुरोश्च निष्ठायामित्यकारप्रत्ययः। यत्कर्म तत्र कर्मणीति कर्मशक्तियुक्ते लिङ्गे इत्यर्थः। चेष्टा कायपरिस्पन्दः इति शरीरव्यापारः। कायपरिस्पन्द एतेन परिस्पन्दवचनेऽत्र चेष्टाशब्दोऽत्र गृह्यते न तु क्रियामात्रवचन इति दर्शयति। एतच्च चेष्टाग्रहणाल्लभ्यते। क्रियामात्रवचने हि चेष्टाशब्दे परिगृह्यमाणे चेष्टाग्रहणं व्यावर्त्याभावादपार्थकं स्यात्। सर्वस्य धातोः क्रियावचनार्थत्वात्। वाराणसीमित्यम्शसोरादिलोप इत्यकारलोपः। अध्वानमिति घुटि चासम्बुद्धाविति दीर्घः, अध्वनीत्यत्रार्थो गृह्यत इति निर्देशस्यार्थपरत्वात्। पन्थानमित्यनन्तो घुटीत्यन्नादेशः। पूर्ववद् दीर्घः। उत्पथेनेत्यादि। अयं भावः ([1]अध्वनीत्ययं निर्देशो) मुख्ये ध्वनिः प्रवर्तते। यत्र लोके अध्वव्यपदेशो रूढः। यदा तूत्पथेन पथा अतिक्रमितुमिष्यते तदा निषेधस्याप्रवृत्तेः अध्वने गच्छतीत्ययमपि प्रयोगो भवति। अपिशब्दादध्वानं गच्छतीत्यपि गतिकर्मणीति कर्तव्ये अर्थग्रहणं पादविहरणात्मिकायाः विशिष्टायाः गतेः परिग्रहार्थम्। तेनेह न भवति, स्त्रियं गच्छतीति। अत्र हि स्त्रीशब्दप्रत्यासत्त्या गमिर्मैथुनमर्थं प्रतिपादयति न तु पादविहरणात्मिकां गतिम्। अजां नयति ग्राममित्यत्रापि न भवति, नयतेर्गत्यर्थत्वात्। प्रतीयते ह्यत्र गतिः, नत्वसौ नयतेरर्थस्तस्य प्रापणवाचित्वात्। ननु चतुर्थी वेति क्रियताम्, चतुर्थ्याञ्च विकल्पितायामर्थात्कर्मणि द्वितीयैव भविष्यतीति किं द्वितीयाग्रहणेनेत्याह—चतुर्थी वेति कर्तव्य इत्यादि बाधकं पुनः षष्ठ्याः कृतीत्येवं विशेषणविधानात्।

---

१. अनध्वनीत्ययं निषेधो (मं०)

मन्यकर्मणि चानादरेऽप्राणिनि २।४।२५

मन्य इति रूपमकारान्तः मन्यमानं प्रत्याह--मन्यते इत्यस्येज्यादि। मन्यतेः कर्म मन्यकर्म इति। अस्वपदेन विग्रहं प्रतिदर्शयति। तस्मिन्कर्मणीति कर्मशक्तियुक्ते लिङ्ग इत्यर्थः। तृणमपि त्वां न मन्य इत्यादि। एतेन निषेधमुच्चारयंस्तृणादेरपि निकृष्टत्वं यदा प्रतिपादयिषितुं भवति तदा द्वितीयाचतुर्थ्यौ भवतः। न तु समत्वविवक्षायामिति दर्शयति। अथ युष्मदस्मदोरपि मन्यतेः कर्मत्वाच्चतुर्थी कस्मान्न भवति, गम्यते हि ततोऽपि चतुर्थ्यामनादर इत्याह--च शब्दोऽत्रेत्यादि। पूर्वसूत्रात्समासस्थं कर्मग्रहणमिहानुवर्तयितुमशक्यमिति पुनः कर्मग्रहणम्। न त्वां काकं मन्य इति प्राणित्वादत्र चतुर्थ्याः अभावः। यद्येवम्, न त्वां शुनं[1] मन्ये, न त्वां शुने मन्ये इति न सिध्यति, उच्यते--प्राणिनिषेधः अयम् नावादिषु स्मर्यते। यत्र च द्वितीयाचतुर्थ्यौ नेष्येते ते नावादयः। न त्वां नावम्मन्ये, न त्वामन्नं मन्ये, अनावादाविति न कृतम्, वैचित्र्यात्।

नमः स्वस्तिस्वाहास्वधालंवषड्योगे चतुर्थी २।४।२६

नमस्स्वस्तीत्यादि। द्वन्द्वगर्भः तृतीयातत्पुरुषः। चतुर्थी भवतीति सम्बन्धषष्ठ्या अपवादः। तेन वारणार्थस्यापि न भवतीति (ननु[2] अलङ्कुरुते कन्या इत्यत्र भूषणार्थस्यापि न भवतीति) कस्मान्नोच्यते, एवं मन्यते--उपपदविभक्तेर्कारकविभक्तिर्बलीयसीत्येवमत्र द्वितीयैव भविष्यति। अलं रोदनेनेति तु नेयं तृतीयाकारकविभक्तिः क्रियापदस्याश्रवणात् रोदनस्याकारकत्वात्। उपपदविभक्तेरित्यादि क्रियाकारकयोः सम्बन्धस्य अन्तरङ्गत्वात् अन्तरङ्गकर्मादिकारकविषया विभक्तिर्बलीयसी भवति। उपपदार्थेन तु क्रियाकारकसम्बन्ध इति उपपदनमस् शब्दादिनिमित्ता विभक्तिर्बहिरङ्गा भवति। एवञ्चान्तरङ्गैव "नारायणं नमस्कृत्य" इत्यादौ कर्मणि कारके द्वितीया प्रवर्तते।

तुमर्थाच्च भाववाचिनः २।४।२७[3]

तुमा समानार्थस्तुमर्थः इत्यत्रार्थशब्दोऽत्र विषयवचनः। यथेन्द्रियाणीन्द्रियार्थेषु इत्यत्र। तेन तुमा समानार्थः तुमातुल्यविषयो यो घञादिः प्रत्ययः सः तुमर्थ इत्युच्यते। अर्ह-प्रत्ययनिर्देशात् समानस्य लोप इति लक्षणद्वारेणै-

---

१. श्वानम् (वा०+मं०)
२. न्यूनपाठः (मं०)
३. २।४।२८ (दु० वृ०)

तदुक्तम्, गम्यमानार्थत्वात् तु समानशब्दो वृत्तौ न प्रयुज्यत एव। भाववाचिनश्चेत्यनेन विहित इत्यनेनैव विहितस्य घञादेः प्रत्ययस्य तुमा तुल्यविषयत्वात्। तदन्तादिति केवलस्य भाववाचिनोऽसम्भवादिति भावः। पाकाय व्रजतीति क्रियायां क्रियार्थायामुपपदे भाववाचिनश्चेति घञ्, नन्वेतत् तादर्थ्यचतुर्थ्येव सिद्धम्। न सिध्यति, तादर्थ्यविहितेन प्रत्ययेन तादर्थ्यस्योक्तत्वाच्चतुर्थ्यभावप्रसङ्गात्। तथाभिहितेऽपि तादर्थ्ये तादर्थ्यचतुर्थी क्रियते। वह्निपाचको व्रजतीति अत्रापि प्राप्नुयात्, अत्रापि हि क्रियार्थोपपदे वुणो विधानात् तादर्थ्यमस्त्येव, करणाय व्रजतीति पूर्ववत् युट्। पाकः, त्यागः, भावे घञ्। भवत्ययं भाववाची न तु तुमातुल्यविषयः। कारको व्रजतीति। भवत्ययं वुण्प्रत्ययः तुमातुल्यविषयः। वुण्तुमाक्रियायामिति विधानात्। न तु भाववाची, किं तर्हि, कर्तृवाची, कर्तरि कृदिति वचनात्। करिष्यामीति व्रजतीत्यत्रार्थे वुणः [1]प्रवृत्तिः।

तृतीया सहयोगे २।४।२८[2]

सहेन योगः सहयोग इति। सहेन सहार्थेनेत्यर्थः। तदाह—सहार्थेन योग इति क्रियागुणद्रव्यसम्बन्धे सति सहयोगो भवतीति सम्बन्धषष्ठी प्राप्नोति सा बाध्यते। तमेव क्रियादिसम्बन्धं क्रमेणोदाहरति। पुत्रेण सहागत इत्यादि। न उभयोरपि पितापुत्रयोः क्रियादिसम्बन्धः प्रतीयते, ततश्च सहयोगे उच्यमाना तृतीयापि तृशब्दादपि कस्मान्न भवतीत्याह—अप्रधानादित्यादि। एवं मन्यते। षष्ठ्यापवादे इयं तृतीया, षष्ठी च सम्बन्धस्योभयाधिष्ठानेऽपि राज्ञः पुरुष इत्यादौ पुरुषावच्छेदकत्वेनोपादीयमानाल्लब्ध - अप्रधानभावाद् राजशब्दादेव स्मरन्ति। न त्वच्छेद्यत्वेन प्रधानात् पुरुषात्। द्विष्ठत्वेऽपि च सम्बन्धस्य द्वाभ्यां षष्ठी न भवति। गुणादेवोत्पन्नायाः षष्ठ्या उभयगतस्यापि सम्बन्धस्याभिहितत्वात्। यद्येवम्, पुरुषस्य राजेति न स्यात्। भवति यदा तत्पुरुषस्य गुणभावो राज्ञश्च विशेष्यत्वं विवक्ष्यते। राज्ञः पुरुषस्येति तु प्रयोगो बाह्य[3]गृहाद्यपेक्षणात्। एवं च षष्ठीविषये तृतीयाविधानाद् अर्थात् पुत्रादेवेयं तृतीया भवति। न तु पितुः प्रधानात्। कथं तस्य प्राधान्यमिति चेच्छब्देन तद्विषयतयैव स्वशक्तिबलात् क्रियासम्बन्धस्य प्रतीतेः। एवं च कृत्वा

---

१. प्रवृत्तेः (मं०)
२. २।४।२३ (दु० वृ०)
३. गुणाद्यपेक्षणात् (मं०)

पुत्रेण सहागत इत्येकत्वेन निर्देश उपपन्नः। सह इत्यत्र यतोऽर्थः गृह्यते तेनेति। यस्मादत्र सहशब्देन सहार्थो गृह्यते, तेन हेतुना पुत्रेण साकमित्यादावपि पर्यायप्रयोगे तृतीया भवति। सहार्थप्रतिपादकं शब्दमन्तरेणापि च भवति। तथा च तस्य तेन समास इति सह नेति कर्तव्ये योगग्रहणं ग्रन्थाधिक्यादर्थाधिक्यं भवतीति शब्दान्तरप्रयोगे विभक्त्यन्तरप्रवृत्त्यर्थम्। तेनाशीर्विषये आयुष्यमद्रकुशलसुखार्थहित-इत्येतैर्योगे चतुर्थी भवति। आयुष्यं च देवदत्ताय भूयात्। षष्ठी बाध्यते, चानुवृत्तेः, पक्षे सापि भवति। अर्थग्रहणादायुष्यादिपर्यायप्रयोगेऽपि षष्ठी चतुर्थ्यौ भवतः। चिरंजीवित देवदत्ताय, चिरं जीवितं देवदत्तस्येति वा। एवं मद्रादिप्रयोगेऽपि उदाहार्यम्। तुल्यार्थैरिति। तुल्यलक्षणोऽर्थो येषां ते तुल्यार्थाः।

हेत्वर्थे २।४।२९[1]

फलसाधनयोग्यः पदार्थो हेतुरिति। ऐतेन शास्त्रीयस्य हेतोरिहाग्रहणमिति दर्शयति। एतच्चात एव योगारम्भादवसीयते। शास्त्रीये हि हेतौ गृह्यमाणे सति कर्तरि चेत्यनेनैव सिद्धत्वादपार्थको योगारम्भः स्यात्। हेतौ तृतीया भवतीति हेतुवाचिनि लिङ्ग इत्यर्थः। विद्यया यशः इति। टौ सो रे इत्येत्वम्। अत्र यशो लक्षणं फलमुपजनयन्ती अपि विद्या तदुपजनने योग्यतया हेतुरिति व्यपदिश्यते। हेताविति न कृतं वैचित्र्यादिति। हेतौ वक्ष्यमाणां पञ्चमीं विधाय विचित्रप्रयोगसंसिद्धये अर्थग्रहणं कृतमिति भावः। तेनाग्निरत्र धूमादित्यादि यथा दर्शनं सिद्धम्।

कुत्सितेऽङ्गे [2]२।४।३०

कुत्सावक्षेपणे चुरादिः। कुत्स्यत इति क्तप्रत्ययः। इट्, निष्ठेटीन इतीनो लोपः। निन्दितेऽङ्ग इति निन्दिताङ्गवाचिनि लिङ्ग इत्यर्थः। एवमुत्तरत्रापि सप्तम्यर्थो व्याख्येयः। अक्ष्णा काण इत्यत्र सर्वत्र काणादिपदसन्निधानादक्षिप्रभृतेः कुत्सितत्वं गम्यते। अस्थिदधीत्यन्नादेशः। अवमसंयोगादित्यकारलोपः। ननु काणशब्दादेव काणगुणयुक्तो देवदत्तः प्रतीयत इति किमक्षिशब्दस्य प्रयोगेण, अस्त्येतत्, किन्तु लौकिके व्यवहारे शब्दप्रयोगं प्रति गुरुलघुचिन्ता [3]नाद्रीयते। अन्यथा शाखादिसत्यर्थे प्रतिपाद्ये वृक्षतरुप्रभृतीनामेव प्रयोगः स्यात्, न तु पादपादिशब्दानाम्। अथाक्षिकाणं देवदत्तस्येत्य-

---

१. २।४।३० (दु०वृ०)
२. २।४।३१ (दु० वृ०)
३. नाश्रीयते (वा०)

त्रापि कस्मान्न भवतीत्याह—अप्रधानादित्यादि ।

उपपदविभक्तेः कारकविभक्तिः बलीयसीत्यस्ति पदाध्याहारादक्षिशब्दादत्र कर्तुः कारकविभक्तिः प्रथमा प्रवर्तते न तूपपदविभक्तिस्तृतीयेत्यर्थः । ननु नेयमुपपदविभक्तिः, नह्यत्र सूत्रे किञ्चिच्छब्दरूपमुपपदत्वेनोपात्तं यद्योगे तृतीयेयं भवति । उपपदविभक्तिरित्युपदिश्यते, अस्त्येतत्, किन्तु यद्यपि नोपात्तं तथाप्यर्थात् प्रतीयत एव । नह्यक्ष्णा काणः इत्यादावसमीपवर्तिनि काणादिपदे कुत्सितत्वमक्ष्यादीनामवगम्यते । इत्थं च भवतीयमप्युपपदविभक्तिः । अक्षिकाणं देवदत्तस्येति । काणत्वगुणयोगादभेदोपचारादक्षिशब्देनोच्यते । अत्र ह्यक्षिप्रधानमिति देवदत्तावच्छिन्नस्य अक्ष्णः काणगुणयुक्तस्य शब्देन प्रतिपादनात् ।

विशेषणे [1]२।४।३१

[2]विशेष्यते येन तद्विशेषणमिति । ज्ञापकपदार्थो टादिरित्यर्थः । अथ कमण्डलुपाणिस्नातक इत्यत्र विशेषणात् कमण्डलोस्तृतीया कस्मान्न भवति, वाक्यकालश्रूयमाणायां प्रथमायां लुप्तायां प्रत्ययलक्षणेन विभक्तिवर्जमितिलिङ्गसंज्ञानिषेधादलिङ्गत्वान्न भवतीति चेत्, तत्र न सम्बुद्धावित्यारम्भात् प्रत्ययलक्षणेन तस्य निषेधस्य अप्रवृत्तेः । अस्तु तृतीया, तत्स्था लोप्या विभक्तय इत्यादिना लोप्स्यत इति चेत्, कथं समासादुत्तरकालभाविनी विभक्तिर्लुप्यते । एवं तर्हि समासपदानामन्यपदार्थाभिधायित्वादविभागमापन्नस्य विशेषणस्य कमण्डलोः तृतीयाविधि प्रत्यवकृष्टुमशक्यत्वान्न भवति । यद्येवम्, नीलमुत्पलमित्यत्र नीलशब्दो विशेषणमिति ततः तृतीया कस्मान्न भवति, न भवति, अर्थान्तरावगमप्रसङ्गात् ।

कालभावयोः सप्तमी [3]२।४।३२

कालः । किल विल क्षपे चुरादाविन्नन्तः । अत इन्नन्तात्कलयति भूतानीति पचाद्यच् । काले भावे चेति । कः पुनः कालः, उच्यते—सूर्यादिकर्तृका प्रसिद्धपरिमाणा क्रिया अहरादिशब्दव्यपदेश्या । क्रियान्तरपरिच्छेदकः कालः । पुष्यतीति । पुष्प् विकासे [4]दैवादिकः । देवदत्ते गते यज्ञदत्तो भुङ्क्त इति

१. २।४।३२ (दु० वृ०)
२. विशिष्यते (मं०)
३. २।४।३४ (दु० वृ०)
४. दिवादि (मं०)

देवदत्तगमनस्य सत्तायामित्यर्थः। एवमग्निहोत्रे हूयमाने गतः इत्यत्राप्यग्निहोत्रे हवने सतीत्यर्थो मन्तव्यः। इह कस्मान्न भवति, शरदिति। भवति हि शरच्छब्दः कालवाची, प्रथमायाः विषयोऽयम्, ततो न भवतीति चेत्, न। कालादन्यत्रासौ सावकाशः। इह सप्तम्या बाध्येतेत्याह—कालभावाभ्यामित्यादि। अयमर्थः। इह विशेषण इति वर्तते, तेन कालभावाभ्यां यदान्यत्किञ्चिद् ज्ञाप्यते तदा—ताभ्यां सप्तमी भवति। यथा मूलोदाहरणे। तत्र हि शरदा सप्तच्छदो विकासो ज्ञाप्यते। देवदत्तगमनेनापि यज्ञदत्तभोजनम्। शरदित्यत्र तु न किञ्चिच्छरदा ज्ञाप्यते इति न भवति। चानुवृत्तेर्भावे विशेषणेऽनादरावगतौ सत्यां षष्ठ्यपि भवति। रुदतः प्राव्राजीत्, रुदति प्राव्राजीत्। रुदन्तमनादृत्य प्रव्रजित इत्यर्थः। सम्बन्धविवक्षात्र दुर्घटैव। अर्थादुपपदान्निमित्तात् बाधशास्त्रे सप्तमी सा भाव एव मन्तव्या। आधारत्वविवक्षायां भावशब्देनैव कालेऽपि सप्तम्याः सिद्धत्वात् कालग्रहणं प्रपञ्चार्थम्।

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च [1]२।४।३३

गोः स्वामी व्रजतीति व्रजिक्रियायां गवां कर्मत्वात् तन्निबन्धना कारकादिविभक्तिः द्वितीयैव प्रवर्तते न तूपपदविभक्ती षष्ठीसप्तम्यौ। अथवा ग्रहणमेव कस्मान्न क्रियते, सप्तम्यभावे च सम्बन्धषष्ठ्यस्त्येवेति किं षष्ठीग्रहणेन, सत्यम्, उत्तरार्थं तु। अन्यथा ह्युत्तरत्र समुदायैकदेशस्य पृथक्करणं विश्लेषो भवतीति सप्तम्यभावपक्षे पञ्चम्यपि स्यात्। षष्ठ्येव यथा स्यादिति षष्ठी ग्रहणम्।

निर्धारणे च [2]२।४।३४

स्वार्थ इन्निति, स्वार्थः प्रकृत्यर्थः। तत्रेन्प्रत्ययः, न तु हेतौ, हेत्वर्थस्याभावात्। तदभावस्तु पृथक्क्रियमाणतामात्रस्य विवक्षितत्वात् दृश्यते च स्वार्थ इन्प्रत्ययः। यथा रामो राज्यमकारयत्। अकुपितमभिसारणेऽनुनेतुमित्यादौ षष्ठीसप्तम्यावनुवर्तेते इति। ननु पूर्वत्र चानुकृष्टा सप्तमी चानुकृष्टं चोत्तरत्र नानुवर्तत इति कथं सप्तम्या इहानुवृत्तिस्स्यात्। सत्यम्। चकारकरणाद्भविष्यति। पुरुषाणां क्षत्रियश्शूर इत्यत्र पुरुषसमुदायात् शूरत्वेन गुणेन क्षत्रियावयवो निर्धार्यत इति निर्धारणवृत्तेः पुरुषशब्दात् षष्ठीसप्तम्यौ भवतः।

---

१. २।४।३५ (दु० वृ०)

२. २।४।३६ (दु० वृ०)

अवयवसम्बन्धविवक्षायामाधारत्वविवक्षायां च वृक्षस्य शाखा वृक्षशाखेतिवत् षष्ठीसप्तम्योस्सिद्धत्वात् योगारम्भस्समुदायादेकदेशस्य प्रकर्षविवक्षायां तयोः प्रवृत्त्यर्थः।

षष्ठी हेतुप्रयोगे [1]२।४।३५

प्रयुक्तिः प्रयोगः। हेतुशब्दस्य प्रयोग इति शब्दस्येति कुतः प्रयोगस्योच्चारणशब्दधर्मत्वात्। विद्यायाः हेतोः वसतीति हेतुशब्दात् षष्ठी विद्या सामानाधिकरण्यात्। ननु हेत्वर्थ इत्यनेन हेतुत्वमात्रे द्योत्ये तृतीया विहिता। इह च हेताविति क्रियमाणे हेतुशब्दप्रयोग एव षष्ठी विज्ञास्यत इति किं प्रयोगग्रहणेन, सत्यम्, विस्पष्टार्थं तु।

स्मृत्यर्थकर्मणि [2]२।४।३६

पितुः स्मरति, इति स्मृ चिन्तायाम्। मातुर्ध्यायतीति ध्यै चिन्तायां वेति वक्तव्यम् इति, ननूत्तरत्र नित्यग्रहणमिह विकल्पं बोधयतीति किं वक्तव्येन, नैतत्, उत्तरत्र हि यन्नित्यग्रहणं तत् हिंसार्थानामित्यत्र वैकल्पिकं बोधयेत्, अनन्तरं नित्यशब्दश्रवणात्। द्विसूत्र्यां तु विकल्प[3] बोधयतीति विचित्रमेतत्[4]। अथ कृत्यप्रत्ययप्रयोगे कर्मणि नित्यम्। अन्यत्र तु कर्मणि विकल्पः, ततः त्रिसूत्रीस्थेऽपि कर्मणि विकल्पो लभ्यत इति, तन्न, हिंसार्थानामित्यत्रैवानन्तरसूत्रे यत्कर्म तत्रैव नित्यग्रहणं विकल्पादेकत्वेनोपक्षीयमाणं सदन्यत्र सूत्रद्वयस्थे कर्मणि कथं विकल्पं बोधयेत्। कारणाभावात्, हेतुप्रयोगे च षष्ठ्याऽपि विकल्पो भवेदविशेषात् इति वक्तव्यमेव ज्यायः। तच्चैतदपूर्वत्वेन न वक्तव्यम्। स्मृतिकर्मणीति कर्तव्ये अर्थग्रहणस्यैव पक्षेऽर्थ्यमानद्वितीयाविभक्तिपरिग्रहार्थत्वात्। पितरं स्मरतीति घुटि चेत्यर्, यदि स्मृत्यर्थानां कर्मणि षष्ठी भवति। तत्कथं पिता स्मर्यत इति प्रयोगः। आत्मनेपदेन कर्मण उक्तत्वात्। यदा च कर्मरूपतामविवक्षितत्वसम्बन्धसामान्यविवक्षा तदा पितुः स्मर्यत इत्यपि भवत्येव। तथा च सर्पिषो दयते, सर्पिषमीष्टे, सर्पिषो नाथते, शतस्य पणते, सहस्रस्य व्यवहरते इत्यादयो दृश्यन्ते। एवं सतोऽप्यविवक्षा यथा, अनुदरा कन्या इति।

---

१. २।४।३७ (दु० वृ०)
२. २।४।३८ (दु० वृ०)
३. वै विकल्पम् (भं०)
४. चित्र्यमेतत् (वा०)

करोतेः प्रतियत्ने [1]२।४।३७

सतो ([2]गुणान्तरोत्पादनमिति। प्रकृतत्वादन्यो) गुणो गुणान्तरम् एधोदकस्येति। समाहारे द्वन्द्वः वेति वक्तव्यमिति नापूर्वत्वेन कुतः कृञ इति कर्तव्ये दितपो अधिकस्य निर्देशेनाधिकविशेषद्योतनार्थेन द्वितीयाया अपि परिग्रहात् सम्बन्धसामान्यविवक्षायां [3]सिद्धैव षष्ठी, आरम्भस्तस्या एव प्रपञ्चार्थः।

हिंसार्थानामज्वरे [4]२।४।३८

हिसि हिंसायाम्। हिंसनं हिंसा। गुरोश्च निष्ठायामित्यकारः। रुजति तुदतीति तुदादेरनीति गुणाभावः। "एति जीवन्तमानन्दः" इति इणिरयं गत्यर्थो न तु हिंसार्थः। ज्वरयतीति ज्वरो रोगे हेताविन्, उपधादीर्घः। सानुबन्धानां ह्रस्वः। सम्पूर्वस्येत्यादि [5]एतच्चाज्वरेः इतीकारस्याधिकस्य निर्देशाल्लभ्यते। सन्तापयतीति। तप सन्तापे हेताविन्। हिंसार्थानामित्यादि। घञादिभिः प्रत्ययैः प्रतिपाद्यस्सिद्धरूपो भावः। सः यदा हिंसार्थानां धातूनां कर्ता भवति तदा षष्ठी प्रवर्तते, यथा—मूलोदाहरणयोः। तत्र ह्येकत्र रोगकर्ता, अपरत्रापि तोदः, रुजितुदी च भावघञन्तौ। वायुः पुरुषं हिनस्ति इत्यत्र तु न भवति कर्तुर्वायोर्भावार्थानभिधायित्वात्। कृपावाजीत्यादिना कर्तर्यण् प्रत्ययान्तो अयं वायुशब्दो न घञाद्यन्तः। अयं च विशेषो अर्थग्रहणाल्लभ्यते अन्यथा हि हिंसायामित्येव कुर्यात्। हिंसायां यो धातुस्तस्य यत्कर्मेति चार्थो विज्ञास्यते।

कर्तृकर्मणोः कृति नित्यम् [6]२।४।३९

क्रियाविशेषणत्वाद् द्वितीयान्तम् इति षष्ठी भवतीति। भवति क्रियायाः नित्यमिति विशेषणं क्रियायाश्च साध्यत्वे सति कर्मकत्वात् तद्विशेषणमपि कर्म भवति। तेन नित्य-शब्दात् कर्मणि द्वितीया, नपुंसकं चैतदिति, तेनाकाराद् असम्बुद्धौ मुश्चेति मुरागमः। असुश्च लोपः। कृत्प्रत्ययान्त इति केवलस्य कृतोऽसत्वात्। आसिका अग्रग्रामिकेति, भावे वुञ्, भवदर्थस्यात्र कर्तृत्वात् कर्तृ

---

१. २।४।३९ (दु० वृ०)
२. गुणान्तरो नापादानमिति प्रकृतादन्यः (वा०)
३. षष्ठी सिद्धा (मं०)
४. २।४।४० (दु० वृ०)
५. एतद्वा ज्वरे (मं०)
६. २।४।४१ (दु० वृ०)

रक्षितेति कर्तरि तृच्। अत्र वुण्, भुवनी कर्मणी। अश्वेनेति करणे तृतीया कृत् प्रत्ययान्तस्येति, तव्य, अनीय, क्यप्, घ्यण् एते कृत्प्रत्ययाः। तवै प्रत्ययस्तु छन्दोविषयः। ते तव्यादयः कृत्प्रत्ययाः अन्ताः यस्य तथोक्ताः, गम्य इति। शकिसहीति य प्रत्ययः कर्तरि चेति न कृतमुत्तरत्र कर्मणोऽप्यनुवृत्तिर्यथा स्यात् इति। अन्यथा चानुकृष्टं कर्मग्रहणमुत्तरत्र नानुवर्तते। यद्येवम्, चकारः एवोत्तरत्रानुवर्तिष्यते। सकर्मण्यपि निषेधं समुच्चेष्यति। एवं तर्ह्युभयोः कर्तृकर्मणोर्यत्र कृत्-प्राप्तिः तस्मिन्कृति प्रयुज्यमाने सति कर्मण्येव षष्ठी यथा स्यात्। कर्तरि माभूदिति नियमार्थं कर्मग्रहणम्। तेनाश्चर्यो गवां दोहो गोपालकेनेत्यत्र कर्ता अगोपालकात् षष्ठी न भवति। यद्येवम्, [1]आश्चर्यमोदनस्य नाम पाको ब्राह्मणानां च प्रादुर्भाव इत्यत्र ब्राह्मणात् कर्तुः षष्ठी न प्राप्नोति, नैतत्, यत्र कर्तृकर्मणोरेव कृत्प्रत्ययविषयत्वेन प्राप्तिः तत्रायं नियमः। इह तु पाके ओदनस्य प्राप्तिः प्रादुर्भावे च ब्राह्मणानामित्यविषयोऽयं नियमस्य। इह तर्हि-चिकीर्षा विष्णुमित्रस्य कटस्य, भेदिका देवदत्तस्य काष्ठानामिति विष्णुमित्र-देवदत्ताभ्यां कर्तृभ्यां नियमात् षष्ठी न प्राप्नोति। भविष्यति चानुवृत्तेः अकारयोः प्रयोगे कर्तर्यपि षष्ठी समुच्चयार्थत्वात्। तथा च क्वचिद्विकल्पः कर्तरि दृश्यते। शब्दानामनुशासनमाचार्येण आचार्यस्येति वा। कृतीति किम्, तद्धिते मा भूत् कृतपूर्वी कटमिति। कृतं पूर्वमनेनेति तसादित्वादिनि प्रत्ययः। अत्र कटात् कर्मणः तद्धितस्य प्रयोगे षष्ठी प्राप्नोति सा कृद्ग्रहणान्न भवति। कृतमिति च निष्ठायाः कर्मसामान्यमभिहितमिति कर्मविशेषमभिधातुं कटाद् द्वितीयैव प्रवर्तते। नित्यग्रहणं पूर्वत्र विकल्पप्रतिपत्त्यर्थम्। यदि पुनः पूर्वत्रैव वेति क्रियते, किं स्यात्, इहापि वेत्यस्यानुवृत्तिः आशङ्क्यते।

न निष्ठादिषु [2]२।४।४०

आदिशब्दोऽत्र प्रकारे तेन येषु प्रत्ययेषु प्रयुज्यमानेषु सत्सु कर्तृकर्मणोः षष्ठी नेष्यते ते निष्ठादयः तानेव निष्ठा। क्वन्सुकान इत्यादिना दर्शयति। भुक्तः भुक्तवानिति। भुज्यते स्म, भुङ्क्ते स्म इति क्तक्तवन्तु, अन्त्वसन्तस्येति दीर्घः। ([3]पचिवानिति सान्तमहतोरिति दीर्घः) अन्यत्पूर्ववदिति। एत्वादिकार्यम्। ईषदाढ्यं भवं भवतेति सुखेन अनाढ्येनाढ्येन भूयत इति विग्रहः। ह्रस्वारुषोरिति मागमः, ईषत्स्थानं भवतेति सुखेन स्थीयत इति यु-

---

१. आश्चर्यमिदमोदनस्य (मं०)
२. २।४।४२ (दु०)
३. न्यूनपाठः (वा०)

प्रत्ययः। कटं कारको व्रजतीति, करिष्यामीति वुण्। शतं दायीति। इन्हन्पूषेति दीर्घः। एवं ग्रामं गमीत्यपि मन्तव्यम्। वर्तमानकाल इत्यादि। कथं पुनरेतल्लभ्यते, नवानिर्दिष्टस्यानित्यत्वात्। तथा चाधिकरणवाचिनोऽपि क्तप्रत्ययस्य प्रयोगे निषेधो नेष्यते इदमेषामासितम्, इदमेषां शयितमिति। गत्यर्थाकर्मकेत्यादिना च शब्दादधिकरणे क्तः, एवं नपुंसके भावेऽप्यनिषेधः। छात्रस्य हसितम्, दास्याः कामुकः, श्वयुकमगमेत्युकञ् वुण्प्रत्ययो भविष्यत्काल विहितो गृह्यत इति न तु वुण्तृचावित्यनेन विहितः वुण्तुमाविति तु वुण् भविष्यत्काले विधीयते तद्विधौ हि भविष्यति गम्यादयः इत्यतो भविष्यतीत्यनुवर्तते। यवानां लावक इति वुण्तृचाविति वुण्, द्विषः, शन्तृङि तु विकल्पः। चौरस्य द्विषन्, चौरं द्विषन्।

षडो णो ने २।४।४१[1]

षड् इति कृतडत्वम्, षष् इत्ययं शब्दो निर्दिश्यते। षण्णामिति षत्वम्, आम्, संख्यायाः ष्णान्ताया इति नुः, हशषच्छेति डत्वमनेन डस्य णः। तवर्गचटेति नस्य णत्वम्। षड्भिरधिका नवतिः षण्णवतिः इति। लोप्यः इत्यर्हप्रत्ययनिर्देशादधिकशब्दो लुप्यते। नवतिनगर्योर्नकारे णत्वं चानुवृत्तेः। अत्र हि विभक्तिग्रहणानुवृत्त्या विभक्तिनकारे परे णत्वम् विज्ञायते तथा च षण्णयनमित्यत्र णत्वं नेष्यते।

मनोरनुस्वारो धुटि २।४।४२[2]

मश्च नश्चेति द्वन्द्वः, पदान्ते सिद्धत्वादिति मोऽनुस्वारं व्यञ्जन इत्यनेनापदान्तेऽयं विधिः। आक्रम्यते, आङ्पूर्वः क्रमिः, ज्योतिरुद्गमनेऽर्थे रुचादिः। श्नुक्रमिभ्यां च परस्मै इति नियमादितीडभावः। सर्पींषि इत्यादि। शि, नुः, सान्तमहतोरिति दीर्घः। मनोरिति व्युत्क्रमपाठादनुस्वरस्यापि क्वचिद् व्युत्क्रमणं भवतीति प्रशान्म्यामित्यादि सिद्धम्।

वर्ग्ये वर्गान्तः २।४।४३[3]

मकारनकारयोरिति। यद्येवम्, चङ्क्रम्यत इत्यादावनुस्वारस्य वर्गान्तो न सिध्यति। वर्ग इति कर्तव्ये य-प्रत्ययनिर्देशादधिकात् सेत्स्यति वर्गस्थश्च-

---

१. २४।४३ (दु० वृ०)
२. २।४।४४ (दु० वृ०)
३. २।४।४५ (दु० वृ०)

वर्गस्तत्स्थाद्वर्गशब्देनाभिधास्यिते, पूर्वेणानुस्वारः प्राप्त इति मनोरनुस्वार इत्यनेन मोऽनुस्वारो यस्मिन् प्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीत्यनेन वर्गान्तेन बाध्यते। शान्तः शान्तवानिति शास्यति स्मेति कर्तरि क्तः, नडीङ्श्वीडीतीडभावः। इह वर्ग्यविशेषार्थं धुटीत्यनुवर्तते, तेनेह न भवति, हन्मि हन्म इति।

तवर्गश्चटवर्गयोगे चटवर्गौ २।४।४४[1]

चटयोर्वर्गौ चटवर्गौ इत्यन्ते प्रयुज्यमाने वर्गशब्दः चकारेणापि सम्बध्यते। अन्यथा टवर्गं च-योग इत्यसन्देहार्थं कुर्याच्चेति घोषवत्योश्चेतीडभावः। णत्वविधेर्वनन्तग्रहणं तवर्गविशेषणार्थमपेक्ष्यते। तेनेह न भवति, प्रशाञ्चिनोति प्रशाण्टीकते। ताविति कर्तव्ये तच्छब्देन सर्वनाम्ना च टवर्गावेव परामृष्टौ भविष्यत इति भावः। गुरुसूत्रकरणादिति वर्गग्रहणाद्धि संज्ञापूर्वकस्य विधेरनित्यत्वं भवति। लक्ष्यानुरोधेन चानित्यत्वस्मरणादपदान्ताभ्यां चटवर्गाभ्यां यो योगः तत्रैव योगोऽयं विधिरिति मधुलिट्तेत्यादावपदान्तविषये न भवति। प्रत्ययलक्षणेन चान्तर्वर्तिनीं विभक्तिमाश्रित्य पदान्तविषयत्वमत्र मधुलिट्तेत्यादि ता त्वौ भाव इति ता त्वौ तसादित्वात् तरतमौ च-टवर्गाभ्यामिति कर्तव्ये योगग्रहणं विस्पष्टार्थम्।

नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नु विसर्जनीयषान्तरोऽपि २।४।४५[2]

तैरन्तरं यस्येति बहुव्रीहिरित्यन्तरं व्यवधानमित्यर्थः। विकारस्थ इति विकारावस्थाव्यवस्थित इत्यर्थ एवमागमस्थः, नामिकराणां प्रत्ययविकाराणां च यथासंख्यसम्बन्धो न भवति। तेषां परमिति। षत्वकरणात् वाक्षु त्वक्षिवति चवर्गदृगिति गत्वम्। अघोषे प्रथम इति कः। गीर्षु, धूर्ष्विति। इरूरोरीरूरौ एते प्रत्ययसकारा इति प्रयोगभेदाद् बहुत्वनिर्देशः। एष इत्येतत् सि सौ सः। येषां तेषामिति। सुरामि सर्वतः। नन्वित्यादि चोद्यमुच्यत इत्यादिना परिहरति। अयमत्रार्थः। विसर्जनीयविधौ वा विराम इति तौ वेति वर्तते तेन यथा गीर्षु सर्जूष्वित्यादौ रेफस्य विकल्पेन विसर्जनीयप्रवृत्तिः। तथा सर्पिषोऽपि सकारस्य यत्र यदा प्रवृत्तिपक्षः तदा विसर्जनीयव्यवधाने सति सर्पिष्विति रूपम्। अप्रवृत्तौ तु सस्य षत्वे कृते तद्व्यवधाने उपजाते सति षत्वं न सिध्यति। ष-ग्रहणं कर्तव्यम्। असाविति अदसस्सावौ सिलोपश्चेत्यौत्वसि-

१. २।४।४६ (दु० वृ०)
२. २।४।४७ (दु० वृ०)

लोपी। उत्तरसूत्रादनन्त्य इति वर्तते। तेन सकारो विशेष्यते। तेनाग्निस्तत्रे-त्यादौ न भवति। सात्प्रत्ययस्य षत्वं नेष्यत प्रतिषेधविषयोपलक्षणपरमेतत्। तेन पदादिसकारस्यापि क्वचिन्न भवति। दधि सिञ्चतीत्यादौ न भवति।

रषृवर्णेभ्यो नो णमनन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि २।४।४७[1]

द्वन्द्वगर्भो बहुव्रीहिरिति स्वरहयवकवर्गपवर्गाणां द्वन्द्वे कृतेऽन्तरशब्देन बहुव्रीहिरित्यर्थः। इत्येतैर्व्यवहितोऽपीति। स्वरादिव्यवधाने सति रषृ-ऋवर्णेभ्यः परो नकारो णत्वं न प्राप्नुयादित्येवमुक्तम्, पुष्णामित्यवमसंयोगादित्यकार-लोपः षाण्णत्वमिति तवर्गषटवर्गादित्यनेनैव सिद्धमिति षग्रहणं पुरुषेणेत्यादौ षाण्णत्वार्थम्। तिसृणामिति त्रिचतुरोरित्यादिना त्रिशब्दस्य तिसृभावः। ननु च ऋवर्णे र-श्रुतिर्विद्यते, ततश्च र-ग्रहणेनैव सिद्धत्वार्थम् किमृवर्णेन, नैतत्, वर्णाधिकाराद्, र-इति वर्णो गृहीतः। न च ऋकारे र-श्रुतिर्वर्णत्वेनेष्यते। पृथक्प्रयत्ननिवृत्तस्य वर्णत्वेनेष्यमाणत्वात्। पितॄन्, गिरीनिति अग्निवच्छसी-त्यग्निवद्भावाच्छसोऽकार इत्यादिना पूर्वं स्वरो नत्वं च नञा निर्दिष्टस्या-नित्यत्वात्। क्वचिदन्त्यनकारस्यापि णत्वम्। हे प्राण्, हे पराणिति। प्र परा पूर्वादन चेत्यस्मात् क्विप्। नृनमस्यापत्यं नार्नमनि इत्यत्र न भवति। बाह्यं तद्धितमपेक्ष्य बहिरङ्गायाः वृद्धेरसिद्धत्वे सति रेफाभावात् रषृवर्णानकारश्च यदेत्याद्यपि शब्दस्यात्र बहुलार्थत्वादिति भावः। तथा च समानपदेऽपि क्वचि-न्नेष्यते। प्रवेपनं प्राध्ययनम्, प्राध्यना प्रभवानां प्रनष्ट इत्यादौ विसर्जनीय-जिह्वामूलीयेत्यादि स्वरादिव्यवधाने णत्वमुच्यमानं विसर्जनीयादिव्यवधानेन प्राप्नोतीत्येवमुक्तम्। ननु विसर्जनीयस्तावत्स्वरनिमित्तकात्स्वर इति शक्यते व्यपदेष्टुम्। जिह्वामूलीयोपध्मानीयावपि विसर्जनस्थानिकत्वाद्विसर्जनीयावेव तेन यद्विसर्जनीयादिव्यवधानं तत्स्वरादिव्यवधानमेवेति स्वरव्यवधानादेव सिद्धं णत्वमिति किमिष्टकथनेन, नैतत्, प्रेन्वनमित्यादावपि हीकारस्स्वरनिमित्तक-त्वात् वकारः स्वर इति तेनापि व्यवधाने णत्वं स्यात्। गौणश्चायं विषयः इतीष्टिरेव ज्यायसी। इवि जिवीत्यस्मात्पूर्वकृतनकारागमाद् युट्। यद्येवम्, वृंहणमित्यादावनुस्वारव्यवधाने णत्वं न सिध्यति। स्थूलपरिवृंहेण इति निर्दे-शात् सेत्स्यति।

---

१. २।४।४८ (दु० वृ०)

नदाद्यञ्च्वाह्वयन्स्यन्तृसखिनान्तेभ्यो ई २।४।४७[1]

ततो द्वन्द्व इति। नदादयश्च, अंश्च आश्च सखा च नान्तश्च इत्येवं रूपः। विदुषीति। विद् ज्ञाने वर्तमाने शन्तृङ्, अन्विलुक्, वेत्तुश्शन्तुर्वन्सुः पेचुषीति पचेः क्वन्सुकानाविति क्वन्सुः। परोक्षवदतिदेशात् द्विर्वचनम्, अस्यैक-व्यञ्जनमध्ये इत्येत्वाभ्यासलोपौ। अन्तीर्घमेकस्वरेतीट्, गोमती धनवती। गावो धनानि च विद्यन्ते यस्या इति मन्तुः। दण्डिनी पद्मिनी इति। तद-स्यास्तीति इन्, नदादिराकृतिगण इति। आदिशब्दोऽत्र प्रकारे, प्रकारश्च सादृश्यम्। तेनाकृत्या सादृश्येनोपलक्षितो यो गणस्सः आकृतिगणः। अतो येभ्यः शब्देभ्य ई-प्रत्ययो दृश्यते ते सर्वे नदादयः। यद्येवमिति। यद्याकृतिगणो नदादिरित्यर्थः। कथं नोपादेयः इत्याह—सिद्धो हीत्यस्यायं प्रपञ्चार्थ इति नदादय एव अनेन प्रकारेण प्रपञ्च्यन्त इत्यर्थः। पूर्वकमिदं च सूत्रमपुराण-मित्याहुः। शक्यत एव हि नदाञ्च्वाहिभ्यो गौरादित्वादीप्रत्ययो विधातुम्।

ईकारे स्त्रीकृतेऽल्लोप्यः २।४।४८[2]

लोपनीयो लोप्यः। शकिसहीति यः। युवतिरिति विभक्तिकार्ये एव कर्तव्ये नलोपस्य अलुप्तवद्भावो विज्ञायते। तेन लोपे सत्यप्यकारलोपः स्यात्। कुण्ड इति। ननु स्त्रियामित्यनुवृत्तेरत्र न भविष्यति। अस्त्येतत्, निरनुबन्धकग्रहणे न [3]सानुबन्धकस्य ग्रहणमिति तु वचनादादेशस्वापीकारस्य ग्रहणमाशङ्क्येत, पदे तुल्याधिकरणे इति ज्ञापकान्नैवमाशङ्क्ष्यत इति चेदे-तच्छब्दविषयमेव एतद्[4] ज्ञापकं स्यात्। स्त्रियामिति कर्तव्ये कृतग्रहणं प्रका-रान्तरेणापि कृत ईकारे यथा स्यादिति कुम्भकारी। अण्येकादितीकारः।

स्वरो ह्रस्वो नपुंसके २।४।४९[5]

लिङ्गस्य योऽन्त्यस्वर इति। वर्णान्त्यस्य विधिरिति वचनादैकारस्य इः, औकारस्य उः। कुतः, सन्ध्यक्षराणां ह्रस्वादेशे इदुताविति वचनात्। गौरिति। गोरी घुटीत्यौत्वम्। कथं पद्मेभ्यः, एत्वस्य बहिरङ्गस्यासिद्धत्वात्। विभज्यत

---

१. नदाद्यञ्चिवाह्व्यन्स्यन्तृसखिनान्तेभ्य ई २।४।५० (दु० वृ०)
२. ईकारे स्त्रीकृते लोप्यः २।४।५१ (दु० वृ०)
३. सामान्यस्य ग्रहणमिति (भं०)
४. न्यूनपाठः (वा०)
५. २।४।५२ (दु० वृ०)

इति पृथक्क्रियते। पञ्चखट्व इति, पञ्चभिः खट्वाभिः क्रीत इति क्रीतार्थकस्येणो द्विगोर्लुगनपत्य इति लोकोपचाराल्लुक्। स्वरो ह्रस्व इति ह्रस्वः। निष्कौशाम्बिरिति। निष्क्रान्तः कौशाम्ब्याः इति तत्पुरुषः। निरो रेफस्य विसर्गः तस्यानव्ययविसृष्ट इति तु-शब्दात् षत्वम्। यत्तु नपुंसक इति सूत्रं तत्स्वरो ह्रस्व इत्यस्य विधेरसकलविषयत्वज्ञापनार्थम्। तेन गोर[1]प्रधानस्यानन्त्यस्य न ह्रस्व इति। सुगो गोकुलमित्यादौ न भवति। यथा चात्र तथेहापि। अतिश्रीः अतितन्त्रीः अतिलक्ष्मीः इति। ईयसो बहुव्रीहावपि। बहुश्रेयसी। ननु ह्रस्वेन सम्बन्धिशब्दत्वाद् दीर्घस्य स्थाने भवितव्यम्। दीर्घश्च स्वर एवेत्यर्थात्। स्वर इति लब्धमिति किं स्वरग्रहणेनेत्याह—स्वरग्रहणमित्यादि। विशिष्टस्यान्तदेशवर्तिनः स्वरस्य ह्रस्वो यथा स्यादिति स्वरग्रहणम्। तेन शोभना वाग्यस्य कुलस्य तत् सुवाक्कुलमित्यत्र स्वरो ह्रस्वो न भवति। वर्णान्त्यपरिभाषयेत्यादिना परमतमाशङ्क्य विसृष्टार्थमित्यनेन परिहरति।

कारकपादश्चतुर्थः।

पञ्चमः पादः

नाम्नां समासो युक्तार्थः २।५।१

नाम्नः संज्ञा पूर्वाचार्याः लिङ्गस्य विभक्त्यन्तस्य कृतवन्त इति। तथा चाहुः—

अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः।
तन्नाम कवयः प्राहुः भेदे वचनलिङ्गयोः॥

इत्यामन्त्रणविभक्तिसहिताः प्रथमाद्याः यत्र अष्टौ विभक्तयो नानाविधेषु कर्त्रादिषु प्रयुज्यन्ते तल्लिङ्गवचनभेदे सति नामेत्याचार्याः व्यपदिशन्ति। लिङ्गवचनभेदः स्त्रीपुंनपुंसकानामेकवचनबहुवचनानां च नानात्वं तेन लिङ्गसङ्ख्यायुक्तं नामेत्यलिङ्गसंख्यानामव्ययानामनामत्वमेव। कर्मधारयसमासे [2]वृत्तिपदानामर्थान्तरानभिधायित्वमतोऽन्तरङ्गत्वाद् युक्तार्थ इत्ययं कर्मधारय

---

१. गोरप्रधानस्यान्त्यस्य ह्रस्व (मं०)
२. वृत्तिपदानामर्थान्तराभिधायित्वम् (वा०)

इति प्रदर्शयन्नाह—युक्तार्थश्चासावर्थः युक्तार्थः इति। [1]नाम्नां यो युक्तार्थ इत्येतेन युक्तार्थ इत्येतदपेक्ष्य नाम्नामितीयं षष्ठीति दर्शयति। समाससंज्ञा भवतीति ([2]सः युक्तः संसृष्टोऽर्थस्समाससंज्ञ इत्यर्थः। संज्ञानिबन्धनं च कार्यमर्थस्य न सम्भवतीति) सामर्थ्यात् तद्वाचिनो राजपुरुषादिशब्दस्येयं संज्ञा विज्ञायते। यद्येवम्, राज्ञः पुरुष इति वाक्यस्याप्यसौ प्राप्नोति। अस्ति ह्यत्रापि परस्परापेक्षत्वाद् युक्तार्थत्वम्। अत्र हि राजा पुरुषमपेक्षते ममायमिति पुरुषोऽपि राजानमस्याहमित्येवमाशङ्क्य परिहारमाह - एकरूपतामापन्नोऽर्थ इत्यादि। सत्यम्, अस्ति राज्ञः पुरुषो राजपुरुष इत्युभयत्रापि युक्तार्थत्वम्। तथापि प्रयुक्तार्थग्रहणसामर्थ्यात् तथाविधमिह युक्तार्थत्वमाश्रीयते। यत्र द्वयोर्नाम्नोरेकार्थत्वमुपजायते यथा राजपुरुष इत्यत्र। अत्र हि राजविशिष्टं पुरुषमभिधातुं प्रयुज्यमानो राजशब्दो राजावच्छिन्ने पुरुषे सङ्क्रान्त इति पुरुषपदार्थादविभक्तं तत्रैवोपलीनं स्वार्थमभिधत्ते, पुरुषशब्दोऽपि राजावच्छिन्नं निजमर्थमभिदधानः पुरुषमात्राद्विलक्षणार्थविषयसञ्जात इत्युभयोरपि पूर्वपदोत्तरपदयोर्विशिष्ट पुरुषाभिधायित्वादेकार्थत्वमुपजातम्। ननु विशिष्टपुरुषाभिधायित्वं राज्ञः पुरुष इत्यत्राप्यस्ति। एवं च सति वक्तव्यः तथाविधः कश्चिदेकार्थ्यकारितो विशेषो येन वाक्ये समाससंज्ञायाः प्रवृत्तिर्न भवेत्। एष उच्यते। इह राज्ञः पुरुष इति वाक्येऽपि संख्याविशेषावच्छिन्नो राजार्थः प्रतीयते। राजपुरुष इत्यत्र राजशब्दः पुरुषविशेषमभिधातुं पुरुषार्थे सङ्क्रान्त इति पांसूदकवदविभागमापन्नत्वात् कथमसौ संख्याविशेषावच्छिन्नं [3]भिन्नार्थमभिदध्यात्। तथा वाक्ये राजशब्दो विशेषणभावापन्नमुद्भूतसम्बन्धमर्थमभिधत्ते। तेन सम्बन्धाभिधायिनो ततो विभक्तिरुत्पद्यते। वाक्यादन्यत्र तु पृथगर्थतायाः निवृत्तत्वाधिष्ठानस्सम्बन्धो वृत्तावेवान्तर्भूत इति नोत्पद्यते विभक्तिः। एवं प्रकार एव च विभक्त्यनुत्पादः तत्स्था लोप्या इति वचनेन प्रत्ययलक्षणसंसिद्धये आख्यायते। अन्यथा त्वन्नयनमित्यादौ पदान्ते धुडामिति प्रथमात्वं न स्यात्। किं च वाक्ये पदार्थानां भिन्नत्वाद् भेदनिबन्धनं समुच्चयं द्योतयितुं च शब्दः प्रयुज्यते। राज्ञश्च पुरुषश्चेति वाक्यादन्यत्र तु भेदरूपताया निवृत्तेः। द्योत्योऽर्थो नास्तीति द्योतकोऽपि च शब्दो विनिवर्तते। तदेवं संख्याविशेषाप्रतीतिः विभक्तिः अश्रवणं च शब्दविनिवृत्तिरित्येव ऐकार्थ्यकारितो

---

१. नाम्नः (मं०)
२. न्यूनपाठः (मं०)
३. निजमर्थमभिदध्यात् (मं०)

विशेषः। एवंविधं चैकार्थ्यं राज्ञः पुरुष इत्यत्र वाक्ये सत्यपि युक्तार्थत्वे नोपजायत इति न तस्यास्ति समाससंज्ञायाः प्रसङ्गः। नीलोत्पलम्, राजपुरुष इत्यत्रार्थान्तरव्यावृत्त्या पूर्वपदोत्तरपदयोर्युक्तार्थत्वम्। तथा हि नीलो गुणो भ्रमरादिभ्यो व्यावृत्तः उत्पलमपि श्वेतादेर्गुणात्। राजापि च स्वान्तराद् व्यावृत्तः। पुरुषोऽपि स्वाम्यन्तरात्। नाम्नामिति बहुत्वनिर्देशेऽपि द्वे नाम्ने उदाहृते। बहुत्वस्यातन्त्रत्वात्। नाम्नामिति किम्, देवदत्तः पचति। तुल्याधिकरणत्वात्सति कर्मधारये विभक्तिलोपः स्यात्। वस्त्रं नीलमित्यादि। तत्र नील-राजाशब्दौ वस्त्रभार्याभ्यां सम्बद्धावुत्पलपुरुषाभ्यामयुक्तार्थाविति नैवं प्रकारो विषयः समाससंज्ञायाः। यत्राप्युपसर्जनं विशेषणमपेक्षते तत्राप्ययुक्तार्थत्वमेव। यथा—ऋद्धस्य राज्ञः पुरुष इति। देवदत्तस्य गुरुकुलमित्यत्र देवदत्तमपेक्षमाणस्यापि गुरोः कुलेन सहायुक्तार्थत्वेऽपि समासः। सम्बन्धिशब्दानां सापेक्षाणामपि सतां परपदेनेति निर्देशात्समासत्वप्रवृत्तेः राजपुरुषोऽभिरूप इत्यत्र तर्हि प्रधानस्य विशेषणमपेक्षमाणस्य कथं समासः, वर्गप्रथम इति समासश्रवणात्। अत्र हि प्रधानं प्रथमशब्दः पदान्त इति विशेषणमपेक्षते। असूर्यम्पश्या राजदाराः, अश्राद्धभोजीत्यादौ तु नञो दृशिभुजिभ्यां सम्बन्धात् सूर्यश्राद्धाभ्यामयुक्तार्थत्वेऽपि समासः। अकर्तरि च कारके इति कारकग्रहणेनैवंविधे विषये समासस्येष्टत्वात्। एतच्च तत्रैव वक्ष्यामः।

तत्स्था लोप्या विभक्तयः २।५।२

तद्ग्रहणेन समासः परामृश्यत इति पूर्वसूत्रे तस्यैव विधीयमानत्वात् प्राधान्यम्। ननु समासे ऐकार्थ्यापत्तेर्विभक्तयो न सन्तीति कथं तत् परामर्शे सति सूत्रार्थसङ्गतिः स्यादित्याशङ्क्याह—समासार्थं च वाक्यमित्यादि। च शब्दोऽवधारणे। स च भिन्नक्रमः वाक्यशब्दादनन्तरं बोद्धव्यः। तेनायमत्रार्थः। नेह समासशब्देन समासः उच्यते वचनवैयर्थ्यप्रसङ्गात्, किन्तर्हि, समासार्थं यद्वाक्यं राज्ञः पुरुष इत्यादि यत्र विभक्तयश्श्रूयन्ते, तदेवोच्यते भवति च तादर्थ्यात् ताच्छब्द्यम्, क्व, यथेत्याह—तेनेत्यादि। समासार्थस्य वाक्यस्य परामर्शार्थेन तद्ग्रहणेन हेतुनेत्यर्थः। यद्येवम्, यत् समासार्थं वाक्यं न भवति। वसिष्ठस्यापत्यं वासिष्ठ इत्यादि। तत्र विभक्तेः लोपो न प्राप्नोति। तत्रेति कर्तव्ये स्थाग्रहणात् भविष्यति। अथ लोप्या इत्यर्हप्रत्ययनिर्देशः किमर्थः, न लोप इत्येवोच्यते। भावघञन्तस्य लोपशब्दस्य विभक्त इत्यनेनान्वयात्। लुप्यन्त इति लोपा इति कर्मघञन्तोऽसौ विज्ञास्यते तदपार्थकोऽर्हप्रत्ययनिर्देश इत्याह—लोप्या इत्यर्हप्रत्ययनिर्देशादित्यादि। अन्यस्यापीति। अविभक्ति-

स्वरूपस्य प्रयोग[1]वशेन, न तु स्वमनीषिकयेत्यर्थः। पूरणप्रत्ययान्त इति। संख्यायाः पूरण इत्यादिना यो विहितः पूरणप्रत्ययस्तदर्थ इत्यर्थः। यद्येवम्, जनार्दनस्त्वात्मचतुर्थ इति। कथमयं प्रयोग इत्याह--जनार्दन इत्यादि। आत्मचतुर्थ इति बहुव्रीहावात्मशब्दोऽत्र प्रथमान्तः समस्यते। न तृतीयान्त इति भावः। दिङ्मात्रं चैतत् प्रदर्शितम्। तथा चान्यत्रापि तृतीया न लुप्यते। ओजस्, सहस्, अम्भस्, तपस्, अञ्जस्, इत्येतेभ्य परो यदा भवति तेनौजसाकृतमित्यादि सिद्धम्। एवं स्तोकान्तिकदूरार्थेभ्यः पञ्चमी न लुप्यते। स्तोकान्मुक्तः, अल्पान्मुक्तः, अन्तिकान्मुक्तः अभ्यासान्मुक्तः, दूरान्मुक्तः, विप्रकृष्टान्मुक्तः। आक्रोशे षष्ठी न लुप्यते। चौरस्य कुलम्, पुत्रे तु वा, दासीपुत्रः, दास्याः पुत्रः। ऋदन्तेभ्यो विद्यायोनिसम्बन्धवाचिभ्यो अपि लोपः। तस्याः होतुः पुत्रः, होतुरन्तेवासी, पितुः पुत्रः, पितुः अन्तेवासी। विद्यायोनिसम्बन्धवाचिन्येवोत्तरपदे लोपस्मरणादिह लोपो भवत्येव। [2]होतृवचनम्, पितृगृहमिति। स्वसृपत्योस्तु वा। पितृष्वसा, पितुः ष्वसा, षत्वविकल्पो लुगभावपक्षे स्मर्यते। तेन पितुः स्वसेत्यपि भवति। एवं मातृस्वसा, मातुः स्वसा मातृष्वसेत्यपि मन्तव्यम्। दुहितृपतिः, दुहितुः पतिः। शयवासवासिषु सप्तमी वा लुप्यते। खशयः खे शयः, ग्रामवासः ग्रामे वासः। ग्रामवासी ग्रामे वासी। कालात्त्वत्र नित्यं लोपः। पूर्वाह्ण शयः। एवमात्मनेपदम्, परस्मैपदम्, मध्ये गुरुः, अन्ते गुरुः, स्तम्बेरमः, कर्णेजपः, सरसिजम्, प्रावृषिजः, शरदिजः, कालेजः, दिविजः, वाचो युक्तिरित्यादयः। समासविषयेऽप्यकृतविभक्तिलोपो मन्तव्यः।

प्रकृतिश्च स्वरान्तस्य २।५।३

अर्हप्रत्ययरहितं लोपग्रहणं चेत्यनुवर्तत इत्यपेक्षते। विभक्त्यदर्शने सति स्वरान्तस्य प्रकृतिरित्येतावान्सूत्रार्थः। तत्किमत्रार्हप्रत्ययापेक्षयेति भावः। सत्यां विभक्तौ यत्कार्यम् उक्तम् तदसत्यां सत्यां तस्यां कथं प्राप्नुयादिति यो मन्यते तं प्रत्याह—प्रत्ययलक्षणेनेत्यादिविभक्तिनिमित्तमिति वाक्यकाले श्रूयमाणायाः विभक्तिर्लुप्ता तद्धेतुकमित्यर्थः नान्यदिति। अविभक्तिनिमित्तं कुत इत्याह--स्वरान्तस्येत्यादि। यद्यविभक्तिनिमित्तमपि कार्यं प्रकृतिभावः बध्नीयात्। स्वरान्तस्येति किं, दृषदि लेखः दृषल्लेखः। दृषच्छब्दस्य यदि

---

१. शब्देन (भ०)

२. होतृवनम् (भ०)

प्रकृत्यभावस्स्यात् । ततः पदान्ते वुडामिति प्रथमो न स्यात् । यद्येवम्, पन्थानं गतः । पथि गत इत्यादौ व्यञ्जने चैषा निरिति न लोपो न प्राप्नोति । तद्विधावेषामिति बहुत्वनिर्देशात् भविष्यति ।

व्यञ्जनान्तस्य यत्सुभोः २।५।४

यदिति कार्यमात्रं निर्दिश्यते तद्विधीयमानं व्यञ्जनान्तलिङ्गं विधिभाक् । सुभोरिति कार्यमात्रस्य निमित्तभावेन विशेषणम् । विभक्तिलोप इति सप्तसप्तमी । यद्येवम्, अप्राप्तविध्यर्थमिति कार्याणां साङ्कर्येण प्रवृत्तिस्स्यात् । ततश्चानुडुहो दत्वमुक्तम् राजशब्दस्यापि भवेत्, नैष दोषः, प्रत्यासत्तेर्यस्य यत्कार्यमुक्तं तस्यैव तद् विज्ञास्यते । अतः अनुषङ्गलोपो दत्वं च भवतीति । ननु दत्वं विरामव्यञ्जनादिविषये उच्यमानमर्थशब्दे परतो प्राप्तमस्माद् वचनाद् भवतीति युक्तं वर्णयितुमनुषङ्गलोपस्सामान्यस्वरनिमित्तकोऽत्र कथं न प्राप्नुयात्, अस्त्येतत्, एवं तु मन्यते, तत्रानुषङ्गलोपस्यावकाशः यत्र समासो नास्ति । विदुषः विद्वद्भ्यामित्यस्य विधेरवकाशः । राजार्थ इति । विद्वदर्थ इत्यत्र ([1]त्वनुषङ्गलोपः तेनास्त्वनेन) वेति परत्वादनेनैव न्याय्यः, तथा च द्युगत इत्यादि उदाहृतमन्यथा त्वत्रापि सामान्यव्यञ्जननिमित्तकं दिव उत्वमस्तीति किमनेनोदाहृतेन । षषो डत्वमिति [2]षष इत्यनुकरणादेकवचनम् । अथ युष्माभिः कृतम् युष्मत्कृतमित्यादावात्वमपि कस्मान्न भवति । तदपि ह्यात्वं व्यञ्जनादावित्यनेन सुभोरुक्तमेव न भवति । तद्विधौ श्रूयमाणव्यञ्जनादिविभक्तिप्रतिपत्त्यर्थस्य विभक्तिग्रहणस्यानुवृत्तिवैयर्थ्यप्रसङ्गात् । व्यञ्जनान्तस्येति किम्, स्वरान्तस्य मा भूत् । चौरेभ्यः भयम्, चौरभयम्, रेफाकारस्य धुट्येत्वमुक्तं न भवति । ([3]स्वरयवरा परे यस्मात्) स्वरयवरपर इत्येत्वानुकरणे तु ज्ञापके आश्रीयमाणे गुर्वी प्रतिपत्तिस्स्यात् । सुभोर्युगपद् यदुक्तं तदिह विधीयत इति चकारस्यानुवर्तमानस्य यौगपद्यद्योतनफलत्वादिति भावः । यत्तु केवले भकारे तन्नेति, विधीयत इत्यपेक्षते । केवले सुकार इति तु नोक्तम्, यतो न तत्र केवले सुकारे परे किञ्चित् केनचिद्वचनेन कार्यमुक्तं यद्वार्येत । भकारे परे दत्वमुक्तं न भवतीति भकार एवोक्तम्, न तु सुकारेऽपीत्यर्थः । स्भोरिति न कृतम्, वैचित्र्यादिति । वृत्तबन्ध ([4]लक्षणस्य वैचित्र्यस्य दर्शनाय

१. तु तेनानुषङ्गलोपस्त्वनेन (भं०)
२. षष् (भं०)
३. स्वरयवरेभ्यः परतः (भं०)
४. लक्षणं प्रदर्शयितुं सुभोरिति (भं०)

स्भोरिति न) कृतमिति भावः। ननु स्भोरिति कृते प्रथमैकवचनविषयाप्याशङ्का स्यात् ततश्च तत्रोक्तस्य कार्यस्य समासे विधानाददः पुत्रम् इत्यत्र सावौ सि लोपश्चेत्यौत्वं स्यात्। नैतत्, औत्वस्य योगपद्येनानभिधानात्।

पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः २।५।५

तुल उन्माने चुरादित्वादिन्, उपधानं गुणाभावः। संज्ञापूर्वको विधिरनित्य इति वचनात्। तथा च "प्रासादास्त्वां तुलयितुम्" इति महाकविप्रयोगः। [1]तत्र तुल्यते अनयेति ([2]विगृह्यतीर्विचिन्तीति) चकारस्यानुक्तसमुच्चयार्थत्वादङ् कारितलोपः। स्त्रियामादाप्, तुलया सम्मितं तुल्यम्, नावस्तार्य इत्यादिना ([3]य इवर्णलोप) विज्ञातव्यो विज्ञेयः स्वराद् यः आत्खनोरीचेतीत्वम्। गुणः, यत्र समासे स्वे पदे इत्यादि। समासे वाक्ये पदद्वयासम्भवात्, वाक्यावस्थापरिदृष्टं रूपमाश्रित्यैवमुक्तम्। तुल्याधिकरण इत्यस्यार्थं विवृण्वन् आह—तुल्याश्रय इति तुल्य आश्रयो ययोः पदयोस्ते तथोक्ते एतदेव व्यनक्ति, एकद्रव्यविषय इत्येकं समानमभिन्नद्रव्यं विषयो ययोरिति विग्रहः। नीलोत्पलमित्यत्र नीलशब्देन यदेव नीलगुणावच्छिन्नं द्रव्यमभिधीयत इति तदेवोत्पलजात्यवच्छिन्नमुत्पलशब्देनापि इत्यस्ति पदयोस्तुल्याधिकरणत्वम्। एवं स्नातानुलिप्त इति तुल्याधिकरणत्वादेवमादिसर्वं कर्मधारयसंज्ञमिति भावः। शब्दाभावादिति। प्रयुक्तानां शब्दानामिदमन्वाख्यायकं नाप्रयुक्तानामिति भावः। तथा च किमो निन्दायामेव समासः, किं राजा, किं सखेति। प्रश्ने तु न भवति को राजा कश्मीरेष्विति।

संख्यापूर्वो द्विगुरिति २।५।६

संख्या पूर्वा यस्येति अवयवावयविभावविवक्षायां षष्ठी निर्देशः। अवध्यवधिमद्भावविवक्षायां दिग्योगलक्षणा पञ्चमी स्यात्। सा ह्यवधित्वेनापेक्षायोगे सति स्मर्यते। स्वरो ह्रस्व इति पूर्वाशब्दस्य ह्रस्वः, संख्यापूर्वस्समास इति प्रकृतित्वात् कर्मधारयः, तद्धितानां येऽर्था इति तेभ्यो लौकिकेभ्यश्शब्देभ्यो हिताः लौकिकशब्दानुसारेण प्रवृत्तिमन्तो ये [4]अणादयः प्रत्ययाः ते तद्धिताः इति व्यपदिश्यन्ते, तेषां येऽर्थाः अपत्यादयस्तेष्वर्थेषु विषयभूतेष्वयं द्विगुः

१. ततस्तोल्यते (भं०)
२. विगृह्यतीषिचिन्तीति (वा०)
३. इवर्णावर्णलोपः (भं०)
४. उणादयः (वा०)

स्मर्यते नत्वभिधेयेष्वन्यथा पञ्चानामिति ([1]रित्यादाविण्) प्रत्ययो न स्यात्। अपत्यार्थस्य द्विगुनैवोक्तत्वात्। तथा च समाहारेऽर्थे इति भिन्नदेशानामेकस्यां क्रियायां गुणी ([2]वा बुद्ध्या) समीपीकरणं समाहारः ([3]उत्तरपदे चेति परस्मिन्पद इत्यर्थः। संस्कृतेऽर्थे एवमादेरणिष्यत इति अणिति। एवमादेरित्यादिशब्दस्यार्थान्तरोपसङ्ग्रहार्थत्वादिति भावः।) समाहारे द्विगुरुच्यत इति शेषः। ननु समाहारः समूह उच्यते समूहश्च तद्धितार्थः तथा च तद्धितार्थत्वादेव समाहारेऽपि द्विगुस्सिद्ध इति किं समाहारेऽर्थे इत्यनेनोक्तेन, उच्यते--पञ्चानां कुमारीणां समूहः पञ्चकुमारीत्यत्र पृथक् समाहारशब्दाभिधानसामर्थ्यात् समूहार्थविहितस्याणोऽनुत्पत्तिरेवमाख्याता भवति। समूहार्थस्य [4]द्विगुनैव अभिधानात्, ([5]ननूत्पद्यतामण्प्रत्ययः तस्य च) द्विगोर्लुगनपत्य इति लोकोपचाराल्लुग् भविष्यति, काम तर्ह्यनेनैव हेतुना प्रत्ययस्याणो [6]लुकि कृते लुक्तद्धितलुकीति स्त्रीप्रत्ययोऽपि निवर्तते, तस्मादणोऽ[7]नुत्पत्तिरेव ज्यायसी सा च पृथक् समाहारशब्दाभिधाने सति सिध्यतीति। तथा समाहारेऽर्थे इति उक्तम्। पञ्चकुमारीत्यत्र स्वरो ह्रस्वः। पञ्चनदम्, पञ्चगवमिति। द्विगुत्वात् तथा द्विगोरिति वचनात् नपुंसकत्वम्। पञ्चगवमित्ययं द्विगुरिति। सति द्विगुव्यपदेशो द्विगोरुत्तरसूत्रेण तत्पुरुषत्वात् तत्पुरुष उच्यमानो गोशब्दादकारस्समासान्तस्सिद्धो भवतीति। इदं चाप्युत्तरपदे द्विगोरुदाहरणम्। पञ्चनावप्रिय इति पञ्चनावः प्रियः अस्येति पञ्चनौशब्दस्य द्विगुत्वादकारस्समासान्तः। नौशब्दाद्धिसमासान्तो द्विगावेव स्मर्यते। नावो द्विगुरिति वचनात् शिष्टस्तु बहुव्रीहिरिति पञ्चगवधन इत्ययं समूह[8] इति तद्धितार्थादिविषयात्। अन्यस्तु संख्यापूर्वोऽपि न द्विगुः पञ्चाम्राः इत्यादि।

विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषस्य च २।५।७

समस्यन्त इति द्वे पदे समाससंज्ञा। तत्पुरुष इति संज्ञा। शिष्टं

---

१. इन् (भं०)
२. गुणेनाबुद्धा (भं०)
३. न्यूनपाठः (भं०)
४. द्विगोरेव (भं०)
५. अनूत्पद्यत इति अण्प्रत्ययस्य (भं०)
६. लोपे (भं०)
७. अनुवृत्तिरेव (भं०)
८. समुदायः (वा०)

समाससंज्ञा[1] विशेषणम्। एवमुत्तरत्र आदौ भव आद्य इति यदुगवादित इति योगविभागाद् यत्। द्वितीयादिविभक्त्यन्ताश्शब्दा इति, केवलानां द्वितीयादिविभक्तीनामसम्भवात् तदन्तत्वं लभ्यते। परपदेन नाम्नेति परपदेत्यादि पदमपि सम्भवतीति तन्निरासाय नाम्नेति विशेषणमुपादीयते। नाम्नामित्यनुवृत्तेः तन्निरासः सिद्ध इति चेत्, एवं तर्ह्यनुवृत्तिरबुधबोधनाय नामग्रहणेनाख्यायते। धर्माश्रित इति। श्रयतेस्म इति। श्रयतेः गत्यर्थाकर्मकेति कर्तरि क्तः, गत्यर्थो हि श्रयतिः तथा च श्रयतीत्युक्ते प्राप्नोतीति गम्यते. प्राप्तिश्च गतिरुच्यते। महाकष्टं श्रितः, परं श्रित इत्यत्र तु समासो न भवत्यनभिधानात्। सापेक्षत्वाच्चेहापि न भवति। महत्कष्टं श्रितः महाकष्टश्रित इति महाकष्टशब्दस्य श्रितशब्देन सह समासे कृते भवति। यूपाय दारु यूपदारविति तादर्थ्ये एषा चतुर्थी। एवं ब्राह्मणायेदं, ब्राह्मणार्थं पयः। एवं ब्राह्मणार्थः सूपः। ब्राह्मणार्था समित्। नित्यः समासोऽत्रार्थशब्देन स्मर्यते न तु वाक्यम्। कुतः, चतुर्थ्या अर्थशब्दस्य च तुल्यार्थत्वात् युगपत्प्रयोगासम्भवात्। यच्चेदं पयः प्रभृत्यनुप्रयुज्यमानं तद्वशादभिधेयव्यवस्थायां सत्यां तद्वशेनैव लिङ्गसम्बन्धात् सर्वलिङ्गता बोद्धव्या। तत्पुरुषत्वाद्धि परवल्लिङ्गता प्राप्ता, वक्ष्यति हि सनपुंसकलिङ्गः स्यादित्यत्र द्वन्द्वस्य तत्पुरुषस्य च यत् [2]परं लिङ्गं तदिष्यत इति। अक्षशौण्ड इति। समासान्तभूतां प्रसक्तिक्रियामपेक्ष्याक्षेष्वित्यधिकरणे सप्तमी। अक्ष्णा काणः, रन्धनाय स्थाली, प्रासादात्पतित इत्यादौ समासो न भवत्यनभिधानात्। एवं पूरणप्रत्ययान्तेनापि षष्ठ्यन्तं न समस्यते। छात्राणां पञ्चमः, समुदायसमुदायिभावलक्षणे सम्बन्धे एषा षष्ठी। गुणेनापि बलाकायाश्शौक्ल्यम्। सति त्वभिधाने क्वचित् तेनापि समासः। वीणाशब्दः, पुत्रस्पर्शः, कपित्थरसः, कन्यारूपम्, चन्दनगन्धः, प्रतिपत्तिलाघवम्, यत्नगौरवम्, गोविंशतिः, खारीशतमित्यादौ। तथा शन्तृङा समानाधिकरणेन च, चौरस्य द्विषन्, राज्ञः पाटलिपुत्रकस्येति। एवं मतिबुद्धिपूजार्थेभ्यो यः क्तप्रत्ययः तदन्तेनापि। राज्ञां मतः, राज्ञां बुद्धः, राज्ञां पूजितः। अधिकरणक्तान्तेनापि। इदमेषामासितम्। कर्तृषष्ठ्यन्तमकेन। भवतः आसिका। कर्तरि यौ तृजकौ ताभ्यामपि। भुवनस्य भोक्ता, सक्तूनां पायकः। विप्रस्यौच्चैरित्यादौ त्वसमासः। ओदनाद् व्यपेक्षायां सत्यां [3]सापेक्षत्वात्, तव्य-

---

१. २।५।८ (दु० वृ०)
२. परस्य (मं०)
३. समासापेक्षित्वात् (मं०)

प्रत्ययेन तु वा । विप्रेण कर्तव्यम्, विप्रकर्तव्यम्, प्राप्तजीविकः, इति । प्राप्त इति, गत्यर्थाकर्मकेति कर्तरि क्तः । अतिखट्व इति । अत्रापि स्वरो ह्रस्व इति ह्रस्वः । दिङ्मात्रं चैतदुदाहृतम्, अन्यदप्येवंजातीयं उदाहार्यम् । आपन्नो जीविकामापन्नजीविकः । अवक्रुष्टं कोकिलया अवकोकिलम्, परिग्लानोऽध्ययनाय पर्यध्ययनः । राजा दन्तानां राजदन्त इत्यादि । न च जीविकां प्राप्त इत्यादिविग्रहे कृते परपदस्य पूर्वनिपातश्शक्यो विज्ञातुम्, लक्षणाभावात् । द्वितीयाद्यभावेऽपि क्वचिद् दृश्यते समास इति । तु शब्दादिति विशेषः । स्वयं [1]धौताविति । स्वयमित्यस्याव्ययस्य क्तान्तेन सह तत्पुरुषस्स्मर्यते । समासत्वाच्चैकपद्यं भवति । [2]धौताविति धावु गतिशुद्ध्योः, क्तप्रत्ययः । नडीङ्श्वीतीडभावः । च्छोशूठो पञ्चमे चेत्यूठ्, अवर्णादूठो वृद्धिरित्यौकारः । मासिभुक्तमिति । मासीत्यस्याव्ययस्याह शब्दपर्यायस्य क्तान्तेनैव तत्पुरुषः । एवं तत्रेत्यस्यापि । तत्र भुक्तम्, एवं खाट्कृत्य, प्रकृत्यर्थमूरीकृत्य, न ब्राह्मणः अब्राह्मणः, न एकम् अनेकम्, इत्यादयः तत्पुरुषाः मन्तव्याः । तत्पुरुष इति पूर्वाचार्यसंज्ञेयमुत्तरपदार्थप्राधान्यं तत्पुरुषस्य द्योतयति । तथा च सर्वस्मै इत्यादावुपसर्जनलक्षणस्य प्रतिषेधस्याप्रवृत्तेः स्मायादयस्सिद्धाः भवन्ति (पूर्व-[3]पदार्थस्तु तत्पुरुषे क्वचिदेव प्रधानम् ।) यथा निष्कौशाम्बिरित्यादौ ।

स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि तान्यन्यस्य पदस्यार्थे बहुव्रीहिः [4]२।५।८

स्यातां स्युरित्यस्तेरादेरित्यकारलोपः । समास इति वर्तते । समस्यन्त इति च पदे द्वे इत्यत्र च समस्यन्त इत्येतद्वचनपरिणामेन सम्बध्यते । तदेतदाह—यत्र समास इत्यादि । एकीक्रियन्ते एकार्थमापद्यन्ते अन्यस्य पदार्थे वर्तमानानीति स्वार्थं विशेषणीकृत्यान्यपदार्थमभिधातुं प्रवृत्तानीत्यर्थः । दण्डैश्च दण्डैश्चेत्यादि करणे एषा तृतीया । समासान्तगते इतीकारः समासान्त इति कर्मव्यतिहार इति शेषः । स हि कर्मव्यतिहारे यो बहुव्रीहिः तत्र स्मर्यते । अव्ययञ्चैतदिति । दण्डादण्डि इत्यादीनां प्रयोगे विभक्त्यन्तस्य लिङ्गस्य चादर्शनादव्ययत्वम् । सपुत्र इत्यादि । सपरस्वराया इति ज्ञापकात् सभावः ।

---

१. (धातोरिति) अशुद्धपाठः (मं०)
२. धाताविति (मं०)
३. क्वचिद्विकल्पस्तत्पुरुषः (मं०)
४. २।५।९ (द्रु० वृ०)

उपदशा इति । [1]सति समासान्त इति समासान्ते सति नस्य तु क्वचिदिति नलोपः । इवर्णावर्णलोपः, हलैश्च मुसलैश्च यद् युद्धं, वृष्टे देवे गतो यः, पञ्चभिः भुक्तं यस्य, पञ्च भुक्तवन्तो यस्येत्यादौ तु बहुव्रीहिर्न भवति, अनभिधानात् । वार्थेऽपि बहुव्रीहिः वक्तव्यः इति । ([2]अन्यपदार्थे उच्यमाने) वार्थेन प्राप्नोतीति भावः । एवं द्वित्रा इति द्वौ वा त्रयो वेति विग्रहः । न तु विकल्प इति । यदि हि विकल्पो वार्थः स्यात् ततो यदा द्वौ भवतः ततः द्वित्राः इति बहुवचनं न भवेत् । तस्मात्संशयो वार्थः । स चानियतां संख्यां विमृशतीति विरुद्धानेकधर्मविषये विमर्शे बहुत्वसद्भावाद् बहुवचनमुपपद्यते । ननु चेत्यादि । चोद्यम्, सत्यमित्यादिना परिहरति – निपातत्वेऽप्यस्तिशब्दस्य नामत्वोपचारात् नामत्वमुपचारस्य तन्निमित्तान्निपातादस्ति शब्दाद्विभक्त्युत्पत्तिः ।

विदिक्तथा [3]२।५।६

विशब्दाद् दिशेः ऋत्विगादिसूत्रेण कर्मणि क्विप्, चवर्गदृगिति गत्वम्, लुप्तसप्तम्येकवचनमिति । आदिलोप इत्यादिना यो दिग्वाचिनां समासः इति पूर्वादिशब्दानां तेषामेव हि दिग्वाच्या भवति । नान्येषामिति भावः । दक्षिणपूर्वेत्यादि । स्वरो ह्रस्व इत्युत्तरपदस्य कृते ह्रस्वे पुनर्विदिशो वाच्यत्वादाप्प्रत्ययः । योगविभागादिति अतुल्याधिकरणत्वात् पुंवद्भावो न सिध्यतीत्येवमुक्तम् । ऐन्द्र्याश्चेत्यादि । इन्द्रस्येयम्, कुबेरस्येयमिति तस्येदमित्यण्, वृद्धिरादौ सणीत्यादिवृद्धिः । अण्येकादितीकारः । अनभिधानादिति । ऐन्द्रीप्रभृतीनां यौगिकानां शब्दानां कृतसमासानां प्रयोगादर्शनादित्यर्थः । विदिशोऽन्यपदार्थत्वात् पूर्वेण सिद्धि मन्यमानः पूर्वपक्षयति । नन्वित्यादि । उच्यत इत्यादिना [4]परिहरति । अयमर्थः दिशां वेत्यनेन यत्सार्वनामिकं कार्यं विकल्पेन बहुव्रीहाविष्यते तदेतत् सूत्रविहित एव दिगभिधेये बहुव्रीहौ यथा स्यात् । पूर्वसूत्रविहिते मा भूत् । किं च स्यादिति । यदि पूर्वसूत्रविहितेऽपि स्यात् । किं दूषणं स्यादित्यर्थः । [5]पूर्वेत्यादिना तद् दूषणमाह—विकल्पेनेत्यादि । ततश्च सर्वनाम्नस्तु समव इत्यादिना ह्रस्वमुकारागमयोः विहितयोः । पक्षे पूर्वोत्तरस्यै

---

१. न्यूनपाठः (मं०)
२. अन्यपदार्थः प्रयुज्यमानः (मं०)
३. २।५।१० (दु० वृ०)
४. परिहारमाह (मं०)
५. पूर्वेणेत्यादिना (मं०)

सम्धायै इत्यपि रूपं भवेत् । एतद् दूषणपरिहाराय दिशां वेत्यत्र विदिग्वाच्यस्य बहुव्रीहेः परिग्रहार्थो योगोऽयमारभ्यते ।

द्वन्द्वः समुच्चयो नाम्नो बहूनां वापि यो भवेत् [1]२।५।१०

समुच्चयनं समुच्चयः । स्वरान्तत्वादल्, यत्र समास इति वस्तु-व्याख्यानमेतत् । अयं त्वत्र यथा-श्रुतपदव्याख्याक्रमः । द्वयोः नाम्नोः बहूनां वा नाम्नां यः समुच्चयः सः द्वन्द्वसंज्ञ इति समुच्चयार्थवृत्तिश्च समास एवात्र समुच्चयशब्देनोक्तो यथा विकल्पार्थवृत्तिः वा शब्दो विकल्पशब्देन तेन समुच्चयार्थवृत्तिः समासो द्वन्द्वसंज्ञक इत्यर्थः । तं चेति द्वन्द्वम् । कः पुनरितरेतरयोगः, को वा समाहारः इत्याह—यत्रेत्यादि । तेनोद्भूतावयवभेदो निर्देश इतरेतरयोग इति व्यवह्रियते यथा—देवदत्तयज्ञदत्तौ, धवखदिरपलाशाः इति । अतएवावयवभेदे उद्भूते सति द्वयोर्द्विवचनेन निर्देशे बहूनामपि बहुवचनेन । तिरोहितावयवभेदस्तु समुदीयप्रधानो निर्देशः समाहारः । यथा—बदरामलकमिति । अतएव समुदायप्राधान्यादेकवचनेन निर्देशः । प्राणितूर्यसेनाङ्गानामित्यङ्गशब्दः प्रत्येकमभिसम्बध्यते । समाहार एवेति नित्वितरेतरयोगे । रथिकाश्वरोहमिति । रथिकाश्च ([2]अश्वाश्च आरोहाश्च) इति बहुत्वे सेनाङ्गानां द्वन्द्वः समाहारे स्मर्यते । अन्यत्र रथिकाश्वरोहावित्येव भवति । जातिवाचिनामप्राणिनां चेति सर्वत्र द्वन्द्वः समाहारे एव स्मर्यत [3]इत्यनुषज्यते बदरामलकमिति बहुत्वे त्वत्र [4]निर्देशः । जातिप्राधान्यविवक्षायां च जातिवाचिनां च समाहारे द्वन्द्वः । व्यक्तिप्राधान्ये तु विवक्षिते बदरामलकानि तिष्ठन्तीत्येव भवतीति । क्षुद्रजन्तूनां चेति । अपचितपरिमाणाः जन्तवः क्षुद्रजन्तव इत्युच्यते । यूकालिक्षम्, दंशमशकमित्यादि । बहुत्वे त्वत्र द्वन्द्वः । शाश्वतिक इति सर्वकालभावी । वृक्षमृगेत्यादि । वृक्षादिवाचिनो ये तेषामुभयत्र द्वन्द्वः । मृगाणां तु पशूनामपि सतां पृथगुपादानं परस्परेण द्वन्द्वनिवृत्त्यर्थम् । प्लक्षन्यग्रोधमित्यादि । [5]इह यत्रेतरेतरयोगे बहुवचनं श्रूयते तत्र बहुवचनान्तयोरेव विग्रहे सति समाहारद्वन्द्वो मन्तव्यः । अन्यत्र त्वेकवचनान्तयोः तथा च फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुवचनान्तानामेव समाहारे द्वन्द्वं

१. २।५।११ (दु० वृ०)
२. अश्वारोहाश्चेति (मं०)
३. इत्यत्र युज्यते (मं०)
४. द्वन्द्वः (मं०)
५. आह (मं०)

स्मरन्ति। लक्ष्यानुसारेणेति प्रयोगानुस्मृत्येत्यर्थः। तथा च चरणानां द्वन्द्वोऽनुवादे गम्यमाने समाहार एव। चरणशब्दः शाखानिमित्तकः पुरुषेषु वर्तते। प्रातिष्ठप्रमाणान्तरावगतस्यार्थस्य शब्देन सङ्कीर्तनमनुवादः। उदगात्कठकालापं प्रत्यष्ठात्कठकौथुमम्। उदयप्रतिष्ठे प्रमाणान्तरादवगते शब्देनात्र पुनरनूद्यते। अत्र [1]चैकत्वमद्यतनीयपरोक्षयोः स्थाणोः प्रयोगे स्मर्यते। तेनेह न भवति, अनिर्दिष्टाः कठकालापाः, [2]उद्यन्ति कठकालापाः इति। एवमनिरवसितेषु शूद्रवाचिनां शब्दानां द्वन्द्वसमाहार एव, निरवसनं बहिष्करणम्, कुतः, पात्रात्। ([3]यैर्भुक्ते सति पात्रं संस्कारेणापि न शुद्ध्यति ते निरवसिताः) रजकतन्तुवायकम्। निरवसितानां त्वितरेतरयोगे चण्डालसूतपाः। एवं गवाश्वम्, मांसशोणितम्, दासीदासम् इत्यादिद्वन्द्व-समाहार एव। दासीदासमित्यत्र त्वेकशेषः पुंसो न भवति, गवाश्वादिगणे तथाविधस्यैव [4]पाठक्रमात्। गवाश्वमिति गोशब्दस्य वक्तव्यादवादेशोऽकारान्तः। तत्पक्षे च समाहारवृत्तित्वम् स्मर्यते इत्यन्यत्र गोऽश्वम्, गोऽश्वाविति एव भवति। दधिपय आदीनाम् त्वितरेतरयोग एव। दधिपयसी, सर्पिर्मधुनी, मधुसर्पिषी, [5]उलूखलमुसली, वाङ्मनसी इत्यादीनाम्, अन्येषां तु केषाञ्चिदुभयत्राद्रव्यवृत्तयो ये विप्रतिषिद्धार्थवाचिनः ([6]शीतोष्णे शीतोष्णम्) सुखदुःखम्, सुखदुःखे। अद्रव्यवृत्तय इति किम्, शीतोष्णे उदके, सुखदुःखाविमौ देशौ। एवमादि यथाप्रयोगमुन्नेयम्।

अल्पस्वरतरं तत्र पूर्वम् [7]२।५।११

पूर्वं प्रयोक्तव्यमिति। प्रयुक्तिक्रियाविशेषणत्वात्। पूर्वमिति द्वितीयान्तं पूर्वं प्रयोक्तव्यमित्येतेन प्रयोगनियमार्थमिदमिति दर्शयति। तत्र पूर्वप्रयोगो नियम्यमानः अल्पस्वरतरं [8]पूर्वनियमभाक्। तत्रेति विषयनिर्देशः। प्रमादजाः प्रयोगा इति। पूर्वनिपातान्यथात्वं प्रमादः। ततो जातः प्रमादजः एतदुक्तं भवति। सर्वत्र द्वन्द्वे अल्पस्वरं पूर्वम् प्रयोक्तव्यम्, यत्र तु क्वचित्प्रमादः तत्र

१. परयोः (वा०)
२. न्यूनपाठः (मं०)
३. न्यूनपाठः (मं०)
४. पाठात् (मं०)
५. उलूखलमुसले (मं०)
६. शीतोष्णम्, शीतोष्णे (शुद्धपाठः)
७. २।५।१२ (दु० वृ०)
८. नाम (वा०)

लक्षणहेत्वोरिति निर्देशो हेतुः। लघ्वक्षरस्येति ह्रस्वसंज्ञकवर्णयुक्तस्य। कुश-काशमिति। कुशाश्च काशाश्चेति विग्रहः। यद्येवम्, व्रीहियवादावित्यादिना सिध्यति, जायापत्योरिति निर्देशात् सेत्स्यति। तरग्रहणं द्वित्वविषयोप-सङ्ग्रहार्थम्। तेन बहूनामनियमः। शङ्खदुन्दुभिवीणाः, वीणाशङ्खदुन्दुभयः।

यच्चार्चितं द्वयोः [1]२।५।१२

पूर्वप्रयोगे नियम्यमानाः। अर्चितं नाम नियमभाक्। द्वयोरिति निर्धारण-षष्ठी। तत्रेति विषयनिर्देशः। यदर्चितं पूजितं नामेति। नाम्नोऽर्चितत्वम् ([2]अर्थधर्मस्य पूजितत्वस्य शब्द-उपचारात्) मातापितराविति मातुरर्चितत्वम् गर्भधारणपोषणाभ्याम्। तेन माता गरीयसीति [3]स्मरणात्। द्वयोरिति किमिति। नाम्नोरिति वर्तमाने द्वयोरित्यनेन किमाशयः, बहूनामित्यस्याप्यनुवृत्तिरा-शङ्क्येत इत्याकूतेन प्रत्युदाहरति। भीमार्जुनवासुदेवा इति। यत्र [4]चानल्प-स्वरोऽर्चितश्च। तत्रार्चितस्य पूर्वनिपातः परत्वात्, युधिष्ठिरभीमौ [5]नैरुक्तिक-हेतुकोत्थानायाः संख्याया इत्यत्र द्वन्द्व इत्युपलक्षणम्। तेन बहुव्रीहावप्येष पूर्व-निपातः। द्वित्राः, त्रिचतुराः। अग्निसंज्ञकस्येति द्वन्द्वे पूर्वनिपातो वक्तव्यः इति सर्वत्रापेक्ष्यते। स्वरादेरकारान्तस्येति कारवचनात् तत्कालपरिग्रहः। तेनाश्ववृक्षौ, वृक्षाश्वावित्यादावनियमः। बहुष्वपि अश्वरथेन्द्राः, इन्द्राश्व-रथाः, इन्द्राग्नी इत्यादौ स्वरादेरकारान्तस्यैव पूर्वनिपातो न [6]त्वग्नेः। पर-त्वादग्नेरप्यल्पस्वरस्य [7]गवाग्नी। एवं स्वराद्यन्तादपि, वागिन्द्रौ। सर्वनाम्नः संख्याया इत्यादि। यत्र च सर्वनाम्नस्संख्यायाश्च स्पर्धा तत्र परत्वात्संख्यायाः पूर्वनिपातः। द्वावन्यौ यस्य सः द्वयन्यः। सप्तम्यन्तस्य तु पूर्वनिपातः उक्तः। कथं तर्हि गडुकण्ठे यस्य सः गडुकण्ठः। गडुशिर इति। अपिशब्दानुवृत्तेः क्वचिद् व्यभिचारात्। सप्तम्यन्तस्य चेति। च शब्दात् ([8]निष्ठाया अपि

---

१. २।५।१३ (दु० वृ०)
२. अत्र धर्मशब्दारोपात् (भं०)
३. ग्रहणात् (भं०)
४. चाल्प (भं०)
५. नैरान्तिक (भं०)
६. तुं द्वयोः (भं०)
७. वागग्नी (भं०)
८. निष्ठायामपि बहुव्रीहौ पूर्वनिपातः कार्यः। नन्वसौ (भं०)

पूर्वनिपातो बहुव्रीह्यादौ। कृतकटः, ननु) विशेषणत्वात् सिद्धो निष्ठान्तस्य, अस्त्येतत्, कटे कृतं येनेति तु विग्रहे निष्ठान्तस्य विशेषणत्वं नास्त्येव। अपीत्यनुवृत्तेः क्वचिद् व्यभिचारः। यत्र जातिकालसुखादिभ्यः परो निष्ठान्तः [1]शार्ङ्गजग्धः समायातः, सुखयातः। प्रहरणार्थेभ्योऽपि निष्ठायाः [2]परनिपातः। अस्युद्यतः, तेभ्यः सप्तम्यन्तस्यापि, दण्डः पाणौ यस्य सः दण्डपाणिः। क्वचिद् यथा प्राप्तमपि उद्यतासिः। उद्यतगदः। क्वचिद्विकल्पः। आहिताग्निः, अग्न्याहितः। जातदन्तः दन्तजातः प्रमादजाः प्रयोगा इति पूर्ववदत्र व्याख्याक्रमः। अपि शब्दानुवृत्तिश्चास्य प्रमादस्य हेतुः।

पूर्वं वाच्यं भवेद् यस्य सोऽव्ययीभाव इष्यते [3]२।५।१३

वाच्यमिति वचेर्ण्यणि। वचोऽशब्द इति कत्वाभावः। पूर्वं शब्दरूपं वाच्यं प्रधानं भवेदिति समासे तत्प्रतिपाद्यस्यार्थस्य वाच्यत्वे सति प्राधान्याद् अर्थद्वारेण तस्यापि प्राधान्यम्। अव्ययपूर्वपदश्च समासः। प्रायेणाव्ययीभावसंज्ञा [4]स्मर्यत इति। राजदन्तादीनाम् सत्यपि पूर्वपदार्थप्राधान्ये संज्ञा न भवति। गुरुसंज्ञाकरणाच्चानव्ययमव्ययं भवतीत्यन्वर्थसंज्ञाविज्ञानेनास्य समासस्याव्ययत्वं प्रदर्श्यते। तेन निष्कौशाम्बिरित्यादीनां समासानामव्ययपूर्वपदानामपि [5]समं लिङ्गसंख्यायोगित्वात्संज्ञाभावः। यस्तून्मत्तगङ्गं नामदेशः इत्यादावन्यपदार्थप्राधान्येऽपि क्वचिदव्ययीभावो दृश्यते। इष्यते ग्रहणात् समीपं कुम्भस्य उपकुम्भमिति समीपार्थस्यात्र प्राधान्यादव्ययीभावसंज्ञा अव्ययीभावादकारान्तादिति सर्वत्राम्भावः। समृद्धिर्मगधानां समागधमिति। अत्र मगधैर्विशेष्यमाणत्वात् समृद्धेः प्राधान्यम्। अत्ययः शीतानाम् अतिशीतमिति। अत्ययोऽतिक्रमो ध्वंस इत्यर्थः, पश्चाद् रथस्यानुरथमिति। पश्चादयोऽर्थोऽत्र प्रधानम्। यथाशक्तीति। सामर्थ्यानतिक्रमलक्षणोऽत्र यथाशब्दार्थः प्रधानम्। अन्यस्माल्लुगिति विभक्तेर्लुक्। यावच्छब्द इत्यादि। अवधारणमवश्यं भावः। तत्रार्थे यावच्छब्दो नाम्ना सह समस्यते। स च समासोऽव्ययीभावसंज्ञः। सौत्रश्चायं विषयोऽर्थविशेषावग्रहेण प्रदर्श्यते, अवधारणादन्यत्र तु न भवति, यावद् दत्तं तावद् भुक्तमिति। अत्र हि कियन्मया भुक्तमिति भोक्ता नावधारयति।

---

१. शाङ्गरजग्धः सामयातः (वा०) शाङ्गरजग्धः समायातः (भं०)
२. पूर्वः (भं०)
३. २।५।१४ (दु० वृ०)
४. प्रयुज्यते (भं०)
५. सताम् (भं०)

अपपरीत्यादि। एतदपि पञ्चम्यन्तेन नाम्नेति विशेषं वक्तुमुच्यते। अपसाकेतम्, परिकुरुक्षेत्रम्, इत्यपपरिशब्दावत्र वर्जनार्थवृत्तिः। बहिर्ग्रामादिति बहिःशब्दयोगे पञ्चमी। [1]शेषः कर्मेत्यत्र चानुवृत्त्या प्राग्ग्रामम्, प्रत्यग्ग्रामम्मिति। प्राक्प्रत्यग्शब्दावञ्चेः प्र-प्रति[2]पूर्वस्य क्विपि मन्तव्यौ। व्याप्तिमर्यादयोरित्यादि। प्रस्तुतेन वर्षादिना कस्यचित्सम्बन्धो व्याप्तिः, तेनासम्बन्धो मर्यादा। पारेमध्ये-शब्दावित्यादि। इष्यते ग्रहणादव्ययीभाव(सन्नियोगेन[3] यत्पार)मध्यशब्दयोरेकारान्तत्वं प्रयोगसमवायि दृश्यते तदनुकरणत्वेन पारेमध्ये-शब्दावित्युक्तम्। [4]पारं यमुनाया इति समासविषयादन्यत्र एत्वाभावादेवं विग्रहः। एवं [5]मध्यं यमुनाया मध्ये यमुनम्, षष्ठीसमासापवादः। पक्षे सोऽपि अपिशब्दानुवृत्तेर्भवति। यमुनापारम्, यमुनामध्यमिति। पूर्वपदमित्यादि। अल्पेऽर्थे यः प्रतिशब्दः तेन सहेति व्याख्येयम्। अत्राप्राप्त इत्यादि। उत्तरपदार्थप्राधान्यादप्राप्तिः न चेयमिष्टिरिष्यते ग्रहणस्यानुक्तविशेषसङ्ग्रहार्थत्वात्।

स नपुंसकलिङ्गः स्यात् [6]२।५।१४

उक्तान्युदाहरणानीति। उपकुम्भमित्यादीनि। यदि इदं सूत्रं नारभ्यते किं स्यादित्याह—अव्ययीभावस्येत्यादि। अव्ययं पूर्वपदमिति बाहुल्यादेतदुच्यते। उन्मत्तगङ्गम्, सुपप्रतीत्यादौ तु हि पूर्वपदमनव्ययमपि दृश्यते। तच्च प्रधानमिति। तथा चोक्तं पूर्वपदार्थप्रधानोऽव्ययीभाव इति। न च तस्य किञ्चिल्लिङ्गमस्तीति अव्ययस्य लिङ्गसंख्याशून्यत्वात्। द्वन्द्वस्य, तत्पुरुषस्य चेत्यादि। स्याद्ग्रहणलभ्योऽयं विशेषः। समाहारद्वन्द्वस्य नपुंसकत्वमुत्तरसूत्रेण विधास्यत इतीतरेतरयोगद्वन्द्वस्यायं विधिः। तत्पुरुषस्याप्युत्तरपदार्थप्रधानस्योत्तर [7]सम्बन्धि लिङ्गं प्राधान्येदेवाविचलमिति पूर्वपदार्थप्रधानोऽसौ गृह्यते। इमे [8]इमावित्यनुप्रयोगस्यापि स्त्रीत्वादिसम्बन्धो विशेषणत्वात्। अत्रार्धशब्दः

---

१. शेषात् (मं०)
२. पूर्वौ (मं०)
३. सन्नियोगे नियमात् पार (मं०)
४. पारे (मं०)
५. मध्ये (मं०)
६. २।५।१५ (दु० वृ०)
७. पद (मं०)
८. कुक्कुटमयूर्याविमे मयूरीकुक्कुटादिमौ (वृत्तिपाठः)

प्रधानमित्यर्धपिप्पलीत्यस्य पूर्वपदार्थप्राधान्यात् तदीयं नपुंसकमिति समप्रविभागवाचिनोऽर्धशब्दस्य नपुंसकत्वात् । यस्त्ववयववाची सः पुंल्लिङ्गः स्मर्यते । द्वन्द्वेऽपीत्यादि सकलपदार्थप्रधाने द्वन्द्वे द्वेऽपि पूर्वपदोत्तरपदे प्रधाने तत्र यदा ते भिन्नलिङ्गे भवतः तदा पर्यायेण द्वयोरपि सम्बन्धिलिङ्गं समासस्य प्राप्तमिति नियमेनोत्तरपदसम्बन्धि तल्लिङ्गयते । अपिशब्दानुवृत्तेः कस्यचित्तत्पुरुषस्योत्तरपदसम्बन्धिलिङ्गं न भवति । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नो जीविकाम् आपन्नजीविकः, अलं जीविकायै अलंजीविकः । निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिरिति स्त्रीत्वं न भवति । इह च पूर्वाह्णः मध्याह्नः, अपराह्णः । नपुंसकं न भवति । सत्यकारे समासान्ते नस्य तु क्वचिदिति नलोपः प्राप्तः, क्वचिद्ग्रहणान्न भवति । लिङ्ग्रहणमन्यत्रापि नपुंसकार्थत्वम् । तेन संख्याव्ययादेः पथ्यन्तस्य तत्पुरुषे नपुंसकत्वं भवति । विगतः पन्थाः विपथः, न पन्थाः अपथम्, चतुर्णां पन्थाः चतुष्पथम् । अकारस्समासान्तः । व्यञ्जने चैषा निरिति न-लोपः । पथिशब्दगतं पुंस्त्वमत्र न भवति । ब्राह्मणसेनमित्यादौ स्वरो ह्रस्व इति ह्रस्वः । अमो नपुंसकादिक्रियाविशेषणानां कर्मत्वादम-उत्पत्तिः । नपुंसकत्वानभिधाने तु क्रियायाः लिङ्गाभावात् तदविशेषणेनैतद्धर्मेणैव भवितव्यम् ।

द्वन्द्वैकत्वम् [1]२।५।१५

द्वन्द्वस्य यदेकत्वं समाहार इति समाहार एव द्वन्द्वस्यैकत्वार्थाविगमात् ।

तथा द्विगोः [2]२।५।१६

द्विगोः समासस्य नपुंसकत्वं भवतीति द्विगोः तत्पुरुषत्वात् । उत्तरपदसम्बन्धिलिङ्गम् प्राप्तं बाध्यते । पञ्चगवमित्यादि । पञ्चानां गवां नदीनां च समाहार इत्यकारस्समासान्तः । यस्त्वन्यत्र द्विगुरिति तद्धितार्थे, पञ्चकपाला इत्यादि संस्कृतेऽर्थेऽण् प्रत्ययः । तस्य द्विगोर्लुगनपत्य इति लोकोपचारात्लुक् । अकारान्तोत्तरपद इत्यादि । अकारान्तमुत्तरपदं यस्य द्विगोः सः द्विगुः स्त्रियां भाष्यते । किं सर्वो द्विगुः, नेत्याह—पात्राद्यन्तं वर्जयित्वेति । के पुनः पात्रादयः । पात्रादिराकृतिगण इति तेन चतुर्युगमित्याद्यपि [3]वर्ज्यते । एतच्चैकत्व-

---

१. २।५।१६ (दु० वृ०)
२. २।५।१७ (दु० वृ०)
३. भवति (भं०)

मिति वर्तमाने तथा शब्दादनुक्तविशेषसङ्ग्रहार्थाल्लभ्यते, तथा चाप्प्रत्ययान्तो द्विगुः स्त्रियां विकल्पेन भाष्यते तेन पञ्चखट्वी पञ्चखट्वाम्। पञ्चानां खट्वानां समाहार इति स्वरो ह्रस्वः, द्विगोरितीकारः। अन्नन्तोऽपि। पञ्चतक्षी पञ्चतक्षम्। न लोपो वक्तव्यः। कृते तस्मिन्नीप्रत्ययः।

पुंवद्भाषितपुंस्कानूङ् पूरण्यादिषु स्त्रियां तुल्याधिकरणे [1]**२।५।१७**

पुमानिव पुंवदिति प्रथमान्तादयं वतिः भाषितपुंस्कानूङित्यस्योपमेयस्य प्रथमान्तत्वात्। भाषितः पुमान्येन तद्भाषितपुंस्कमिति। समासान्तगतानामिति। ककारस्समासान्तः। अत्र च यद्वक्तव्यं तद्भाषितपुंस्कं पुंवद्वेत्यत्रैवोक्तम्। भाषितपुंस्कानूङिति। शब्दरूपापेक्षया नपुंसकत्वम्, अतो नपुंसकलक्षणः, ततः सिलोपः। पूर्यतेऽनयेति पूरणशब्दात् करणयुङन्तादीप्रत्ययः। येन प्राक् पुमान् भाषित इति ([2]भाषितशब्दस्यातीतकालाभिधायित्वात् पूर्वं येन पुमान्भाषित इति) लभ्यते, अधुना तर्ह्यसौ क्व वर्तत इत्याह—सम्प्रति च स्त्रियां वर्तत इत्येतेनानूङिति पर्युदासाश्रयणात् स्त्रीवृत्तेर्भाषितपुंस्कस्यायं विधिरिति दर्शयति तेन ग्रामणिकुलम् दृष्टिरस्य ग्रामणिदृष्टिरित्यत्र ग्रामणीशब्दस्य भाषितपुंस्कस्यापि सतो नपुंसकवृत्तित्वात् पुंवद्भावो न भवति। यदि स्यात् नपुंसकह्रस्वत्वं न भवेत्। एवं स्वरूपभार्यः, कल्याणभार्य इति स्वरूपा भार्या यस्य, कल्याणी भार्या यस्येति विग्रहः। कल्याणीशब्दो बह्वादित्वादीप्रत्ययान्तः। ङकार इहार्थं इत्यसन्देहार्थमिदं सूत्रम्। इत्यत्रासति हि ङकारे भाषितपुंस्कान्वयपूरण्यादिष्विति निर्देशे सन्देहस्स्यात्। अथोङ्निषेध उत्तरत्रैव कस्मान्न क्रियते, पूर्वपदस्य स्त्रीवृत्तित्वं कथं लभ्यत इति चेत्, स्त्रियामित्यस्या वृत्तेर्न लप्स्यते। अत्रोच्यते। कर्मधारये [3]पुंवद्भावो निषिद्धविषय आरभ्यमाणो ब्रह्मबन्धू वृन्दारिकेत्यूङन्तस्यापि प्राप्नोतीहैवानूङिति कर्तव्यम्। कल्याणीपञ्चमा इत्यत्र पूरणप्रत्ययान्ते पञ्चमीशब्दे परतः पुंवद्भावो न भवति। यद्येवम्, कल्याणी पञ्चमी यस्य [4]सा कल्याणीपञ्चमीकः पक्ष इत्यत्रापि न प्राप्नोति। भविष्यति, प्रधानपूरणीविषये निषेधात्। अत्र च नास्ति पूरण्याः प्राधान्यं, कुतः, पक्षे अन्यपदार्थेऽवयवानामत्यन्ततिरोधानात्। कल्याणीपञ्चमा इत्यत्र तु प्रथमादिरात्रिवत्पञ्चम्यपि रात्रिस्समासस्य वा चेति सापि प्रधानमिति

---

१. २।५।१८ (दु० ह०)
२. न्यूनपाठः (मं०)
३. निषेधम् (बा०)
४. सकल्याणपञ्चमीकः (मं०)

तत्रैव निषेधः। प्रियादिषु परेषु न भवतीति कथं तर्हि दृढभक्तिः, नत्रा निर्दिष्टस्यानित्यत्वात्। कल्याणीप्रमाणाः इति शब्दोऽजहत्स्वलिङ्ग एव कल्याणीशब्देन तुल्याधिकरणः। अन्यत्रापीति। अनुत्तरपदे दर्शनीयतरेत्यादि। इयमनयोरतिशयेन दर्शनीया, इयमासां दर्शनीयतमेति, तसादित्वात् तरतमौ। एवं कल्पपाशरूपाः। पट्वीति तदन्ताद् गुणवाचिन इतीकारः। तदेति। दादानीमिति दा-प्रत्ययः। त्यदाद्यत्वमम्प्रत्ययः, पुंवद्भावः। कठीता कठीत्वमिति कठिशब्दाज्जातिवाचिनो जातेरयोपधादितीकारः बहुशो देहीति बह्वीशब्दात् बहुत्वादिभ्य इतीप्रत्ययान्तात्तसादित्वाच्छस्। एवमन्यत्रापि योगविभागात्पुंवद्भावः। हस्तिनीनां समूहो हास्तिकम्। भवत्याश्छात्राः भावत्काः, भवदीयाः। कुक्कुट्याः अण्डं कुक्कुटाण्डम्, काक्याः शावः काकशावः, मृग्याः क्षीरं मृगक्षीरम्। अथ द्रोणीभार्यः इत्यादौ कस्मान्न भवति, भवति ह्ययं द्रोणीशब्दः परिमाणविशेषवृत्तिः। भाषितपुंस्कः इत्याह—चेति वर्तत इत्यादि। अन्ये तु भाषितपुमान्यस्मिन्नर्थे प्रवृत्तिनिमितभूते जात्यादिक इत्यर्थस्यात्रान्यपदार्थत्वात्। तुल्ये प्रवृत्तिनिमित्ते यो भाषितपुंस्कः तस्य अयमतिदेश इति व्याचक्षते, यथा दर्शनीयशब्दस्य तस्य हि स्त्रीपुंसयोः [1]वर्तमानस्य तुल्यं दर्शनीयत्वं नाम प्रवृत्तौ निमित्तम्, नैवं द्रोणीशब्दस्य, तथा ह्ययं जातिविशेषोपादानेन स्त्रियां [2]गवादिन्यां वर्तते। परिमाणविशेषोपादानेन तु पुंसि। एवं भिन्नप्रवृत्तिनिमित्ते द्रोणीशब्दस्याभाषितपुंस्कत्वान्न भवति पुंवद्भावः। यद्येवम्, गर्भिणी भार्या यस्य स [3]गर्भिणीभार्यः। प्रसूतभार्यः। प्रजातभार्यः इत्यत्रापि न प्राप्नोति, भिन्नं तर्ह्यत्र प्रवृत्तौ निमित्तम्। तथा गर्भिणी स्त्रीति स्त्रीवृत्तेः गर्भिन्शब्दस्यानवयवः गर्भसम्बन्धो निमित्तं गर्भी। व्रीहिरिति ([4]पुंवृत्तेः पुनरवयवभूतस्य) गर्भसम्बन्धः। प्रसूतप्रजातशब्दयोरपि स्त्रीवृत्त्योः गर्भविमोचनं निमित्तम्। पुंवृत्त्योरपि गर्भाधानम्। [5]सत्यम्, गर्भसम्बन्धमात्रं तु प्रवृत्तिनिमित्तकेत्राश्रितमितरेतरयोरप्यपत्यापत्यवत्सम्बन्धमात्रम्। अवान्तरभेदस्तु सन्नपि न विवक्ष्यते। अन्यथा दर्शनीयादीनां शब्दानां तुल्यप्रवृत्तिनिमित्तत्वं न स्यात्। तेषामपि स्त्रीपुंसयोर्वर्तमानानामन्यादृशस्य दर्शनीयत्वादेः प्रवृत्तिनिमित्तस्य विद्यमानत्वात्।

---

१. प्रवर्तमानस्य (भं०)
२. प्रवर्तते (भं०)
३. गर्भिणभार्यः (भं०)
४. पुंवृत्तिरप्यवयव (भं०)
५. सत्याम् (वा०)

संज्ञापूरणीकोपधास्तु न [1]२।५।१८

संज्ञायतेऽनयेति संज्ञा, करणे युटं बाधित्वा भीषिचिन्तीति च शब्दादङ्-प्रत्ययः। कोपधायाश्च स्त्रिया इत्यर्थधर्म स्त्रीत्वं शब्दे आरोप्य कोपधाया इति स्त्रीत्वेन निर्देशः। पूर्वेण प्राप्त इति योगद्वयेन एको हि पुंवदिति योगो अपरश्च भाषितपुंस्केत्यादि। दत्ताभार्या इति संज्ञाशब्दानां भाषितपुंस्कत्वे स्वरूपमेवा-प्रवृत्तौ निमित्तम्। पाचिका भार्येति। पचतीति वुणो युवुद्रामनाकान्ता इत्यका-देशः। अस्योपधाया इति दीर्घः। आप्प्रत्ययः, के प्रत्यये इतीत्वम्। वक्तव्यात् क-प्रत्ययः इति कुत्सनप्रावीण्ययोस्तसादित्वात्। एवं दत्तापाशा, पञ्चमीपाशा, पाचिकापाशेत्याद्यपि निषेधविषयः उदाहार्यः। प्राप्तो ह्यत्र पुंवद्भावः, पुंव-दिति योगविभागात्। वुण्प्रत्ययादेशस्येत्यादि वुण्तृचावित्यादिना विहितो यो वुण्प्रत्ययः तदादेशस्य अकस्य यः ककारः तद्धितश्च च यः तस्येह प्रतिषेध-विधौ ग्रहणं नान्यस्य ककारस्य। तेन क्व निषेधो भवतीत्याह तेनेत्यादि। एतच्च नज्ञा निर्दिष्टपरिभाषया लक्ष्यवशेन व्यवस्थितया लभ्यते। पाक-भेकशब्दावौणादिकाविति पाकशब्दस्यार्मकः पृथक् पाकावयवमित्यत्रौणा-दिकसूत्रे क-प्रत्ययान्तस्य निपातित्वात्। ([2]बिभेतेः कः प्रत्यय इति एकः इण् भी पाकः, भेकः पाकः काकः शल्कः अर्कः मर्कः इत्युणादिसिद्धं शल्यति, सन्दिभ्यः कन्नित्यनेन एकस्मादिति पाकशब्दात्) अन्यस्मादिति। भेकशब्दात् जातेः पुंवद्भावो नेष्यत इति योगद्वयेन प्राप्तः। तेन कठीपाशेत्याद्यप्युदाहार्यम्। एतच्चतुश्शब्दादन्यत्रापि निषेधाल्लभ्यते तथा च रक्तविकाराभ्यामन्यत्र यः तद्धितो वृद्धिनिमित्तं तदन्तस्यापि स्त्रीवृत्तेः पुंवद्भावो न भवति। स्रुघ्ने भवा स्रौघ्नी, अण्णन्तादितीकारः, सा भार्या यस्य स स्रौघ्नीभार्यः। एवं स्रौघ्नी-पाशः। रक्तविकारविषये तु निषेधो न भवति। कषायेण रक्ता काषायी सा बृहतिका यस्य सः काषायबृहतिकः। लोहस्य विकारो लौही सा ईषा यस्य सः लौहीषः। एवमन्यत्रापि यथालक्ष्यं पुंवद्भावनिषेधो मन्तव्यः।

कर्मधारयसंज्ञं तु पुंवद्भावो विधीयते [3]२।५।१९

कर्मधारय इति संज्ञा यस्येति। इति शब्देन कर्मधारय शब्दोऽत्र स्वरूप-प्रधानो निर्दिष्टः, नार्थप्रधान इति दर्शयति। पूर्वेण प्रतिषेधः प्राप्त इति। स

---

१. २।५।१९ (दु० वृ०)
२. न्यूनपाठः (भं०)
३. २।५।२० (दु० वृ०)

बाध्यत इति शेषः। प्रतिषेधस्य तर्हि को विषय इत्याह—तस्य त्वित्यादि। पूर्वसूत्राभिहितप्रतिषेधविषये सर्वत्र कर्मधारये पुंवद्भाव इष्यते, तु-शब्दात्। तेन कठवृन्दारिका, स्रौघ्नवृन्दारिका दीर्घकेशवृन्दारिका। अतएव केचित्संज्ञापूरणीकोपधाया इति न सम्बध्नन्ति। कस्य तर्ह्ययं पुंवद्भावः, भाषितपुंस्कानूङः। तेन खट्वावृन्दारिका, ब्रह्मबन्धूवृन्दारिका। अपूरण्यादिष्वेतत्त्वत्र नापेक्ष्यते। तेन महती चासौ नवमी महानवमी, महाद्वादशीत्यादि सिद्धम्। विधीयते ग्रहणं जातीयदेशीययोरपि यथा स्यादिति दत्तजातीया दत्तदेशीया। प्रकारवचने तसादित्वाज्जातीयप्रत्ययः ईषदसमाप्तावपि देशीयप्रत्ययः। एवं सर्वत्र निषेधविषये जातीयदेशीययोः पुंवद्भावः। पञ्चमजातीया चेत्युदाहार्यम्।

आकारो महता कार्यस्तुल्याधिकरणे पदे [1]२।५।२०

महान्कायो यस्य स महाकाय इति बहुव्रीहिप्रदर्शनेन निवृत्तं कर्मधारयसंज्ञा इत्येतद् इति दर्शयति। तस्य तु निवृत्तिः तुल्याधिकरणग्रहणात्। अनुषङ्गलोपे कृते आत्वमिति। ननु नित्यत्वादात्वं स्यात् ततश्च कृते तस्मिन्कथमनुषङ्गलोपः स्यात्, एवं मन्यते। प्रतिपादितपूर्वमनुषङ्गविधावनुषङ्गसंज्ञानिमित्तस्य लोपस्य बलीयस्त्वम्। तेन पूर्वमनुषङ्गलोपः तत आत्वम्। अथेहात्वं कस्मान्न भवति। अमहान्महान्सम्पन्नः। महद्भूतश्चन्द्रमा इत्यस्ति ह्यत्र तुल्याधिकरणत्वम्। तथाहि यत्रैवार्थे च्व्यन्तो महच्छब्दो वर्तते तत्रैव भूतशब्दो अपि, अत आत्वं प्राप्नोति। सत्यम्, गौणार्थवृत्तित्वान्महदर्थस्य न भविष्यति। ननु च महत्त्वयुक्तः चन्द्रमा महान्, तदयुक्तम्, महदर्थस्य गौणत्वम्। मैवम्, सर्वत्रैव हि च्व्यन्तेनार्थः आश्रितः, पूर्वावस्थोपचरितेऽन्तरावस्था उच्यते तस्मादिहापि चन्द्रमा आश्रितपूर्वावस्थो महच्छब्देनोच्यमान उपचरितमहत्त्वानुगतोत्तरावस्था उच्यते। यद्येवम्, अमहती महती सम्पन्ना सा महद्भूता ब्राह्मणीत्यत्र पुंवद्भावोऽपि न प्राप्नोति। पुंवदिति योगविभागाद् भविष्यति। इह तर्हि गौर्वाहीकः। गां वाहीकमानयेति गौणत्वात् गो([2]शब्दस्यौत्वात्वेन स्याताम्, भविष्यतः, तयो येभ्यो शब्दार्थो यत्नः कृतः) तत इह महत्या घासः महाघासः। एवं महाघामः, [3]महाकारः [4]महाविशिष्ट इति। पुंवदिति योगविभागान्महतीशब्दस्य कृतपुंवद्भावे भिन्नाधिकरणे पदे परतः कथमात्वमित्याह—कार्य-

१. २।५।२१ (दु०वृ०)
२. शब्दस्यात्वं त्वेन भविष्यति यस्त्वेतयोः विधौ द्यो शब्दार्थो तः कृतः(मं०)
३. महाकरः (मं०)
४. महाविप्रविष्टः (मं०)

ग्रहणादिति । दण्डादण्डि इतीकारः समासान्तः । एकादशेति । कतेश्च जस्-शसोर्लुक्, द्वौ च दश च द्वादश । अष्टौ च दश च अष्टादश । द्वाभ्यामधिका-विंशतिः द्वाविंशतिः, द्वाभ्यामधिका त्रिंशत् द्वात्रिंशत् । माता च पिता च मातापितरावित्यादीति । आदिग्रहणात् पितापुत्रौ [1]पोतापोतारौ, इन्द्रावरुणौ इत्यादयः ।

नस्य तत्पुरुषे लोपः [2]२।५।२१

नस्येति । न-शब्दादव्ययानुकरणी षष्ठी । अमशकमित्यव्ययीभावः । अपाप इति बहुव्रीहिः । यदि तत्पुरुषग्रहणं समासस्योपलक्षणार्थं तदा समास-ग्रहणमेव क्रियताम्, किं तत्पुरुषग्रहणेन, सत्यम्, उत्तरार्थं तु, कोः कदादेशः, तत्पुरुष एव यथा स्यात् ([3]कुष्टो राजेति) बहुव्रीहौ मा भूदित्युत्तरत्र च तत्पुरुष-ग्रहणे क्रियमाणे सति समास इत्यत्र कर्तव्यं स्यात् । ([4]ततश्चेद् गुरुभवतीति तत्पुरुष इत्यत्रैव) ज्यायः । कार्य इति वर्तते । तेनाख्यातेऽपि निन्दायां लोपः । अपचसि त्वं जाल्मः । अ मा नौ नः, प्रतिषेधे इत्यकारस्य प्रतिषेधवाचिनः सम्भवे अपि नञोऽत्र विषये प्रयोगो मा भूदित्येवमुच्यते । तथा गमेः डप्रत्ययान्ते वा, न गच्छतीत्यगः । नगः वा । कथमगोदुपलश्शीते न, अप्राणिन्येवं विकल्पं स्मरन्ति ।

स्वरेऽक्षरविपर्ययः [5]२।५।२२

विपर्यय इति विपरिपूर्वादिणः स्वरान्तत्वाद् भावेऽल्प्रत्ययः । अक्षरं च अक्षरं च अक्षरे इति सरूपाणामेकशेषो इत्येकोऽक्षरशब्दोऽवशिष्यते । ये द्वे अक्षरे नकाराकाराविति । अव्युत्पन्नस्याक्षरशब्दस्य सकलवर्णविषयत्वेन रूढ-त्वात् । न विद्यते अश्वो यस्येति । एतेन तत्पुरुषग्रहणस्य समासोपलक्षण-परत्वे नानुवृत्तेर्बहुव्रीहावप्येष विधिरिति दर्शयति । अथान्स्वरः इति कस्मान्न [6]क्रियते अनेकवर्णत्वाच्चायमन्नादेशो नस्य सर्वस्यैव विज्ञास्येत इति किं गुरु-सूत्र करणेनेत्याह—अन्स्वर इत्यादि ।

---

१. होतापितारौ (वा०)
२. २।५।२२ (दु० वृ०)
३. कुष्ट्वेति (मं०)
४. तच्च गुरु भवतीति तत्पुरुषग्रहणमेव (मं०)
५. २।५।२३ (दु० वृ०)
६. कृतम् (मं०)

कोः कत्[1] २।५।२३

कदश्वः कदन्नमिति कर्मधारयावेतौ तत्पुरुषावुभाविति तत्पुरुषसंज्ञो त्विरथवदेत्यादिकार्यग्रहणानुवृत्तेः फलमेतत् । कत्रयः कद्रथः इति कर्मधारयावेतौ । अदिति न कृतम्, सर्वादेशो मा भूदिति ।

का त्वीषदर्थेऽक्षे[2] २।५।२४

ईषल्लक्षणोऽर्थः ईषदर्थः । अनीषदर्थार्थमक्षग्रहणमिति ईषदर्थे सिद्धत्वात् । तेनाक्षे चेति पृथक् सूत्रमिदमनीषदर्थार्थम् जायते । अतएव तु शब्दो भिन्नक्रमः सूत्रभेदं द्योतयति । ईषदम्लं काम्लमिति । एतेनेषदर्थवृत्तेः कु शब्दस्य स्वरादावपि परत्वात्कादेश एव भवतीति सूचयति । कुत्सितोऽक्षः काक्ष इति । अथवा कुत्सितमक्षि यस्य सः काक्षः । अकारः समासान्तः । आ इति न कृतम् । सर्वादेशाशङ्का मा भूदिति ।

पुरुषे तु विभाषया[3] २।५।२५

विभाषणं विभाषेति । गुरोश्च निष्ठायामित्यकारः । टौसोरे इत्येत्वम् । विभाषया विकल्पेनेति विभाषाशब्दस्य विकल्पवाचित्वेन रूढत्वात् । अप्राप्तविभाषेयम् । ईषदर्थ इति हि निवृत्तमिति । तद्विवक्षायां तु पूर्वेण नित्यं कादेशः । नत्वनेन परत्वात् कृतः, पूर्वोक्तपरोक्तयोरिति परशब्दस्येष्टवाचित्वात् । तु-शब्दात् कुत्सितः पन्थाः कापथः । अकारः समासान्तः । कोः कत् कव क इत्येते आदेशा इत्यादि। एतच्च वेति कर्तव्ये विभाषा ग्रहणस्याधिक्यस्य करणाल्लभ्यते ।

याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित्[4] २।५।२६

रेवतिमित्रम् इत्यादि । रेवतीरोहिणीशब्दौ गौरादित्वादी-प्रत्ययान्तौ । गार्गीपुत्रः इति गर्गस्यापत्यं स्त्रीति गर्गशब्दाण्ण्य गर्गादेरिति ण्यः प्रत्ययः । ण्यदितीकारः । यस्यापत्यस्येति लोपः । ततष्षष्ठीसमासः । मालाहस्तः इति बहुव्रीहिः । याकाराविति किम्, कद्रूपुत्रः, कद्रुशब्दात् पङ्गुकद्रु इत्यूङ्, स्त्री-

---

१. २।५।२४ (दु०वृ०)
२. २।५।२५ (दु०वृ०)
३. २।५।२६ (दु० वृ०)
५. २।५।२७ (दु० वृ०)

कृताविति किम्, लक्ष्मीपदः, लक्षेर्मुट् चेति लक्ष्मीशब्दः। [1]तत्र स्त्रियामिति नास्त्येव तु-शब्दानुवृत्तेः क्वचिद्विकल्पः। ग्रामणिपुत्रः, ग्रामणीपुत्रः। ब्रह्मबन्धुपुत्रः, ब्रह्मबन्धूपुत्रः।

ह्रस्वस्य दीर्घता [2]२।५।२७

द्व्यङ्गुला कर्ण द्वे अङ्गुली प्रमाणमस्येत्याकारस्समासान्तः। ह्रस्वग्रहणं दीर्घस्य क्वचिदनित्यत्वार्थम्। तेन ऋषौ विश्वामित्रः। अन्यत्र तु विश्वमित्रः। प्रतिबोधः, प्रतीबोधः। एवं प्रसादः प्रासादः, प्रकारः प्राकारः इत्यादि। यथा लक्ष्यमुन्नेयम्।

अनव्ययविसृष्टस्तु सकारकपवर्गयोः [3]२।५।२८

अनव्ययशब्दः कृतव्युत्पत्तिः, विसृज्यते स्मेति क्तः। भृजादीनां षः, तवर्गचटवर्गयोगे टकारः, आकारपरस्येत्यादिः। क्वचिद् ग्रहणानुवृत्तेरेतल्लभ्यते। अनुत्तरपदस्थस्येति परपदयोः अनव्ययः स्थितः इत्यर्थः। अयस्कारः, अयःकरोतीति कर्मण्यण्, अयस्कंस इति। अयो युक्तः कंस इति विग्रहः। एवमयस्कुम्भः, अयस्पात्रमिति षष्ठीसमासः। अयस्कुशेति अयोरूपा कुशेति विग्रहः। कुम्भीप्रभृतिषु अपि लिङ्गग्रहणपरिभाषया सत्वम्, परमपयः पात्रमिति, परमं च तत्पय इति विग्रहे कृते पात्रशब्देन षष्ठीसमासे सति परमशब्दे पयः शब्दः विसर्जनीय उत्तरपदस्थ इत्युच्यते। आकारादपि परस्येति। क्वचिदिति वचनात् क्वचिन्न भवति, भासः करणं भाः करणम्, भास्कर इति भासं करोतीति। तदाद्यद्यन्तानन्तकारेत्यादिना ट-प्रत्ययः। इस्-उस् इत्येतयोर्विसृष्टस्य चेति क्वचित्सत्वं स्मर्यते इति सम्बध्यते। क्वचिदिति वचनात् सर्पिः करोति, सर्पिः पिबतीत्याद्यपि भवति, अयुक्तार्थत्वे चेसुसोर्नेष्यते। तिष्ठतु सर्पिः, पिबत्वमुदकमिति। शिरस्पदमिति सप्तमीसमासः। पदे चेति। च-शब्दात् अधस्पदमित्यपि भवति। सुपो धातुवदयं तत्पुरुषः। एवमन्यत्रापीति। तेनाकारात्परस्य विसर्जनीयस्य कुकमिप्रभृतिभ्योऽन्यत्रापि सत्वं भवति। तमस्काण्डम्, मेदस्पिण्डः, अयस्काण्डमित्यादौ लक्ष्यानुसारेणेति न तु स्वमनीषिकयेत्यर्थः। तेनेह न भवति। गीः काम्यति। धूः काम्यति। क्वचिद्विकल्पः। तिरस्कर्ता,

---

१. अत्र च (मं०)
२. २।५।२८ (दु० वृ०)
३. २।५।२९ (दु० वृ०)

तिरःकर्ता इत्यादौ । निष्कृतम्, दुष्कृतम् इत्यादि । निरो दुसश्च विसर्गः, तस्य सत्वम् । सस्यापि षत्वम् । दुष्पतिः, दुष्पुत्रः इति कर्मधारयावेतौ ।

[1]पञ्चमः पादः ।

षष्ठः पादः

अपत्ये २।६।१

अपत्यशब्दो रूढार्थानामित्यत्र कृतव्युत्पत्तिः । लिङ्गादिति षष्ठ्यन्तात्, कुतः, अपत्येनापत्यवत आक्षेपादपत्यापत्यवत्सम्बन्धे षष्ठीप्रवृत्तेः । ऋष्यन्धकेत्यादिः । ऋषयो वसिष्ठादयः । अन्धकादयो वंशाख्याः, वासिष्ठ इत्यादिः । तत्र वसिष्ठविश्वामित्रशब्दौ ऋषिवचनौ, श्वफल्कशब्दोऽन्धकवचनः, वसुदेवनकुलशब्दावपि वृष्णिकुरुवचनौ । विदादिभ्योऽपीति प्रत्ययमिमं स्मरन्ति इति सम्बध्यते । विदादिमध्ये च परस्त्री परशु चेति गणसूत्रं पठ्यते । तेन परस्त्रिया अपत्यं पारस्त्रः पारशवः । परस्त्रीशब्दः प्रत्ययमुत्पादयति । परआदेशमापद्यते । यामुनः, चैन्तितः इति यमुनाचिन्तिताशब्दाभ्यामण् । ननु अपत्यशब्दोऽयं नपुंसकलिङ्ग इति तत्र योऽत्र प्रत्ययः तदन्तस्यापि नपुंसकलिङ्गता प्राप्नोति सा कस्मान्न भवति । न भवति, अपत्यशब्देनेह प्रयोजनमात्रविवक्षितत्वात् । लिङ्गत्वं विवक्षितं स च प्रजनः सन्ततिः अपत्यम् प्रसव इति सर्वलिङ्गैरभिधीयमानो दृश्यते एवं च कृत्वा लुग्विधावस्त्रियामिति निषेधः ([2]उपपन्नः, अन्यथा त्वपत्यप्रत्ययान्तस्य नपुंसकत्वात् स्त्रियां लुकः प्राप्त्यभावादस्त्रियामिति निषेधः कस्मान्न) कर्तव्यः स्यात् । एकत्वमप्यत्र विवक्षितं तत्रैव बहुत्वग्रहणात् वा ग्रहणाद्वाक्यमपि भवति । यद्येवम्, प्रत्ययाभावपक्षे तस्यैवाभिधानं प्राप्नोति । वसिष्ठस्यापत्यमित्यादि । वसिष्ठापत्यमित्यादि समासस्तु न स्यात तद्धितोत्पत्त्या बाध्यमानत्वादस्त्येतत्, विभाषयेत्यस्यानुवृत्तेः सोऽपि भविष्यति । ऋद्धस्य वसिष्ठस्यापत्यमित्यादौ तु न भवति सापेक्षत्वात्। इत्थमन्यतोऽपि इत्यादि । एतेन ऋष्यन्धकेत्यादि यदुक्तं तत्पूर्वाचार्यप्रसिद्धप्रकृतिविशेषप्रदर्शनपरत्वेन । नन्वेतत् प्रकृतिपरिगणनं प्रकृत्यन्तरादप्यणो दर्शनादिति

---

१. शिष्यहितान्यासे शिष्यालोकाभिधाने नामप्रकरणे समासपादः पञ्चमः । (मं०)

२. न्यूनपाठः (मं०)

लक्षयति[1]। तथा च विकर्णादिभ्योऽण्यण् दृश्यते। वैकर्णः, शौङ्गः, छागलः, लक्ष्यानुसारेणेति वचनादिभ्यो वात्स भारद्वाजात्रेयेष्वेवापत्यविशेषेष्वण्प्रत्ययोऽन्यत्र त्विञ्णेव भवति। एवं माण्डूक इत्याद्यप्युदाहार्यम्। इणेयणावप्यस्माद् भवतः, माण्डूकः माण्डूकिः माण्डूकेयः। संख्यासम्भद्रपूर्वायाः इति स्त्रीत्वेन निर्देशो जननीवाचिनो मातृशब्दस्य परिग्रहार्थः। तेन धान्यादीनां मातुर्ग्रहणं न भवति। अणि पर इति। अपत्यार्थविहिते उरादेशो वक्तव्य इति निपातानामनेकार्थत्वाद्वा शब्दस्य बहुलार्थवृत्तित्वाद्वाच्य इत्यर्थः। तथा चापत्ये प्रत्ययान्तरमपि दृश्यते। स्त्रैणः, पौंस्नः, स्त्रीपुंसाभ्यां नञ्स्नञ् इत्येतौ भवतः। भवति हि समूहादिष्वप्यर्थेषु स्त्रीपुंसाभ्यामेताविष्येते। वत्यर्थे तु न भवतः, पुंवदिति ज्ञापकात्। कथं तर्हि स्त्रीवत् वा-शब्दाद् बहुलार्थात्, द्वैमातुर इति तद्धितविषये द्विगुः ततः प्रत्ययः। साम्मातुरः। भाद्रमातुरः। यथाक्रमं तत्पुरुषात् कर्मधारयाच्च प्रत्ययः। बहुलार्थाच्च वा-शब्दात् स्वार्थेऽपि यथाविधानमण् दृश्यते। प्रज्ञा एव प्राज्ञः, प्रजानातीति प्रज्ञ इत्युपसर्गे त्वातो डः। एवं प्रत्यक्ष एव प्रात्यक्षः। मन एव मानसम्, चोर एव चौरः, शत्रुरेव शात्रवः, मरुदेव मारुतः, रक्ष एव राक्षसः देवतैव दैवतम्, बन्धुरेव बान्धव इत्यादयः। कनीनादेश इष्यत इति बहुलार्थाद्वाशब्दात्, कन्याया अपत्यमिति। नन्वक्षतयोनिः कन्या सा कथमपत्येन युज्यते, अत्राहुः—विवाहपूर्वके पुरुषसम्बन्धे सति कन्यात्वं निवर्तते या तु विना विवाहसंस्कारं प्रमादात् पुंसा सह युज्यते न सा कन्यात्वं जहातीति। योगश्चायं तस्येदमित्यस्य प्रपञ्चः। तस्येदमित्यस्य विशेषा ह्येते। अपत्यं, समूहः, विकारो, निवासो अवयव इति।

ण्यः गर्गादेः २।६।२

वा-ग्रहणमनुवर्तत इति बहुलार्थवृत्तित्वेन इहोत्तरत्र चेति शेषः। अनुक्तविशेषसङ्ग्रहार्थं हि तदुत्तरत्राप्युपयुज्यते। एवं पौत्रप्रभृतीत्यादिः। पौत्रप्रभृतिशब्दो बहुव्रीहिः। प्रभृतिशब्दो आद्यर्थे वर्तते तेनापत्य इति सामान्येनोक्तावपि पौत्रादारभ्य यदपत्यं तत्रैवापत्ये ण्य-प्रत्ययः। येन त्वनन्तरमव्यवहितं यदपत्यं तत्राप्यत्रैव विशेषमाह। जमदग्निपराशरशब्दाभ्यां त्वित्यादिः तु-शब्दो गर्गादिभ्य एतयोर्विशेषद्योतनार्थः। कथं पुनः पौत्रादावपत्ये प्रत्ययमभिधायानन्तरापत्ये लभ्यते। बहुलार्थाद्वा शब्दात्, तथा चानन्तरापत्यविवक्षायामणण्याभ्यां दृश्यते। जामदग्नः, पाराशरः एवं मानवी प्रजा, मनुशब्दो हि गर्गादिः। अपत्यसन्ततेरित्यादि। अपत्यसन्तानस्य प्रवर्तयितृभ्यो लोके कुल-

१. दर्शयति (भं०)

व्यपदेशत्वेन प्रसिद्धेभ्यो गर्गादिभ्यो अयं ण्य-प्रत्यय इत्यर्थः। गर्गो नामकः कश्चिदिति अप्रसिद्ध इदानीन्तनः गार्गिरितीण्प्रत्ययः। अयं विशेष इति अपत्यसन्ततेरित्यादिकः। तेन कुञ्जो नाम कश्चित् तस्यापत्यं कौञ्जिः। बहुनाम कश्चित् तस्यापत्यं [1]बाहविः। अपत्यार्थ इति। अपत्यार्थप्रस्तावादपत्येऽर्थे इत्युक्तम्। अर्थान्तराभिधानेऽपि हि यथाभिधानं [2]द्यौत्य इत्यादि प्रयुज्यत एव। पत्यन्तादप्यण् अपत्यादावर्थे दृश्यते। आश्वपतः, पाशुपत इत्यादौ। कथं दितेरपत्यं दैतेयः, उच्यते, नैष दितिशब्दादेयप्रत्ययः। किं तर्हि कृतोऽकारान्ताद् दितीशब्दात्। एवमपि लिङ्गग्रहणपरिभाषया दितीशब्दादपि ण्यप्रत्ययः प्राप्नोति। नैतत् तस्याः परिभाषायाः अनित्यत्वादिहाग्रहणात्। अनित्यत्वं चास्याः स्वागमविधावुक्तम्। ननु यथेत्यादि। अयं प्रश्नार्थः, इह पौत्रादावपत्ये गर्गादिभ्यो ण्य-प्रत्ययो विधीयते। ततो यथा गार्ग्य इत्यादि भवति यथा च गार्ग्यादिशब्देभ्यः कुञ्जादेराकृतिगणत्वदायनणं विधाय गार्ग्यायण इत्याद्यपि भवति। तथा पौत्राद्यर्थविवक्षायां प्रतिबन्धकाभावादायनण्णन्तादिणि सति गार्ग्यायणिरित्याद्यपि प्राप्नोति। इण्णन्तादपि तथैवायनणि सञ्जाते गार्ग्यायणायण इत्याद्यपि रूपं भवेत्। एवं च पौत्र प्रभृत्यपत्यविवक्षायामायनणन्तात् पुनरिण् इण्णन्तादप्यायनण् इत्येवमपर्यवसितप्रत्ययमालाप्रवृत्तौ सत्यां प्रयोगपर्यवसानमेव न भवेदिति कथमत्र प्रत्ययानां व्यवस्था कर्तव्येति, उच्यते—इत्यादिना व्यवस्थामाह—अयमत्रार्थः। गर्गस्यापत्यं ([3]गार्ग्यः गार्ग्यस्यापत्यं गार्ग्यायणः) गार्ग्यायणस्यापत्यमित्यादिविग्रहे कृते पौत्रप्रभृत्यपत्यविवक्षायां वा-शब्दाद् बहुलार्थादेक एव प्रत्ययो भवति स च भवन् गर्गप्रभृतेरेवादिपुरुषाभिधायकाद् भवति न तु गार्गिगार्ग्यायणप्रभृतिभ्यः। तेभ्यो हि भवन्ननेकोऽसौ भवेत्। यद्येवम्, गार्ग्यप्रभृतेरायणन् न प्राप्नोतीत्याह— ण्यप्रत्ययान्ताद् वा आयनण् भवतीत्येवेति कुञ्जादेराकृतिगणत्वस्मरणादिति भावः। तेनेत्यादिना प्रत्ययव्यवस्थामभिमतामुपसंहरति। यतः पौत्रप्रभृत्यपत्यविवक्षायामेक एव प्रत्ययः तेन हेतुना गार्ग्यणस्यापत्यमिति विग्रहे यो गर्गशब्दाद्विहितः प्रत्ययः स एव ण्य-प्रत्ययो भवति। एवं च गार्गेः गार्ग्यायणस्य वा यदपत्यं तद् गर्गस्यापत्यमिति सर्वत्र [4]गर्गशब्द एव प्रयोक्तव्यः। एवमुत्तरत्रापीति पौत्रप्रभृत्यपत्यविवक्षायामेक एव प्रत्ययो भवतीत्येव मार्गः उत्तरत्रापि

१. बाहवः (वा०)
२. दैत्यः (वा०)
३. गार्गेरपत्यम् (भं०)
४. गार्ग्य (भं०)

बोद्धव्यः। तेन कुञ्जादिभ्यः पौत्रादावपत्ये आयनण्येव भवति, न तु तदन्तादिण्। इण्णन्तादप्यायनण्णिति। ननु यद् गार्ग्यायणस्यापत्यं तत्कथं गर्गस्यापत्यं स्यादित्युत्पादयितुरेवापत्ययोगं मन्यमानस्यैष प्रश्नः, एवं च गार्ग्यायणस्यापत्यस्य गर्गानपत्यतया गार्ग्यव्यपदेशो न सिध्यतीति भावः। उच्यत इत्यादिना परिहारमाह—उत्पादयितृवदपत्यसन्ततेः प्रवर्तयिता आदिपुरुषोऽप्यपत्येन सम्बध्यते इत्यादिपुरुषस्यापि हि तदपत्यं भवत्येव, कुतः, इत्याह—न पतन्तीत्यादिः। अपतनादपत्यमुच्यते, अतो योऽपि गार्ग्यायणापत्यत्वेन विवक्षितः सः अपि मूलप्रकृतेः गर्गस्यापत्यं भवत्येवेति युज्यते गार्ग्यायणापत्यस्य गार्ग्यापत्यस्य वा गार्ग्य इति व्यपदेशः।

कुञ्जादेरायनण् स्मृतः २।६।३

स्मृतग्रहणस्याधिक्यादकर्तव्यतां यो मन्यते तं प्रत्याह—स्मृतग्रहणमित्यादि। स्वार्थ इति प्रकृत्यर्थेन त्वपत्यर्थः। असाविति ण्य-प्रत्ययः। नन्वादिभ्योऽप्यायनयण्णन्तेभ्य इति नेष्यत इत्यपेक्षते स्मृतग्रहणलभ्यश्चायं प्रकारः पूर्वाचार्याभिहितप्रयोगविषयत्वेनायनण् न स्मर्यमानत्वात् पौत्रादावित्यनुक्तविशेषसङ्ग्रहार्थो वा शब्दो बहुलार्थः सर्वत्र हेतुत्वेन योज्यः। स्मृतग्रहणं तु तस्यैव द्योतनार्थम्। तत्रेति। अनन्तरापत्ये कौञ्जिरितीण्प्रत्ययः ण्य-प्रत्ययान्तं कुञ्जादिगणमध्ये पठन्तीति कुञ्जादेराकृतिगणत्वात्।

स्त्र्यत्र्यादेरेयण् २।६।४

सौपर्णेयो वैनतेयः इति सुपर्णी-विनता-शब्दाभ्यामेयण्प्रत्ययः। सुपर्णीशब्दः पाकाद्यन्ताद् इतीप्रत्ययान्तः स्त्रीग्रहणेन स्त्रीप्रत्ययान्ताश्शब्दा इह गृह्यन्त इत्येतेनाकद्रवा इति निषेधारम्भात् स्वरूपं न गृह्यते इति दर्शयति। न स्त्रीवाचिन इति। नापि स्त्र्यर्थवाचिनश्शब्दाः गृह्यन्ते, तद्ग्रहणेन सत्याशीरादिभ्योऽपि ([1]अस्त्रीप्रत्ययान्तेभ्य एयण् प्रसज्येत) यद्येवम्, कृतिप्रभृतिभ्योऽपि स्त्रीप्रत्ययान्तेभ्य एयण् प्राप्नोतीत्याशङ्क्याह—प्रत्यासन्नाच्चेत्यादि। च-शब्दोऽवधारणे प्रत्यासन्न एवेत्यर्थः। इत्याद्या अत्र्यादयः इति। एवं प्रकाराः अत्र्यादयः। अत्र्यादेराकृतिगणत्वात्। तथा च पितृस्वसुरपत्यं पैतृष्वसेयः, इवर्णावर्णाविति व्युत्क्रमपाठादृकारलोपः एवं ([2]भ्रुवोऽपत्यं भौवेयः) वा

१. स्त्र्यर्थवृत्तेभ्य एयण् प्रसज्यते (मं०)
२. भ्रुवोऽपत्यं भ्रौवेयः (मं०)

शब्दाद् बहुलार्थात्कार्यान्तरद्योतनफलाद्वकारागमः। तथा च क्वचित् स्त्रीप्रत्ययान्तादपि न भवति। क्रुञ्चाया अपत्यं क्रौञ्चः, क्रुञ्चाशब्दोऽजादिः। एवं वडवाया वृषे वाच्ये वडवाया अयं वृषो वाडवेयः, अपत्ये त्वण्णेव भवति। वाडवः सौभागिनेयः दौर्भागिनेयः इति क्वचित् पूर्वपदोत्तरपदयोर्युगपद् वृद्धिरिष्यत इत्युभयपदवृद्धिः।

इण्णतः २।६।५

अतोऽकारान्तादित्येतेन। अत सातत्यगमन इत्ययं क्विबन्तः धातुरिह न गृह्यते इति दर्शयति। कौरव्यासुरीत्यासुरिशब्दस्येण्णन्तस्य निर्देशाद् [1]इति दर्शयति। यद्येवम्, अस्यापत्यमिः अत्रानकारान्तत्वान्न प्राप्नोति। अन्तवद्भावाद्भविष्यति। दाक्षिरित्यादि। वेत्यनुवृत्तेः वाक्यमपि भवति। इणभावे त्वण्प्रत्ययो न भवत्यनभिधानात्। इण्प्रत्ययान्तादायनणं स्मरन्तीति कुञ्जादेराकृतिगणत्वात्, दाक्षायण इति। दाक्षिशब्दादिण्णन्तादायनण्, आदिति कर्तव्ये तपरकरणमाकारनिवृत्त्यर्थम्। कीलालपो अपत्यं कैलालपः। अणि कृते इवर्णावर्णावित्याकारलोपः, इह तु "प्रदीयतां दाशरथाय मैथिलीम्" इति दशरथशब्दात्तस्येदमित्यत्रार्थेऽण्प्रत्ययः। अपत्यविवक्षायां तु इणैव भवितव्यम्। यदि तर्हि जातिवाचिभ्य इण् नेष्यते, कथं कुतश्चरति मायूरिरित्यादौ प्रयोगे मयूरकपिञ्जलशब्दाभ्यां जातिशब्दाभ्यामिण्णित्याह—कुतश्चरतीत्यादिः। वा-शब्दाद् बहुलार्थादेवमादिः सेत्स्यतीत्यर्थः।

बह्वादेश्च विधीयते २।६।६

बाहविरित्यादि। उवर्णस्त्वोत्वमापाद्य इत्योत्वम्। इह येऽनकारान्ताः पठ्यन्ते ([2]तेषां प्रत्ययविध्यर्थः पाठः येऽप्यकारान्तास्तेषां बाधकबाधनार्थः। अजीगर्तयुधिष्ठिरप्रद्युम्नार्जुनप्रभृतयो हि पठ्यन्ते) तेषामण्प्रत्ययः प्राप्तः स बाध्यते। सुधातृशब्दस्येत्यादि। उपलक्षणपरत्वेन तदुक्तम्। तेनेदमपि सिद्धम्। व्यासस्यापत्यं वैयासकिः, [3]नैषादकिः।

रागान्नक्षत्रयोगान् समूहान् सास्य देवता २।६।७

(रागान्नक्षत्रयोगाच्च समूहात्सास्यदेवता तद्वत्यधीते तस्येदमेवादेरणिष्यते।)

---

१. न्यूनपाठः (वा०)
२. न्यूनपाठः (भं०)
३. नैषादिकः (भं०)

रज्यते येन सः रागः इति व्यञ्जनान्ताच्चेति घञ् रञ्जेर्भावकरणयोरिति पञ्चमलोपः इह समूहग्रहणेनैवमादिग्रहणेन च समूहेऽर्थे, एवमादौ चार्थे प्रत्ययो विधित्सितः। ततश्च समूहादेरर्थस्य भावेऽण् प्रत्ययस्य भाव इत्येवमर्थ-[1]व्याख्याने सत्यर्थत्वेन अभिमतात् कालभावयोरित्यादिना सप्तमी न्याय्या तत्कथं समूहादेवमादेरिति चेत्यादि। सप्तम्याः स्थाने प्रसङ्गे प्राप्तौ सत्यां हेताविति विचित्रत्वान्निर्देशस्य [2]पञ्चम्या कृते हेतुत्वं चार्थेनापि व्यवस्थितस्य समूहादेर्युक्तमेवेति सामर्थ्यात् समूहादावर्थे सत्यण्प्रत्यय इत्ययमत्रार्थो जायते। तेन रक्तमित्यत्रार्थे इति येन रज्यते कुङ्कुमादिना सः तेनेति निर्दिश्यते। अयं चात्रार्थो अध्याह्रियत इति शब्दशक्तिस्वाभाव्याद्रागविशेषवाचिनशब्दात्तेन रक्तमित्यत्रैवार्थेऽण्प्रत्ययस्य दर्शनादिति भावः। नक्षत्रयोगादण् भवतीति पुष्यादिसम्बन्धादण्प्रत्ययस्य कर्तुमशक्यत्वान्नक्षत्रयोगादित्येषा पूर्ववद्धेतौ पञ्चमी, तेन नक्षत्रयोगाद्ण् भवतीति अत्र नक्षत्रयोगे सत्यण् भवतीत्ययमर्थो जायते। कस्य पुनः नक्षत्रेण योगे सति, प्रत्यय इत्यर्थकथनद्वारेण कालस्य नक्षत्रेण योगे सति प्रत्यय इत्याह—नक्षत्रेणेत्यादि। एतेन पुष्येण युक्तश्चन्द्रमा इत्यत्र न भवति। ननु कालविशेषमवधारयितुं लोके पौषमहः पौषी रात्रि-रित्यादि प्रयुज्यते। एवं च कालविशेषावधारणहेतुरिह योगोऽभिप्रेतः। सः च तयोरेव भवति। ययोस्सन्निकर्षापकर्षौ स्तः। यथा पुष्यचन्द्रमसोः। न च नित्यस्य विभोश्च कालस्य नित्येन नक्षत्रेण सन्निकर्षोऽस्त्यपकर्षो वा येन तयो-स्सम्बन्धवाचो युक्तिरन्विता स्यात्। अत्रोच्यते—नामी पुष्यादयोऽभिन्नि-यानीत्यामुख्येऽर्थे वर्तमानाण्प्रत्ययमुत्पादयन्ति, किन्तर्हि, पुष्यादिसमीपस्थे चन्द्रमसि वर्तमानः। एवं च पुष्यादिसमीपस्थेन चन्द्रमसा कालस्योपपद्यते योगः। तदवस्थस्य चन्द्रमसः [3]कादाचित्कत्वात्। तेन पुष्येण युक्तः काल इत्यस्यायमर्थः पुष्ययुक्तेन चन्द्रमसा युक्तः काल इति। ननु नक्षत्रेण युक्तः काल इत्यत्रार्थे प्रत्ययः क्रियमाणः प्रकृतिविशेषानुपादानात् लिङ्गमात्रात् प्रसज्येत इत्याह—नक्षत्रयोगादिति। यद्यपीत्यादि कुतो विना वचनं नक्षत्रा-दयं प्रत्ययो लभ्यत इत्याह—नदीत्यादि। अन्यस्मादित्यनक्षत्रात् ([4]यद्येवम्, उक्तेन न्यायेन पौषमास इत्यादिकालनियमः कुतः, उच्यते—नात्र कालनियमः, किन्तर्हि, सास्मिन् पौर्णमासीति पूर्वाचार्यवचनादण्प्रत्ययः) कथमित्यादि।

---

१. व्याख्याते (भं०)
२. पञ्चम्यो (भं०)
३. कदाचित्कत्वात् (भं०)
४. न्यूनपाठः (भं०)

तेन रक्तमित्यस्यासम्भवात् प्रश्नः, उपमानादयं प्रयोग इति गौर्वाहीकः इत्यादि प्रयोगवत्। लाक्षारोचनेनेत्यादिः। रागादित्यणि प्राप्ते इकणो विधानम्। शकल-कर्दमाभ्यां तु बाहुलकादणपि भवति। शाकलं कार्दमम्। वक्तव्यादिति। तिष्यपुष्ययोः अणि परे य-लोपो वक्तव्य इत्यस्मात्। यदेत्यादि। अत्र च वा शब्दहेतुः। कालसामान्यस्य इति। यत्र अहरादिलक्षणो विशेषो नावभासते तत्कालसामान्यम्। तेनाणो लुकि सति अद्य पुष्यः, अद्य तिष्यः इत्याद्येव भवति। एतच्च पुष्येण युक्तः काल इति कालनक्षत्रयोः भेदविवक्षया प्रत्यय-श्रवणे प्राप्ते उक्तम्। यदा तु तयोरभेदविवक्षा तदा प्रत्ययाभावात् पुष्यादिभ्य प्रत्ययस्योत्पत्तिरेव नास्तीति किं लुक्वचनेन। हांसमित्यादि समूहेऽर्थेऽणन्तः-स्वभावान्नपुंसकार्थवृत्तिः। राजकमिति। [1]पूर्ववन्न लोपः। राजन्यकं, मानुष्यकमिति। राजन्यमनुष्यशब्दाभ्यां जातौ प्रत्ययार्थे स्मृत[2]यप्रत्ययाभ्यामकः प्रत्ययः। एवं यथाभिधानमपत्यप्रत्ययान्ताद् वृद्धशब्दाच्चाकण् वक्तव्यः। उपगता गावो यस्य उपगुः तस्यापत्यानि औपगवाः तेषां समूहः औपगवकम्। एवं वार्धकम्। यण् चेति च-शब्दात् अकणिकणावपि भवतः। कैदारकम्, कैदारिकम्। कावचिकम्, कावचकमिति। नस्य तु क्वचिदिति न लोपः। इवर्णावर्णलोपः। धेनुशब्दात् कण् वक्तव्य इति नञ्पूर्वात् तु नेष्यते। बाहुलकात्, आधैनुकम्, आधेनवम्। अण्प्रत्ययः। अचित्तवाचिन इति। न विद्यते चित्तं यस्य तथाविधार्थवाचिन इत्यर्थः। क्वचित्त्वणपि तस्माद् भवति। अह्नां समूह आह्नम्। हस्तिनाम् समूहो हास्तिकमिति। लिङ्गग्रहणपरिभाषया हस्तिनीनां समूहो हास्तिकम्। पुंवदिति योगविभागात् पुंवद्भावः। वात्येति। स्वभावात्स्त्रीवृत्तिः। पशूनां समूहः, पाशवम्। बाहुल-कादोत्वाभावः। तथा केशाश्वाभ्यां यणीयौ वा, [3]कैश्यम्, आश्वीयम्। पक्षे केशशब्दात् अचित्तवाचिन इकण्, कैशिकम्। अश्वशब्दात्त्वण्, आश्वम्। एवं खलगोरर्थेभ्य इन्, ञ, त्र, कड्य, य-प्रत्ययश्च। खलिनी गोत्रा, रथ—कड्या, खल्या, गव्या, रथ्या। समूहेऽण्विधिः। तस्येदमित्यस्य प्रपञ्चः। ऋतुवायुशब्दाभ्यामित्युपलक्षणे एते। अनेन पितृ-उषस् इत्येताभ्यामपि यः, पित्र्यः, उषस्यः। अण्सन्नियोगेन कार्यान्तरमपि। कः प्रजापतिः, स देवता अस्य, स कायः तद्वेत्ति तदधीते इत्यधीत इत्यत्र तदित्यस्याभिसम्बन्धात् तदधीते

१. पूर्ववदन् लोपः (मं०)
२. य प्रत्ययाभ्यामकण् (मं०)
३. कैशम (मं०)

इति पृथगयमर्थनिर्देशः। तेन योऽधीते न च वेत्ति तत्रापि भवति। अर्थावबोधश्चात्र वेदनमभिप्रेतम्। न तु स्वरूपमात्रवेदनम्। अन्यथा यो यदधीते तदवश्यमेव सः स्वरूपतो वेत्ति इति किं तदधीत इत्यनेन कृतं स्यात्। तथैवेति। एतयोरर्थयोरित्येषोऽत्र प्रकारार्थः क्वचिच्चाध्येतृवेदित्रोरणो लुक्। द्वौ वेदौ वेत्ति अधीते वा द्विवेदः, त्रिवेदः, चतुर्वेदः, सर्ववेदः, सर्वतन्त्रः। क्वचिदकणपि। अग्निष्टोमिकः, वाजपेयिकः, राजसूयिकः, ऐतिहासिकः, पौराणिकः, लाक्षिकः, लाक्षणिकः, क्वचिदिकप्रत्ययः, शतपथिकः। तस्येदमिति सम्बन्धमात्रमत्र विवक्षितम्। लिङ्गसंख्यादिकं तु नान्तरीयकत्वात् शब्दोपात्तमपि न विवक्ष्यते। तेनास्येदम्, तस्यैतत्, इत्यादावपि सर्वत्र प्रत्ययः। तस्यानन्तरं तस्य समीपमित्यादौ त्विदमर्थविशेषेऽनन्तरादौ प्रत्ययो न भवत्यनभिधानात्। रथात्तु य-प्रत्यय इष्यते। रथस्येदं रथ्यम्, रथाङ्गमेवोच्यते। पत्रपूर्वात्त्वणेव। पत्रं वाहनम्, आश्वरथम्। हलसीराभ्यामिकण्। हालिकम्, सैरिकम्। युष्माकमयं युष्मदीयः अस्मदीयः। इदमर्थे ईयः ईनणपि। यौष्माकीनः। आस्माकीनः। अणपि यौष्माकः, आस्माकः। युष्मदस्मदोर्युष्माकास्माकौ बाहुलकात्। एवं तवायं तावकीनः, ममायं मामकीनः। एवं तावकः मामकः। निवसन्ति यस्मिन् सः निवास इति व्यञ्जनान्ताच्चेत्यधिकरणे घञ्। तत्र भव इत्यत्रार्थे प्रत्ययान्तरमपि। आहेयम् ग्रैवेयम्। ग्रीवाया अणपि। ग्रैवम्। तत आगत इत्यत्रार्थे प्रत्ययान्तरमपि। शुल्कशालाया आगतम्, शौल्कशालिकम्। एवमापणिकम्, औपाध्यायकम्। शैष्यकम्, आचार्यकम्, पैतामहकम्, पैतृकम्, मातृकम्, मातुलकम्। भ्रातृकम्। स्वसृकम्। [1]पितृकम्। इकण् अकण् य इत्येते प्रत्ययाः अन्यत्राप्यर्थे इति। ततः प्रभवतीत्यस्मिन्नर्थे हि भवतः। प्रभवति हैमवती गङ्गा। तेन कृते ग्रन्थे। वररुचिना कृतो ग्रन्थः वाररुचः। एवं क्षुद्रभिः कृतं क्षौद्रम्। भ्रामरम्। तत्र संस्कृतः भक्ष्यः। किलोश्यां संस्कृतो [2]भक्ष्यः कैलोशः। प्रत्ययान्तरस्थमपि। शूले संस्कृतं शूल्यं मांसम्। एवमुखायां संस्कृतम् उख्यं दाधिकम्। [3]औदश्वितकम्। क्षौरेयम्। इकण् कण् एयण् एते प्रत्ययाः। एवं चक्षुषा गृह्यते चाक्षुषं रूपम्। श्रवणेन गृह्यते श्रावणः शब्दः इत्यादि यथा प्रयोगमुन्नेयम्।

---

१. पित्र्यकम् (वा०)
२. भक्षाः (भं०)
३. ओदनं श्वितकम् (वा०)

तेन दीव्यति संसृष्टं तरतीकरणं चरत्यपि पण्याच्छिल्पान्नियोगाच्च क्रीतादेरायुधादपि २।६।८

आयुध्यतेऽनेनेत्यायुधमिति युधेराङ्पूर्वात् घञर्थे [1]कः, नियुज्यते यस्मिन् सः नियोगः इत्येतेनाधिकरणसाधनोऽयं नियोगशब्दो [2]द्वाराधिकेऽर्थे वर्तत इति दर्शयति। तेनेत्येतत् पदमिति। नन्वानन्तर्याद्दीव्यतीत्यनेनैव तेनेत्यस्याभिसम्बन्धो न्याय्यः, न तु संसृष्टादिभिः। अस्त्येतत्, किन्तु तैरवश्यं किञ्चित्साधनमपेक्षितव्यम्, तन्न युक्तम्, यत्सूत्रोपात्तेनैव बुद्धौ परिस्फुरता तेनेत्यनेन तेषां सम्बन्धो न श्रूयते। न साधनान्तरेणेति क्रीतादेरिति पञ्चमीत्यादिपूर्ववद् व्याख्येयम्। पण्यादिति। पणितव्यः, पण्यो गन्धादिरुच्यते। तस्मात् प्रत्ययः कस्मिन्नर्थ इत्याह—तदस्य पण्यमित्यत्रार्थ इति वतः, शब्दशक्तिस्वाभाव्यात्। गान्धिकादिशब्देन हि गन्धादिः यस्य पण्यं स एवोच्यते। शिल्पादिति। यच्चभ्यासपूर्वकं क्रियासु कौशलं शिल्पमिति। ततः प्रत्ययः कर्तुमशक्यः तत्राप्यर्थात् शिल्पस्य विषयभूतो यो मृदङ्गवादनादिर्यद्विषयं तच्छिल्पम्। तद्वृत्तेर्मृदङ्गादिशब्दात् प्रत्ययो विज्ञायते, क्वार्थ इत्याह—तदस्य शिल्पमित्यत्रार्थे शब्दशक्तिस्वाभाव्यं चात्र हेतुः। अक्षैर्दीव्यति इत्याक्षिक इत्यक्षैरिति करणे तृतीया। तेनेत्यस्य [3]करणीतृतीयान्तत्वात्। कर्तृतृतीयान्तत्वं त्वेतन्न भवति, दीव्यतीत्यादि व्याख्यातेनैव कर्तुरभिहितत्वात्। हेतुतृतीयान्तमपि न भवति, अक्षादीनां देवनादिक्रियायाः प्रति व्यापृतत्वावगमात्। अनाश्रितव्यापारश्चार्थो हेतुरुच्यते। यथोक्तमनाश्रित्य व्यापारो योग्यता[4]पात्रयुक्तो द्रव्यगुणक्रियाविशेषोऽर्थो हेतुरिति। इह च तेन दीव्यतीत्यादौ संख्याकालौ न विवक्ष्येते, तेन संख्यान्तरे कालान्तरेऽपि प्रत्ययः। यद्येवम्, एकपदोपात्तस्य कर्तुरप्यविवक्षा स्यात्। नैवम्। एवं हि सति क्रियामात्रमवश्यमेवोपादानसामर्थ्याद्विवक्षणीयमिति तद्विवक्षार्थं युडादिना भावार्थाभिधायिना निर्देशं कृत्वा देवन इत्यादि निर्देशं कुर्यात्। दिवतीत्यादि तु न निर्दिशेत्, तस्माद् दीव्यतीत्यादिनिर्देशाज्ज्ञायते परस्मैपदवाच्यः कर्ता अत्र विवक्षित इत्याक्षिकादिकश्च शब्दः तद्धितान्तो दीव्यतीत्यादौ क्रियामात्रप्रधाने अप्यर्थे व्युत्पादितः कर्तृप्रधानः शब्दशक्तिबलात्। दध्ना संसृष्टमिति। संसृष्टमेकीभूतं लवणादिकणिति

---

१. क प्रत्ययः (मं०)
२. दूरादिके (मं०)
३. करण (मं०)
४. मात्र (?)

संसृष्टार्थविहितस्य लक्षणेन संसृष्टमिति लवणाख्येन द्रव्येणेत्यर्थः। चूर्णिन्य इति। ऋन्नेभ्यस्त्वी, जस्। वेणुभारेण तरतीति। तरति प्लवत इत्यर्थः। अनिमज्जनं ह्यत्र तरतेरर्थः। अथाभिभवार्थवृत्तिः कस्मान्न गृह्यते। यथा तरति मृत्युमिति। उच्यते—यदि सः गृह्यते, ततोऽभिभूयमानलक्षणेन कर्मणा तरतेः सकर्मकत्वात्कर्मापेक्षायां सत्यां प्रकृत्यर्थेन सह तरत्यर्थस्यानन्वयः प्रसज्येत। मृदङ्गवादनं शिल्पमस्येति। नन्वेवं विग्रहे सति मृदङ्गवादनशब्दादेव प्रत्ययः प्राप्नोति न तु मृदङ्गशब्दादिति चोद्यमाशङ्क्याह—तद्धितान्त इत्यादि। अत्र वादयतीति वादन इति वादनशब्दो वादयितरि पुरुषे प्रवर्तते। एतेन च शब्दशक्तिस्वाभाव्यात् मृदङ्गवादनवृत्तेर्मृदङ्गशब्दादयं प्रत्ययः, न तु मृदङ्गवादनशब्दादिति दर्शयति। अन्येन च विग्रहोऽन्यस्माच्च प्रत्ययो दृश्यत एव। यथा (१अवेत्सां ममाविकमिति)। अथ देवदत्तेन क्रीतमित्यत्रापि प्रत्ययः कस्मान्न भवतीत्याह—प्रत्ययोऽयमित्यादिः स्मर्यत इत्यनेन कर्तुरनभिधानात् प्रत्ययाभावमाह—तथा च मूल्यादेव करणात् प्रत्ययोऽयमिष्यते न तु पणिना क्रीतमित्यादौ पण्यादेरपि करणात्। एवं प्रस्थाभ्यां क्रीतं प्रस्थैः क्रीतमिति द्विर्वचनबहुवचनान्तादपि प्रत्ययो न भवति। प्रत्ययाद् द्वित्वबहुत्वानवगमात् प्रकरणात् तदवगमेऽपि प्रत्ययो भवति नो वेत्यत्र (२तत्त्वविदः प्रमाणम्। मुद्गैः क्रीतं मौद्गिकमित्यत्र) बहुवचनान्तेऽपि प्रत्ययः। मुदगादिशब्दानां तद्धितवृत्तौ बहुत्वावगमात्। नह्येकया मुद्गव्यक्त्या क्रयस्सम्भवति। आदिग्रहणादिति क्रीतादेरित्यस्मादर्थान्तरेऽपीत्युक्ते क्वान्यत्रार्थ इति प्रश्नावसरे आह—तदस्य परिमाणमित्यत्रार्थ इति प्रास्थिको राशिरिति। एवं वर्षशतं परिमाणमस्य वर्षशतिकः, वर्षसाहस्रिकः। तेन खनतीत्यत्रार्थे इत्येतत् पदद्वयं सर्वत्र सम्बध्यते। वेतनेन जीवति वैतनिकः इति। एवं धानुर्दण्डिकः, धानुष्कः दाण्डिकः, नान्य इत्यनभिधानात्। धर्मेण चरतीति पुनः पुनः धर्ममासेवत इत्यर्थः। एवं सार्धमिकः। तेन वर्तत इत्यत्रार्थे इति वर्तते चेष्टते इत्यर्थः। सर्वधुरा-शब्दात् तथैवेति। वहत्यर्थः प्रकारार्थः। सर्वधुरीणः इति सर्वा चासौ धूश्चेति, अकारस्समासान्तः तत आप्प्रत्ययः। अस्तिनास्तिशब्दाभ्यां निपाताभ्यामिति, न त्वाख्यातप्रत्ययान्ताभ्याम्। कुतः, लिङ्गप्रकरणत्वात्। अथ सामान्याभिधानेऽप्यस्ति। परलोक इति। सति रम्येत्येष विशेषः। कुतो लभ्यते, तेन सति सत्तामात्रे प्रत्ययस्स्यादित्याशङ्क्याह—परलोककर्तृके

---

१. अपठनीयः।

२. न्यूनपाठः (भं०)

प्रकृत्यर्थे प्रयोगावेतौ स्मर्येते इति प्रकृत्योरस्तिनास्तिशब्दयोः भावाभाव-लक्षणोऽर्थः। तत्र परलोको यदा कर्ता भवति तदा अस्तिनास्तिशब्दाभ्यां प्रत्यय इत्यर्थः। इत्थमादिग्रहणात् तेन जयति, अक्षैर्जयति आक्षिकः, तेन संस्कृतम्। दध्ना संस्कृतं दाधिकम्। सतः उत्कर्षाधानं संस्कारः। अणपि क्वचित्। कुलत्थैः संस्कृतं कौलत्थं, अक्षद्यूतेन निवृत्तमाक्षद्यूतिकम् वैरम्। दध्नोपसिक्तं दाधिकम्। एवं घातिकं। प्रतिलोमं वर्तते प्रातिलोमिकः एव-मानुलोमिकः, प्रातिकूलिकः, आनुकूलिकः। प्रतिलोमादिभ्यः क्रियाविशेषण-त्वात् द्वितीया। समाजं रक्षति सामाजिकः, संशयं प्राप्तः सांशयिकः। योजनं गच्छति यौजनिकः, क्रोशशतं गच्छति क्रौशशतिकः, यौजनशतिकः। तदस्य शीलम्। अपूपभक्षणं शीलमस्य आपूपिकः, मौदकिकः। एवमावसथे वसति, आवसथिकः। हलं वहति हालिकम्। सैरिकं इत्यादयः। क्वचित् स्वार्थेऽपि। विनय एव वैनयिकः, समय एव सामयिकः, औपयिकः। पा-शब्दस्य ह्रस्वं बाहुलकात्। अकस्मादेवाकस्मिकम्। एवमात्ययिक इत्येवमादयः। धनुरायुध-मस्य धानुष्कः, इति धनुस् इत्यस्यानव्ययविसृष्ट इति सत्वम्। शक्तियष्टीभ्यामी-कण्बक्तव्य इत्यपिशब्दात् तथा च तीयप्रत्ययान्ताद् विद्या[1]विनयाद् अन्यत्र स्वार्थेऽपीकण् दृश्यते विकल्पेनैतत् ([2]द्वैतीयीकम्, तार्तीयीकम् द्वितीयम्, तृती-यम्) यकम्, द्वैतीय तार्तीय कि ता तात्तीयं द्वितीयं तृतीयं विद्याविषये द्वितीया विद्येत्येव भवति।

नावस्तार्ये विषाद्वध्ये तुलया सम्मितेऽपि च तत्र साधौ यः २।६।६

तार्ये इति तरतेः, तरितुं शक्य इति शक्येऽर्थे [3]ण्यः प्रत्ययः। वध्य-शब्दोऽ-र्हेऽर्थे यः प्रत्ययान्तः। सम्मित इति। इतिस्यतीत्वम्। य इति स्वरूपेणार्थे-नार्थवत्वात् प्रथमा। इत्थं सर्वत्रैवं प्रकारे विषये प्रथमा, तुला-शब्दात् सम्मिते परिच्छिन्नेऽर्थे इति फलव्याख्यानमेतत्। तुलया सम्मितेऽर्थे हि प्रत्ययः क्रिय-माणः तुला-शब्दादेव विज्ञायते। तेनान्यस्मात् लिङ्गात् तत्र साधुरित्यत्रार्थ इत्येतेन साध्वर्थे तुला शब्दोऽनन्तरोऽपि न प्रकृतिरिति दर्शयति। एतच्च तुला-शब्दात् साध्वर्थस्यानवगमाल्लभ्यते। नावा तार्यमित्यादि। नौविषशब्दाभ्यां करणतृतीयान्ताभ्यां यः प्रत्ययः। प्रत्ययार्थसामर्थ्यलभ्यत्वात् तृतीयान्तत्वस्य नाव्यमिति कार्यविवावाविव्यवादेशः। तुलया सम्मितं तुल्यमिति शब्द[4]व्युत्पत्तये

१. विषयात् (मं०)
२. न्यूनपाठः (वा०)
३. ण्यण् (मं०)
४. व्युत्पत्त्या (मं०)

केवलमत्र त्वलोपादीयते । सदृशपर्यायस्त्वयं तुल्यशब्दः । सभायां साधुः सभ्य इति । प्रवीणो योग्यो वा साधुः । तत्र प्रावीण्यं चित्तवतां धर्मो योग्यत्वं पुनः सामर्थ्यं सर्वत्र भक्ताण्णः प्रत्ययो इति साधौ चेति च-शब्दात्, तथा च प्रत्ययान्तरमपि, प्रतिजने साधुः प्रातिजनीनः । जनं जनं प्रतिजनम्, अव्ययीभावः । एवं सार्वजनीनः महाजनीनः, पर्षदि साधुः पार्षदः, य प्रत्ययोऽपि पार्षद्यः । कथायां साधुः काथिकः, एवं [1]जानवादिकः, गौणिकः, साङ्ग्रामिकः, औपवासिकः । पाथेयमिति । व्यञ्जने चेषां निरिति न लोपः । दण्ड्यः इति दण्डमर्हतीत्यर्थः । एवं मधुपर्क्यः, अर्घ्यः, एभ्यः अर्हार्थादर्थान्तरेऽपि । य-प्रत्यय इष्यते स्वर्गः प्रयोजनमस्य स्वर्ग्यः, यशस्यः, आयुष्यः । कालः प्राप्तोऽस्य काल्यः । तरसा निर्जितः तरस्यः । अणपि औरसः, धर्मशब्दात् प्राप्ये चार्थ इति । ननु धर्मेण यत्प्राप्यं तद्धर्मादनपेतं भवति । एवं चानपेत इत्येव प्राप्येऽपि सिद्धो य-प्रत्ययः । नैतत् । धर्माद्धि तदनपेतमुच्यते यदनपेतं धर्मात्, यथा धर्म्यो राजा, धर्म्या बुद्धिरिति । धर्मेण प्राप्यं तु यत्फलं तद्धर्म्यम्, तच्च फलं धर्मादनपेत्यैव धर्मोत्पत्तिसमनन्तरं देशकालसहकारि [2]बाहुल्यात् फलस्यादर्शनात् । अतोऽनपेतार्थेनासिद्धत्वात् प्राप्ये चार्थ इति पृथगुक्तम् । हृदादेशो वक्तव्यः इति बाहुलकात् ।

ईयस्तुहिते २।६।१०

हिनोतिस्मेति । हि गताविति यस्मात् गत्यर्थाकर्मकेति क्तः, दधातेर्वा, धीयतेस्मेति क्तप्रत्यये कृते हिरादेशः । शरीरावयवादिति शरीरावयववाचिनो लिङ्गात् । ऐतिकायनीयः । इतिकस्यापत्यमित्यायनण्प्रत्ययः । तस्येदमित्यत्राथेंऽपीति लिङ्गसम्बन्धवाचिनो ये स्वरा इत्यादि सर्वमपेक्ष्यते । एवं पूर्वोक्तान्युदाहरणानि । माहिष्मतीय इत्यादीनि कण् ईय् इत्येताविष्यत इति शन्तृङ्ङन्तात् [3]अणेव । भवत इदं भावतम्, भवदीयम्, अन्तर्वर्तिनीं बिभर्क्ति प्रत्ययलक्षणेनाश्रित्य [4]पदत्वात्तीयः, भ्रात्रीयः इति । व्य-प्रत्ययोऽपीष्यते । भ्रातुरपत्यं भ्रातृव्यः । शत्रुपर्यायस्त्वपर एव भ्रातृव्यशब्दः । एवमन्यतोऽपि यथादर्शनमीयप्रत्ययः । एवमन्तस्थायां भवः अन्तस्थीयः । मुखतो भवः मुखतीयः । पार्श्वतीयः । अन्त्यस्वरादिलोपः बाहुलकात् । एवं कवर्गीयः चवर्गीयः

---

१. जानपदिकः (मं०)
२. वैकल्यात् (वा०)
३. अणपि (मं०)
४. पदत्वादी (?)

पवर्गीयः इति। एवं सर्वस्मै हितं सर्वीयम्। अणपि सार्वम्। पुरुषाय हितं पौरुषेयम्। बाहुलकात् एयः प्रत्ययः। वधविकारसमूहः, तेन कृतेष्वपि पौरुषेयो वधः। विकारस्समूहो ग्रन्थो वा। आत्मनीनमिति। नस्य तु क्वचिदिति क्वचिद् ग्रहणान्नलोपाभावः। एवमन्यतोऽपीनप्रत्ययः। विश्वे च ते जनाः विश्वजनाः। तेभ्यो हितं विश्वजनीनम्, एवं पञ्चजनीनम्, सार्वजनीनम्। सार्वजनिकमित्यपीष्यते।

यदुगवादित २।६।११

उगवादित इत्यसर्वनाम्नोऽपि पञ्चम्यन्तात्तस् इष्यत इति तस्-प्रत्ययः। शङ्कुभ्यम्, परशव्यम् इति। उवर्णस्त्वोत्वमापाद्यः, कार्यविवावावित्यवादेशः। एवं वधव्यमित्यत्रापि। यदित्येको योगः कर्तव्यः इति तेनानुगवादिभ्योऽपि यद् भवतीति भावः। दिश्यमिति गत्वमत्र न भवति, यकारे तद्धिते तस्यानिष्यमाणत्वात्। तथा च विरामव्यञ्जनादिष्वित्यत्रोक्तम्। एवमुत्तरत्रापि यकारे तद्धिते न भवतीति इत्याद्युदाहार्यमिति। आदिग्रहणेन पथ्यं, पक्ष्यं, [1]आद्यम् इत्यादयः। सम्बन्धिशब्दादिति। जायाः जनकत्वेन लोके प्रसिद्धा। एतच्च बाहुलकाल्लभ्यते। श्वाशुरिरितीण् प्रत्ययः। शुन्शब्दो गवादिषु पठ्यते। तस्य बाहुलकात् शूनं शून्यमिति च रूपे भवतः। एवमूधसोऽप्यूधन्य इति। ऊधस्शब्दो हि गवादिषु पठ्यते। सस्य तु नत्वम्, बाहुलकात्।

उपमाने वतिः २।६।१२

उपमीयते येन तदुपमानमिति करणे युट्। तत्पुनः प्रसिद्धं यत्सादृश्यात्परस्य परिच्छेदायोपादीयते। ततो वतिप्रत्ययो भवतीति। स च भवन् सर्वविभक्त्यन्ताद् भवति। उपमानोपमेयभावस्य सर्वस्य विभक्त्यर्थविषयत्वात्। विभक्त्यर्थविशेषावसायस्तूपमेयाद् बोद्धव्यः। [2]तथा चाहुः—उपमाने यः संशयः स उपमेयाद् व्यावर्तत इति सादृश्यमात्रे च प्रत्ययविधानात् क्रियागुणद्रव्यतुल्यत्वेऽपि सर्वत्र वति-प्रत्ययः। ब्राह्मण इवाधीते ब्राह्मणवदिति ब्राह्मणशब्दोऽत्र ब्राह्मणार्थसहचरितायामध्ययनादिक्रियायां वर्तमानप्रत्ययमुत्पादयति। अन्यथा क्षत्रियाध्ययनस्य कथं ब्राह्मणेन तुल्यता स्यात्। एवं देवदत्तवत् स्थूलः, देवदत्तवद् गोमान् इत्यादि गुणद्रव्यतुल्यत्वमुदाहार्यम्।

---

१. गव्यम् (भं०)

२. तथा च वदत्युपमाने यस्तूपमेयाद् बोद्धव्यः तथा च वदति (भं०)

ता-त्वौ भावे २।६।१३

भावेऽर्थे लिङ्गात् ता-त्वौ भवत इति तत्र भावशब्दोऽयमभिप्रायार्थवृत्तिरिह न गृह्यते। देवदत्तस्याभिप्राय ईश्वराराधने इत्यत्रापि देवदत्तशब्दात् प्रत्ययप्रसङ्गात्। पदार्थवृत्तिरप्यस्ति सोऽपि न गृह्यते तस्मिन् हि गृह्यमाणे सति शुक्लता शुक्लत्वमिति शुक्लादिभ्यो गुणवृत्तिभ्यो भावप्रत्ययोपजाते सति गुणपदार्थस्यैवाभिधानं प्राप्नोति न गुणमात्रस्य तस्य चाभिधानमिष्यते॥ एवं च पदार्थवृत्तौ भावशब्दे गृह्यमाणे प्रकृत्यर्थात् प्रत्ययार्थस्य [1]तेनावभासनात् स्वार्थ एव ता-त्वौ भवेताम्। न चैवं ता-त्वप्रत्ययान्तादर्थान्तरावगमात् सत्तावृत्तिरपि नायं भावशब्दः। एवं हि सति गोत्वादिशब्दानां सह सामान्यरूपासत्तार्थत्वेनावतिष्ठते न तु विशिष्टा गोत्वादिजातिः। अथ मतम्, अच्छस्वभावापि सह सामान्यरूपा सत्ता गोत्वादिभेदोपहिता रागा सती विशिष्टगोत्वादिजातिविषया विज्ञास्यत इत्येवमप्यभावत्वं शून्यत्वमित्यादावभावादिशब्दानां सत्तासमवायविरहात् प्रत्ययेन भवेत्, तस्माच्छब्दप्रवृत्तिनिमित्तमिह भावशब्दस्यार्थः। तच्चानेकप्रकारम्। तथाहि जातिशब्दानां जातिः प्रवृत्तौ निमित्तम्। गोत्वमिति गुणशब्दानामपि गुणः शुक्लत्वमिति। क्रियाशब्दानामपि क्रियावाचकत्वमिति। यदृच्छाशब्दानामपि डित्थादीनां संज्ञासंज्ञिसम्बन्धः। डित्थत्वमिति। कौमाराद्यवस्थाभेदप्रकल्पितभेदानां तेषां सर्वावस्थानुयायिनी वा जातिप्रवृत्तौ निमित्तम्। तच्च शब्दप्रवृत्तिनिमित्तभूतं गोत्वादिवस्तुगतमपि शब्दप्रवृत्तावुपायभूतमिति कृत्वा शब्दसम्बन्धित्वेन कथ्यते ततस्तत्र वाच्यः भावप्रत्ययः। गोता गोत्वमित्यत्र यदा गोशब्दो जात्यवच्छिन्ने द्रव्ये वर्तते तदा जातेः प्रवृत्तिनिमित्तत्वात् तस्यां भावप्रत्ययः। जातिप्रवृत्ते तु-शब्दस्वरूपे प्रवृत्तिनिमित्तान्तरस्याभावात्। रूपादिभ्योऽपि गुणमात्रवृत्तिभ्यो गुणसामान्ये शुक्लादिभ्योऽपि तथाविधेभ्यस्तत्रैव शुक्लस्य गुणस्य भावः शुक्लता शुक्लत्वमिति शुक्लगुणजातिरित्यर्थः। गुणगुणिनोरभेदोपचारात्। गुणवृत्तिभ्यस्तु तेभ्यो गुणे शुक्लस्य पटस्य भावः शुक्लता शुक्लत्वमिति शुक्लो गुण इत्यर्थः। अणुमहद्दीर्घादिभ्योऽपि परमाणुवृत्तिभ्य परिमाणमात्रे समासकृत् तद्धितेभ्यः सम्बन्धे राजपुरुषादिशब्देभ्यो हि जायमानो भावप्रत्ययः स्वस्वाम्यादिसम्बन्धमवगमयति। ततः स एव तेषां प्रवृत्तिनिमित्तम्, राजपुरुषता राजपुरुषत्वम्। पाचकता पाचकत्वमिति क्रियाकारकसम्बन्धः। औपगवता औपगवत्वमित्यपत्यापत्यवत् सम्बन्धः कुम्भकारादिभ्यो

---

१. भेदानवभासात् (मं०)।

रूढिशब्देभ्यो जातिविशेषावच्छिन्नद्रव्यवृत्तिभ्यो जातौ भावप्रत्ययः। ननु कुम्भकरणक्रियाश्रयेण कुम्भकारादिशब्दानां प्रवृत्तेः क्रियैव तेषां प्रवृत्तौ निमित्तं स्यात्। अस्त्येतत्, किन्त्वेमादयः कृत्प्रत्ययान्ताः संज्ञाप्रायाः रूढिरूपत्वैवार्थमवगमयन्ति। तथा च अकुर्वत्यपि कुम्भं कुम्भकारमानयेत्युक्ते तज्जातीयमेवानयति। तस्माज्जातावेवात्र भावप्रत्ययः। सतां भावः सत्ता सत्त्वमिति [1]सत्पदार्थविषयायां नित्यसमवायिन्यां शब्दप्रवृत्तिनिमित्तभूतायां सत्तालक्षणायाः जातावेव हस्त्यादिभ्योऽपि स्वजातावेव धवखदिरत्वमिति जातिसमुदाये अत्वमित्यादावपि विविधव्यक्त्युदीरितानेकाकारं व्यक्तिसमवेते अत्वसामान्ये। गोभावो गोता गोत्वमिति। वाहीकस्य भावो वाहीकत्वमिति वाहीकगतेषु जात्यादिषु गुणेषु देवदत्तादिभ्यः कौमाराद्यवस्थाभेदभिन्नद्रव्यसमवायिनि सामान्ये चन्द्राकाशाभावादिशब्देभ्योऽपि अवस्थाभेदात् प्रदेशभेदात् सम्बन्धिभेदाच्च यो भेदः [2]तत्समवायिनि सामान्ये युगपदित्यस्य भावो यौगपद्यम्। नानेत्यस्य भावो नानात्वमिति। एककालतायां पृथग्भावे च। एवमन्यत्रापि विशेषसमवायिनि सामान्ये भावप्रत्ययः तदर्थमत्र राद्धान्ताः सर्वेऽमी शब्दाः स्वाभिधेये वाचकत्वेन प्रवर्तमानास्सन्तः स्वप्रवृत्ताववश्यं किञ्चिन्निबन्धनमपेक्ष्यन्ते। तदेव च भावप्रत्ययान्तात् [3]प्रतीयते। देवात्स्वार्थ इत्यादि स्वार्थः प्रकृत्यर्थः इति।

यण्च प्रकीर्तितः २।६।१४

कृतेश्चुरादित्वादित्यत एव ज्ञापकादीकारादेशः, क्त-प्रत्ययः, इट्, निष्ठेटीनः यण्च भवतीति चकारात् ता-त्वौ च। ननु तौ पूर्वेणैव सिद्धौ, सत्यम्। किन्त्वयं प्रत्ययोऽभिधानवशात् गुणवचनादन्यतोऽपि ब्राह्मणादेः प्रायेणेष्यते। तत्रानेन यणा तत इष्यमाणेन ता-त्वयोर्बाधो मा भूदिति चकारेण तौ समुच्चयेते। सूत्रार्थानङ्गत्वात् प्रकीर्तित ग्रहणमनर्थकमिति यो मन्यते तं प्रत्याह—प्रकीर्तितग्रहणमित्यादि। कर्मणीति कर्मशब्दोऽत्र क्रियावाची न तु साधनकर्मवचनः ब्राह्मणादिशब्दानां द्रव्यवचनानां साधनकर्मणा सम्बन्धानुपपत्तेः। यथा दर्शनमिति। दर्शनं प्रयोगव्यवस्थालक्षणमनतिक्रम्येत्यर्थः। तथा च पौरुषमिति केवलात् पुरुषशब्दात् अण्प्रत्ययः, न तु समासस्थात्। अपुरुषता अपुरुषत्वमिति। लाघवमित्यादौ उवर्णस्त्वित्यौत्वम्। एवं सुहृत् सौहार्दम्, दुर्हृत् दौर्हार्दम्। सुहृदयदुर्हृदयशब्दयोः मित्रामित्रार्थे सुहृद्दुर्हृदित्येतौ निपात-

१. सन्तृ (भं०)
२. तत्समवायिनि (?)
३. प्रतीयात् (भं०) डानु (वा०)

यन्ति । सुभ्रातृ सौभ्रात्रम्, दुर्भातृ दौर्भ्रात्रम् । श्रौत्रमित्यादयोऽणन्ताः बोद्धव्याः । श्रोत्रियस्याध्येयशब्दो लुप्यते बाहुलकात् । इमन्प्रत्ययो दृश्यत इति । अपि शब्दादणपि । पार्थवं मार्दवं लाघवं गौरवं, पृथुतेत्येवं ता-त्वावपि भवतः । प्रकीर्तितग्रहणात् प्रत्ययान्तरमपि । स्तेनस्य भावः कर्म वा स्तेयम् । न लोपो बाहुलकात् । स्तैन्यमपीष्यते । सख्युः भावः कर्म वा सख्यम् । एवं दूत्यम्, वणिज्याय प्रत्ययः । कपेर्भावः कर्म वा कापेयम्, एयण् । रामर्णायकम् । साहायकम् । अकण-प्रत्ययः । स्वार्थेऽपि क्वचित् । यण् च प्रकीर्तितग्रहणादेव चत्वार एव वर्णाः चातुर्वर्ण्यम् । एवं चातुराश्रम्यम् । चातुरूप्यम् । त्रैलोक्यम । त्रैरूप्यमित्यादौ ।

तदस्यास्तीति मन्त्वाद्यः २।६।१५

आदौ भव आद्य इति यदुगवादित इति योगविभागात् मन्तु-वन्तु-विन्-इन् इत्याद्याः भवन्तीति । प्रयोगवशेन मन्त्वादीनां बहुप्रकारत्वादिति भावः । अवर्णान्तादवर्णोपधादित्यादि । अवर्णग्रहणेन जातिपक्षसमाश्रयणादकाराकारौ गृह्यते किं [1]शिडन्तात्सर्वस्मान्नेत्याह—शिडन्तवर्जितादिति यवादीन्वर्जयित्वेति । यवाः [2]कुसि कुन्सि कुञ्चां द्राक्षा इत्येवमादयः ये यवादयः प्रयोगतो परिदृष्टवन्तु-प्रत्ययाः तान् परिहृत्येत्यर्थः । सुगणवानिति । गण संख्याने चुरादित्वादिन् । अस्य च लोपः । शोभनं गणयति इति क्विप्, कारितलोपः । प्रशान्वानिति । शसेः प्रपूर्वात् प्रशास्तीति क्विप् । पञ्चमोपधेति दीर्घः । मोनो धातोरिति मस्य नत्वम् । आयुष्मानिति मन्तुः, अनव्ययविसृष्टस्त्विति सत्वम्, षत्वम् । [3]स्रग्धीति । चवर्गेति गः, एभ्यो वन्तुरपि दृश्यते इति वानुवृत्तेः । इन्प्रत्ययस्त्वेकस्वरात्कृतो जातौ नेष्यते । स्ववान्, कारकवान्, व्याघ्रवान् । सत्यभिधाने तु क्वचिदिष्यते । [4]कार्यी तण्डुलीति शब्दादित्यादि । अस्येति षष्ठ्यर्थे विधीयमाना मन्त्वादयोऽस्मिन्निति सप्तम्यर्थे न प्राप्नुवन्तीत्यधिकविषयसमुच्चयार्थादिति शब्दाद् भवन्ति । शालयो विद्यन्ते यस्मिन्निति सप्तम्यर्थोऽत्र कोष्ठागारादिः विवक्षितो यत्र षष्ठ्यर्थो न सम्भवति । [5]अथेह कस्मान्न भवति—चित्रा गावो यस्य सः चित्रगुरिति । न भवति, अस्त्यर्थस्य बहुव्रीहिणैवोक्तत्वात् । यद्येवम्, चित्रगोमानिति न सिध्यति ।

१. धात्वन्त्यात्सन्नेष्यत इत्याह (मं०)
२. कुमिकुन्सि (मं०)
३. स्रग्वीति (?)
४. कारी (मं०)
५. अत्र हि (मं०)

अन्यपदार्थेन तद्वत्तायाः प्रतिपादनात् सेत्स्यति । चित्रा गावोऽस्य सन्तीत्यत्र तु न भवति, गोपदस्य विशेषणमपेक्षमाणस्य सतः [1]प्रत्ययार्थेन सहानन्वयात् । इहैते मन्त्वादयः ([2]भूमिनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ।) भूमादिषु भवन्तीति केचिन्मन्यन्ते । भूम्नि बहुत्वे तावत्, गावोऽस्य सन्तीति गोमान् । निन्दायाम् कुष्ठी, प्रशंसायाम् रूपवती कन्या, नित्ययोगे क्षीरिणो वृक्षाः, अतिशये उदरिणी कन्या, संसर्गे दण्डी, संसक्तदण्ड उच्यते । अन्ये त्वाहुः—सत्यपि भूमादिपरिग्रहे विशिष्टमेव बहुत्वमभिधानवशादाश्रयणीयम् । अन्यथा त्रिप्रभृतिष्वपि बहुत्वस्याविवक्षितत्वात् तत्रापि मन्त्वादयो भवेयुः, तद्वरमनाश्रयणमेव भूमादीनां ज्यायः । यत्र त्वेका गौरस्तीत्यादौ नेष्यते । तत्रानभिधानमेव शरणम् । गुणवाचिभ्यो मन्त्वादयो ([3]नेष्यन्त इति । यद्येवम्, रूपवतीकन्या, गन्धवती पृथिवीत्यादौ रूपादिभ्योऽपि गुणेभ्यो मन्त्वादयो) न प्राप्नुवन्तीत्याह—ये गुणाः गुणमात्र इत्यादि । गुणमात्रे वर्तन्ते, स्वात्मन्येवावतिष्ठन्त इत्यर्थः । ननु सर्वस्य गुणस्य स्वात्मन्यवस्थानं न सम्भवति, द्रव्याश्रयत्वात् इति कथं गुणमात्रे ये गुणा वर्तन्त इत्युक्तम्, सत्यम् । शब्दव्यापारापेक्षयैतदुक्तम् । तथाहि केचिद् गुणाश्शब्देन द्रव्यनिष्कृष्टा एव प्रत्यायन्ते न तु द्रव्यस्योपरञ्जनकत्वेन । यथा कन्यायाः रूपमिति । अत्र हि सर्वदा वैयधिकरण्यमेव गुणगुणिनोः न तु सामानाधिकरण्यम् । नहि भवति रूपं कन्येति । अपरे तु गुणाः शुक्लादयः कदाचिद् द्रव्यान्निष्कृष्टाश्शब्दैरुच्यन्ते यथा—पटस्य शुक्लो गुण इति । कदाचिदनिष्कृष्टाः द्रव्यमनुरञ्जयन्ते । यथा पटः शुक्लः इति । तत्र ये गुणाः गुणमात्रेण गुणवति चाभेदोपचाराद् द्रव्ये वर्तन्ते शुक्लादयस्तेभ्यो गुणवाचिभ्यो मन्त्वादयो नेष्यन्त इत्यत्र प्रतिषेधग्रहणेन गृह्यन्ते न तु सर्वदा ये गुणमात्रवृत्तयो द्रव्येण सह वैयधिकरण्यमापन्नाः रूपादयः । तेन तेषां प्रतिषेधे गुणग्रहणेनाग्रहणान्मन्त्वादयो भवन्त्येव । एतच्च वा-शब्दाद् बहुलार्थादवगम्यते, तथा च मन्त्वादिप्रत्ययान्तान्मन्त्वादयः सरूपाः नेष्यन्ते । तेन गोमन्तोऽस्य सन्तीति पुनर्मन्तुर्न भवति । विरूपास्तु भवन्त्येव, दण्डो विद्यन्ते येषां ते दण्डिन , ते विद्यन्ते यस्यां शालायां सा दण्डिमती । इन्नन्तादपि मन्तुः ।

ननु सम्भवे व्यभिचारे च विशेषणविशेष्यभावो युक्तः । यथा—नीलोत्पलयोः । न च तच्छब्दवाच्योऽर्थोऽस्तीत्येतद्विशेषणं व्यभिचरति । यथोक्तम्

---

१. प्रत्ययात् (भं०)
२. न्यूनपाठः वा०)
३. प्रमादादङ्कितम् ।

[1]न पदार्थः सत्तां व्यभिचरतीति। [2]अतो बुद्धिसत्तया एव सर्वशब्दप्रवृत्तौ कारणत्वात्। तदस्यास्तीति एतद्विशेषणमर्थादवाप्यत एवेति किमर्थमस्ति-[3]ग्रहणेन, उच्यते—विशिष्टायां सत्तायां वर्तमानकालावच्छिन्नायां यथा स्यात्। भूतभविष्यसत्तायां मा भूदित्येवमर्थमस्तिग्रहणम्। तेनेह न भवति। गावो स्यासन्, गावोऽस्य भवितार इति गोमानासीत्, गोमान्भवितेति [4]प्रयोग-योस्तु साधुत्वं धातुसम्बन्ध इत्यनेनैव तत्रैव [5]वक्ष्यते। प्रज्ञारजश्शब्दाभ्या-मित्यादि-मन्त्वादय एवामी प्रकृतिविशेषावग्रहेणैवमुच्यन्ते इति मन्तव्यम्। रजोऽस्ति यस्याः सा रजस्वलेति। रजोऽस्मिन्पथि विद्यत इत्यत्र न भवत्य-नभिधानात्। तपस्सहस्राभ्यामिति प्रदर्शनमात्रमेतत्। अन्यतोऽपि यथाभि-धानमणो दर्शनात्। तथा च ज्यौत्स्नास्मिन्निति ज्यौत्स्नः पक्षः। एवं तामिस्रः। वक्तव्य विषय इति। प्रज्ञारजश्शब्दाभ्यामित्यादिना कथिते यथा-प्राप्तग्रहणेनावर्णान्तादवर्णोपधादित्यादिविशेषपरिहारेण मन्त्वादय एष्टव्य इति दर्शयति। तेन प्रज्ञावान् तपस्वी सहस्रीत्याद्यपि भवति। सुखादिभ्य-स्त्विन्नेव दृश्यते इति। तेन सुखवानित्यादिः न भवति। जातावर्थ—इति विशिष्टायां जातावित्यर्थः। पद्मकमल-इत्यादि प्रदर्शनमात्रमेव। उत्पलिनी, विसनी, मृणालिनीत्यादेरपि दर्शनात्। देशविशेषवाच्य इति समुदायेन विशिष्ट-देशाभिधाने सतीत्यर्थः। याञ्चावाचिनोऽर्थशब्दादिति। अर्थनमर्थः इत्यर्थ-यतेश्चुरादीन्नन्तादलि सति योऽस्त्यर्थशब्दः क्रियापदार्थकः तस्मादिन्प्रत्ययो भवतीत्यर्थः। अर्थीति। याञ्चावानित्यर्थः। अर्थवानिति द्रव्यवाचिनोऽयम-त्रार्थशब्दः, न तु याञ्चा वचन इति। वन्तुप्रत्यय एवास्माद् भवति। एव-मादयोऽन्येऽपि प्रत्ययाः इत्यादि। तेन प्राण्यङ्गवाचिनो तदन्ताल्ल-प्रत्ययः। चूडालः, अन्यतोऽपि चुडुलः। मांसलः, यूकालः, मक्षिकालः, सूर्कालः, वत्सलः, अंसलः, फेनलः, इल्-प्रत्ययोऽपि अमुतः फेनिलः। लोमानि सन्त्यस्य लोमशः, ऊषोस्मिन्नस्ति ऊषरं क्षेत्रम्। कृषीरस्यास्तीति कृषिवलः। बाहुलकाद् दीर्घः। ऊर्जा अस्यास्तीत्यूर्जस्वी, ऊर्जस्वलः। अमागमः पूर्ववत्। फलमस्यास्तीति फलिनः, वर्हिणः। यथादर्शनम् अर्थान्तरेऽपि मन्त्वादयः। हिमं न सहते हिमिलः, वलं न सहते [6]बलूलः। एवं वातूलः। वातसमूहोऽपि वातूलः। ऊर्णा

१. न्यूनपाठः (मं०)
२. यथा (मं०)
३. ग्रहणम् (वा०)
४. प्रत्ययोस्तु (वा०)
५. वक्ष्यति (मं०)
६. वलूरः (मं०)

यस्यास्तीत्यूर्णायुः । स्वमस्यास्तीति स्वामी, स्वशब्दादामिन् प्रत्ययः । वातो स्यास्तीति वातकी, अतिसारकी, पिशाचकी, किन् प्रत्ययः । एवम् अहंयुः शुभंयुः । अहं शब्दोऽत्राहङ्कारवृत्तिः । शुभंशब्दोऽत्र शुभार्थे वर्तते ।

संख्यायाः पूरणे डमौ २।६।१६

एकादश संख्या येन पूर्यते सः एकादश इति । कुतः, उच्यते—संख्याया इतीयं पूरणशब्दापेक्षया कर्मणि षष्ठी तेन संख्यायाः पूरणे डमौ प्रत्ययौ भवतः । अर्थात् संख्याया एवेत्यस्यार्थस्य घटनात् दशस्ववस्थितेषु [1]येनोपजाते-नैकादश संख्या सम्पद्यते । स एवैकादशशब्दव्यपदेश्यो भवति । तेन पञ्चा-नामुष्ट्रिकाणां पूरणो घटः इत्यत्र म-प्रत्ययो न भवति । ह्युष्ट्रिकाणां द्रव्यान्त-रेण यदतिरिक्तीकरणं तत्पञ्चत्वसंख्यायाः पूरणं भवति । नह्यत्र घट उप-जाते सति पञ्चत्वसंख्या सम्पद्यते । किं तर्हि, अवाप्तपञ्चत्वसंख्यानामुष्ट्रि-काणां द्रव्यान्तरेणातिरिक्तता क्रियते । नान्तायास्संख्याया इत्यादि । बाहु-लकादेष विषयविभागः । शेषाया इति । या संख्यादिः तस्याः ।

द्वेस्तीयः २।६।१७

द्विशब्दादित्येतेन शब्दमात्रविवक्षा तात्पर्यात् सर्वनामकार्यं त्यदाद्यत्वं द्विशब्दस्य न कृतमिति दर्शयति । एवमुत्तरत्राप्येवं प्रकारेषु निर्देशेषु त्यदाद्य-त्वाभावो मन्तव्यः, ज्ञापकात्सिद्धावपि योगाविभागारम्भो ड-प्रत्ययबाधनार्थः ।

त्रेस्तृ च २।६।१८

त्रेरिति शब्दमात्रविवक्षायामेकत्वनिर्देशः, त्रेश्च तृ-आदेशः इति न तु प्रत्ययः । प्रत्ययत्वविज्ञाने सति पूरणार्थाप्रतीतेरिति भावः ।

अन्तस्थो डेर्वाः २।६।१९

र च षश्चेति विग्रहः । षकारो विधीयमानः रेफषकारान्तसंख्याविधि-भाक् । अन्त इति षकारस्य विशेषणम्, ड इति निमित्तं संख्याया इत्येवेति । सा च रेफषकाराभ्यां प्रत्येकमभिसम्बध्यते । तदाह—रेफान्तायाः षकारा-न्तायाश्च संख्याया इति । थकारागमो भवतीति, कथं पुनः आगमशब्दं विना थकारागमत्वं शक्यमवगन्तुमित्याह—अन्तशब्द इत्यादि । अन्तशब्द-स्यात्र विशिष्टदेशावयववाचित्वेन प्रसिद्धत्वादिति भावः । चतुर्थः षष्ठ इति रेफषकारयोरत्र विसर्गरुत्वे न भवतः लिङ्गस्य रेफषकारान्तत्वात् कृते

---

१. येनापजायत एकादश (मं०)

थकारागमेऽन्त्यस्वरादिलोपेनाकार लोप इति थकारागमस्य सस्वरत्वात् । तथा च कतिपयथ इत्यादि सिद्धं भवति । अथ थकारागमात् पूर्वमन्त्यस्वरादिलोपो लोपविधेर्बलवत्त्वात्कस्मान्न भवति इत्याह—प्राक्तु थकारागमादित्यादि । रेफषकारयोरभावात् योगारम्भस्य वैफल्यं स्यादित्यर्थः । तत्र चागमादेशपरिभाषाप्रवृत्तिलक्षणे सत्यपि परिहारे प्रत्यासन्नतया योगारम्भवैफल्यलक्षणः परिहारः उक्तः । न च क्रियतामन्त्यस्वरादिलोपो योगारम्भसामर्थ्यात् । भूतपूर्वौ रेफषकारावाश्रित्य थकारागमो विज्ञास्यत इति शक्यते वक्तुम् । नानिष्टार्थशास्त्रप्रकल्पितिरिति वचनात् । षष्ठी चतुर्थीति ज्ञापकं स्त्रीत्वविषय एव षष्ठ्यादिशब्दसाधुत्वं गमयेन्न तु विषयान्तरज्ञापकेन सिद्धावसत्यां योगारम्भः ।

कतिपयात् कृतेः २।६।२०

द्वे पञ्चम्यौ वैचित्र्यात् ।

विंशत्यादेस्तमट् २।६।२१

एकेनाधिका विंशतिरेकविंशतिरिति लोप्या इत्यर्ह-प्रत्ययनिर्देशादधिकशब्दस्य लोपः । ड-प्रत्ययो भवतीति संख्यायाः पूरण इत्यनेन ।

नित्यं शतादेः २।६।२२

ननु यश्शतादिस्सः षष्ठ्यादिरिति षष्ठ्याद्यतत्परादित्यनेनैव शतादेरपि [1]उपसिद्ध इति नार्थोऽनेन योगेनेति पूर्वपक्षयति । नन्वित्यादिना मासार्धमासेत्यादि एतच्च पूर्वत्र वा इति कर्तव्ये योगारम्भसामर्थ्याच्चेह नित्यविधिविज्ञाने सिद्धे सति यन्नित्यग्रहणमधिकं ततो लभ्यते ।

षष्ठ्याद्यतत्परात् २।६।२३

षष्ठ्यादेः संख्याशब्दात् इति नवत्यन्तात् । एकषष्ठितम इत्येकेनाधिका षष्ठिरिति विग्रहः ।

विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परस्तु ये ।
अद्वयादेस्सर्वनाम्ना किं बहोश्च पराः स्मृताः ॥ २।६।२४

अत इत्येतदस्तेषु त्वेतदकारतामिति । अत्वं परमिति वचिक्रियाविशेषणत्वाद् द्वितीयान्तम् । विभक्तिरिति संज्ञा येषामिति विभक्तिरित्येषशब्दः संज्ञा येषामित्यर्थः । किं बहोरिति समाहारे द्वन्द्व इति । यद्येवम्, द्वन्द्वैकत्वमिति

१. तमट्-सिद्धः (?)

नपुंसकत्वान्नामिन इति नुरागमस्स्यात्, न भविष्यति। अनित्यमागमशासनमिति वचनात् ये तसादयः प्रत्ययाः वक्ष्यन्त इति प्राक्तसादिसंकीर्तनात् किं वहोश्च परा भवन्तीति। ननु किं-शब्दस्य सर्वनामत्वादेव सिद्धमिति किं तस्य पृथगुपादानेनेत्याह —अद्व्यादेरिति प्रतिषेधः प्राप्तः इत्यादि। त्यादीनां यत्परं तच्छिष्यत इति पूर्वाचार्यवचनेन भवांश्च कश्च काविति किमः शेषो यथा स्यात्। भवच्छब्दस्य तवच्छब्दस्य मा भूदिति द्व्यादिकत्वं किमोऽवश्यमभ्युपगन्तव्यम्। एवं च द्व्यादिलक्षणं प्रतिषेधं प्राप्तं बाधितुं सर्वनामापि किंशब्दः पृथगुपादीयते। सत्यां विभक्तिसंज्ञायां त्यदाद्यत्वमिति तद्विभक्तौ कार्यं त्यदादीनामविभक्ताविति वचनात्। कुतः। कुत इति तहो कुरिति कुरादेशः। इह संख्याग्रहणानुवृत्त्या बहुशब्दः संख्यावचनो गृह्यते। न वैपुल्यवचनः। तेनेह त्रतसौ न भवतः। वहोः सूपेः, वहोस्सूपादिति। द्वाभ्यां द्वयोरिति त्यदाद्यत्वम्। अकारो दीर्घमिति दीर्घः। सर्वनामकार्यं एवेत्यादि सर्वनाम्नः परे तसादयः क्रियमाणाः सन्निधानात् कार्यं एव कर्तव्ये विभक्तिसंज्ञां लभन्ते, न लिङ्गकार्येऽपि। तेन किं सिद्धं भवति इत्याह—तेनेत्यादि। तस्मिन्काले, कस्मिन्काले इति विगृह्यते तदो दा दानीमाविति दा-प्रत्ययः, किम अपि। किं सर्वेत्यादिना। अत्राकारो दीर्घमिति दीर्घो न भवति, दा-प्रत्ययस्याविभक्तिकत्वात्। अविभक्तित्वं तु दीर्घस्य लिङ्गकार्यत्वात्। यत्तु सर्वनामकार्यं मत्वा कादेशलक्षणं तद्भवत्येव।

तत्रेदमिः २।६।२५

इदमिति लुप्तषष्ठीकम्। क्वचित्पूर्वपराविति सर्वस्येत्यन्त्यादेशशङ्कां निरस्यति।

रथोरेतत् २।६।२६

एतदिति लुप्तप्रथमाद्विर्वचनम्। रेफादौ वकारादौ चेति यस्मिन्विधिस्तदादाविति वचनात् तदादित्वं लभ्यते।

तेषु त्वेतदकारताम् २।६।२७

तु-शब्दस्थाः प्रत्यये निषेधद्योतनार्थः। तेनेह न भवति। एतेन प्रकारेण च तथा तेष्विति द्वितकारपाठे तु प्रमाणं नास्ति, येन तकारादिषु तेषु विभक्तिसंज्ञकेषु अकारादेश इति व्याख्या युक्तिमती स्यात्।

पञ्चम्यास्तस् २।६।२८

तसोः विसर्गाभावः स्वरूपभङ्गभयात्। अद्व्यादेः सर्वनाम्न इत्यादि-

प्रकृतिनिर्देश उक्तोऽप्यबुधबोधनाय स्मर्यते । तस्प्रत्ययो भवतीत्येतेन तसादयोऽमीप्रत्ययाः न तु विभक्त्यादेशः इति दर्शयति । कथं पुनरेतदवगम्यते, तसादीनां विभक्तिसंज्ञारम्भात् । विभक्त्यादेशत्वे हि तेषां विज्ञायमाने सति स्थानिवद्भावेनैव त्यदाद्यत्वादिकार्ये संसिद्धे विभक्तिविधानं सफलं स्यात् । एवमस्त्विति चेत् तर्हि कुतः, कुत्र तेषु तत्रेत्यादौ यथाक्रममोत्वमेत्वं च प्रसज्येते, ततः प्रत्ययत्वमेव तसादीनां ज्यायः, अमुतः इति अदसः पदे मः, उत्वं मात् । युष्मदस्मद्भ्यां तस्वक्तव्यः इति द्व्यादित्वान्न सिध्यतीति नञा निर्दिष्टपरिभाषया वाच्य इत्यर्थः । अत्पञ्चम्यद्वित्व इति ङसिभ्यामोरदादेशं कृत्वा त्वत् मत् युष्मत् अस्मदिति विगृहीतवान् । त्वत्तः मत्त इति त्वन्मदोरेकत्व इति त्वन्मदी । असर्वनाम्नोऽपीत्यादि । अत्र च प्रयोगतश्चेति निर्देशो हेतुः । ओहाङ्-रुहीत्येतयोरिति । ओहाङ् त्यागे, रुहबीजजन्मनि इत्यनयोः प्रयोगे तु न भवति, अनभिधानादिति भावः । ([1]सार्थाद्धीयते इति सार्थस्यापादानस्यापि) सतो [2]दैवतं त्यजतः । कर्तृत्वमस्तीति कर्त्रपेक्षया देवदत्ते कर्मणि जहातेरात्मनेपदम् । यण् । दामा गायतीत्वम् । मन्त्रो हीनः स्वरतो वर्णतो वेत्यत्र तु तस्प्रत्ययो बाहुलकात् । स्वरादिशब्दात्तृतीयान्तान्मन्तव्यः । हीन इति च जहातेरिहापगमनार्थत्वात् गत्यर्थलक्षणो गत्यर्थाकर्मकेति क्तः । यस्मादन्यस्मादित्यादि । एतेनाद्व्यादेराकृतिगणत्वं बोधयति । सर्वार्थ इत्यादि । तेन परिषिञ्चति, अभियातीत्यादौ न भवति ।

किमः कुहेति [3]२।६।३९

कुहेति तहोः कुरिति कुभावः । छन्दसीति वेदविषये, तेन भाषायां कुहेति प्रयोगाभावः ।

अत्क्व च [4]२।६।३०

अत्प्रत्ययो भवतीति त्रप्रत्ययापवादः पक्षे सोऽपि भवति बाहुलकात् ।

काले किं सर्वयदेकान्येभ्यः एव दा [5]२।६।३१

कदेति किं कः, एवकारो वैचित्र्यार्थ इति निपातानामनेकार्थत्वाद्विशेषा-

---

१. सामर्थ्याद्धीयत इति सामर्थ्यापादानस्यापि (मं०)
२. देवदत्तं (मं०)
३. २।६।३१ (दु० वृ०)
४. २।६।३२ (दु० वृ०)
५. २।६।३४ (दु० वृ०)

न्तरसमुच्चयलक्षणेन विचित्रेणार्थेन सार्थक इत्यर्थः। तदेव विशेषान्तरमाह— सर्वशब्दस्येत्यादि।

इदमो र्हुधुनादादानीमौ [1]२।६।३२

सर्वनाम्नो यथा दर्शनमित्यादि दर्शनं प्रयोगानुभवतः, तमनतिक्रम्य इत्यर्थः। तेनाद्यतन एव कालविशेषे हि प्रत्ययो न कालसामान्ये।

सद्य आद्या निपात्यन्ते [2]२।६।३३

निपात्यन्त इति द्वे पदे, पतेरिन्नन्तस्य कर्मणि यणि कारितलोपः, साधुत्वेन कथ्यन्त इति लक्षणेनासङ्ग्रहात्। समानशब्दस्य द्यस्प्रत्ययो निपात्यत इति कालविशेषे यत्र निमित्तनिमित्तिनोः नैरन्तर्ये प्रतिपादयिषितं तत्र यथा सद्यः शूलहरमौषधमित्यस्मिन्नहनीति वाक्यमिति। अहः शब्दोऽत्राहोरात्रवृत्तिः। यथा त्र्यहमुपोष्य भुङ्क्त इति।

पुरस्तादादयश्च २।६।३४

पूर्व-अवर इत्येतेभ्य इत्यादि यथासंख्यसम्बन्धोऽत्र न भवत्यनित्यत्वाद्यथासंख्यपरिभाषायाः। अनित्यत्वं चास्य स्वपिवचीत्यादौ वक्ष्यति। दिगादिवृत्तित्वं सप्तम्यादि[3]विभक्त्यन्तं चात्र निपातनाल्लभ्यते। सर्वमन्यत्पूर्ववदिति दिगादिवृत्तित्वं सप्तम्यादिविभक्त्यन्तसम्बन्धः पुराद्यादेशविधानं चेत्यर्थः। एवमूर्ध्वायाः दिश आगतः, उपर्यागतः, उपरिष्टादागत इत्यादि मन्तव्यम्। उत्तराधरदक्षिणशब्देभ्य एव प्रत्ययो निपात्यत इति सप्तम्यन्तेभ्यः पञ्चम्यन्तेभ्यः प्रथमान्तेभ्यश्च निपातसामर्थ्यात्। एवमुत्तरस्यां दिशि, उत्तरात्, उत्तरस्याः दिशि उत्तरात्, ([4]उत्तरादिक् उत्तरात्) अधरात्, दक्षिणात्। आत्प्रत्ययः। अपरस्यां दिशि पश्चात्। अपरशब्दस्य पश्चादेशः। आच्च प्रत्ययः। दक्षिणस्यां दिशि दक्षिणतः, उत्तरतः। अतस्प्रत्ययः। एवं परतः, अवरतः, पुरस्तात्, अवरस्तादित्यादयः। योगश्चायं पृथक्पठ्यमानो [5]न पुराण इव दृश्यते।

---

१. २।६।३६ (दु० वृ०)
२. २।६।३७ (दु० वृ०)
३. वृत्तित्वम् (वा०)
४. न्यूनपाठः (वा०)
५. न्यूनपाठः (मं०)

प्रकार वचने तु धा [1]२।६।३५

प्रकारस्य वचन इति सामान्यस्य मनुष्यत्वादेरवच्छेदको विशेषोऽध्ययनादिप्रकार उच्यते, तस्याभिधान इत्यर्थः। वचनग्रहणं तु सप्तम्यादिविशेषपरिहारेण प्रकारमात्रोक्तौ यथा स्यादित्येवमर्थम्। तेनेह सप्तम्या काल इति वचनापेक्ष्यते। संख्याया धा प्रत्ययो वक्तव्य इति तु शब्दात्।

आख्याताच्च तमादयः [2]२।६।३६

आख्याताच्चेत्यन्तान्नीतलिङ्गलक्षणप्रकृतिको निर्देश इति प्रथमं लिङ्गस्यावधित्वं प्रदर्शयन्नाह—लिङ्गादिति। आख्याताच्चेति। आख्यातशब्देन त्यादय उच्यन्ते। पटिष्ठ इत्यादि। इवर्णावर्णाविति व्युत्क्रमपाठात् पटुलघुशब्दयोरुकारलोपः। अतिशयेऽर्थ इति लिङ्गस्यैतद्विशेषणम्। तच्च वा शब्दस्य बहुलार्थस्यार्थविशेषावस्थापकत्वाल्लभ्यते। प्रकृतिविशेषावग्रहोऽप्यत एव हेतोः। तथा चाह—इष्ठेयस्सौ त्विष्यादि प्रशस्य-अन्तिक-अल्प-इत्येतेभ्यश्चेति। अगुणवाचित्वादेषां पृथगुपादानम्। च शब्दादन्येभ्योऽपि यथादर्शनमिति तेन विन्नन्तवन्त्वन्ताभ्यां वृद्धवाढ्ययुवन्नित्येतेभ्योऽपि भवतः। श्रेष्ठ इत्यादि। इवर्णावर्णावित्यकारलोपः। एकस्वरस्य नेष्यते। ज्येष्ठो ज्यायानिति रूपे वृद्धशब्दस्य मन्तव्ये तस्य तु ज्याभावो वृद्धस्य चेति लोकोपचारात्। अयमेषां बाढमधीते, साधिष्ठमधीते, अयमनयोः साधीयोऽधीते। अन्तिकबाढयोरित्यादिना बाढशब्दस्य साधादेशः। अयमेषामतिशयेन युवा। कनिष्ठोऽयमनयोः कनीयान्। युवाल्पयोरित्यादिना युवशब्दस्य कन्-आदेशः। स च वातेन यविष्ठः, यवीयान्। बाहुलकाद्वनो लोपः, उकारस्योत्वम्। अयमेषां स्रग्वी, स्रजिष्ठः। अयमनयोः स्रजीयान्। अयमेषां त्वग्वान्, त्वचिष्ठः। अयमनयोः त्वचीयान्। विनो वन्तोश्च लोपो बाहुलकात्। निमित्ताभाव परिभाषया गत्वनिवृत्तिः खल्वपीति। खलु-शब्दः इदानीमर्थेऽपि समुच्चये। तरां तमामित्येतौ भवत इति क्रियागुणप्रकर्षवृत्तित्वाभिधानवशात् कितमामित्यादि, संशयरूपस्यात्मगुणस्य ज्ञानस्यात्र प्रकर्षः। पूर्वाल्लेतरामित्यादि। शक्तिरूपोऽत्र गुणो विभक्त्यर्थः प्रकृष्यते। उच्चैस्तमामित्यादि। इदमेषामनयोर्वा अतिशयेनोच्चैरित्यधिकरणशक्तेः प्रकर्षः। द्रव्यप्रकर्षे तु न स्मर्यते उच्चैस्तमः, उच्चैस्तरः। क्रियागुणविषयः प्रकर्षो यदा द्रव्य उपचर्यते तदा द्रव्यस्यापि प्रकर्षो भवत्येव। यथा जातेः प्रसिद्धावाह —दोहादिनिमित्तकः। गोतर गोत-

---

१. २।६।३८ (दु० वृ०)
२. २।६।४० (दु० वृ०)

मेति । ईषदसमाप्तौ सत्यामित्यादि प्रकृत्यर्थविशेषणमेतत् । लिङ्गादिति । आख्यातादपीति मन्तव्यम् । ईषदसमाप्तः । पटुरिति । स्तोकेनासम्पूर्णमस्य पाटवमित्यर्थः । प्रशंसायामर्थे रूप इष्यत इति । लिङ्गादाख्याताच्च प्रशस्तं पचति पचतिरूपम्, एवं पचतोरूपम्, पचन्तिरूपम् । ननु रूपप्रत्ययोऽयं प्रशंसाविशिष्टे प्रकृत्यर्थे विधीयमानत्वात् स्वार्थिकः । स्वार्थिकश्च प्रत्ययः प्रायेण प्रकृत्यर्थगतां संख्यामुपाददत इति प्रकृत्यर्थस्य द्वित्वबहुत्वयोगात् रूपप्रत्ययान्तादपि द्विर्वचनबहुवचने प्राप्नुतः, ते कस्मान्न भवतः । उच्यते—एकत्वं संख्यावच्छिन्ना क्रियैवाख्याते प्रधानमिति तत्प्राधान्याद्रूपप्रत्ययान्तस्य कुतो द्वित्वबहुत्वाभ्यां योगः । यद्येवम्, पचतः पचन्तीति [1]प्रकृतिभावे द्विर्वचनबहुवचने [2]न स्याताम् । पचिक्रियाकर्तृभेदात् तदपेक्ष्यते । भविष्यतः । रूपप्रत्ययान्तादपि तथैव स्यातामिति चेत्, न । आख्यातप्रत्ययेनैव कर्तृभेदस्य उक्तत्वात् तेन भविष्यतः । एकत्वस्याप्युपयुक्तत्वादेकवचनमपि ततो न स्यादिति चेत्, न केवला प्रकृतिस्तु प्रयोक्तव्येत्यतस्समयात्तद् भविष्यति । द्विवचनबहुवचनेऽपि प्राप्नुयातामिति चेत्, न, प्राथम्यादेकवचनप्रवृत्त्यैव केवलं प्रकृतिप्रयोगनिवारणात् । यदि तर्हि क्रियाप्रधानमाख्यातम् । एवं सति क्रियायाः अलिङ्गत्वाद्रूपप्रत्ययान्तस्य कुतो नपुंसकत्वं स्यात् । स नपुंसकलिङ्गस्स्यादिति, अत्र लिङ्गग्रहणाद् भविष्यति । भूतपूर्वेऽर्थे इति । भूतः पूर्वं भूतपूर्वः । असहार्थवाचिन एकशब्दादिति । न तु संख्याद्यर्थवाचिनः । केशैः प्राख्यात इति । प्राख्यातः प्रसिद्धः । [3]कुत्सायां पाशप्रत्यय इष्यत इति । स चेष्यमाणः प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तकुत्सायामेव नान्यत्र । चेन चौरे तार्किके सम्यग्ग्रन्थस्य वेत्तरि प्रत्ययो न भवति । तारकादिभ्यः इत-प्रत्यय इष्यत इति तारकादिषु मध्ये बुभुक्षापिपासाशब्दौ पठ्येते तयोः किमर्थः पाठो यावता निष्ठायामिति कृते यथेष्टं सिध्यत्येव, सत्यम् । [4]सिध्यतीति प्रवर्तमाने तु प्रयोगासिद्धौ युक्तोऽनयोः पाठः । गर्भ-शब्दोऽत्र पठ्यते । तस्मादप्राणिन्येव प्रत्ययः । गर्भिताश्शालयः, प्राणिनि तु गर्भिणी गौः । प्रमाणेऽर्थ इति, यल्लिङ्गं वर्तते तत इति शेषः । प्रमाणशब्दाच्च ये प्रसिद्धाः तेभ्यः प्रत्ययो न भवत्यनभिधानात् । दिष्टिः प्रमाणमस्येति दिष्टिः, वितस्तिः । अण्प्रत्ययश्चेष्यत इति च-शब्दाद् दा-धादयोऽपि त्रयः, द्विगोस्तु न भवत्यनभिधानात् । द्विपुरुषमुदकं द्विहस्त्युदकम् । इकारादेशश्चेति । इदमः ([5]कियानित्यत्रानुबन्धे-

१. प्रकृतिभागे (वा०+भं०)
२. न्यूनपाठः (भं०)
३. निन्दायाम् (भं०)
४. सिध्यत्यतीते (भं०)
५. कियानितीडनुबन्धेऽन्त्यस्वरादेर्लोपः (भं०)

न्त्यस्वरादिलोपः) चतुष्टयमिति । चत्वारः, इत्यस्य विसर्गः । ते थे वा समः षत्वम्, द्वित्रिभ्यामिति अवयववृत्तिभ्याम् । उभशब्दादिति । अवयववृत्तेः संख्या प्रश्नेऽर्थे किं शब्दादिति संख्याविषयो यः प्रश्नः तत्रार्थे यः किंशब्दः, ततः इत्यर्थः । बह्वल्पार्थाच्चेति कारकाभिधायिन एवाभिधानवशात् । तथा च बहूनां स्वामी, अल्पानां स्वामीति । अकारकान्न भवति । अल्पशो ददाति । सुतजन्मादावित्यादावपि यत्र मङ्गलं न गम्यते तत्र न भवति । संख्याया एकवचनान्ताच्चेति । कारकाभिधायिन एव, तेन द्वयोर्द्वयोस्स्वामीत्यादौ न भवति । घटं घटं ददातीत्यादौ घटादेर्जातिशब्दान्न भवत्यनभिधानात् । अभूततद्भाव इति कारणस्य विकाररूपेणाभूतस्य विकारात्मना भावोऽभूततद्भावः । तेन कारणस्याविवक्षायां न भवति । शुक्लं [1]करोतीति कारणाद्विकारस्याभेदविवक्षायामपि नेष्यते । मृदो घटं [2]करोतीति । अदेवगृहो देवगृहो सम्पद्यत इत्यत्र पूर्ववन्न भवति । अदस् मनस् चक्षुस् चेतस् राजस् इत्येतेषां च्विप्रत्यय-[3]सम्प्रयोगेन सलोपः बाहुलकात् । ([4]अनरुः अरुः करोति अरूकरोति) एवमुन्मनीकरोति, तच्चक्षूकरोति, विचेतीकरोति, विरहीकरोति, विरजीकरोति । [5]एवमरुभवतीत्याद्यप्युदाहार्यम् । बाहुलकाद् दीर्घमीत्वं च । कात्स्न्यें गम्यमान इति । कृत्स्नमशेषमुच्यते । तस्य भावः कात्स्न्यम् । तत्र सात्प्रत्यय इष्यते, [6]सः च वातेन च्विरपि भवति, अभूततद्भावेऽर्थे कृभ्वस्तीनां प्रयोग [7]इत्यत्रापेक्ष्यते । तदधीन इति । तदायत्ते तत्स्वामिक इत्यर्थः । कृभ्वस्तिप्रयोग इत्यत्रापि सम्बध्यते । अन्येऽपि बोद्धव्या इति । तेनासन्नारूढार्थवृत्तिभ्यामुपाधिभ्यां त्यकन्प्रत्ययः बाहुलकात् । बाहुलकाच्च नियतविषयमासन्नारूढं गृह्यते । तेन [8]पर्वतस्यासन्नमुपत्यकात्यं तस्यैवारूढमधित्यका, के प्रत्यय इतीत्वं न भवति तद्विधौ वानुवृत्तेः । एवं पन्थानं गच्छति पथिकः, व्यञ्जने चैषा निरिति न लोपः । पन्थानं नित्यं गच्छतीत्यत्र तु विग्रहे अण्-प्रत्ययः पान्थः । अध्वानमलंगच्छति [9]अध्वन्यः अध्वनीनः । अमेहक्वकुतस्ततस्तत्रात्रेभ्यः त्य-प्रत्ययः ।

---

१. कारतीति (वा०)
२. कारतीति (वा०)
३. सन्नियोगेन (भं०)
४. अनन: अन: करोति अरूकरोति (वा०)
५. एवमरू (भं०)
६. स इत्यस्य स्थाने न इति पाठः (भं०)
७. अन्यत्रापीष्यते (भं०)
८. त्य इत्यनर्थकं प्रतिभाति ।
९. अध्वनीः (भं०)

[1]अमाभावः अमात्यः। अमा-शब्दः समीपवचनः। एवमिह भव इहत्यः, क्वत्यः, कुतस्त्यः, ततस्त्यः, तत्रत्यः, अत्रत्यः। दक्षिणापश्चात्पुरस्-इत्येतेभ्यः त्यण्। दक्षिणाशब्दः पुरस्तादादयश्च त्यप्रत्ययान्तो अव्ययसंज्ञः। तत्र भवः दाक्षिणात्यः, एवं पाश्चात्यः, पौरस्त्यः इत्यादयः।

समासान्तगतानां वा राजादीनामदन्तता [2]२।६।३७

राजादीनां शब्दानामिति। आदिशब्दः प्रकारे। तेन ये शब्दाः समासान्तभाजः ते राजादयः। अदन्तता भवतीत्यस्यार्थं विवृण्वन्नाह—अकारः प्रत्ययोऽन्तो वा भवतीत्यर्थ इति, अन्तशब्दोऽयमवयववचनः। यथा वस्त्रान्तो वसनान्त इति। तेनायमकारप्रत्ययः समासावयवभूतानां राजादीनामवयवो विज्ञायते। समासादुत्तरकालमकारस्य भवतोऽपि तदवयवत्वमन्तग्रहणसामर्थ्यात्। तेन शरदः समीपमुपशरदम्। आत्मन्यधि अध्यात्ममित्यादौ कृतेऽपि समासान्तेऽव्ययीभावादकारान्तादित्यम्भावस्सिद्धो [3]भवति। इह च द्वे धुरौ [4]समाहृते द्विधुरीत्यादौ कृतेऽपि समासान्ते द्विगोरिति [5]स्त्रीप्रत्ययः सिद्धः। महाराज इति। अकारो महतः कार्य इत्यात्वम्। परमाह इति अह्नो नस्य तु क्वचिदिति न लोपः। पुंल्लिङ्गता च वक्तव्येति। रात्राह्नाहाः पुंसीति लोकोपचाराद्वाच्य इत्यर्थः। तत्पुरुष एवाकारं स्मरन्तीति महाराज परमाहयोरपि तत्पुरुषावुभाविति तत्पुरुषसंज्ञास्त्येव। तेनेह न भवति। इति वा शब्दस्य व्यवस्थितं विज्ञानात्। तथा च मद्राणां राज्ञी मद्रराज्ञीत्यादावपि न भवति, लिङ्गग्रहणपरिभाषातो ह्यत्रापि प्राप्नोति। गोशब्दादपि तत्पुरुष एवेत्यकारं स्मरन्तीति सर्वत्रानुसज्यते। पंचगवमिति संख्यापूर्वत्वात् द्विगुरयं न तत्पुरुष इति मन्वानं प्रत्याह—तत्पुरुषावुभावित्यादि। यद्येवम्, पञ्चभिर्गोभिः क्रीतः पञ्चगुरित्यत्रापि समासान्तः प्राप्नोति। सत्यम्, वा शब्दात्तु न भविष्यति। संख्याव्ययादेरङ्गुलिशब्दस्येति तत्पुरुष एवेति सम्बध्यते। तथा च पञ्चाङ्गुलिरनङ्गुलिरित्यत्र बहुव्रीहौ न भवति। अहस्सर्वाभ्यां च रात्रेरिति च शब्दात्पूर्वरात्रः, अपररात्रः, पुण्यरात्र इति। संख्याव्ययाभ्यामिति द्वे रात्री समाहृते द्विरात्रम्, त्रिरात्रम्, अतिक्रान्तो रात्रिमतिरात्रः। भवति नपुंसकयोगः संख्यापूर्वस्य रात्रिशब्दस्येति द्विरात्रमित्यादेर्नपुंसकत्वम्। तेनेह न भवतीति।

---

१. अमाभव (मं०)
१. २।६।४१ (दु० वृ०)
३. अपि (मं०)
४. सहते (मं०)
५. ई (मं०)

इतरेतरयोगे कुतः वा शब्दस्य व्यवस्थितविभाषावाचित्वात् । द्वित्रिभ्यामिति शब्दमात्रविवक्षायां द्वित्रिनिर्देशः, तेनेह न भवतीति । अत्रापिपूर्वक एव हेतुः । वाङ्मनस इति । चवर्गादृगिति गत्वम् । पदान्ते धुटामिति प्रथमः तस्य पञ्चमः, औरीम्, उवादेशो वक्तव्य इति । विभक्तिस्वर उच्यमानोऽत्र न प्राप्नोतीति भावः । दाराश्च गवाश्चेति दारगवमिति गोशब्दात् तत्पुरुष एवाकारः समासान्त इत्युक्तम् । तत्कथम् अत्र द्वन्द्वेऽप्यसौ भवतीति [1]मन्वानं प्रत्याह—दारपूर्वादपीत्यादि । अत्र चादन्ततेति भावः प्रत्ययनिर्देशो हेतुः । नक्तं च दिवा च नक्तंदिवमिति । ननु नक्तंदिवाशब्दयोः अव्ययोरावेयपरतन्त्रयोस्सतो[2]न्मितोः युक्तार्थत्वं न सम्भवति, इति कथमत्र समासः । द्वन्द्वविधावपि शब्दाद् भविष्यति । अहनि च दिवा च अहर्दिवमिति । नन्वहर्दिवाशब्दौ पर्यायौ तत्रैकेनैवार्थस्योक्तत्वादपरस्य प्रयोगो न प्राप्नोति । तत् कथमनयोर्द्वन्द्व इति परस्य प्रश्नमाशङ्क्य वीप्सायामयं पूर्ववदपि-शब्दात् द्वन्द्व इत्यभिप्रायेणाह—अहन्यहनीत्यर्थ इति वीप्सायां चोक्तार्थोऽपि-शब्दः प्रयुज्यत एव वीप्साद्योतनार्थत्वात् । पुरुषस्यायुः, पुरुषायुषमिति विग्रहविशेषेण नायं द्वन्द्वविधिरिति दर्शयति । एवं ऋच् पुर् अप् धुर् इत्येतेभ्योऽप्यकारः समासान्तः । अर्धम् ऋचः अर्धर्चः, नान्द्याः पूः नान्दीपुरम् । द्विधागता, सङ्गताः, अन्तर्गता आपोऽत्रेति द्वीपम्, समीपम्, अन्तरीपम्, ईत्वमनोऽकारस्य बाहुलकात्, राज्यस्य धूः, राज्यधुरा, राजधुरा इह त्वक्षस्य धूः अक्षधूः, दृढधूः, अक्ष इत्यत्र न भवति बाहुलकात् । एवमनुगतं लोमान्यस्यानुलोमम्, प्रतिलोमम् । धेनुश्चानड्वांश्च धेन्वनड्वाहौ, ऋक्च साम च ऋक्सामे, ऋग्जयुषम् । जातश्चासौ उक्षः जातोक्षः । एवं महोक्षः, वृद्धोक्षः । गोष्ठे श्वः गोष्ठश्वः । ग्रामस्य तक्षः ग्रामतक्षः । अतिक्रान्तः श्वानमतिश्वः, अस् समासान्तो वक्तव्य इति । अदन्ततेति भावः । प्रत्ययनिर्देशात् अप्रजाः इति अस् समासान्तः, इवर्णावर्णलोपः, दुष्प्रजा इति । अनव्यय विसृष्ट इति तु-शब्दात् सत्वम् । एवममेधा इति । अविद्यमाना मेधास्येति विग्रहः । नञ्दुःसुभ्योऽन्यत्रोऽपि यथाविधानं दृश्यते । तथा च प्रयोगः "श्रोत्रियस्येव ते राजन्मन्दकस्याल्पमेधस" इति । हस्त्यादिवर्जितादुपमानादित्यादि । हस्तिन्, दासी, गणिका, कुसूल इत्येवमादयो ये हस्त्यादयः तद्वर्जितं यदुपमानं ततः परस्य पादशब्दस्य बहुव्रीहावन्तलोप इष्यते, भावप्रत्ययस्य विशेषान्तरसङ्ग्रहार्थत्वात् संख्यासुशब्दाभ्यां च परस्येति । पादशब्दस्येत्यादि सम्बध्यते । एवं ताभ्यां परस्यादन्तशब्दस्य

---

१. इति यो मन्यते तम् (मं०)
२. सतोन्मितोः (वा०)

बहुव्रीहावकार लोपः । वयसि गम्यमाने द्विदन् सुदन् । इह तु विकल्पः, कुड्मलाग्रदन्, शुद्धदन्, शुभ्रदन्, वृषदन्, वराहदन्, अहिदन्, मूषकदन् । पक्षे कुड्मलाग्रदन्त इत्यादयः उदाहार्याः । उपमानात् स्वसुरतिभ्यां चेत्यादि । बहुव्रीहाविति सर्वत्रापेक्ष्यते च-शब्दादुद्गतो गन्धो यस्य स उद्गन्धिः, पूतिगन्धिः । अल्पाख्यायामपि । सूपोऽल्पोऽस्मिन्सूपगन्धि भोजनम्, गन्धवती पृथिवीत्यादौ यो गुणवचनो गन्धशब्दो दृष्टः तस्येह ग्रहणं स्मर्यते । यस्तु गन्धानि विक्रीणीत इति द्रव्यवचनस्तस्य न भवति । शोभनो गन्धो यस्य सः सुगन्ध आपणिकः । नद्य इति नदीसंज्ञकात् क्वचिदृकारान्तादपि क-प्रत्ययो न भवति । जीवभर्तुरिति ज्ञापकात् । तेन पूजाविषये शोभनो भ्राता यस्य सः सुभ्रातेति सिद्धम् । अनद्या अनृकारान्ताच्च विकल्पेनेति क-प्रत्यय इष्यत इत्यपेक्ष्यते । बह्वचो मालाः यस्य सः बहुमालाकः । बहुमाल इति । मालाशब्दस्य स्वरो ह्रस्व इति ह्रस्वः । बहुमालाक इत्यपि भवति । संज्ञापूर्वकस्य विधेरनित्यत्वात् व्यवस्थितविज्ञानाच्च, अनद्या अनृकारान्ताच्च क्वचिन्नित्यमेव । व्यूढमुरो यस्य सः व्यूढोरस्कः । न विद्यते अर्थो यस्य सोऽनर्थकश्शब्दः, प्रियसर्पिष्कः, प्रियलक्ष्मीकः । क्वचिदिति वचनादेकवचनान्तादेव लक्ष्मीशब्दान्नित्यं क-प्रत्ययो न द्विर्वचनबहुवचनान्तात् । तेन ततो विकल्प एव भवति । एवमिन्नन्ताद् बहुव्रीहेः स्त्रियां नित्यम् । बहवो दण्डिनो यस्यां सा बहुदण्डिका शाला । ईयन्स्प्रत्ययान्तात् तु बहुव्रीहेर्न भवति । बहवश्श्रेयांसो यस्य सः बहुश्रेयान्, बह्वचश्श्रेयस्यो यस्य सः बहुश्रेयसी । एवं स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तादपि बहुव्रीहिः । बहुनाडिकायः, बहुतन्त्रीग्रीवा, तन्त्रीशब्दो धमनीवृत्तिः (१स्वाङ्ग इति किम् बहुनाडीकस्तम्भः । बहुतन्त्रीका वीणा । एवमन्येऽपीत्यादि । तेन केवलात् पूर्वपदात् परो यो धर्मशब्दः ततो बहुव्रीहावन् समासान्तः, प्रियधर्मा) इह तु न भवति, परमः स्वो धर्मस्येति । एवं कर्मव्यतिहारे बहुव्रीहाविकारस्समासान्तः । केशाकेशि । अव्ययमेतत्, अकारो महतः कार्य इति कार्यग्रहणात् आत्वम्, एवं जायान्तस्य बहुव्रीहेर्निशब्दः समासान्तः । प्रिया जाया यस्य सः प्रियजानिः । याशब्दस्य लोपो बाहुलकात्, भावप्रत्ययनिर्देशादन्त्यादपि । २शार्ङ्गधन्वा, धनुषोऽन्त्यस्य अन्नादेशः । संज्ञायां तु वा शतधन्वा, शतधनुः । एवमाद्यमन्यदुन्नेयम् । क्वचित् समासान्तो न भवति इति । क्वचिदिति वचनात् तु क्वचिद् भवत्येव । शोभनं मन्थ्यस्य सुमन्थः, सुसक्थः, अतिसक्थः, शोभनमक्ष्यस्य स्वक्षः, अत्यक्षः, सुसखा, अतिसखेति । सख्युश्चेत्यन्नादेशः ।

---

१. न्यूनपाठः (भं०)

२. गाण्डीव (भं०)

क्षेपेऽर्थ इति। क्षेपो निन्दा तत्पूर्वस्येति, किम्शब्दपूर्वस्य। क्षेप इति किम्, कस्य राजा किंराजः, किंसखा। प्रइनेऽत्र किंशब्दः। नञ्तत्पुरुषेऽपीति न भवति। समासान्त इति शेषः। तत्पुरुष इति किम्, अनूचो माणवकः, अघुरं शकटम्। अविद्यमाना ऋचोऽस्येति विग्रहः। अकारस्समासान्तः। पथस्तु नञ्तत्पुरुषे विकल्पः। न पन्थाः अपथम्, अत्रापि अकारस्समासान्तः। अघुट्-स्वरे लोपं व्यञ्जने चैषा निरिति न लोपः। स नपुंसक इति लिङ्गग्रहणान्नपुंसकत्वम्। पक्षे अपन्था, पन्थि मन्थि इत्यात्वम्। पुनर्वा ग्रहणमिहैव विकल्पो नोत्तरत्रेत्यवधारणार्थम्।

डानुबन्धेऽन्त्यस्वरादेर्लोपः [1]२।६।३८

सप्तमी पञ्चम्यन्ते जनेर्ड इत्येतेन व्याप्तेर्न्यायात् प्रकरणान्तरविहितोऽप्यत्रानुबन्धः प्रत्ययो गृह्यत इति दर्शयति। डानुबन्धकरणसामर्थ्यादिति तु हेतोः नोक्तः। श्रवणार्थस्यापि डकारस्य सम्भाव्यमानत्वात्। यथा अमन्ताड् इति उवर्णादावश्यक इति ज्ञापकादत्रानुबन्धेऽपि क्वचिदन्त्यस्वरादिलोपः। तेनावश्यं भव आवश्यकम्। प्रकीर्तितग्रहणादकन्। एवं सायंप्रातर्भवस्सायंप्रातिकः। पौनःपुनिकः, ब्राह्म इत्यादयः।

इवर्णावर्णौ स्वरे प्रत्यये ये च [2]२।६।३९

इवर्णस्यावर्णस्य च लोपो भवतीति वस्तुव्याख्यानमेतत्। इदं त्वत्र यथाश्रुतविभक्त्यर्थद्वारेण व्याख्यानम्। इवर्णावर्णौ लुप्येते इति ([3]लोपशब्दस्तु भावसाधनोऽप्यनुवर्तमान इह लुप्यत इति) लोप इति कर्मसाधनो विज्ञायते। प्रथमान्तयोस्स्थानिनोः भावसाधनेन तेनानन्वयात्। आत्रेयः नादेय इति। स्त्र्यत्र्यादेरेयण्। दाक्षिरितीणन्तः, बालेयः इति पूर्ववदेयण्, गार्ग्य इति ण्यगर्गादेः। तुल्यमिति। नावस्तार्ये इत्यादिना यः प्रत्ययः, वर्णसमाम्नाय पूर्वमवर्णस्य सन्निवेशादवर्णेवर्णाविति पाठो न्याय्यः। तत्किमर्थोऽयमिवर्णावर्णाविति व्युत्क्रमपाठ इत्याह—इवर्णावर्णाविति व्युत्क्रमपाठादित्यादि। पटिष्ठः पटीयानिति। तमादित्वाष्ठेयन्सौ प्रत्ययौ। अत्रेकारस्य लोपः। पैतृष्वसेय इत्यादि पूर्ववदेयण्, अत्रापि ऋकारलोपः। एकस्वरस्यावर्णलोपो नेष्यत इति पूर्वसूत्रादपीत्यनुवृत्तेः। श्रेष्ठः, ज्येष्ठः, श्रेयानिति प्रशस्यशब्दात् तसादित्वा-

---

१. २।६।४२ (दु० वृ०)
२. २।६।४४ (दु० वृ०)
३. न्यूनपाठः (मं०)

दिष्ठेयन्सौ ([1]प्रशस्य ज्य चेति लोकोपचारात् प्रशस्यशब्दस्य श्रज्यादेशौ) प्रत्ययग्रहणं किम्, सुदाक्षि एतत् सुदाक्षियत्।

नस्य तु क्वचित् [2]२।६।४०

राज्यमिति। यण् च प्रकीर्तित इति यण्, इह तु न भवति क्वचिद् ग्रहणात्। सामन्यः, वेमन्यः। तत्र साधौ च यः।

उवर्णस्त्वोत्वमापाद्यः [3]२।६।४१

आपाद्य इति पदेऽर्हे त्विन्नन्तात्स्वराद्यः, तत्रोवर्ण ओत्वमापाद्यत इत्यापत्तिक्रियायामोकारः। कर्म भवतीत्योत्वमिति द्वितीयान्तम्। न च य-प्रत्ययेनाभिहितं कर्मेति शक्यते [4]कर्तुम्। तेनोवर्णगतस्यैव कर्मणोऽभिहितत्वात्। आपादनक्रियायां ह्यवर्णः कर्म भवति। तथा ह्ययमत्रार्थः। उवर्ण ओत्वम् ([5]आपाद्य इति) कृत्यप्रत्ययेनोत्वगतं कर्म नाभिहितमिति तत्र कर्मण्योत्वमिति द्वितीया। औपगव इति बाणपत्य इत्यण्। ववव्य इति। यदुगवादित इति यत्। स्वयम्भूशब्दस्येत्यादि। क्वचिद् ग्रहणानुवृत्तेः क्वचिन्नेष्यत इति भावः। स्वायम्भुव इति पूर्ववदण्। उवादेशविधौ चानुवृत्तेः अत्राविभक्तिस्वरेऽप्युवादेशः तद्धितप्रकरणविहित एव स्वरादौ ओत्वं विज्ञायते, तेनेह न भवति, पट्वी, तदन्ताद् गुणवाचिन इतीकारः।

एयेऽकद्रवास्तु लुप्यते [6]२।६।४२

अकद्रवा इति नञो निर्देशो व्याख्यानात्। काद्रवेय इति। पूर्वेणोत्वम्।

वृद्धिरादौ सणि [7]२।६।४३

स्वर इति वर्तत इति स्थानि-निर्देशार्थमिवर्णादित्यतः तच्चार्थवशात् षष्ठ्यन्तं ज्ञायत इति सप्तमीनिर्दिष्टस्य तस्य स्थानित्वं प्रत्ययोगित्वादिति भावः। वृद्धिर्भवतीति। आन्तरतम्यादवर्णस्याकारः इवर्णस्यैकारः उवर्णस्यौकारः,

---

१. न्यूनपाठः (भं०)
२. २।६।४५ (दु० वृ०)
३. २।६।४६ (दु० वृ०)
४. वक्तुम् (भं०)
५. आदेशमापादयितव्य एवं चेति (भं०)
६. २।६।४७ (दु० वृ०)
७. २।६।४६ (दु० वृ०)

ऋवर्णस्यार्। आक्षिक इति। तेन दीव्यतीतीकण्। वैनतेय इति स्त्र्यभ्यादेरेयण्। गोपुच्छिक इति। तेन तरतीत्यत्रार्थे इकण्। [1]कर्मण्यणिञि यण् च प्रकीर्तितः नन्वाक्षिरिति कथं वृद्धिसंशब्दनेनाकारो विहितः यावता नायं [2]वृद्धिसंज्ञकः, वृद्धिसंज्ञा ह्यारुत्तरे चेत्यनेनारः एदोद्भ्यां चोत्तरयोः ऐदौतोः विधीयते। न त्वाकारस्य। तत्केन प्रकारेण आकारो वृद्धिसंब्दनेन विधातुं शक्यत इति पूर्वपक्षयति। ननु चेत्यादि। उच्यत इत्यादिना परिहरति आपत्यस्येति निर्देशात् ज्ञापकात् आकारोऽपि वृद्धिसंज्ञकः, अन्यथा कथमपत्यशब्दमणिपरे वृद्धिशब्दोच्चारणेन कृतात्वं निर्देशात् योऽप्यापत्यस्य संहितासाम्येऽपि कृतात्व एवायं निर्देश इति मन्तव्यमन्यथा त्वपत्यशब्देन कीदृशं यस्येत्यस्य कार्यिणस्सामानाधिकरण्यं स्यात्। अपत्यार्थविहितत्वाद् ऋकारोऽप्यपत्यशब्देन व्यपदेक्ष्यत इति चेत्, तर्हि ज्ञापकदिगियं, इदं त्वत्र स्फुटं ज्ञापकम्, षडाद्यः सार्वधातुकमिति। ऐहलौकिकम्, पारलौकिकमिति क्रीतादिरित्यादि ग्रहणादिकण्प्रत्ययः।

न यूवोः पदाद्योः वृद्धिरागमः [3]२।६।४४

नकारः प्रतिषेधवाची। वृद्धिप्रतिपद्यमानस्स्वरप्रतिषेधभाक्। स्वरस्य विशेषणं यूवोः, यूवोः विशेषणं पदाद्योः। तणीति निमित्तमित्येकोऽवयवार्थः, यूवावागमिनौ। वृद्धिरागमः इत्यपरः सूत्रस्थ आदिशब्दः समीपवाचीति। न तु स्वरविशेषणभूतो योऽनुवर्तमान इति भावः। समीपवाची चायमादिशब्दो दृश्यते। यथा दधिभोजनम्। अर्थसिद्धेरादिरिति। समीपभूताविति समीपत्वं प्राप्तौ। भू प्राप्तावित्यस्य हि चौरादिकस्याधृषाद्वेति विकल्पितेन्प्रत्ययस्यायं भूतशब्दः। वृद्धिरागमो भवतीत्येतदुक्तम्। तत्रारोऽपि वृद्धिशब्देन प्रसङ्गं यूवोर्वा ऐदौतोरव्यवस्थाया प्राप्तिम् [4]मन्वानं प्रत्याह—आन्तरतम्यादित्यादिना व्यवस्थाया आगमस्यास्तिप्रसङ्गः। यत आन्तरतम्यात् सदृश आगमो भवति। तेन इचुयशास्तालव्याः इति तालुस्थानस्य यकारस्य ए ऐ कण्ठतालव्याविति ([5]तालुस्थान एव ऐकार आगमो भवति, वकारो दन्त्यौष्ठ्य इति वकारस्यापि दन्त्यौष्ठ्यस्य ओ औ कण्ठ्यौष्ठ्याविति।) ओष्ठ्यभागेनान्तरतम्यात् ओष्ठ्य-

---

१. कर्मण्यमिति (वा०)
२. वृद्धिसंज्ञकाः (भं०)
३. २।६।५० (दु० वृ०)
४. यो मन्यते तम् (भं०)
५. न्यूनपाठः (वा०)

स्थान एवौकारागमः। तेनान्तरतम आरागमो न भवति। [1]अव्यवस्था या चैदौतोः अण्प्रत्ययः इति भावेऽर्थे। एवमादेरित्यादिग्रहणात्। अत्रेत्यादिना [2]सूत्रार्थमुदाहरणेषु योजयति। अन्तर्वर्तिनीं विभक्तिमिति। ङि-प्रत्ययः, सा च विभक्तिः तस्था लोप्या इति स्थाग्रहणाल्लुप्तापि सती प्रत्ययलक्षणेन पदत्वहेतुर्भवत्येव। एवं च वैयसन इत्यत्र यदसन इत्यण् पूर्वपदं तस्य पदस्यादिः समीपभूतो यो यकारस्तत् सम्बन्धिनोऽकारस्य वृद्धिराकारो न भवति। एवं व्याकरणमधीते वैयाकरण इति तदधीते इत्यत्रार्थे अण्-प्रत्ययः। अत्रावर्णं सर्वमुखस्थानमित्येकीयमते आङ्शब्दसम्बन्धिन आकारस्य वृद्धिप्रसङ्गे ऐदौतोरपि वृद्ध्योः प्राप्तौ सत्यां वृद्धिनिषेधः क्रियते। सति तस्मिन्नागमिका वृद्धिरैकारः। सौवश्विरिति। अत्राप्यन्तर्वर्तिनीं षष्ठीं प्रत्ययलक्षणेनाश्रित्य यदश्व इति पदं तस्यादिर्यो वकारः तत्सम्बन्धिनः स्वरस्याकारस्याकारो वृद्धिर्न भवति। नार्थिरिति। अत्र प्रत्ययलक्षणेनान्तर्वर्तिनीं षष्ठीमाश्रित्य यदर्थ इति पदं तस्यात्रादी रेफः न तु य्वोरिति रेफाकारस्य वृद्धिनिषिध्यते। पदाद्योरिति किम्, यतो यां यात इणः शन्तृङि परत इणश्चेति कृते यत्वे तस्येदमित्यण्। नायं यकारः पदसमीपवर्तीति वृद्धिरत्र न निषिध्यते। नन्वागमिका वृद्धिर्नित्या विशेषविहिता चेति, सैवादिवृद्धिं बाधिष्यते। तर्हि तस्य निषेधकरणेन, असदेतत्, अनारभ्यमाणे हि निषेधे दाध्यश्विः साध्वश्विरित्यादावपि य्वोरागमिकावृद्धिः विशेषाभावात् प्रसज्येत। निषेधारम्भे तु सत्यादिवृद्धिनिषेधसन्नियोगेन विधीयमाना वृद्धिरागमिका आदिवृद्धिनिषेधस्याप्रवृत्तिविषये दाध्यश्विरित्यादौ न प्रवर्तत एव। नहि दाध्यश्विरित्यादिवृद्धिनिषेधस्य विषयः। य्वोः स्वरस्यानादित्वादिति निषेधकरणमेव ज्यायः। नन्वागमिकायामित्यादि। अयमर्थः। इह वैयसनं सौवश्विरित्यागमिकायां वृद्धौ कृतायां यावेतावैकारौकारौ तयोर्यथाक्रममायावावादेशौ प्राप्नुतः। स्वरस्यापि परत्वाच्च का तयोः प्राप्तिरिति चेत्, न। स्वरादेशपरिभाषया यत्ववत्वयोस्स्थानिवद्भावात् स्वरस्यैकारस्योकारस्य च य आदेशः। परममनश्वशब्दसम्बन्धिनमकारं निमित्तमाश्रित्योपजातः सः पूर्वस्यैकारस्यौकारस्य च विधौ कार्ये आयावादेशलक्षणे कर्तव्ये स्थानिवद् भवति। एवं च सति प्राप्नुयाताम् आयावाविति कस्मान्न भवतः। उच्यत इत्यादिना [3]परिहरति। अत्राप्ययमर्थः। स्वरादेशपरिभाषया योऽयं पूर्वस्य विधौ कर्तव्ये स्थानिवद्भावेनासावविशेषेण यः कश्चित्पूर्वः तस्य पूर्वस्य विधौ कर्तव्ये

१. अव्यवस्थो या (वा०)
२. सूत्रमुदाहरणेषु (भं०)
३. परिहारमाह (भं०)

इति । किं तर्हि, विशेषणानादिष्टात् । अकृतादेशात् स्वराद्यः पूर्वस्तस्य पूर्वस्य विधौ कर्तव्ये स्थानिवद्भाव इति । यथा स्पृहयतीत्यत्र । अत्र हि योऽसावस्य च लोप इत्यकारस्य लोपः कृतः सः पूर्वस्य ऋकारस्य उपधागुणे कर्तव्ये स्थानिवद् भवति । सः च ऋकारो कृतलोपलक्षणादेशात्स्वरादकारात्पूर्वो भवतीति युक्तः तस्य पूर्वस्योपधागुणे कर्तव्येऽकारलोपस्य स्थानिवद्भावः । वैयसनमित्यादौ तु यावसावैदौतौ यकारवकाराभ्यां पूर्वौ न तौ, अकृतादेशात्स्वरादिकारादुकाराच्च पूर्वौ य्वोरिति वचनादिकारोकारावस्थायामैदौतोरसञ्जातत्वात् । तस्माद् येनादिष्टपरिभाषया विशेषेण स्थानिवद्भावस्मरणात् । कृतादेशात्स्वरात्पूर्वयोरैदौतोरायावादेशलक्षणे कार्ये कर्तव्ये नास्ति प्रसङ्गः स्थानिवद्भाव परिभाषया इति कथमायावौ भवेताम् ।

[1]तद्धितपादः षष्ठः ।

सप्तमः पादः (स्त्रीप्रत्ययपादः)

स्त्रियाम् २।७।१

अधिकारोऽयमिति । कुतो विधेयस्यानिर्देशात् साकाङ्क्षत्वे सति पारिशेष्यात् स्त्रियां वर्तमानाल्लिङ्गादित्येतेन स्त्रीत्वयुक्तद्रव्यवाचिनो लिङ्गादिबादयः प्रत्यया: स्वार्थमात्रे भवन्तीति प्रकृत्यर्थस्येदं स्त्रियामिति विशेषणम् । न तु स्त्रीत्वम् । अत्र प्रत्ययार्थ इति दर्शयति । प्रत्ययार्थे हि सति स्त्रीत्वस्य प्रत्ययवाच्यस्यैकत्वसंख्यावच्छिन्नत्वात् । कुमार्यौ कुमार्य इत्यादौ द्विबहुवचने न स्याताम् । यद्यपि स्त्रीत्वस्याश्रयभूतं यद् द्रव्यं तद्भेदात् द्विबहुवचनसमर्थयितुं शक्यते, तथापि तत्समर्थनद्वारेण यत्प्रतिपत्तिगौरवं तदपरिहार्यम् । वेति प्रकृत्यर्थविशेषणपक्ष एव ज्यायान् ।

अजाद्यन्तादाप् २।७।२

अदन्तादकारान्तात्लिङ्गादित्येतेन यस्मै दित्सेति आप्प्रत्ययनिर्देशाददन्तग्रहणेन शरत्प्रभृतयोऽत्रादन्ताः न गृह्यन्त इति दर्शयति । पकारो वैचित्र्यादिति पूर्वाचार्यप्रसिद्धिप्रदर्शनमात्रमत्र वैचित्र्यम् । नन्वजादयोऽकारान्ता इति ततश्चादन्तग्रहणेनैव तेभ्यो आप्प्रत्ययः सिद्ध इति भावः । असदेतदिति

---

१. भट्टोग्रभूतिकृते शिष्यहितान्यासे शिष्यलोकाभिधाने नामप्रकरणे षष्ठः पादः । (मं०)

परिहारमाह—ये तावदिति तावच्छब्दः क्रमद्योतनार्थः। अनकारान्ता इति युञ् इत्यादयः क्विबन्ता अकारान्तास्तर्ह्यज-एडक इत्यादयः किमर्थं पठ्यन्त इत्याह—ये त्वकारान्त इति बाधकबाधनार्थमित्याप्प्रत्ययस्य बाधको विशेषलक्षणो विहितो य ई-प्रत्ययः तस्य बाधननिवृत्त्यर्थः प्रयोजनं यस्य पृथगुपादानस्य तत् तथोक्तम्। तान्येव विशेषलक्षणानि प्रदर्शयितुमाह—तत्रेत्यादि। अजादीनामित्यादिग्रहणेनाश्वचटक इत्यादयो गृह्यन्ते। त्रिफलाशब्दो द्विगोरिति ईकारः प्राप्त[1]इति सर्वत्रानुषज्यते। दंष्ट्रशब्दो हि दंशेः नीदाण्शसित्यादिना ष्ट्रन्प्रत्ययान्तत्वात् पानुबन्धप्रत्ययान्तः। बालवत्सादिभ्यः। आदिशब्दः पाकहोतृ-इत्यादीनामन्येषां प्रथमवयोवाचिनां परिग्रहार्थः। ज्येष्ठकनिष्ठमध्यमेभ्यः पुंयोगात्तेन चेदाख्येत्यनेनेति पुरुषशब्दसम्बन्धाद्धेतोर्ज्येष्ठादिशब्दानां स्त्रीवृत्तित्वात् एवमन्येभ्योऽपि सफलं सत् पुष्पादिभ्यो जातिगणपरिपठितेभ्यः पाकाद्यन्तादित्यादिना (ई-प्रत्ययस्य प्राप्तिः पूर्वापहाणापरापहाणाभ्यामपि युडन्ताभ्यां षडनुबन्धादित्यादिना) तदेवमजादिग्रहणं बाधकबाधनार्थम्। जातिवाचिनश्शूद्रशब्दादित्यादि। शूद्रा चामहत्पूर्वाजातिरिति यदजादिगणमध्ये सूत्रं पठ्यते तदर्थाभिधानमेतत्। महतोऽर्थप्रधानस्यात्वस्मरणात्, अमहत्पूर्वादिति शब्दप्राधान्ये सत्यात्वाभावः। जातेरयोपधादितीकारः प्राप्त इति सम्बध्यत इति शेषः। कुतो जातिवाचिन इति विशेषेणोपादानात् तेन यः पुंयोगलक्षण ई-प्रत्ययः सः भवत्येव। तथा च प्रत्युदाहरति शूद्रस्य भार्या शूद्रीति। अमहत्पूर्वादिति किमिति, केवलात् शूद्रशब्दादुच्यमान आप्प्रत्ययोऽमहत्पूर्वात् कथं प्राप्नोति इति मन्यमानस्यैष प्रश्नः। तदन्तविधिना प्राप्ति मन्वानं प्रत्युदाहरति। महाशूद्रीति महाशूद्रशब्दोऽयमाभीरजातिमाचष्ट इति समुदाय एवमयमाभीरजाति[2]वाचिनः। नन्वत्रावयवार्थोऽस्ति, गोःखुरवत् ततोऽस्माज्जातेरयोपधादिति ई-प्रत्ययः। यद्येवम्, महाशूद्रेत्याप्प्रत्ययो न प्राप्नोति, उच्यते—महाशूद्रशब्दसमुदायो यदा जातिमाचष्टे तदा निषेध आप्प्रत्ययस्य। यदा तु महत्त्वविशिष्ट शूद्रा प्रतिपादयिषिता भवति तदाप्प्रत्ययो भवत्येव। यदि तदन्तविधिना महत्पूर्वा प्राप्तिरुच्यते तर्हि अजादीनामपि तदन्तविधिविज्ञानात्। पञ्चानामजानां समाहारः पञ्चाजीत्यादावप्यापूप्रत्ययः प्राप्नोति। प्रत्यासत्तेरजादिगते स्त्रीत्वे विधानमिदम्। इह तु समाहारगतं स्त्रीत्वमित्याप्-प्रत्ययो न भविष्यति। एवं च महाशूद्रयां शूद्रार्थगतस्य स्त्री-

---

१. इत्यनुसर्वत्रापज्यते (वा०)
२. न्यूनपाठः (भं०)
३. वचनः (भं०)

त्वस्याभावात् महत्पूर्वात् प्राप्त्यसम्भव इत्यमहत्पूर्वादिति कर्तव्यं वा न वेति सूरयः प्रमाणम् ।

ऋन्नेभ्यस्त्वी २।७।३

ऋतश्च नश्च ते ऋन्ना इति प्रयोगभेदेन ऋकारनकारबहुत्वादेव विग्रहः ।

वनो र च २।७।४

वन्निति वनिपः क्वनिपश्च ग्रहणम्, वनिस्तु धातुरश्राविप्रत्ययान्तः । सन्दिग्धसत्ताक इति न तस्येह ग्रहणम् । ऋन्नेभ्य इति सिद्धे योगारम्भो रेफादेशार्थः । पीवरी धीवरी । पिबतेः दधातेश्च मनिनादिसूत्रेण क्वनिप्, दामागायतीतीत्वम् । ई-प्रत्यये सत्यनेनान्त्यस्य रेफादेशः । शुनो निष्क्रान्तान्निश्शुनी, मघोनी । युवानमतिक्रान्ता अतियूनीत्यत्र [1]वत्वं न भवति । [2]वनो स्यानर्थकत्वात् । श्वन्शब्दो ह्ययं पञ्चपाद्यां ([3]शुनयुक्षन्नित्यत्र) सूत्रे श्वयतेः कनिनि इकारलोपे च सति निपात्यते । मघवन् शब्दोऽपि तत्रैव महेर्धातोः कनिनि घत्वे अवुगागमे च, युवन्नित्येतदपि कनिन्युवृषितक्षीत्यादौ यौतेः कनिन्युवादेशौ च साध्येते । यद्येवम्, सहयुद्ध्वा ब्राह्मणीत्यादावपि प्राप्नोति । सार्थको ह्यत्र वन्शब्दः । सहराज्ञो युध इति क्वनिपो विधानात्, सत्यम् । पादो वेति अतो वत्यपेक्षते तस्य व्यवस्थितविभाषात्वान्न भविष्यति ।

न संख्यायाः २।७।५

तिसृचतसृ इति त्रिचतुरोरिति जसि शसि वा तिसृचतसृभावः । ई-प्रत्यये निषिद्धे नौ रं स्वरे इति रत्वम् । ननु विभक्तिनैरन्तर्ये ([4]णोपजायमानः तिसृचतसृभावः ई-प्रत्यये विहिते कथं विभक्ति नैरन्तर्यम्) विहन्यादिति प्राप्तिरेवात्र स्त्री-प्रत्ययस्य नास्तीति किमनेनोदाहृतेन, नैतत् व्यभिचारित्वादेवंविधस्य व्यवहारस्य । तथा च या सा इत्यत्र विभक्तिनिमित्तमपि त्यदाद्यत्वमाप्प्रत्ययं विधाय विभक्तिप्रत्यासत्ति विहन्त्येव । पञ्च ब्राह्मण्य इत्यादि । कतेश्च जस्शसोर्लुगिति जस्शसोर्लुक् । लिङ्गान्तनकारलोपः, तस्यालुप्तवद्भावादनन्तत्वादाप् प्रत्ययोऽपि न भवति । यद्यपि च संख्याशब्दानां द्रव्यस्य भेदमात्र-

---

१. रत्वम् (भं०)
२. वनोरस्यानर्थकत्वात् (भं०)
३. श्वन्नुक्षन्नित्यत्र (भं०)
४. न्यूनपाठः (वा०)

प्रतिपादनप्रसिद्धव्यापाराणां स्त्रीत्वं नास्ति तथापि तेषां कैश्चिद् गुणवचनत्वमभ्युपगम्यते। एवं च गुणवचनानां शब्दानामाश्रयतो लिङ्गवचनानि भवन्ति। संख्याशब्दानामपि शुक्लादिशब्दानामिव स्त्रीत्वेन योगात् स्त्रीप्रत्ययः प्राप्तो निषिध्यते।

मनः २।७।६

दामा दामानाविति मनिनादिसूत्रेण ददातेर्मनिन्प्रत्ययः। सीमा सीमानाविति सीमन्शब्दोऽव्युत्पन्नः। यद्येवम्, अनर्थकस्तदेकदेशो मन्शब्द इति तस्येह ग्रहणं प्राप्नोति, नैष दोषः, अनित्यत्वादर्थवद्ग्रहणपरिभाषाया अनित्यत्वञ्चास्याः प्रकृतिभावविधावन्तग्रहणादुक्तम्।

अनश्च बहुव्रीहेः २।७।७

अन इत्यत्रावमसंयोगादित्यकारलोपो न कृतः, स्वरूपभङ्गप्रसङ्गात्। तत्पुरुषोऽयमिति विभक्तयो द्वितीयाद्या इत्यादिना उक्तं हि तत्र क्वचिद् द्वितीयाद्यन्तं परपदं पूर्वपदेन समस्यत इति।

तयोस्तु डा २।७।८

तयोरित्यानन्तर्यलक्षणे सम्बन्धषष्ठी, दामे दामा इति द्विवचनबहुवचनयोरुपन्यासे डा-प्रत्ययाभिव्यक्त्यर्थः। दामा इत्येकवचनोदाहरणे हि डा-प्रत्ययप्रतिषेधयोः विशेषो न स्यात्। वन्नन्तस्य बहुव्रीहेरित्यादि। अन्यथा त्वनश्च बहुव्रीहेरिति निषेधादी-प्रत्ययो रेफादेशश्च न भवेतामिति बहुधीवरीति न प्रसिद्ध्येत्।

उदुकारानुबन्धास्त्वी २।७।९

उकारानुबन्धप्रत्ययान्ताल्लिङ्गादिति। अथ प्रत्ययग्रहणं कुतो धातुरपि ह्यु[1]कारानुबन्धोऽस्ति ततश्च ततोऽपि स्त्रीप्रत्ययस्स्यात्। उखास्रत् पर्णध्वत्। ब्राह्मणीति। नैतदस्ति। धातोरुकारः, इड्विकल्पविधौ चरितार्थ इत्यर्थात्प्रत्ययसम्बन्ध्येवाकारो गृह्यते। गोमतीति। गावो विद्यन्तेऽस्या इति तदस्यास्तीति मन्तुः उकार इहार्थः। भवन्तु शब्द इत्यादि। भवन्तु शब्दो मातीति भासिति भा-शब्दाद् वन्तुप्रत्ययः, मातेर्वात्र वन्तुः।

---

१. संयोगादित्यनो (मं०)

यादौ वा २।७।१०

लुप्ताकार इति । हस्त्यादिवर्जितादुपमानादित्यादिना वचनेन । पाच्छब्दादिति पाच्छब्दान्ताद् द्विपदी त्रिपदीति संख्याश्वशब्दाभ्यां च परस्येति पादस्यान्तलोपः । तु शब्दोऽनुवर्तते । मन्त्र ऋचि वाच्यायां पादान्तादाप्प्रत्ययो समुच्चिनोति, तेन द्वौ पादावस्याः सा द्विपदा ऋक् ।

अनुपसर्जनात् २।७।११

उपमृज्यते अप्रधानीक्रियते इत्युपसर्जनम् । कृत्य युट इति कर्मणि युट् । अधिकारोऽयमिति । आपादपरिसमाप्तेरनुपसर्जनादप्रधानादिति । ननु प्रधाने कार्यसम्प्रत्ययात् प्रधानादेव भविष्यतीति किमनेन वचनेन, अस्त्येतत्, व्यभिचरति पुनरयं न्यायः । प्रियस्येत्यादावप्रधाने विषयेऽप्यन्नादिकार्यदर्शनादित्यत्र प्रधानादपि प्राप्तौ सत्यामनुपसर्जनादिति वचनमिदमारभ्यते । उपसर्जनमप्रधानमिति लोकतः । लोके ह्यप्रधानमेवोपसर्जनमुच्यते । नह्यथा वयमत्र गृहे ग्रामे वोपसर्जनीभूता इति ।

नारी २।७।१२

नृ-शब्दस्य ई-प्रत्यये कृते इति ऋन्नेभ्यस्त्वीत्यनेन ।

यूनस्तिः २।७।१३

यून इति ह्वयुवमघोनां चेति व-शब्दस्योत्वम् । युवतिरिति । अत्र मनुष्यजातेरिति पुनस्त्वी-प्रत्ययो नाशङ्कनीयः । युव-शब्दस्य मनुष्यजातिवाचित्वाभावात् विशिष्टवयोवचनो ह्ययं शब्दो यौवनावस्थाविशिष्टायामेव वर्तते । बहुयुवेति । तयोस्तु ङा इति ङा-प्रत्ययः । केवलाद् युवशब्दात् प्रत्ययः उच्यमानस्तदन्तविधिनापि प्रसज्येत ।

अणेयेकात् २।७।१४

वासिष्ठीति । वाण्पत्य इत्यणि [1]कृते ई प्रत्ययः । कुम्भकारी । अत्रापि कर्मण्यणित्यणि कृते प्रकरणान्तरविहितोऽप्यण् न गृह्यते व्याप्तेर्न्यायात् । वैनतेयीति स्त्र्यन्यादेरेयण् आन्वीक्षिकीति । तेन दीव्यतीत्यत्रार्थे इकण् ।

ण्यत् २।७।१५

गार्गी वात्सीति । गर्गवत्सशब्दाभ्यां ण्य गर्गादेरिति ण्यप्रत्ययः । अणे-

---

१. परे (मं०)

थेकाण्ण्यादित्येकयोगे कर्तव्ये किमर्थो योगविभाग इत्याह—योगविभाग इत्यादि।

प्राचामायन चागमः २।७।१६

प्रपूर्वस्याञ्चतेः प्राञ्चतीति क्विपि। अनुषङ्गलोपः। आयनिति लुप्त-प्रथमैकवचनम्। आयनः आगमो विधीयमानः ण्यादित्यवधिनिर्देशः। तद्विशेषणं स्त्रियामिति प्राचामिति मतापेक्षया षष्ठी। आयन आगमो भवतीति। अभक्त इति शेषः। तथा ह्यस्यागमनस्य न पूर्वं आगमी। ण्यादिति पञ्चमी-निर्देशात्, [1]नापि पर ई-प्रत्ययः। आगमसम्बन्धयोग्ययोः ततः षष्ठी सप्तम्योरश्रवणात्। पञ्चम्या निर्दिष्टे परस्य चेति वचनेन ण्यादितीयं पञ्चमी ई-प्रत्ययस्य षष्ठी [2]कल्पयतीति चेदेवमपि क्वावकाश ईकारस्य [3]अयमागम इति सन्देहः स्यात्, तस्मान्मध्यपाती अयमागमो [4]भक्तो विज्ञायते। प्राचां प्रान्देशवर्तिनामिति। प्राक्छब्दोऽयमाचार्याणामत्र विभक्त्यन्त एवाभिधायक [5]इत्याहुः। यदि पुनः प्रादिदेशे [6]भव इति प्राक्छब्दात् पुरस्तादादयश्चेत्यस्तातिः क्रियते ततोऽस्यैवं रूपस्याव्ययत्वेस्मरणात् विभक्तेरश्रवणं स्यात्।

कौरव्यासुरिमण्डूकात् २।७।१७

कौरव्यशब्दो ण्य-प्रत्ययान्तः। आसुरिशब्द इण्त इर्णान्तः। मण्डूक-शब्दो अण्णन्तः। पूर्ववदत्रोत्तरत्र चावयवार्थः। कौरव्यायणीति। ण्यप्रत्यये सत्युवर्णस्त्वोत्वमित्योत्वम्। कार्यिवावाविति यवादेशः। ण्यादितीकारः। आसुरायणीति। आसुरिशब्दात् इण्त इतीकारः। अत्र च कृते आयनागमे इवर्णावर्णावित्यतद्धितेऽपि स्वरे इवर्णो लुप्यते, तद्विधौ वा शब्दस्य बहुलार्थस्यानुवृत्तेः माण्डूकायनीति। अणेयेकादितीकारः। कौरव्यशब्दस्य पृथगुपादानादिति प्राचामित्यस्यानुवृत्तौ हि कौरव्यशब्दस्य पूर्वेणैव सिद्धत्वादिहोपादानमनर्थकं स्यादिति भावः।

---

१. नामि (बा०)
२. विकल्पयिष्यतीति (भं०)
३. येनागमः (भं०)
४. भवतीति (भं०)
५. इत्यर्थः (भं०)
६. भावः (बा०)

वतण्डी च २।७।१८

अयं शब्दो निपात्यत इति। यद्येवम्, वातण्डीति ([1]न सिध्यति) ([2]अपत्यार्थविवक्षायामणि कृते सेत्स्यति) प्राचामायने चेति च शब्दाद्वाताण्ड्यायिनीत्यपि भवति।

वयसि प्रथमे २।७।१९

यल्लिङ्गमकारान्तं प्रथमे वयसि वर्तत इति। यद्येवम्, उत्ताना शेत इत्युत्तानया, लोहिती पादौ यस्य सा [3]लोहितपादिकेत्यत्रापि प्राप्नोति। गम्यते ह्यत्र प्रथमं वयः, सत्यम्, गम्यते प्रकरणवशात्। [4]न तु बहिरङ्गमिति प्रत्ययाभावः। वधूटीति। [5]ननु वधूटशब्दः प्राप्तयौवनं स्त्रियमाचष्टे, यौवनं च द्वितीयं वयः। तथा च "पिता रक्षति कौमारे, भर्ता रक्षति यौवने। पुत्रस्तु स्थविरे भावे, न स्त्री स्वातन्त्र्यमर्हति।" इति। एवं नायं वधूटशब्दः प्रथमवयोवृत्तिरिति कथमस्मादीप्रत्ययः, उच्यते—उपचयापचयलक्षणे द्वे वयसीति केषाञ्चिन्मतम्। तथा चाहुः—वर्धते यावदनेन वर्धितव्यमतः परमपायेन युज्यत इति। एवं च तेषां मते द्वितीये वयसि यौवनं नान्तर्भवतीति प्रथमवयोवृत्तिरेवायं वधूटशब्दः पूर्वत्र तु दर्शने चानुवृत्तिलक्षणपरिहारोऽत्र वाच्यः। वृद्धशब्देन सह कर्मधारय इति सः च पश्चादुपजायमानो बहिरङ्गत्वात् अन्तरङ्गां कुमार्यां स्त्रीप्रत्ययसम्बन्धं न बाधत इति भावः।

द्विगोः २।७।२०

व्यवस्थित[6]विभाषावृत्तेरपि परिमाणान्ताद् द्विगोः तद्धितलुकि न भवति। पञ्चभिरश्वैः क्रीता पञ्चाश्वा दशाश्वा। परिमाणान्तात् तु भवत्येव। द्व्याढकी, त्र्याढकी।

पडनुबन्धात्त्वी २।७।२१

तावनुबन्धौ यस्य प्रत्ययस्येति। [7]यस्य प्रत्ययस्येत्येतत् कुतो धातुरपि हि

---

१. निषिध्यति (भं०)
२. न्यूनपाठः (भं०)
३. लोहितपादिका (वा०)
४. तत्तु (भं०)
५. नहि (भं०)
६. विभाषानुवृत्तिरपि (भं०)
७. अथ (भं०)

त्रपुष् धेट् इत्यादि षडनुबन्धोऽस्ति । तत्सोऽपि कस्मादन्यपदार्थत्वेन न विज्ञायते, उच्यते—धातुषकारस्तावदङ्प्रत्ययविधौ चरितार्थ इति प्रत्ययपकार एवेह गृह्यते । तत्साहचर्याच्च धकारोऽपि प्रत्ययसम्बन्ध्येव । यद्येवम्, स्तनन्धयीति धातुटकारनिमित्तमीकारो न प्राप्नोति । गौरादेराकृतिगणत्वाद् भविष्यति । किमर्थस्तर्हि धेटष्धकार इति चेत् धेड्दृशीत्यादौ विशेषणार्थः । असति हि टकारे धेटस्सन्ध्यक्षरान्तत्वादात्वे कृते सति धा इति निर्देशः स्यात् । ततश्च धाङोऽपि ग्रहण भवेत्, धे इति पठ्यताम्, ततोऽयमदोष इति चेत् ; प्रष्टव्यप्रयोजनस्तर्ह्यत्र गणकार एव ।

गौरादेः २।७।२२

वक्तव्याद् यलोपः इतीकारे परे मत्स्यस्य यलोपः इत्यस्मात् । आकृतिगणोऽयम् इति । तेन ऊरुप्रमाणमस्य ऊरुद्वयसी, ऊरुदघ्नी, ऊरुमात्री, तरुणी तलुनी गवयी हयी पुरुषो सुकामी मनुषी चिती यथाकामीत्यादयः ।

बहुव्रीह्यूधसोऽन च २।७।२३ (वृत्तावेवायं पाठः न तु न्यासे)

वा संयोगोपधात् स्वाङ्गात् २।७।२४

संयोगोपधा यस्येति । नन्वन्त्यात् पूर्ववर्णस्योपधा-संज्ञा विहिता तत्कथं वर्णसमुदायात् सा [1]संयोगानामुपधा संज्ञा स्यात्, अस्त्येतत्, उपधाग्रहणं त्विह देशविशेषोपलक्षणार्थम् । तेनान्त्याद् वर्णाद् यत्र पूर्वं संयोगः तत्र विकल्पो न भवतीति । ततो नञा समास इति । कुत एतत्, उत्तरत्र कण्ठादीनां संयोगोपधानां विकल्पारम्भात् । एवं शशिमुखेति । शशीव मुखमस्या इत्येवमत्रापि विग्रहः । वा शब्दोऽयं व्यवस्थितविभाषावाची । तेनाप्रधानात् स्वाङ्गाद्विधिरयमिति । शिखेत्यादौ न भवति । अङ्गगात्रान्तादित्यादि संयोगोपधत्वादप्राप्तौ ई-प्रत्ययो विकल्प्यते । अथ स्वाङ्गं किमुच्यते इति । किं स्वमङ्गं स्वाङ्गमिहान्वर्थं गृह्यते, ([2]अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् । अतस्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम् ॥) [3]अथाद्रवं मूर्तिमदिति पारिभाषिकमिति उभयथा दर्शनाद् विशेषं जिज्ञासोरयं प्रश्नः, इदानीमिष्टसिद्धये पारिभाषिकं स्वाङ्गं गृह्यत इत्याह—अद्रवमित्यादि । प्राणिस्थं स्वाङ्गमिति । प्राणो नाम वायुः यो मुखनासिकया च बहिः निर्गच्छति सोऽस्ति यस्य यः प्राणी, तत्र

१. संयोगो नामोपधा (वा०)
२. न्यूनपाठः (भं०)
३. अथाद्रव्यम् (वा०)

यत्तिष्ठति तत् प्राणिस्थम्, तेन बहुकफा इत्यत्र प्रत्ययो न भवतीति कफस्य द्रवात्मकत्वात् । नत्वन्यदिति । अप्राणिस्थम् । वातादीनामिति वात-पित्त-रक्त श्लेष्माणां वैषम्यमिति संक्षोभः ततो जातं विकारजमिति सप्तमी पञ्चम्यन्तेर्जनेर्डः । अपरेण श्लोकार्धेनेति । अतस्थं तत्र दृष्टञ्चेत्यादिना ङसमुदायः स्वाङ्गग्रहणेन न गृह्यते । पुरुषसमुदाय इव पुरुषग्रहणेन, तेनेह न भवति [1]कल्याणिपाणिपदा ।

अनश्चाल्लोपि कर्णतः २।७।२५

अन्नन्ताल्लिङ्गादलोपिन इति योग्यतया लिङ्गस्यैतद्विशेषणं सञ्जातम्, ई-प्रत्ययाल्लोपित्वस्यासम्भवात् । सुपर्वा इति । शोभनानि पर्वाण्यस्या इति विग्रहः । अत्रावमसंयोगादिति निषेधादल्लोपित्वं नास्ति ।

नासिकोदरकण्ठान्त्रजङ्घादन्तौष्ठशृङ्गतः २।७।२६

इत्येतदन्तादिति नासिकादिभिः लिङ्गस्यैतद्विशेषणात्तदन्तविधिः नासिकोदरयोः क्रोडादिबहुस्वरादिति निषेधः प्राप्त इति बहुस्वरत्वात् । सोऽनेन बाध्यते ([2]अत्र सविद्यमाननञ्पूर्वान्नेत्ययमपि निषेधः कस्मान्न बाध्यते) ततश्च सनासिकेत्यादावपि विकल्पः स्यात् । युक्तश्चास्यैव निषेधस्य बाधः । अनन्तरत्वात् न तु बहुस्वरलक्षणस्य व्यवहितस्य कण्ठादीनां च संयोगोपधनिषेधवद् वक्ष्यमाणमस्यानन्तरं निषेधं बाधित्वा विकल्प. स्यात् । अत्रोच्यते— कण्ठादीनां तावद्विकल्पो मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरानिति संयोगोपधलक्षणमेव निषेधं बाधते, नोत्तरं विद्यमानलक्षणम् । नासिकोदरयोरपि विकल्पो व्यवस्थितविभाषारूपत्वाद् बहुस्वरलक्षणस्यैव निषेधकस्य बाधको न तु सविद्यमानलक्षणस्य । तेन सनासिकोदरेत्यादौ निषेध एव प्रवर्तते न त्वयं विकल्पः, एवं मणिपुच्छीत्यादि । मणिपुच्छोऽस्याः, विषं पुच्छोऽस्याः, शरः पुच्छोऽस्याः इति विग्रहः ।

सविद्यमाननञ्पूर्वान्नः २।७।२७

सह-शब्दस्य ज्ञापकसिद्धो यः [3]सकारः तदनुकरणोऽयं सः शब्दः । वा संयोगोपधादित्यनेन विकल्पः प्राप्त इति सः बाध्यत इति शेषः । एवं सनासि-

---

१. कल्याणपादा (भं०)
२. न्यूनपाठः (वा०)
३. भावः (भं०)

केत्यादि। एतेन नासिकालक्षणोऽपि विकल्पो अनेन निषेधेन बाध्यत इति दर्शयति। नन्वानन्तर्यादस्यैव विकल्पस्य बाधो युक्तो न तु वा संयोगोपधादित्यस्य, अस्त्येतत्, पूर्वग्रहणात्स्वधिकात् पूर्वोऽपि विकल्पो बाध्यते।

[1]क्रीडादि बहुस्वरात् २।७।२८

आकृतिगणोऽयमिति तेन सुभगा दुर्भगेत्यादौ अपि न भवति। यद्येवमिति। यद्याकृतिगणोऽयं क्रीडादिराकृतिगणोऽयं क्रीडादिरित्यर्थः प्रपञ्चार्थमिति। क्रीडादिरनेन प्रकारेण प्रपञ्च्यत इत्यर्थः।

अन्तर्वतो नु गर्भिण्याम् २।७।२९

गर्भोऽस्त्यस्या इति। तदस्यास्तीतीन्प्रत्ययः, ऋन्नेभ्यस्त्वीतीकारः, नुरागमो विधीयमानः अन्तर्वत इत्यवधिः तस्य विशेषणं, गर्भिण्यां स्त्रियामिति नुरागमो न भवतीति प्रकृतिप्रत्ययोरनुपघातको पूर्वो वर्णो मध्यपाती भवन्नुकारोऽयमागम इति व्यपदिश्यते। ननूकारेण चिह्नेन आगम उदनुबन्ध इत्यस्याः परिभाषाया उपस्थानादन्तर्वर्तत इति चैतस्यां षष्ठ्यां व्याख्यायमानायामन्तर्वच्छब्दस्यैवान्त्यात्स्वरादयं परो नकारागमः कस्मान्न विज्ञायत इत्याशङ्क्याह—उकार उच्चारणार्थ इत्युच्चारणमात्रफलोदयमुकारो न तु कार्यार्थो येनास्य कार्यार्थमुच्चारितस्य सतोऽनुबन्धव्यपदेशे सत्यागम उदनुबन्ध इत्यस्या उपस्थानं स्यात्। अप्रमाणकमेतद् इति चेत्, अविच्छिन्नाचार्योपदेश एवात्र प्रमाणम्। अन्तर्वत्नी गर्भिणीति। ननु कथमत्रान्तश्शब्दाद्वन्तुप्रत्ययः, यावता तदस्यास्तीत्यादिना तच्छब्दवाच्यस्यार्थस्यास्तिना सामानाधिकरण्ये सत्यसौ विधीयते। यथा गोमानिति। अत्र हि गावः सन्त्यस्येति गवां सत्तयाभिसम्बन्धः। अन्तर्वत्नीत्यत्र तु अन्तर्विद्यते यस्या इति विगृहीते सति नान्तश्शब्दस्य सत्तयाभिसम्बन्धः। किन्तर्हि, अधिकरणशक्तिप्रधानादस्माद् यदाधेयं प्रतीयते तस्य। एवं च कथमन्तश्शब्दाद्वन्तुरित्याह—अन्तश्शब्दादधिकरणप्रधानाद्वन्तुप्रत्ययो निर्देशबलादिति। स च गर्भिण्यामेव स्त्रियां नत्वन्यत्र। तथा च प्रत्युदाहरति—अन्तरस्यां शालायां विद्यत इति।

पतिवज्जीवति भर्तरि २।७।३०

पतिवदिति लुप्तपञ्चमीकम्, निर्देशबलाच्चानुषङ्गलोपः। पूर्ववदवयवार्थोऽत्र मन्तव्यः। जीवति भर्ता यस्य सा जीवभर्तेति। एतेन जीवतीति

---

१. क्रोडादि (मं०)

जीव इति जीवशब्दोऽयं नाम्युपधालक्षणः क-प्रत्ययान्तत्वात् कर्तृसाधन इति दर्शयति। अस्वपदेन च विग्रहः। मन्यकर्मणीतिवत्। पतिवत्नीति पूर्ववदीकारः। ननु [1]मन्त्वादिप्रत्ययविधाववर्णाद्वर्णोपधादित्यादिना ग्रन्थेन वन्तुविशेषणोक्तः तत्कथमसौ पतिशब्दादिवर्णान्ताद् भवतीत्याह – पतिशब्दादित्यादि। पतिमती मथुरेति। अत्र जीवभर्तृका स्त्री न वाच्या। तेन वन्तुप्रत्ययो न भवति। नापि नुरागमः। भर्ता चात्र योऽग्निसाक्षिकेण पाणिग्रहणेन सम्बन्धी सः गृह्यते न तु यस्स्वामी।

पत्युर्नश्च २।७।३१

तस्य च नकारादेश इति वर्णान्तस्यस्य विधिरित्यन्तस्य, पत्नीति शब्दशक्तिस्वाभाव्यात् यस्या इति शास्त्रोक्तेन विधिना संस्कार उपजातः सैवमुच्यते। तथा चाह—ऊढायां स्त्रियामयं विधिरिति। ऊढा कृतविवाहेत्यर्थः। ग्रामस्य पतिरयमिति पतिशब्दः अत्र स्वामी-वाची।

समानादेर्गणात् परो यः २।७।३२

समानादेर्गणात् परो यः पतिशब्द इति। अथ समानशब्दादिर्यः पतिशब्दः इति कस्मान्न विज्ञायते। नैवं शक्यम्, एवं हि सत्यसन्देहार्थमादिग्रहणमकृत्वा समानादित्येवं ब्रूयात्। अत एव संज्ञापि न गृह्यते। क्व पुनस्स्याद् यद्यसौ गृह्येत, अः पतिरस्याः ([2]इः पतिरस्या) इत्यादौ। तस्मात्समानादेरिति गणेऽत्रान्यपदार्थः ([3]न तु समानसंज्ञो वर्णः)। योगविभागादिति। समानस्य स इति य एको योगो विभज्यते तेनेत्यर्थः। योगविभागश्च तत्रावश्यं कर्तव्यः। समानरूपं यस्य सः सरूपः सस्थानः सवयः सवर्णः इत्यादिसिद्ध्यर्थः।

वान्यपूर्वोपसर्जनात् २।७।३३

अन्य-पूर्व-ग्रहणं विस्पष्टार्थम्। समानादेरित्यस्यानुवृत्तौ हि पूर्वो योगो निर्विषयः स्यात्। अनुपसर्जनं तस्य विषय इति चेत्, न। समानादेः परस्य पतिशब्दस्यानुपसर्जनस्य स्त्रियां प्रवृत्त्यसम्भवात्।

कामुका मैथुनेच्छायाम् २।७।३४

मिथुनस्य कर्म मैथुनम्। प्रकीर्तितग्रहणात् अन्, इच्छाशब्द इच्छत्यत्र निपातयिष्यते।

---

१. अमन्त्वादि (मं०)
२. न्यूनपाठः (वा०)
३. न्यूनपाठः (मं०)

नागात्स्थौल्ये २।७।३५

नागीति । स्थौल्यग्रहणावच्छिन्नं स्त्रीत्वविशिष्टं द्रव्यमेवाभिधीयते । नागेति संज्ञेयं कस्याश्चित् ।

अकृते स्थूलात् २।७।३६

स्थूलीति । अन्यत्र स्थूलम् ।

गौणादावपने २।७।३७

आवपन्त्यस्मिन्धान्यादीनीत्यावपनम् । अधिकरणे युट्, गौणेति नाम कस्याश्चित् ।

पिण्डादन्ने २।७।३८

अद्यते स्मेत्यदेः क्तः । जग्धादेशस्याभावोऽत एव ज्ञापकात् ।

आमन्त्रे तु कुण्डतः २।७।३९

कुण्डेति । कुडि दाहे, कुण्डनं कुण्डेति, गुरोश्च निष्ठायामित्यकारः । तु-शब्दात् काली-शब्दो वर्णेऽर्थे साधुः । (१कुलीशब्दोऽयोविकारे) ।

घटाच्छिल्पिकृते २।७।४०

घटेति । घट चेष्टायाम्, षडनुबन्धभिदादिभ्य इत्यङ् । षानुबन्धो ह्ययं घटादयो षित इति स्मरणात् ।

कुम्मात् २।७।४१

योगविभागो वैचित्र्यार्थः ।

असितादेश्च वर्णतः २।७।४२

सितादिगणवर्जितादिति । सितादिगणः प्रयोगतोऽनुमन्तव्यः । यतो वर्णवाचिनोऽपि ई-प्रत्ययो न दृश्यते, सः सर्वः सितादिः । तेन कृष्णा, कपिला श्वेता इत्यादयो सितादयः ।

तोपधातो नकारश्च वा २।७।४३

त इति षष्ठी प्रथमा वा प्रकृतेति । प्रकृतशब्दोऽयं प्रस्तुतपर्यायो न वर्ण-वाची । अत्र नित्यमी प्रत्यय इति पूर्वसूत्रेण, नत्वनेनैव विकल्पितः ।

---

१. कुलीशब्दो व्ययो विकारे (भं०)

उदन्ताद् गुणवाचिनः २।७।४४

गुणवाचिनो गुणस्य प्रतिपादकादिति। यद्यपि च यो गुणवाची तस्य स्त्रियां वृत्तिर्न सम्भवति। तथापि च सामर्थ्यात् यो गुणमभिधाय तद्वति द्रव्ये वर्तते स इह गुणवाचीत्युच्यते। तपरकरणमसन्देहार्थमिति। असति हि [1]तस्मिन्वृत्तावुच्यमाने किमिदं वकारस्य ग्रहणमथोकारस्येति सन्देहस्स्यादिति तन्निवृत्तये तपरकरणम्। अथ तत्कालार्थं कस्मान्न भवति। गुणवाचिनः तूदन्तस्यामन्त्वात्। नन्विदमस्ति। पटुमिच्छत्यात्मन इति यिन्। [2]नाम्यन्तानां यणायीति दीर्घः, क्विप्, य्वोर्य्वङ्जने ये इति य-लोपः। पटू इति। नैतत्। अस्य क्विबन्ततया क्रियाशब्दत्वे सति गुणवाचित्वाभावात्। पूर्वस्यामवस्थायामयं गुणवाचीत्यसति तपरत्वे स्यादत्र प्राप्तिरिति चेत् [3]सति न, मुख्ये परस्मिन्गुणवाचिनि सति गौणे, गौणस्यैवंविधस्य गुणवाचिनो गृहीतुमशक्यत्वात्। तस्मादसन्देहार्थमेव तपरकरणम्। आखुरियमिति जातिवाच्ययं शब्दो न गुणवाची। [4]खरुशब्दात् गुणवाचिन इत्यपेक्षते। एतच्च वा शब्दस्य व्यवस्थितविभाषावाचिनो विजृम्भितम्।

बह्वादिभ्यः २।७।४५

बैपुल्यगुणवाचिनो बहुशब्दस्य पूर्वेण सिद्धत्वादिह पाठे प्रयोजनं न विद्मः, इकारान्तात्लिङ्गादीकारो वेष्यत इति कृति हृति ([5]अकरणिः अहरणिः) इत्येवं प्रकारे तु विषये न भवति। व्यवस्थितविकल्पानुवृत्तेः।

भुवो नित्यम् २।७।४६

भूशब्दस्य ग्रहणमिति विभुप्रभृतेर्य एकदेशः तस्य। अत्र च हेतुरुदन्तग्रहणानुवृत्तिः। यद्येवम्, भुव इत्यत्र निर्देशे भूशब्दस्य पञ्चम्या परतो ङसिङसोरलोपश्चेत्यग्निकार्यम् औत्वं प्राप्नोति तत्कस्मान्न भवतीत्याह—अग्निकार्यं न भवतीत्यादि। भू-इत्येतदन्तादिति। भू-शब्दस्य केवलस्यासम्भवात् तदन्तत्वप्रतिपत्तिः। ([6]विद्वीषत्वीति विप्रशब्दस्य पूर्वस्य भवतेः भुवो

---

१. तस्मिन्वन्तादित्युच्यमाने (वा०)
२. नाम्यन्तानां यिनायीति (वा०)
३. न्यूनपाठः (भं०)
४. संयोगोपधाच्चेति (भं०)
५. अरणिसुहरणि (भं०)
६. विद्वी प्रद्वीति विप्रशब्दपूर्वाद् भवतेः भुवो डुविप्रशंप्रेष्विति डः (भं०)

भुविरयं संप्रेष्विन्निन्त्र) प्रत्ययः। अन्त्यस्वरादिलोपः। स्वयम्भूरयमिति स्वयं भवतीति क्विप्।

पुंयोगात्तेन चेदाख्या २।७।४७

पुंयोगादित्यत्र पुंशब्दस्यान्तर्वर्तिनीं विभक्तिं प्रत्ययलक्षणेनाश्रित्य पदान्तवृत्तेर्मकारस्य मोऽनुस्वारं व्यञ्जने इत्यनुस्वारः। हेतौ चैषा पञ्चमी हेत्वर्थे इत्यर्थग्रहणात्। आख्यानमाख्येति। आतश्चोपसर्ग इत्याङ्प्रत्ययः, ई प्रत्ययो विधीयमानः लिङ्गविधिभाक्। लिङ्गस्य विशेषणं स्त्रियामिति पुंयोगादिति तत्र हेतुनिर्देशः। तेन चेदाख्येति चेच्छब्दो यद्यर्थेष्वयमवयवार्थः, समुदायार्थस्तु वृत्तावुक्तः, तेन चेच्छब्देनेति यतः शब्दादी-प्रत्ययो विधीयते। तेनेत्यर्थः। गणकीति। गण संख्याने। चुरादिरदन्तः। निन्दहिंसेति वुञ्। अत्रेत्यादिना [1]अत्रार्थमुदाहरणेषु योजयति। गोपालकादीनामित्यादि। अत्र च हेतुः व्यवस्थितविकल्पानुवृत्तिः। सूर्याद् देवतायामर्थ [2]इतीकारो नेष्यत इति सम्बध्यते। योगविभागाद् य-लोपः इत्यनपत्ययकारत्वादप्राप्तः, सूर्यशब्दो हि सूर्यरुच्येत्यादौ कृत्प्रत्ययान्तो निपातयिष्यत ईकारे कृत इत्यनेनैव सूत्रेणानुरागमो वक्तव्य इति पूर्वसूत्राच्चानुवृत्तिः। तथा च यवाद् दोषे ई-प्रत्ययः आनुरागमश्च दृश्यते। दुष्टो यवो यवानी, यवनाल्लिप्याम्। यवनानामियं लिपिर्यवनानीति।

क्रीतात्करणपूर्वात् २।७।४८

वस्तुक्रीतीत्यादि। इवर्णावर्णावित्यकारलोपः। वाक्ये तु नेष्यत इति व्यवस्थितविकल्पानुवृत्तेः।

पूतक्रतुमनोरै च २।७।४९

समाहारे द्वन्द्व इति। नोरागमस्य त्वभावो नित्यत्वमागमशासनमिति वचनात्। तयोश्चैकारादेश इवर्णान्त्यस्य विधयो भवन्तीति अन्त्यस्य मनोरौकारादेशो वेष्यत इति शब्दात् कार्यान्तरसमुच्चयार्थात्। ननु च शब्दो वाक्यभेदद्योतनफलः कथं कार्यान्तरे समुच्चिनुयात्। नैतत्, विनापि हि च-शब्दं वाक्यभेदो द्योतत एव। यथा धातोरेकस्वरादित्यादौ। एवं च समुच्चेतव्याभावात् च-शब्द औकारादेशमेवात्र समुच्चिनोति। तद्विषयस्तु विकल्पो व्यवस्थितविकल्पानुवृत्त्यैव लभ्यते इति नापूर्वत्वेन वक्तव्यः। अथ विकल्प्यते, औकारादेशे पक्षे किं भवतीत्याह—पक्षे मनुरिति। नन्वौकाराभावपक्षे ऐकारादेशस्याभ्यनुज्ञानं प्राप्तमिति कथं पक्षे मनुरित्युदाहृतम्, एवं मन्यते यदि

१. अत्रेत्यादिना सूत्रार्थः (मं०)
२. इतीप्रत्ययो (मं०)

विकल्प ऐत्वमनुजानीयाद्वाग्रहणमफलं स्यात्। ऐत्वौत्वयोरुभयोर्विधानात्। उभयोरपि पाक्षिक्याः प्रवृत्तेः सिद्धत्वात्। तस्माद्वा ग्रहणम् औत्त्वाभावपक्षे स्त्रीप्रत्ययशून्यमेव प्रयोगं समुच्चिनोति इति पक्षे मनुरित्युदाहृतम्। पूतक्रतु-मनुशब्दौ यदेत्यादि। पुंयोगादित्यस्यानुवृत्तेरेवं व्याख्यायते। एवमुत्तरसूत्रेष्व-पीति पुंयोगादित्यस्याभिसम्बन्धादेवं रूप उत्तरसूत्रेऽपि व्याख्याक्रमो बोद्धव्य इत्यर्थः।

कुसितानिनृषाकपेः २।७।५० (वृत्तावेवेदं सूत्रं न तु न्यासे)

दुहितुः पुत्रो वा ब्रह्मसूतभोजोऽप्रराजतः २।७।५१

दुहितृशब्दादी-प्रत्ययो वा भवतीति न संख्याया इत्यनेनेति योगभेदेन तस्य प्रतिषेधाभिधानादप्राप्तौ सत्यां पक्षे विधानं क्रियते। शैलपुत्रीत्यादयस्तु प्रयोगाः पुत्रीशब्देन गौरादित्वाद्विहिता स्त्रीप्रत्ययेन सह समासे कृते सेत्स्यन्ति। यद्येवम्, पुत्रीदुहितृशब्दयोर्विद्यमानत्वात् प्रयोगद्वयं सिद्धमित्यपार्थको योगा-रम्भः, सत्यम्, न्यायावगत एव त्वयमर्थः। एवं सूत्रकृता प्रदर्शितः।

जातेरयोपधादस्त्रीतः २।७।५२

जायेते अनया भिन्नेष्वभिन्नाभिधानप्रत्ययाविति जातिः। करणयुटं बाधित्वा कृत्ययुट् इति, जनेः क्त्ति-प्रत्ययः। धुटिखनिसनीत्यात्वम्। जाति-रित्युच्यते। केयं जातिर्नाम। तथाहि यदि जननेन प्राप्यते या सा जातिरिति [1]जातिलक्षणमङ्गीक्रियते तर्हि जन्मवतामेव जातित्वमभ्युपगतं स्यात् नाजन्मिनां नित्यानां परमाण्वादीनामिति। नैतत्, जातिलक्षणम्। अथ जायेते अनया भिन्नेष्वभिन्नावभिधानप्रत्ययाविति जातिरित्येतत् तस्य लक्ष-णम्। एवमपि जातिपदार्थवादिपक्षे देवदत्तवाच्यस्याप्यर्थस्य जातित्वं प्राप्नोति। अवस्थाभेदप्रकल्पितभेदस्य तस्याभिन्नाभिधानप्रत्ययहेतुत्वात्। एवं [2]व्यावृत्त्याभावात् जातेरिति विशेषेणोपादानमपार्थकं स्यादिति लोकप्रसिद्धं जातेः लक्षणमाह—आकृतिग्रहणेत्यादि। आकृतिशब्देनेहाकारः संस्थानविशेष उच्यते न तु जातिः, तस्या एव लक्ष्यत्वात्। जातेर्जातिग्रहणेनेति विशेषणा-नन्वयात्। गृह्यतेऽनेनेति ग्रहणमिति पूर्वं करणसामान्ये ग्रहणशब्दो युडन्तः। [3]संस्थीयते। तत्राकृतिशब्दसमवधाने स्त्रीत्वप्रतिपत्तिर्[4]भवन्त्यपि बहिरङ्गत्वादी-

१. जातिलक्षणमाश्रीयते (बा०)
२. व्यावर्त्याभावात् (भं०)
३. संस्क्रियते (भं०)
४. भवत्यपि (बा०)

प्रत्ययनिमित्तं न भवतीत्याकृतिग्रहणं यस्या इति विग्रहः। तेनाकृत्या संस्थानेन या गृह्यते सा जातिः अवयवसन्निवेशविशेषव्यङ्ग्येत्यर्थः। तदेतल्लक्षणं गोत्वादिजातेः। गोत्वादयो हि विषाणादिमदाकृतिव्यङ्ग्यत्वादाकृतिग्रहणाद् भवन्ति। ब्राह्मणत्वादिजातेस्त्वसङ्ग्रहः। ब्राह्मणक्षत्रियादीनां संस्थानस्य सदृशत्वादिति द्वितीयं लक्षणमाह—[1](लिङ्गानामित्यलिङ्गानामिति) कर्मणि षष्ठी। सर्वशब्दस्य च लिङ्गापेक्षत्वेऽपि गमकत्वात् सत्युपपदसमासे भजेर्विण्प्रत्ययः। यान्यपि लिङ्गानि सर्वाणि न भजते सापि जातिः, यथा ब्राह्मणत्वादिः। सा हि ब्राह्मणः ब्राह्मणीति स्त्रीपुंसावेव भजते न तु नपुंसकम्। तदादेस्तु सर्वलिङ्गत्वेऽप्याकृतिग्रहणाज्जातित्वोपपत्तिः। [2]सकृदित्यादि। सा च जातिरियं गौरित्येकत्रापि पिण्डे सकृदुपदिष्टा सती निर्गृहीतुं निश्चेतुं पिण्डान्तरेऽपि शक्यः। एकत्वान्नित्यत्वात् प्रत्येकं परिसमाप्तत्वाच्च एकत्वादेव हि पिण्डान्तरे निश्चीयते ([3]नित्यत्वमप्यत्र निबन्धनमनित्यत्वे तु पिण्डात्, विनाशे अपि पिण्डान्तरेण निश्चीयते।) प्रत्येकं च सा यदि परिसमाप्ता न भवेत् सर्वात्मना पिण्डान्तरेण ग्रहणमेव न भवेत्तस्याः सकृदाख्यातनिर्ग्राह्येत्यनेन चाद्यलक्षणद्वयशेषभूतेन देवदत्तः देवदत्तेत्यत्रासर्वलिङ्गत्वेऽपि न जातित्वम्। देवदत्तस्य संज्ञारूपतया नियतपिण्डसमवेतत्वात् सकलव्यक्तिसाधारण्यानुपपत्तेः पिण्डान्तरे देवदत्त इत्यसम्प्रत्ययात्। अथास्ति तत्रापि सम्प्रत्ययः। एवमपि वाचकशब्दमात्र सादृश्यादस्तु, न तु देवदत्तत्वं नाम किञ्चिदनेकव्यक्त्यनुगतमस्ति यत्पिण्डान्तरेण निर्गृह्यते ततो देवदत्तेत्यत्राजातित्वादी-प्रत्ययाभावः। तृतीयं लक्षणमाह—गोत्रञ्चेत्यादि। चरणशब्दाः शाखाध्यायिषु वर्तन्ते तैः क्रियासम्बन्धप्रवृत्तौ कठादिशब्दैः सह गोत्रमपत्यप्रत्ययान्तं च जातिः। पूर्वेण लक्षणद्वयेनाव्याप्तिः नाडायनादीनामसंस्थानव्यङ्ग्यत्वात् सर्वलिङ्गभाक्त्वाच्च जातिवाचि-यल्लिङ्गमिति लिङ्गमेव जातिरभिधानेऽभिधेयोपचारात्। तथा स्त्रियामेव यन्न वर्तत इत्येतेन स्त्रियां प्रत्यये विधीयमाने ([4]अस्त्रीत इत्यनेन) विरोध इति दर्शयति। यतः स्त्रियामन्यत्र च यस्य वृत्तिर्दृष्टा तद् यदा स्त्रियां वर्तते तदा तस्मादनेन प्रत्ययः। यत्तु सर्वदा स्त्रियामेव वर्तते तत्रास्त्रीत इति वचनान्निषेधः। कुक्कुटीति। एतदाकृतिग्रहणायाः जातेरुदाहरणम्। ब्राह्मणीत्यसर्वलिङ्गभाजः। नाडायनी, कठीति। एतेऽपि गोत्रचरणलक्षणायाः। मुण्डेति। मुण्डगुणभेदात्। स्त्रियां मुण्डव्यपदेश इति गुणशब्दोऽयं भवति, न तु

१. लिङ्गानां च न सर्वभागिति (भं०)
२. सकृदाख्यातनिर्ग्राह्येति (भं०)
३. न्यूनपाठः (भं०)
४. अस्त्रीति नानेन (भं०)

जातिशब्दः । बलाकेति पक्षिविशेषवृत्तिरयं जातिशब्दो नित्यं स्त्रियामेव वर्तते इती-प्रत्ययाभावः । अनुपसर्जनादित्येव बहुकुक्कुटा [1]पूः ।

पाकाद्यन्तात्तथैव च २।७।५३

अस्त्रीत इति प्रतिषेधः प्राप्त इत्योदनपाकादीनां नित्यस्त्रीविषयत्वात् । ओदनपाकीत्यादि । ओदनस्यैव पाकोऽस्या इति [2]विग्रहव्युत्पत्तिमात्रं चैतत्, समुदाय एव त्वोदनपाकादयः [3]कस्याञ्चिज्जातौ वर्तन्ते ।

इण्तः २।७।५४

इष्टि वशात्तसिति । अ सर्वनाम्नोऽपि पञ्चम्यन्तात् तसिष्यत इति । [4]अयं तस्प्रत्ययविधाविष्टस्तत्सामर्थ्यादित्यर्थः । उत्तरसूत्रस्यायं विषय [5]इत्यपुराणोऽयं योग इत्याहुः । दाक्षिप्रभृतीनां जातित्वं गोत्र च चरणैस्सहेति गोत्रप्रत्ययान्तत्वात् ।

मनुष्यजातेः ई २।७।५५

अर्वन्ती कुन्तीति । अर्वन्तिकुन्तिशब्दाभ्यामपत्येऽर्थे ण्यः । तस्य गर्गयस्कविदादीनां चेति च-शब्दाल्लुक् तत ई-प्रत्ययः । दारदिति । दरदोऽपत्य स्त्रीत्यणः पूर्ववल्लुक् । पुनः जातिग्रहणं योपधादपि यथा स्यादिति । तदा ([6]उदमेयस्यापत्यमौदमेयी) इण्णन्तादीकारः ।

ऊङुतः २।७।५६

ङकार इत्यादिपुंवद्भावमाषित([7]पुंस्कादनूङ्) पूरण्यादिष्विति निर्देशे सन्देहस्स्यात् । कुररिति । कुरोरपत्यं स्त्रीति ण्य-प्रत्ययः, ण्यस्य पूर्ववल्लुक् । ऊङ् प्रत्ययः । ब्रह्मबन्धूरिति । ब्रह्मबधुरस्या इति विग्रहः । ब्राह्मणजातौ गुणहीनायां कस्याश्चिदयं शब्दो वर्तते । ककारस्तु समासान्तोऽत्र न भवति । जीवभर्तरीति ज्ञापकाद् अनित्यत्वात् समासान्तस्य । ऊङिति दीर्घनिर्देशो वैचित्र्यार्थः । ततोऽपि तपरकरणमपि तत्कालार्थं तु तन्न भवति । मनुष्य-

---

१. नगरी (भं०)
२. विग्रहः व्युत्पत्तिमात्रम् (?)
३. कस्याश्चिज्जातौ (भं०)
४. यूयम् (बा०)
५. पुराणोऽयम् (भं०)
६. दमेयस्यापत्यं दमेयी (भं०)
७. पुंस्केत्यत्रायं ङकारो विशेषणार्थः, असति तर्हि तस्मिन्भाषितपुंस्कात्व(भं०)

जातिवाचिन ऊकारान्तस्यासम्भवात्। कथम् [1]अधुः ब्राह्मणी, अयोपधादिति वर्तते।

षङ्गु कद्रुतः २।७।५७ (वृत्तावेवेदं सूत्रं न तु न्यासे)

[2]सफलक्षणवामादेरूरोः २।७।५८

सफोरूरिति संश्लिष्टो ऊरुरित्यर्थः। सह संहित सहितादेरित्यादि। एतच्चसफलक्षणवामादिति कर्तव्ये आदिग्रहणाल्लभ्यते। सहोरूरिति। सहेते इति। सहावच्प्रत्यय महानुरू यस्येति विग्रहः। अव्ययं वा सह शब्दो विद्यमानार्थवृत्तिः। तेन विद्यमाना ऊरुः यस्याः इति विग्रहः। संहितोरुः, संहितोरुरिति। संहितशब्दो सन्धीयते स्म इति सम्पूर्वस्य धाञः क्तप्रत्यये परे दधातेर्हिरिति सहितशब्देऽपि विद्यमानं हितमस्येति विग्रहः। नन्वयं सम्-शब्दस्य हितशब्दे परे मकारलोपः, एवं हि सत्येकदेशविकृतस्यानन्यत्वात् संहितशब्देनैव सहितशब्दाद्भविष्यतीति पृथक् सहितग्रहणमपार्थकं स्यात्।

औपम्यसंहितात् २।७।५९ (वृत्तावेवेदं सूत्रं न तु न्यासे)

बाह्वन्ताच्च संज्ञायाम् २।७।६०

ननु केवलो बाहुशब्दः संज्ञाशब्दो न भवतीति संज्ञाग्रहणादेव तदन्तत्वमवाप्यते इति किमन्तग्रहणेन, असदेतत्, इदानीमपि हि कस्याञ्चिद् योषिति संज्ञात्वेन विनियुज्यमानं बाहुशब्दं को निवारयेदिति केवलात् ततः संज्ञाभूतान्माभूत्। तदन्ताद् यथा स्यादिति समुदायस्य संज्ञात्वं प्रतिपत्त्यर्थमन्तग्रहणम्।

वलोपश्श्वशुनस्य च २।७।६१

वयोर्लोपः वलोप इति श्रूयमाणस्यैव वकारस्य लोपः कस्मान्न विज्ञास्यते, उच्यते—संज्ञाग्रहणानुवृत्त्या संज्ञायामयं लोपः, न च श्रूयमाणवकारलोपे सति संज्ञा गम्यत इत्युकाराकारयोरयं लोपो विज्ञायते।

([3]शिष्यहितान्यासे स्त्रीप्रत्ययपादः)

---

१. अध्वर्युः (भं०)
२. सहलक्ष्मणवामादेरुरौ (शि० हि० वृ०)
३. भट्टोग्रभूतिकृते शिष्यहितान्यासे शिष्यालोकाभिधाने नामप्रकरणे सप्तमः पादः (भं०)

आख्यातप्रकरणम्

प्रथमः पादः

अथ परस्मै पदानि ३।१।१

[1]परार्थानि पदानीति तादर्थ्यचतुर्थ्यन्तस्य परशब्दस्य पदशब्देन कृते समासे तस्था लोप्या इत्यादिना विभक्तिलोपो न भवति तद्धिधौ वा तृतीयासप्तम्योरित्यतो वा शब्दस्य व्यवस्थितविभाषावाचिनोऽभिसम्बन्धात्। वक्ष्यमाणेत्यादि बहुत्वापेक्षया चायं बहुत्वनिर्देशः। परस्मैपदानीत्येवंरूपा त्विय संज्ञा न भवति। यतः आवर्तिन्यः संज्ञाः भवन्ति। न च परस्मै इति परस्मै-शब्देन पदानीत्ययं शब्दः क्वचिदावर्तते, किन्तर्हि परस्मैपदशब्दः। यद्येवमाशिपि च परस्मै इति परस्मै-शब्देन व्यवहारो न सिध्यति। सत्यभामा भामेत्यादिवदेकदेशेन समुदायस्य ग्रहणात् सेत्स्यति। अधिकारोऽयम् इति संज्ञात्वेनेति शेषः। वर्तमाना ति तस् अन्तीत्यादिषूपतिष्ठत इति [2]तत्रैवोपस्थाने सति त्यादीनि परस्मैपदसंज्ञानि भवन्तीति विशिष्टवाक्यार्थोत्थानादाकाङ्क्षा विनिवृत्तेः [3]अधिकारार्थत्वेनोपयुज्यमानोऽयमथ शब्द इति यो मन्यते तं प्रत्याह—अथ शब्दो मङ्गलार्थ इति। अगर्हिताभीष्टार्थसिद्धिर्मङ्गलम् तदर्थः प्रयोजनं यस्यार्थशब्दस्य अथ शब्दस्य स तथोक्तः स्यादिपद संस्कृतमनन्तरं त्यादिपदस्यावसरो वर्तते इत्यानन्तर्यार्थत्वप्रतिपादनम्। पुनरस्याथ-शब्दस्य फलशून्यमेवेति किं तेन।

नव पराण्यात्मने ३।१।२

पराणीत्यत्र कृते नुकारागमे परत्वनित्यत्वाभ्यां कृतेऽपि णत्वे घुटिचासम्बुद्धाविति च-शब्दादुपधादीर्घः। सर्वत्रात्मन इत्यादि व्यवहारादात्मन इत्येतावती संज्ञेयमिति यस्य भ्रमस्तं प्रत्याह—आत्मने पदानीति। आत्मने पदानि भावकर्मणोरित्यादिव्यवहारादात्मनेपदशब्दोऽयमित्याह—संज्ञात्वेनाधिक्रियते, स च प्राधान्यात् प्रधानविभक्त्या प्रथमया निर्दिष्ट इत्यर्थः।

---

१. परार्थं पदानि परस्मै पदानीति (भं०)
२. तत्रैवास्योपस्थाने (भं०)
३. अधिकाराङ्गत्वेनानुपयुज्यमानो (भं०)

कस्मात्तर्हि पदानीत्येतन्नाश्रीयत[1] इत्याह—आदिलोप इत्यादि। पूर्वसूत्रात्तु पदानीत्येतदशक्यमनुवर्तयितुम्, तस्य संज्ञापदैकदेशस्य पृथग्रूपतयाबुद्धावपरिस्फुरत इहाकृष्टुमशक्यत्वात्। यद्येवं सर्वत्र आत्मन इत्यादौ कथमात्मने शब्देन व्यवहारः, उच्यत, तत्रापि पदानीत्युपात्तं तत्तु पूर्ववल्लुप्यते। अयमप्यधिकार इति नवशब्दस्य संख्याशब्दस्य संख्येयनिष्ठत्वात्। संख्येयस्य च संज्ञिनः कस्यचिदनुपादानात्साकाङ्क्षत्वे गति पारार्थ्यादधिकारोऽयमिति भावः। तेन नवेति पराणि इति आत्मने पदानि इति चैतत्त्रयमुत्तरत्राप्यधिक्रियते।

त्रीणि त्रीणि प्रथममध्यमोत्तमाः ३।१।३

त्रीणीत्यस्य परस्य स्थाने द्विश्च पदमिति वचनाद्वीप्साविषये त्रीणि त्रीणीत्ययं शब्दः आदिश्यत इति स्थानिवद्भावात्त्रीण्येकमेवेदं पदम्। अन्ये तु सत्यपि [2]स्थानिवत्वे स्वगतमादेशस्य भेदमाश्रित्य पदद्वयमेतदित्याहुः। वचनापेक्षया चैष नपुंसकेन निर्देशः, मध्ये भवः मध्यमः, तमादित्वान्म-प्रत्ययः, उत्तम इत्युच्छब्दात् तद्गतार्थवाचिनस्तमादित्वात्तमप्रत्ययः। परस्मैपदानामात्मनेपदानां चेति। नन्वानन्तर्यादात्मनेपदग्रहणस्यैवानुवृत्तिः न्याय्या, अस्त्येतत्। इच्-प्रत्ययविधौ तु प्रथमग्रहणे कृते यदात्मनेग्रहणं करोति ततो विज्ञायते प्रथमादिसंज्ञाविधौ परस्मैपदग्रहणमप्यनुवर्तत इति प्रथममध्यमोत्तमसंज्ञानामित्यादि। कथं पुनरेषां प्रथमादिव्यपदेशभाजां पुरुषसंज्ञा बोद्धुं शक्यत इत्याह॥

युगपद्वचने परः पुरुषाणाम् ३।१।४

युगपद्वचन इति तत्पुरुष इति विभक्तयो द्वितीयाद्या इत्यादिना प्रथमान्तयोरप्ययं तत्पुरुषः। यत उक्तं द्वितीयाद्यभावेऽपि क्वचिद्, दृश्यते [3]समास इति। परिभाषेयमिति। तत्र परः पुरुषः परिभाष्यमाणः धातुः परिभाषणभाक्। युगपद्वचन इति सप्तम्यन्तमपि। पुरुषाणामिति निर्धारणषष्ठी। परिभाषास्वरूपं प्रदर्शयितुमाह—पुरुषाणामित्यादि। युगपद्वचनइत्यस्यार्थं व्यक्तीकर्तुमाह—तुल्यकालाभिधान इति। धातोः परो भवतीति। अथ धातोरित्येतत्कुतः, उच्यते—परिभाषेयम्, स च यत्र किञ्चित्कार्यं विधीयते [4]तत्रानियमनिवारणायोपतिष्ठते यथा शेषात्कर्तरि परस्मैपदम्। आत्मने पदानि भावकर्मणोरित्यादिषु। अत्र च धातोरेकस्वरादित्यतो धातोरित्यपेक्षते। एवं च विधि-

---

१. न श्रूयत (भं०)
२. स्थानिवद्भावे (भं०)
३. समासान्त (वा०)
४. तत्र नियमनिर्धारणायोपतिष्ठते (भं०)

प्रदेशे परिभाषाया व्यापारादर्थादिह धातोरित्येतल्लभ्यते । इदानीं परस्मैपदादिविधौ यादृश्यनियमे प्राप्ते वचनेनानेन नियमः क्रियते । तं नियमं प्रदर्शयितुमाह—एकस्मिन्धात्वर्थ इत्यादि । एतेनैकधात्वर्थविषयतया साधनत्रयोपनिपाते सत्यनियमस्य प्राप्तिं दर्शयति । अत्रेत्यादि । स च त्वं च अहं च पचाम इत्युदाहरणानाम् युष्मदस्मदां [1]त्रयाणां पाकार्थं प्रति साधनत्वेनावस्थितानां प्रयोगे नाम्नि प्रयुज्यमानेऽपीत्यादि सूत्रत्रयारम्भसामर्थ्यात् पर्यायेण सर्वे प्रथममध्यमोत्तमाः प्राप्नुवन्ति । तेषामित्थं प्राप्तौ सत्यामेतत्सूत्रारम्भात् परः पुरुषः उत्तम एव प्रवर्तते । एतच्च व्यक्तौ पदार्थे उक्तम् । तत्र हि यद्यपि स पचति, त्वं पचसि, अहं पचामीत्यत्राविरोधिनि निजे विषये प्रथमादयः सावकाशाः, तथापि विरोधिविषये तेषां प्रवृत्त्यभावे सति नाम्नि प्रयुज्यमानेऽपीत्यादिलक्षणानर्थक्यप्रसङ्गात् पर्यायः प्राप्नोति । यतो व्यक्तौ पदार्थे प्रति लक्ष्यं लक्षणं प्रवर्तते । एवं च यस्मिन्नेव लक्ष्ये लक्षणं न प्रवर्तते तल्लक्ष्यविषये तस्य लक्षणस्यानर्थक्यं प्रसज्येत इति लक्षणानर्थक्यभयादेव प्रतिव्यक्तिलक्षणप्रवृत्त्या विरोधिविषयेऽपि पर्यायेण सर्वेषां प्रथमादीनामस्ति प्राप्तिः, जातौ तु पदार्थे प्रवृत्तिरेवैतेषां न भवेत् स्वविषये चरितार्थत्वाच्च न लक्षणानर्थक्याप्रसङ्गः । तदेवं पर्याये प्रवृत्त्यभावे वा प्राप्ते परिभाषार्थं वचनमिदमारभ्यते । यद्येवं पुरुषाणामिति बहुवचननिर्देशाद् द्वयोस्तुल्यकालप्राप्तौ परो न सिध्यतीत्याह —पुरुषाणामिति बहुवचननिर्देशमप्रधानमिति द्वित्वम् । यथैककर्तृकयोरित्यत्र । तेन किं सिद्धं भवतीत्याह – तेनेत्यादि । प्रथमाद्यनुवृत्तौ पुरुषग्रहणं प्रथमादीनां पुरुषसंज्ञास्तित्वप्रतिपत्त्यर्थम् । अन्ये तु किमेषां फलशून्यया [2]गुरुसंज्ञयेति मन्यमानाः प्रपञ्चे [3]गुरुलघुत्वमचिन्तनीयमिति समाधानमाहुः [4]प्रपञ्चार्थो ह्ययं योगः । तथा चाह पूर्वोक्तपरोक्तपरिभाषयेत्यादि ।

नाम्नि प्रयुज्यमानेऽपि प्रथमः ३।१।५

प्र-पूर्वाद् युजेर्वर्तमाने अन्तृङ्डानशावित्यानश् । सार्वधातुके यण्, आन्सोऽन्त इति अनः मागमः । धातोः प्रथमो भवतीति । कुत एतत्, उच्यते—शेषात् कर्तरि परस्मैपदम् । आत्मनेपदानि भावकर्मणोरित्यादिना प्रथमपुरुषस्य सिद्धत्वाद् वचनमिदमारभ्यमाणं नियमार्थं विज्ञायते, नियमश्च यादृश एव विषये विधानं तादृश एव विषये प्रवर्तते । प्रथमपुरुषस्य च धातोर्विधान-

---

१. त्रयाणामेकार्थम् (मं०)
२. पुरुष (मं०)
३. लाघव (मं०)
४. न्यूनपाठः (मं०)

मित्यर्थान्नियमविधावपि धातुप्रकृतिर्लभ्यते । प्रत्यस्य चायं नियमो नास्त्येव । प्रथम इति । ननूपपदे नाम्नि प्रथम एवेति कुतः, नाम्न्युपपदे देवदत्तेन कुर्वता इत्यादौ शन्तृङ्शानचादिप्रत्ययाभावप्रसङ्गात् । एवमुत्तरयोगावपि पुरुषनियमार्थावेव कथं पुनर्नाम्न्येव प्रथम इत्यभिहिते सति प्रत्ययनियमशक्यो विज्ञातुम् । उच्यते, यत एवकारकरणं ततोऽन्यत्रावधारणं भवतीति नाम्नीत्यत एवकारः परश्रूयमाणः प्रथमपुरुषं नाम्नि प्रतिबध्नातीति प्रत्ययस्यैवायं नियमो विज्ञायते । नाम तु प्रत्ययेन प्रतिबद्धमिति तत्रोपपदे प्रत्ययान्तराणि प्रवर्तन्त एव । अन्ये तु तुल्यजातीयविषयव्यावृत्तिकारित्वान्नियमानां नाम्नि प्रथम एवेत्युपपदनियमेऽपि मध्यमोत्तमयोरेव व्यावृत्तिर्विज्ञास्यते न तु शन्तृङ्शानादेः [1]प्रत्ययस्येत्युपपदनियमोऽप्यदुष्ट इत्याहुः । अपरे तु प्रत्ययस्य विधीयमानत्वात्प्राधान्यमिति तन्नियम एव युक्त आश्रयितुमिति मन्यन्ते । अपि-शब्दे प्रयुज्यमाने इति गतार्थत्वात् अनु[2]च्चार्यमाणे । ननु वक्ष्यमाणेन योगद्वयेन मध्यमोत्तमयोर्यथाक्रमं युष्मदस्मद्विषये नियतत्वात् अर्थात् प्रथमपुरुषो नाम्न्येव भविष्यतीत्यपार्थको योगारम्भः, नैतत्, अनारम्भे सत्युत्तरत्र प्रत्ययनियमपक्षे युष्मदस्मदोरनियतत्वाद् यथा तयोः प्रत्ययान्तरं प्रवर्तते । एवं प्रथमोऽपि प्रवर्तते, तस्येत्थं प्राप्तप्रवृत्तेः प्रथमस्य नाम्नि नैयत्यमापादयितुमयं योग आरभ्यते । ननु प्रग्रहणं किमर्थमिति प्रशब्दान्वितात् युजेः उच्चारणलक्षणोऽर्थो यः प्रतीयते स युज्यमानशब्देन प्रत्येष्यते, कुतः, कारकशक्तियुक्तं हि विभक्त्यन्तं लिङ्गं तस्य धातुना युज्यमानतायां चेत्प्रत्ययः तदा सामर्थ्यलभ्यमेव तस्योच्चारणम्, अनुच्चार्यमाणस्य सम्बन्धायोगादिति नार्थः प्रग्रहणेनेति भावः । अत्रोच्यत इत्यादिना परिहारमाह—नाम्नो धातुना सह या प्रयुज्यमानता तस्याः यः प्रकर्षातिशयः तस्य प्रतिपत्त्यर्थं ग्रहणं क्रियते । कः पुनः युज्यमानतायाः प्रकर्ष इत्याह—तेनेत्यादि । विभक्त्यन्तेन धातुना सामानाधिकरण्येनैककारकतया सम्बध्यमाने नाम्न्युपपदे प्रथमपुरुष इत्यसौ युज्यमानतायाः प्रकर्षः । यथा—स पचतीत्यत्र । अत्र हि द्वयोरपि नामधात्वर्थयोर्द्वयोरपि कर्तृनिष्ठत्वात्सामानाधिकरण्यमेव । देवदत्तेन पूज्यमेत्वमित्यत्र तु नाम्नो धात्वर्थेन नास्ति सामानाधिकरण्यम् । कथं नास्तीत्याह— अत्रेत्यादि । देवदत्तस्यात्र कर्तृत्वं कर्तरि चेति ततः कर्तरि तृतीयाविधानात् धात्वर्थस्य तु कर्मविषयत्वमात्मनेपदानि भावकर्मणोरिति कर्मण्यात्मनेपदप्रवृत्तेः । तेनात्र कारकभेदावगमे प्रथमपुरुषो मा [3]भूदित्येवमर्थं प्रग्रहणम् । नन्वयं युष्मच्छब्दसामानाधिकरण्यात् परत्वा-

१. अधिकपाठः (भं०)
२. इतोऽग्रे भ्रष्टपाठो प्रतीयते (ननु पूर्वम्)
३. भूदित्येतदर्थम् (भं०)

न्मध्यमस्य विषयः [1]तत्कथमेवात्र प्रथमपुरुषस्य प्राप्तिः। एवं मन्यते, तेषां परमिति योगारम्भाज्जायते, पूर्वोक्तपरोक्तपरिभाषा सव्यभिचारेति। एवं च प्रथमपुरुषोऽत्यत्राशङ्क्यत इति तुल्यकारकविषयप्रतिपत्त्यर्थं प्रग्रहणं कर्तव्यमेव। न कर्तव्यम्, कालभावयोस्सप्तमीत्यनेन हि भावविहितया नाम्नीत्यनयैव सप्तम्यैव योगे लब्धे यद् युज्यमानग्रहणं कृतं तान्येव विशिष्टयोग प्रतिपत्त्यर्थत्वान्नामधात्वर्थयोरेवकारविषयतया प्रथमपुरुषो विज्ञास्यत इत्येवं तर्ह्यस्यैवार्थस्य द्योतनार्थं प्रग्रहणम्।

युष्मदि मध्यमः ३।१।६

युष्मास्मभ्यां मदिगित्यत्र यस्सिद्धौ युष्मच्छब्दस्तदनुकरणभूत इह युष्मच्छब्दो निर्दिश्यते। ततोऽनुकार्येणार्थेनार्थवत्वात्सप्तमी। यद्येवं तस्यां परतो [2]युष्मदोरेकत्व इत्यनेन लक्षणेन त्वदादेशः। तस्य च एत्वमस्थानिनीत्येवं कस्मान्न भवतीत्याह—युष्मदीत्यत्रेत्यादि। अनुकार्यप्रतिपादनपरो योऽयमत्र युष्मदीति निर्देशः ततो हेतोस्त्वदादेशादेर्लक्षणस्याभावः। लक्षणप्रवृत्तौ हि सत्यामनुकरणरूपविनाशः प्रसज्येत तथा च वैसादृश्यादनुकार्यप्रत्यायनं न भवेत्। यद्यपि च त्वयीत्यपि कृते युष्मदर्थावसायोऽस्त्येव तथाप्येवं कृते सत्येकत्वविषय एवायं मध्यम इति कस्यचिदाशङ्का स्यादिति तन्निवृत्तये लक्षणाभावः। एवमुत्तरसूत्रेऽपि इति लक्षणाभाव इति शेषः। तत्रापि ह्येतल्लक्षणप्रवृत्त्या तवमयीति रूपं प्रसज्येत, युष्मदि प्रयुज्यमान इति पूर्ववत्सिद्धौ सत्यां मध्यमः[3] नियमार्थत्वादस्य योगस्य युष्मद्येव प्रयुज्यमान इति मन्तव्यम्। एवमुत्तरत्रापि येन विधिस्तदन्तस्येति तदन्तविधिविज्ञानादिहापि भवति परम त्वं पचसि इति। यद्येवं त्वामतिक्रान्तः अतित्वम् पचतीत्यत्रापि प्राप्नोति, नैतत्, युष्मदर्थेन हि यत्र धातोस्समानाधिकरणं तत्र मध्यमः। अतित्वामित्यत्र युष्मदर्थोपसर्जनभूतेनातिक्रान्तार्थेन सामानाधिकरण्यमिति तस्य नासौ विषयः। अत्वं त्वं सम्पद्यते त्वद्भवतीत्यत्र तु च्व्यन्ते युष्मद्युपपदे न भवति। अत्वयि त्वच्छब्दप्रयोगाद् युष्मदो गौणार्थत्वात्। यद्येवं त्वदादेशोऽपि न प्राप्नोति, नैतत्, गौणमुख्यव्यवहारे ह्ययमर्थविषयः अर्थाश्रय एव कार्ये कर्तव्ये प्रवर्तते। मध्यमप्रवृत्तिलक्षणं चेदं कार्यमर्थाश्रयं युष्मदि सामानाधिकरण्य इत्येवं विधानात्। सामानाधिकरण्यं चार्थनिमित्तमिति मध्यमस्याप्रवृत्तौ युक्तो गौणार्थत्वादिति परिहारः। त्वदादेशस्तु शब्दमात्राश्रयत्व इति कर्तव्ये गौणमुख्यन्यायो

१. तत्केवात्र (वा०+भं०)
२. युष्मदः त्वन्मदोरेकत्वे (भं०)
३ अधिकपाठः (भं०)

नावतरति। तेनासौ भवत्येव। यद्यपि चासावेकत्ववचनादर्थाश्रयोऽपि तथापि तस्यैकत्व इति लक्षणस्यार्थस्यात्र गौणमुख्यव्यवहारसम्भवाद् गौणमुख्यपरिभाषा त्वदादेशविधौ नाश्रीयत इति शब्दमात्राश्रयत्वं त्वदादेशस्य वर्ण्यते। भवान्करोतीत्यादौ तु मध्यमो न भवति युष्मदर्थाभावात्। सम्बोधनविषयो हि युष्मदर्थः। न च भवच्छब्दप्रयोगे सम्बोधनं प्रतीयते या त्वनयोः पर्यायत्वप्रतिपत्तिस्सा विषयैक्यात्। यत्र सम्बोधनविषयत्वं तत्र भवत्येव मध्यमः। यथा भवति भिक्षां देहीति। विषयान्तरे युष्मदर्थाभावान्न भवति, यथा [1]भवति भिक्षां ददातु भवान्करोतीत्यादौ।

अदाब्दाधो दाः [2]३।१।७

दाप् लवने दैप् शोधन इत्यनयोः यत्सामान्यं दाबिति रूपं तदिह गृह्यत इति। ननु कथमेतत्, यावता दैपो दाबिति रूपमात्वं विना न घटते, तच्च तस्य न प्राप्नोतीत्यसन्ध्यक्षरान्तत्वात्, सत्यम्, अनुबन्धानां तु कार्यार्थमासञ्जनमिति तेषां प्रयोगाननुपातित्वात्। ष्ये्ञो अनव्ययतेरित्यात्वनिषेधारम्भाच्चानुबन्धकृतमसन्ध्यक्षरान्तत्वं नाश्रीयते, तेन दैपस्सन्ध्यक्षरान्तत्वादात्वे प्रवृत्ते दाबिति रूपं भवत्येव। सामान्यमिति चानेनैतद् दर्शयति। दाब्दैपोः यद् दाबिति रूपमात्रमुभयानुगतं तद् गृह्यत इति। एवं च कृत्वा दैपो दाबिति [3]रूपस्तु लाक्षणिकत्वात्कथं निषेधे ग्रहणमिति। न चोदनीयमेतत्, नहि दाबिति रूपमात्रपरिग्रहे सति लक्षणप्रतिपदोक्तपरिभाषोपतिष्ठते। इदं लाक्षणिकम् इदं प्रतिपदोक्तमिति विशेषावभासे सति अस्या उपस्थानात्। यद् वा दैपः पानुबन्धकरणसामर्थ्यादनुपस्थानमस्याः स्यात्। तस्य हि पानुबन्धोऽदाबित्यत्र निषेधे दापिदैपोरपि परिग्रहो यथा स्यादिति क्रियते। यदि चास्या उपस्थानं स्यात् ततो दैपोः दाब्रूपतया लाक्षणिकत्वाददाबित्यत्र निषेधे ग्रहणम्। सन्ध्यक्षरान्तानामकारा इत्यात्वे कृते यत्सामान्यमित्येतेन चतुःसंख्यावच्छिन्न दा-रूपधातुगतस्य चेति रूपसामान्यपरिग्रहात्पूर्ववदनुपस्थानं लक्षणप्रतिपदोक्तपरिभाषाया इति दर्शयति। तथा च दोदेङावपि दा-रूपो गृह्यते। एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येत्येतदपि नोपतिष्ठते। रूपसामान्य-परिग्रहादेवेहापि दाञोऽपि ग्रहणम्। धा-इति यद्रूपमिति सामान्यमिति शेषः। तद् धा-ग्रहणेन गृह्यत इति सम्बध्यते। ईत्वं स्यादिति। दामा गायतीत्यादिना अदाबित्यत्र विशेषणार्थ इति पकारेण विशेषणेनादाबित्यत्र निषेधे

१. भवती (मं०)
२. ३।१।८ (दु० वृ०)
३. रूपस्य (मं०)

दाब्दैपोः परिग्रहो यथा स्यादित्येतदर्थः तयो पकार आसक्तः इत्यर्थः ।

क्रियाभावो धातुः [1]३।१।८

भवतेरिन्नन्तादिति सत्तार्थस्य भवतेरकर्मकत्वात्क्रियालक्षणेन कर्मणा सम्बन्धो नोपपद्यत इति कर्मोपपदलक्षणस्ततो प्रत्ययो न प्राप्नोतीत्यतो इन्नन्तादित्युक्तम् । इन्नन्ताः हि धातवो प्रयोज्येन कर्मणा सकर्मकतां प्रतिपद्यन्ते [2]यथा—शेते देवदत्तः, शाययति देवदत्तम्, यद्येवं यो भावयतीत्यस्यार्थः स करोतीत्यस्यार्थ इति कृत्वा क्रियायाः कर्ता क्रियाभाव-[3]शब्देनाभिधेय इति आशङ्क्याह—यश्शब्दः क्रियां [4]भावयति प्रतिपादयतीत्येतेन भावयतिरिह प्रतिपादने वर्तते इति दर्शयति । तेन यश्शब्दः क्रियां भावयति प्रतिपादयतीति प्रतिपत्तृबुद्धावुपस्थापयति ([5]क्रियाविशेषप्रतीतिमुपजनयति स धातुसंज्ञ इत्यर्थः । का पुनरियं क्रिया नाम इत्याह—क्रियत इति) क्रियेति साध्यमानावस्था पूर्वापरीभूतावयवैकफलमुद्दिश्य प्रवर्तमानै[6]कत्वेनाध्यवसितो व्यापारात्[7]साक्षात्प्रवाहः क्रियेत्यर्थः । यद्येवं घण्टाया ध्वनिरिति सिद्धस्वभावोऽपि ध्वनिः घण्टां ध्वनतीत्याख्यातेन कथं साध्यतया प्रत्याय्यते, उच्यते, यथा साध्यरूपामपि क्रियां कृदन्तशब्दः सिद्धस्वभावामाचष्टे तथैव सिद्धरूपस्यापि साध्यरूपतया प्रतीतिर्भविष्यति । शब्दव्यापाराधीनो ह्ययं क्रियाद्रव्यप्रविवेकः न वस्त्वर्थनिबन्धनः । एवं च क्वचिच्छब्दस्साध्यरूपस्यापि सिद्धरूपतामाचष्टे । यथा पाकः पाक इति, तथा चात्र सिद्धवस्तुविषये द्विवचनबहुवचने प्रवर्तते । क्वचिच्च स एव शब्दः सिद्धस्वभावमपि पूर्वापरीभूतावयवत्वसमाश्रयणेन साध्यरूपतया प्रत्याययतीति कोऽत्र भ्रमः । गडि वदनैकदेशे, खर्ददन्तशूक इत्यादीनां तु द्रव्य[8]वृत्तीनामभिधीयते क्रियावाचित्वेऽपि धातुत्वं गणपाठसामर्थ्यात् तच्च गण्डादिशब्दसिद्धये एव सत्यां धातुसंज्ञायां स्यादय इति । नन्ववगते क्रियावाचित्वे धातुसंज्ञा स्यात्, न च पचतीत्यादौ केवलात् पच्छब्दादिमात्रः कश्चिदर्थोऽवगम्यते, अस्त्येतत्, अन्वयव्यतिरेकाभ्यां तु क्रियावचनाः पचादयः ।

---

१. ३।१।९ (दु० वृ०)
२. तथा (भं०)
३. शब्देनाभिधीयते (भं०)
४. न्यूनपाठः (भं०)
५. कोष्ठांकितः न्यूनपाठः (भं०)
६. एकत्वेनावस्थितो (भं०)
७. साक्षण (वा०+भं०)
८. अभिधीयते इति न्यूनपाठः (भं०)

तथा च पचति पच्यत इति कर्तृभेदेऽप्यवगम्यमाने पक्तिमात्रमनुगतमेव प्रतीयते। अतो बुध्यामहे कारकभेदावगतावपि यत्पक्तिमात्रानुगमनं स नूनं पचतेऽर्थे इति। ननु साध्यमानोऽर्थः क्रिया। न च तस्याः साध्यत्वं प्रत्ययेन साधनाभिधायिना विना प्रतीयते। तत्कथं पचतीत्यादौ केवलात्प्रकृतिमात्रात् क्रियावाचित्वप्रतीतिः स्यात्, सत्यम्। लौकिकी मा भूत्, शास्त्रीया त्वस्त्येव अन्वयव्यतिरेकसमधिगम्या। न च बाधिता प्रतीतिरपह्नोतुं शक्यते, तस्मादन्वयव्यतिरेकाभ्यामवगतक्रियावचनत्वात् पचादयो धातुसंज्ञाः। [1]अथवा धातुरिति पूर्वाचार्यसंज्ञां प्रति कोऽभिनिवेश इत्याह—पूर्वाचार्यसंज्ञाङ्गीकरणमित्यादि। तेन किं सिद्धं भवतीत्याह—तेनेत्यादि। प्रभुशब्दस्य सोपसर्गस्य समुदायस्य धातूपसर्गारब्धस्य विशिष्टसत्ता लक्षणार्थाभिधायित्वात् क्रियावाचित्वात् प्राप्ता धातुसंज्ञा पूर्वाचार्यसंज्ञाङ्गीकरणान्न भवति। प्रभृतेः पाठाभावात् प्रशब्दः प्रागकारागमः स्यादिति प्रभूशब्दस्य धातुत्वाद् धात्वादिसंशब्दनेन च अकारागमस्य प्रवृत्तेः। यद्येवं स्तुन्भुप्रभृतीनां सौत्राणां पाठाभावाद् धातुसंज्ञा न सिध्यतीत्याह—सौत्राणामित्यादि। स्तन्भु स्तुन्भु स्कन्भु स्कुन्भु स्तूञ्भ्यः चेत्यादौ पूर्वाचार्यसूत्रे ये भवन्ति ते सौत्राः एवमादेरणिष्यत इति भावेऽर्थेऽण्-प्रत्ययः। तेषां धातुसंज्ञा वक्तव्या। न चेदमपूर्वाभिधानमपि शब्दानुवृत्तेरेव सिद्धत्वात्। ननु तेषामधातुत्वे सति धातुविहिते क्त्वा-प्रत्यये परस्मिन्निड्-विकल्पप्रवृत्त्यर्थम्, उद्-अनुबन्धकरणमपार्थकं स्यात्। ततस्तत्करणबलादेषां धातुत्वं भविष्यति, सत्यम्। क्त्वा-प्रत्यये एव धात्वर्थमित्थं विज्ञायते। प्रत्ययान्तरधातुविहितमेभ्यो न भवेत्। अथापि भवेदेवमपि जु-प्रभृतीनां सौत्राणां केन संज्ञा स्यादित्यपि शब्दानुवृत्तिरेव ज्यायसी। पूर्वाचार्यसंज्ञापरिग्रहादेव क्रियाभावग्रहणं लब्धम्। अक्रियावाचिनां पूर्वाचार्यैरनङ्गीकृतत्वाद् धातुसंज्ञाया इति किं क्रियाभावग्रहणेनेत्यभिप्रायेणाह—क्रियाभाव इति किमिति। द्रव्यार्थवृत्तीनां भू-प्रभृतीनामप्यविशेषात् धातुसंज्ञा समाशङ्क्यत इति आकूतेन प्रत्युदाहरति भूर्वेति, भू-शब्दो भूमिवाचीत्यादिना अक्रियावाचित्वं भूर्वाशब्दयोर्दर्शयति।

काले [2]३।१।९

कृतव्युत्पत्तिरभिहितार्थश्च कालशब्दः, कालभावयोः सप्तमीत्यत्र अधिकारोऽयमित्यधिक्रियते प्रस्तूयत इत्यधिकारः। किं पुनरत्राधिक्रियते, काले शब्दः। यद्येवं प्रधानविभक्त्या प्रथमयासौ निर्देष्टव्यः न तु सप्तम्या। नहि तत्र

१. धातुत्वम् (भं०)
२. ३।१।१० (दु०वृ०)

किञ्चिदधिक्रियते, अस्त्येतत्, किं तु सेनातीत इत्यादौ अधिकारो प्रस्थानवाक्ये यदतीत इति पदं सप्तम्यन्तं कालशब्दस्य विशेष्यत्वेनाभिमतं विद्यते तद्धर्मापित्या काले इत्ययं सप्तम्या निर्देशः। अन्यथा कालातीतशब्दयोः प्रथमासप्तम्यन्तयोः विशेषणविशेष्यभावोऽधिकारबलादुपपाद्यमानो मृदुमतीनां प्रतिपत्तिगौरवविधायी स्यात्। अथ यदीदं नारभ्येत किं स्यात्, उच्यते—सेनातीते इत्यादौ यदतीत इत्युपात्तं तत्प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति प्रत्ययवाच्यस्य कर्त्रादेः साधनस्य प्राधान्याद्विशेषणं विज्ञायते। ततश्च यत्र साधनमतीतं भविष्यच्च तत्रैवातीतादिविहितः प्रत्ययः प्राप्नोति। रामो वनमगच्छत्, उत्पत्स्यमानोऽस्य पुत्रो राजा भविष्यतीति। देवदत्तोऽयं वनमगमत्, गमिष्यति वेत्यादौ न स्यात्। वर्तमानकालावच्छिन्नत्वात् साधनस्य। योगारम्भे तु सत्यतीतादिना कालोऽभिसम्बध्यते। कालश्च परिच्छेदहेतुः। तेन च योगः सिद्धस्वभावं साधनं विहाय धात्वर्थस्यैव सम्भवति। तस्य साध्यस्वरूपत्वात्। तेन साधनमतीतमस्तु [1]भविष्यद्वा सर्वथा धात्वर्थो यत्रातीतो भविष्यच्च तत्रातीतकालादिविहितप्रत्ययः प्रवर्तते, तेन धात्वर्थानुयायित्वमतीतादेर्यथा स्यात् [2]साधनानुयायित्वं मा भूदिति वचनमिदमारभ्यते। ननु न साधनस्य अतीताद्यवच्छेदः स्वतोऽस्ति तस्य सिद्धस्वभावस्य सर्वतो निराशंसस्य कालेनावच्छेत्तुमशक्यत्वात्। क्रियाद्वारकस्तस्यातीतादिना परामर्शः। तथा च घटोऽभूद् भविष्यति वेति घटगतभवति क्रियैव कालेन भिद्यते न घटः। एवं चातीतादिविशेषणं साधनमपास्य धात्वर्थस्यैव भविष्यति। तथा च कृत्प्रकरणे नास्ति कालाधिकारः, क्रियते चेत् तर्हि क्रियतां यत्र प्रधानं धात्वर्थः। प्रत्ययार्थः इह तु क्रियाप्रधानत्वादाख्यातस्य कथं प्रधानं धात्वर्थमपहायातीतादिना साधनस्य सम्बन्धः स्यात् इति सर्वथा धात्वर्थ एवातीतादिना विशिष्टे प्रत्ययः सेत्स्यतीति किमनेन योगेन। सत्यम्। अयमेव त्वर्थो मृदुमतीननुग्रहीतुं योगारम्भेण प्रतिपाद्यते।

सम्प्रति वर्तमाना [3]३।१।१०

वृत्तेर्वर्तमाने शन्तृङ्ङानशावित्यानश्, अन्विकरणः, गुणः, आत्मोऽन्त [4]आन इति मागमः। संप्रतिकाले वर्तमाने काले इति सम्प्रतीत्यस्य वर्तमानकालार्थवृत्तित्वादवधारणं चात्र बोद्धव्यम्। संप्रत्येव काल इति। शेषात्कर्तरीत्यादिना

१. भविष्यत्वात् (वा०)
२. अननुयायित्वम् (भं०)
३. ३।१।११ (दु०वृ०)
४. अधिकः पाठः (भं०)

हि सिद्धावपि वर्तमानादयोऽत्र प्रकरणे काले नियम्यन्ते अतएव धातोर्वर्तमाना भवतीति धातोः प्रकृतत्वमाह—सिद्धे सत्यारम्भस्य नियमार्थत्वात्। सिद्धश्च वर्तमानाया धातोरेव नान्यतः। अथ वर्तमाने काले धातोरिति केयं वाचो युक्तिः धातुः हि शब्दः न च शब्दस्य काले वृत्तिस्सम्भवति तस्य साध्यमर्थं प्रति परिच्छेदकादित्वात्। अर्थद्वारेण तु धातोर्वर्तमाने काले वृत्तिः। तेन वर्तमाने काले साध्ये धात्वर्थे यो धातुः प्रवर्तत इत्येवं व्याख्यायते। ननु धात्वर्थः क्रिया सा च साध्यरूपत्वादसती, न चासतोऽर्थस्य [1]वर्तमानत्वे योगो उपपद्यते। सदवस्थस्य वस्तुना वर्तमानत्वयोगात्। एव क्रियायाः वर्तमानत्वेन योगाद् तद् द्वारेणापि कथं वर्तमाने काले धातोः वृत्तिर्भवेत्। नैतत्, द्रव्यात्मिका हि सत्ता मा भूत्। क्रियायाः साध्यत्वेन तु तस्याः सतीत्वं को [2]ऽपह्नुवीत, नहि पदार्थानामेकरूपमेव सत्वं, सर्वस्य स्वेन रूपेण सत्त्वात्। तथा च नीरूपोऽप्यभावो विज्ञानप्रतिभासिना रूपेण रूपमवलम्बत एव। अन्यथा ह्ययमव्यवहार्य एव स्यात्। अवश्यं च साध्यमानत्वे क्रियायाः सत्त्वमभ्युपेयम्, अन्यथा हेतुरहितदेवदत्तस्य देशान्तरव्याप्तिलक्षणा फलोत्पत्तिरेव न भवेत्। तस्याः हि फलोत्पत्तेर्निमित्तान्तरासम्भवाद् गतिक्रियैव निमित्तं तदालम्बनाच्चायमबाधितो गच्छतीति व्यपदेशः। तस्माद् व्यापारमन्तरेण कारकसन्निधानमात्रादनुपपद्यमानं फललक्षणं लिङ्गमनुमापकं क्रियायाः तदावलम्बनं च वर्तमानत्वमभ्युपगन्तव्यम्, अन्यथा भूतभविष्यतोरपि कालयोरनुपपत्तिः स्यात् तयोर्वर्तमानापेक्षत्वात्। किं च सति वर्तमानत्वाभ्युपगमे भावानामसत्वमेव स्यात्। यतो भूतभविष्यतोस्तावत्कालयोस्तेन सन्त्येव, यदि चान्तरालेऽपि तेन भवेयुः। ततस्तेषामसत्वमेव प्रसज्येत। अतस्तेषामवश्यमणीयसी [3]क्रियावलम्बमाना वर्तमानावस्थाभ्युपेयेति साध्यमानरूपेण क्रिया विद्यत एव तस्याश्च वर्तमानत्वेनोपपद्यते योगः। यद्येवं तिष्ठन्ति पर्वताः वहन्ति नद्यः इत्यादौ वर्तमाना न प्राप्नोति स्थानादेः सर्वदाभावात् साध्यत्वानुपपत्तेः अक्रियारूपत्वात् क्रियाधर्मस्य वर्तमानत्वस्याप्यभावात्। नैतत्, प्रबन्धाव्युपरतिलक्षणं हि वर्तमानं कालमाहुः। न च स्थानादिक्रिया कदाचिदुपरतेऽप्यस्ति तस्याः वर्तमानत्वम्। अस्थनुः स्थास्यन्ति वा पर्वताः, अवाक्षुः वक्ष्यन्ति वा नद्यः इति भूतभविष्यद्व्यपदेशस्तर्हि न सिध्यति। अतीतानागतभूपालसत्तालक्षणोपाधिभेदात्सेत्स्यति।

---

१. क्रियायां वर्तमानेन (भं०)
२. अपह्नुवते (भं०)
३. क्रियालम्बना (भं०)

स्मेनातीते [1]३।१।११

अतीतकालद्योतकः स्मच्छब्दोऽव्ययम्, शब्दपरत्वान्निर्देशस्य विभक्तेर्लुगभावः। अत्येति स्मेति गत्यर्थकर्मकेति अतिशब्दस्य पूर्वादिणः कर्तरि क्तः, योगशब्दः सप्तम्यन्तः अध्याहियत इति सूत्रार्थबलात्। अन्यथा स्मेनातीत्येतदवाचकं स्यादिति भावः। धातोः अतीते काले वर्तमाना भवतीति विधिः, अयं नियमः पूर्वेण वर्तमानाया वर्तमाने नियतत्वादतीते प्राप्त्यभावात् ह्यस्तन्यद्यतनीपरोक्षाणां बाध इति। नन्वतीतमात्रविहितायाः अद्यतन्याः एव बाधो युक्तो। नत्वतीतविशेषविहितयोः ह्यस्तनीपरोक्षयोः। अस्त्येतत्, अपि शब्दस्त्वत्र वर्तते स स्मशब्दयोगे ह्यस्तनीपरोक्षविषये वर्तमानं समुच्चेष्यति। पृष्टप्रतिवचने गम्यमाने इति पूर्वः प्रश्नः? पृष्टम् इति, नपुंसके भावे क्तः इति पृष्टे पूर्वकं प्रतिवचनम् ([2]ननु प्रश्नपूर्वकमेव प्रतिवचनं) भवतीति किं पृष्टग्रहणेन, नैतत्, अनेकार्थो हि प्रतिवचनशब्दः। तथा ह्ययमस्त्यव्ययीभावः वचनं वचनं प्रति प्रतिवचनमित्यस्ति वचनाभिमुख्यवृत्तिः। तथा च विरुद्धमपि वचनं प्रतिवचनमुच्यते, स साधनवृत्तिरप्यस्ति। तदेवमनेकार्थत्वसम्भवे सति प्रश्नपूर्वकं यत्प्रतिवचनं तस्य परिग्रहार्थं पृष्टग्रहणम्। तत्र अकार्षीः कटं देवदत्त इत्येष प्रश्नः। ननु करोमीत्येतत्प्रतिवचनम्। अपीत्यपेक्षते। तेन [3]ननु शब्दे चोपपदे पृष्टप्रतिवचने विकल्पः, अकार्षीः कटं देवदत्तः। न करोमि, नाकार्षम्, अहं नु करोमि, अहं त्वकार्षम्। योगश्चायं प्रयोगतश्चेत्यस्य प्रपञ्चः।

भूतकरणवत्यश्च [4]३।१।१२

भूते करणं विधानं भूतकरणमित्येवमयं यदि भूतकरणशब्दोऽव्युत्पन्नः इह गृह्यते ततो यासां विभक्तीनां भूते विधानमस्ति ता भूते विधीयन्ते इत्ययमर्थोऽभिहितः स्यात्। एवं चाभिधेयमाने सति वचनमिदमपार्थकं स्यादित्याशङ्क्याह—व्युत्पन्न एवायं भूतकरणशब्दः। पूर्वाचार्यप्रसिद्धयाकारागमस्य वाचक इत्याह—अद्धात्वादिरित्यादि। अद्यतन्य इति तु न कृतमपूर्वमकारागमस्य पूर्वाचार्यसंज्ञां प्रदर्शयितुम्। तत्प्रदर्शने तु फलं वैचित्र्यमेव। भूतकरणत्वात् विभक्तयो ह्यस्तन्यद्यतनी क्रियातिपत्तय इति कुतः तास्वेव परास्वकारागमस्य सम्भवात्। यद्येवं भविष्यद्विवक्षायां क्रियातिपत्तिनं प्राप्नोति।

---

१. ३।१।१२ (दु० वृ०)
२. न्यूनपाठः (वा०)
३. न-शब्दे नु-शब्दे (भं०)
४. ३।१।१४ (दु० पा०)

दक्षिणेन [1]चेदयास्यन्न शकटं [2]पर्याभविष्यत्, यदि कमलकमाह्वास्यन्न शकटं पर्याभविष्यदित्युच्यते। च शब्दोऽत्र पठ्यते, स भविष्यति यथादर्शनं क्रियातिपत्तिः समुच्चेष्यति। तथा च भविष्यन्त्यप्यत्र भवति। दक्षिणेन चेद् यास्यति न शकटं पर्याभविष्यतीति। सप्तम्यपि, दक्षिणेन चेद् यायान्न शकटं [3]पर्याभविष्यति।

भविष्यति भविष्यन्त्याशीश्श्वस्तन्यः [4]३।१।१३

[5]भवतेश्शन्तृङ्डानशावित्यादिना स्येन सहितः शन्तृ-प्रत्ययः, इट्, गुणः, भविष्यन्तीत्यत्र तु शन्तृ-प्रत्ययान्तादकारेति ई-प्रत्ययः। आशासनमाशीः, कृत्ययुट् इति भावे क्विप्। अतएव ज्ञापकादित्वम्। शासिवसि इति षः। श्वो भवः श्वस्तनः, तमादित्वात्तन-प्रत्ययः। तत्र विहिता विभक्तिः श्वस्तनीति नदादित्वादी-प्रत्ययः। ननु भविष्यन्त्यादयो भविष्यत्येव काले विज्ञास्यन्ते। तथा हि भविष्यन्तीत्येषा संज्ञा गुरुसंज्ञात्वादन्वर्था सती स्यतिप्रभृतीनां भविष्यत्कालविषयत्वमेवावगमयति। आशीरित्येषाप्यन्वर्थसंज्ञा। तेनानाप्तस्य प्रियस्य प्राप्तुमिच्छा आशीरित्येषामित्येवमाशीरर्थविबोधनाद् [6]स्यादयो भविष्यत् कालमेवावगाहन्ते। एवं श्वो भवः श्वस्तन इति व्युत्पत्त्या श्वस्तनी संज्ञाप्यर्थानुगमनेन त्यादीनां प्रत्ययानां भविष्यत्येव विधानं बोधयतीति नार्थोऽनेन योगेन। नैतत्। गुरुसंज्ञानामपि कासाञ्चिदर्थानुगमनस्य भग्नशक्तित्वदर्शनात्। तथा च सर्वो धातुप्रयोजकमस्येत्यर्थानुगतायामपि गुर्व्यां सार्वधातुकसंज्ञायां न सार्वधातुभ्यः त्यदादयो भवन्ति। घृतं घृणा धर्म इत्यादौ तेषामदर्शनात्। अदर्शनं तु केषाञ्चित् धातूनां नियतप्रत्ययविषयत्वात्। तस्माच्छब्दव्युत्पत्तिमात्रफलमपि भविष्यन्त्यर्थादीनामर्थानुगमनं भवेदिति न संज्ञानामन्वर्थत्वं स्यतिप्रभृतीनां भविष्यत्कालतामवगमयति इति योगारम्भः।

तासां स्वसंज्ञाभिः कालविशेषः [7]३।१।१४

कालसामान्ये विभक्तयो मा भूवन्निति नियमार्था परिभाषेयमारभ्यते।

---

१. चेद् यास्यति न (भं०)
२. पर्याभविष्यतीति सप्तमी अपि दक्षिणेन चेद् यायान्न (भं०)
३. पर्याभवेदिति (भं०)
४. ३।१।१५ (दु०वृ०)
५. शन्त्राना (भं०)
६. यादयो (भं०), यदादयो (वा०)
७. ३।१।१६ (दु० वृ०)

तत्र कालविशेषं परिभाष्यमाणाः ता अडादयोविभक्तयः परिभाषणभाजः। स्वसंज्ञाभिरिति। हेतौ तृतीया पुंवद्भाषितपुंस्केति स्वा-शब्दस्य पुंवद्भाव इति न तु कर्मधारयसंज्ञक इत्यादिना तत्र हि संज्ञा[1]पूरणीकोपधा इति वर्तते तासामित्यनेन सर्वनामपदेनान्तरे प्रक्रान्तानां बुद्धौ परिस्फुरन्तीनां भविष्यन्त्यादीनामेव तिसृणां विभक्तीनामिहाभिसम्बन्धं प्राप्नोति, न तु परोक्षादीनामिति [2]मन्यमानं प्रत्याह – तासामिति परोक्षादयोऽनुकृष्यन्ते इति आदिग्रहणात् भूतकरणवती प्रभृतयोऽनुकृष्यन्ते न त्वनन्तराः तिस्र एवेति तिस्र एव भविष्यन्त्यादयो नानुकृष्यन्ते, किं तर्हि, परोक्षादयोऽपीत्यर्थः। कुत एव तदवगतमित्याह—तद् ग्रहणं ह्यनर्थकं स्यादिति आनन्तर्यादेव भविष्यन्त्यादीनामनुवृत्तिसिद्धे तद् ग्रहणमपगतप्रयोजनं भवेदिति तदुपादानात्परोक्षादयोऽत्र श्वस्तनीपर्यन्ताः सर्वा एवानुकृष्यन्ते। ननु स्वसंज्ञाभिरिति बहुवचननिर्देशादेव भविष्यन्त्यादीनामनुवृत्त्यभावसिद्धः, तासामेव ह्यनुवृत्तौ स्वसंज्ञाभ्यामिति द्वित्वं [3]निर्दिशेत्। नहि भविष्यत्कालस्य भविष्यन्ती संज्ञागतोऽस्ति विशेषः तस्मात् स्वसंज्ञाभिरितीदमेव बहुत्वं परोक्षादीनामनुवृत्तिकारित्वेनावस्थितमिति किमनेन तद्ग्रहणस्य हेतुत्वोन्न्यासेन, एवं चेदसफलमतिरिच्यते तद् ग्रहणम्, अस्त्येतत्, अयमेव स्वर्थस्तद् ग्रहणेन प्रतन्यते, परोक्षाद्यनुवृत्तौ सत्यां यत्फलं सम्पद्यते तद् दर्शयितुमाह—तासामडादीनामित्यादि। तत्रैकेनादिशब्देन तसतुसुस् इत्यादयः प्रत्ययाः। ये परोक्षेत्यादिकया त्रिसूत्र्या विहितास्ते गृह्यन्ते। अपरेणापि ह्यस्तन्यादिसंज्ञाः। अतीतादेरित्यादिग्रहणेन भविष्यतो ग्रहणम्, कालस्यातीतादेर्विशेषो भवतीत्ययमेवार्थं वितत्य प्रदर्शयितुमाह—परोक्षादीनां संज्ञानामित्यादि। परोक्षत्वादिका इत्यादिग्रहणं ह्यस्तनी क्रियातिपतनादिविशेषपरिग्रहार्थम्। न तु कालसामान्य इति परोक्षत्वादिना विशेषेण रहिते अतीतभविष्यन्मात्र इत्यर्थः। यदि तासामिति वचनेन विभक्तयोऽनुवर्तन्ते वर्तमानापि कस्मान्नानुवर्तत इत्याह —वर्तमाना तु नेहानुवर्तत इतीहेत्यनेनैतस्यानुवृत्तिर्नतूत्तरत्रेति दर्शयति। कथमिहानुवृत्तिस्तस्येत्याह—वर्तमानस्य कालस्येत्यादि कालस्य [4]विशेषोऽनेनाधीयते। विशेषश्च स्वरूपातिरिक्तो धर्मः उच्यते यथा—परोक्षत्वमतीतस्य। न च वर्तमाना विभक्तिसम्बन्धि यद्वर्तमानत्वं स वर्तमानस्य कालस्य विशेषः। साध्यरूपदशायां वर्तते इत्येवंरूपस्य तस्य वर्तमानत्वस्य वर्तमानशब्दार्थ-

---

१. पूर्वकोपधा (भं०)
२. यो मन्यते तं (भं०)
३. निर्देक्ष्येन (भं०)
४. अनेन विशेषः आधीयते (भं०)

निरूपणया वर्तमान एव काले सम्भवात्। अतो न वर्तमानत्वं वर्तमानस्य विशेष इति प्रयोजनाभावाद्वर्तमानान्न न सम्बध्यते, तेन प्रबन्धाव्युपरतिरूपे वर्तमाने सर्वत्र वर्तमाना भवतीति मांसं न भक्षयति, इह शिशवः क्रीडन्ति, तिष्ठन्ति पर्वता इत्यादि सिद्धम्। नन्वतीतसामान्ये परोक्षेऽपीत्यर्थः। किं पुनः परोक्षत्वमुच्यत इत्याह—अक्षेभ्य इन्द्रियेभ्यः परं परोक्षमिति अक्षशब्दस्येन्द्रियवचनत्वात्। तेनेन्द्रियगोचरे धात्वर्थे वर्तमानाद्धातोः परोक्षा भवति। ननु सर्वः क्रियात्मको धात्वर्थस्साध्यमानः सत्त्वात् सिद्धवस्तुविषयाणामिन्द्रियाणां नैव गोचर इति सर्वस्य धात्वर्थस्य परोक्षत्वात्किमस्यातीतकालविशेषणस्य परोक्षाग्रहणस्य [1]व्यावृत्तं स्यात्—उच्यते, साधनस्य प्रत्यक्षत्वादनिष्पन्नेऽपि धात्वर्थे यो लोकस्य प्रत्यक्षत्वाभिमानः तदत्र [2]व्यावृत्तम्। तेन यत्र क्रियायाः साधनं परोक्षं तत्र परोक्षा नान्यत्र। नन्वशक्तस्य साधनत्वाच्छक्तेरेव सर्वत्र साधनाभावः सा च कार्यानुमेयेति कथं साधनस्यापि शक्तिरूपस्य प्रत्यक्षत्वं स्यात्? ब्रूमः, शक्तिशक्तिमतोर्भेदमविवक्षितत्वात् शक्तेराश्रयभूतं यद् द्रव्यं तदेवात्र साधनशब्देनोच्यते, तत्र [3]प्रत्यक्षे [4]सत्यसत्यामपि अतीतकालावगतौ परोक्षा न प्रवर्तते। न केवलमिन्द्रियाणामगोचरं परोक्षम्, यावत् मनसो सान्निध्यात् आत्मसंसाधितोऽपि यो धात्वर्थस्सोऽपि परोक्ष एवेत्याह—यदपीत्यादि। सुप्तोऽहं किल विललापेति, सुप्तेन त्वया किमपि विलपितमित्यन्येन बोधितो जनः एवं वाक्यं प्रयुङ्क्ते। अत्यन्तापह्नवे परोक्षा वक्तव्येति। अत्यन्तापह्नवः सुप्रसिद्धार्थोऽपलापः। तत्र साधनस्य [5]प्रत्यक्षत्वान्न सिध्यतीत्यपि शब्दानुवृत्तेरभिधातव्येत्यर्थः। बुभुज इति सर्वत्रात्मन इति गुणाभावः। ह्यस्तनेऽतीते ह्यस्तनीति। अतीतशब्दोऽतिक्रान्तवचनः। [6]तो नह्यस्य धात्वर्थस्यातिक्रान्तता जाता तद्वृत्तेर्धातोर्ह्यस्तनी भवति। ह्यो भवः कालः ह्यस्तनः तत्सहचरिता विभक्तिरपि ह्यस्तनी। अद्य ह्यो तु क्षुहीत्यादौ तु ह्यस्तनसम्बन्धेऽप्यद्यतन्येव भवति परत्वात्। नत्वतीतविशेष ([7]इति। अद्य यदतीतं सोऽतीतविशेषः)। एतच्च संज्ञाभिरिति कर्तव्ये स्वग्रहणस्य पूर्वाचार्याभिहित स्वकालप्रतिपत्त्यर्थत्वाल्लभ्यते। पूर्वाचार्याः हि भूतमात्रेऽद्यतनीं स्मरन्ति,

---

१. व्यावर्त्यम् (भं०)
२. प्रकृतम् (भं०)
३. परोक्षे (भं०)
४. सत्यामप्यतीत (भं०)
५. परोक्षत्वान्न (भं०)
६. तेन ह्यो यस्य (भं०)
७. न्यूनपाठः (वा०)

यद्येवं ([1]ह्यो गेयो सामं बोषान्) अपाम पयं इति ह्यस्तनेऽतीतेऽद्यतनी न प्राप्नोति, गमेः पुषादित्वात् अण्, अस्य वमोर्दीर्घ इति दीर्घः। अपामेति सिच इण्स्थादेत्यादिना लुक्। अत्रोच्यते—अतीतमात्रविवक्षायामद्यतन्यां सत्यां ह्यश्शब्देन सम्बन्धो भविष्यति। यत्र हि तेन नास्ति सम्बन्धे ह्यस्तनविशिष्टश्चायमतीतः कालो विवक्ष्यते। तत्र कथमद्यतनी अमुत्रावात्समिति सुप्त्वा हि प्रतिबुद्धस्यापरस्मिन् दिने एष शब्दप्रयोगः। नैतत्, सकलमतिक्रान्तयामिनीयामत्रयं जागरितवतो न्याय्यः तत्स्थाने क्व भवानुषित इत्यनेन पृष्टस्याद्यतनकालाभिमानिन एवं शब्दः प्रयोगात्। इत्थं च अत्र अद्यतन्येव न्याय्या। मुहूर्तमात्रं सुप्तस्तु यः प्रयोक्ता तदपेक्षया अमुत्रावात्समिति ह्यस्तन्येव भवति। अवात्समिति वसेरद्यतनी परस्मैपदोक्तमेकवचनं सिच्, अस्य च दीर्घः, सस्य ये सार्वधातुके तः, अतिपत्तिः अनिष्पत्तिः अतिपूर्वस्य पतेरनिष्पन्नार्थत्वात्। अमोक्ष्यत भवानित्यादि। अतीतकालविषयमेतद्वचनम्, ये तु भविष्यत्कालविषयमिति व्याचक्षते तान्प्रति प्रयोगोऽयं भूतकरणवत्यश्चेति च शब्दात्। किं पुनस्तेषामेवं व्याचक्षाणानामतीते क्रियातिपत्तेरुदाहरणम्। दृष्टो मया भवतः पुत्रोऽन्नार्थी [2]चङ्क्रम्यमाणः अपरश्च ब्राह्मणार्थी। तत्र यदि स तेन दृष्टोऽभविष्यत्ततोऽमोक्ष्यत न तु दृष्टवान् अन्येन यथा हि गतस्सः इत्येतत्। विशेषस्य कस्यचिदभावादिति संज्ञागतश्चेति शेषः। भविष्यत्वं संज्ञागतं भविष्यतः कालस्य सुगतं स्वरूपमिति नासौ तस्य विशेषः, तेन भविष्यत्सामान्य एव भविष्यन्ती प्रवर्तन्ते। आशीर्युक्त इति। आशासन ([3]सम्बन्धे किमेवाशासनम्) अप्राप्तस्य प्रियस्य प्राप्तुमिच्छा श्वस्तने काले भविष्यती श्वस्तनी। यद्येवं कथं श्वो गमिष्यतीत्यत्र श्वस्तनी विषये भविष्यन्तीत्याह—श्वो गमिष्यतीत्यत्रेत्यादि पदसंस्कारपक्षाश्रयणेन भविष्यत्सामान्येन पूर्वं गमिष्यतीति इत्येतत् पदं संस्क्रियते पश्चाद्विशेषावगतिद्योतनार्थं श्वश्शब्देन सम्बन्धो भविष्यति. स च बहिरङ्गत्वादन्तरङ्गसंस्कारं न बाधते। नाग्नि प्रयुज्यमानेऽपीत्यादिलक्षणारम्भाद् वाक्यसंस्कारपक्षोऽप्यादृतः। ततस्तत्र किं प्रतिसमाधानमिति चेत्, प्रयोगतश्चेति वचनम्। अतएव परिदेवनविषये यत्र भविष्यत्सामान्यावगमः तत्राविरुद्धः श्वस्तन्याः प्रयोगः। यथेयं नु कदा गन्ता यैवं पादौ निदधाति। अयं नु कदाध्येता य एवमनभियुक्तः इति।

---

१. ह्योगसामघोषान् (वा०)
२. चापकृष्यमाणः (वा०)
३. सम्बुद्धेः किं पुनराशासनम् (भं०)

प्रयोगतश्च [1]३।१।१५

प्रयोज्यत इति प्रयोगः। अकर्तरि च कारक इति कर्मणि घञ्। तदन्तादसर्वनाम्नोऽपि पञ्चम्यन्तात् तस्यिष्यत इति तस्, तत्र कालविशेषो विधीयमानो वर्तमानादयो विधिभाजः। प्रयोगत इति हेतुनिर्देशः। अर्थवशादिति प्रयोजनसामर्थ्यात् कर्मधारयेण कालविशेष इत्यनेन प्रयोजनमित्यर्थः। ननु पूर्वमसौ तत्पुरुषः कथमिहानुवृत्तिमात्रादेव कर्मधारयः शक्यो विज्ञातुम्? उच्यते—भवेदेवं यदि तदनुवर्तते ([2]न तु तदनुवर्तते) पूर्वत्रैव तस्य कृतकृत्यत्वात् तत्सदृशं तु शब्दान्तरमनुवर्तते। तच्च येन रूपेणेह सम्बन्धयोग्यं भवति तद्रूपमाश्रयति। काललक्षण एव च विशेषो वर्तमानादीनामनेन विधीयते, न तु कालस्य विशेष इति कर्मधारय एवात्र कालविशेष इति वर्तते। वर्तमानाप्यत्र सम्बध्यते, पूर्वत्र प्रयोजनाभावादनभिसम्बन्धः तस्याः। अभूत् इह तु अस्त्येव तदभिसम्बन्धः प्रयोजनकालान्तरेऽपि विधानं यथा स्यादिति, तेन वर्तमानाप्यत्र सम्बध्यते इति न केवलमन्यविभक्तय [3]इत्येतदपि शब्दार्थप्रयोगः। शिष्ट प्रयोग इति भगवद्व्यासादयः शब्दानां प्रयोक्तारः शिष्टाः तेषां यः प्रयोगः सः प्रयोगः न तु प्रयोगमात्रमित्यर्थः। विशिष्टः कालो भवतीत्येतेन कालविशेषस्य शब्दस्य कर्मधारयः व्यनक्ति। एतदेव वितत्य प्रदर्शयितुमाह—कालान्तरेऽपीत्यादि। वर्तमानादिलक्षणात् कालादन्यत्रापि काले शिष्टप्रयोगानुसारेण वर्तमानादयो भवन्तीत्यर्थः। एवं च तासां काललक्षण एव विशेषो विधीयत इति कर्मधारयार्थो व्याख्यातः। यावत्पुराशब्दावत्र निपाताविति अभ्युत्पन्नाविति शेषः। निपातसंज्ञा त्वनयोः पूर्वाचार्यप्रसिद्धेः। यदा न निपाताविति। एष च विशेषः प्रयोगस्य हेतुत्वाभिधानाल्लभ्यते। नह्यत्र निपाताभ्यां यावत्पुराशब्दाभ्यां योगे विशिष्टव्यवहारे भविष्यत्कालविषयतया वर्तमाना वा प्रवृत्तिरस्ति, स्वकाल इति, भविष्यत्काले भविष्यन्त्येवेति न तु वर्तमानेत्यर्थः। यावद् दास्यति तावद् भोक्ष्यते इति यत्परिमाणस्य तत्परिमाणस्येति तसादित्वाद् वन्तुः प्रत्ययः। आत्वञ्चान्त्यस्य। अनया पुरा व्रजिष्यतीति। अनयेति स्त्रीत्वनिर्देशः, पुराशब्दोऽयं करणतृतीयान्तो न तु निपात इति प्रदर्शयितुम् पॄ पालनपूरणयोः, क्विब्भ्राजीति क्विप्, उरोष्ट्योपधस्येत्युरादेशः। कदा भुङ्क्त इति किं सर्वैतादिना किमो दा प्रत्ययः, किं कः, कर्हि भुङ्क्ते, सर्वनाम्नो हि यथादर्शनं प्रत्ययो वक्तव्य इति किमो हि प्रत्ययः। कदा कर्हि योगे

---

१. ३।१।१७ (दु०वृ०)
२. अधिकः पाठः (भं०)
३. एवेत्येषोऽपि (भं०)

इत्यनेन च विकल्पस्य विषयमात्रप्रदर्शनं कृतम्। शब्दान्तरयोगेऽपि हि भविष्यत्काले वर्तमाना विकल्पेन दृश्यते। यत्र लिप्सायां गम्यमानायां किमो विभक्त्यन्तस्य डतरडतमान्तस्य च प्रयोगः। किं भवन्तो भोजयन्ति, पक्षे भोजयिष्यन्ति भोजयितार इति च भविष्यन्ती श्वस्तन्यावपि भवतः। एवं कतरो भिक्षां ददाति दास्यति दाता वा, कतमो भिक्षां ददाति दास्यति दाता वा। लिप्सायामिति किम् ? को वाराणसीं गमिष्यति। एवं लिप्स्यमानात् सिद्धावपि गम्यमानायां यो भक्तं दास्यति ददाति दाता वा सः स्वर्गलोकं यास्यति याति याता वा। इत्थमन्योऽप्येवंप्रकारो विकल्प विषय उदाहार्यः।

पञ्चम्यनुमतौ [1]३।१।१६

शेषात्कर्तरीत्यादिना सिद्धायां पञ्चम्यामारम्भस्तस्याः अर्थादेशनार्थः। तत्रानुमतिरर्थः आदिश्यमानः पञ्चमी विभक्तिरर्थादेशनभाक्। यद्येवमनुमतेरर्थस्य विधीयमानत्वात् प्राधान्यमित्यनुमतिः पञ्चम्या इति सूत्रनिर्देशो न्याय्यः। सत्यम्, यस्यास्तु पञ्चम्या अनुमतिरर्थः तस्मिन्नर्थेऽवश्यं तस्याः प्रवृत्तिरिति फलद्वारेणायमनुमताविति सप्तम्या निर्देशः। अभ्युपगमः इत्यङ्गीकरणम्। जीवताद् भवानित्यादि तु हि इत्येतावाशिष्युत्तरसूत्रेण।

समर्थनाशिषोश्च [2]३।१।१७

सं पूर्वादर्थ याञ्चायामित्यस्मात् चुरादीन्नन्ताद् ईषिश्रन्थासि इति युः प्रत्ययः समर्थनायामाशिषि च धातोरित्येतेन समर्थना आशीश्च [3]धातोः विशेषणमिति दर्शयति। तेन समर्थनाधिके धात्वर्थे आशीर्विशिष्टे च यो धातुः वर्तते तत इयं पञ्चमी भवतीति। सिद्धावपि सत्यां विशेषविधानार्थमिदमारभ्यते। अध्यवसाय इति निश्चयः। केचिदित्यादि। एतच्च शब्दस्य विभक्त्यन्तरसमुच्चयार्थत्वाल्लभ्यते। नन्वाशीः प्रार्थनाविशेषः प्रार्थने च अस्त्वेवोत्तरसूत्रेण पञ्चमी तत्किमत्राशीः ग्रहणेन, सत्यम्, आशीर्विभक्त्या तु पञ्चम्याः बाधः स्यात्।

विध्यादिषु सप्तमी च [4]३।१।१८

विध्यादिषु सत्स्विति। एतेन विध्यादिष्वेत्येषा सप्तमी कालभावयो-

---

१. ३।१।१८ (दु० वृ०)
२. ३।१।१९ (दु० वृ०)
३. धात्वर्थस्य (मं०)
४. ३।१।२० (दु० वृ०)

रित्यादिना भावे सत्तायां विहितेति दर्शयति। [1]केन पुनःरूपेण विध्यादीनामिह विज्ञायते प्रत्ययार्थविशेषणता लक्षणेन आत्मनेपदानि भावकर्मणोरित्यादिना हि ये भावकर्मकर्तारः प्रत्ययानामर्थाः तेषामयं विध्यादिरर्थो विशेषणम्। तेन विध्यादिषु सत्स्वित्यत्र विध्यादिविशिष्टेषु कर्त्रादिषु सत्स्वित्यर्थो जायते। अथ प्रकृत्यर्थत्वं विध्यादीनां कस्मान्न भवति, न भवति, विदधाति निमन्त्रयतीत्यादावपि प्रत्ययप्रसङ्गात्। नापि प्रत्ययार्थत्वं विदध्यादित्यादौ प्रकृतिभिरेव विध्यादीनामर्थानभिधानात् प्रत्ययोत्पादप्रसङ्गात्। तस्मात् प्रत्ययार्थविशेषणत्वमेव ज्यायः। शास्त्रान्तरप्रसिद्धा इति तद्वक्तुं विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङिति। विधिरज्ञातस्य ज्ञापनमिति। अग्निहोत्रं जुहुयादित्यादिना वाक्ये यदज्ञातस्यार्थस्य ज्ञापनं तत् विधिः। यद्येवमाख्यायिकादिवर्णनमपि विध्यर्थो भवेत् तत्राप्यज्ञातज्ञापनस्य विद्यमानत्वादित्याशङ्क्याह—प्रेषणं वेति भृत्यादेः कस्याञ्चित् क्रियायां प्रवर्तनमित्यर्थः। एतेनाप्रवर्तन-प्रवर्तनमात्रं विधिशब्दस्यार्थ इति दर्शयति। तदुक्तम्, विधेर्लक्षणमेतावदप्रवृत्तप्रवर्तनम्। अतिप्रसङ्गदोषस्तु न, अज्ञातज्ञापनं विधिरित्येवं प्रेषणस्यापि विध्यर्थत्वात् तत्रापि सप्तमीपञ्चम्यौ यथा दर्शनं भवत इति प्रैषे तेन वक्तव्ये एव निमन्त्रणादीनां च विध्यर्थविशेषत्वात् परिग्रहो सिद्धे सत्यादिग्रहणं विस्पष्टार्थमेवेत्याहुः कव्यहव्योद्देशेनेति देवपित्राधिकरणेन चानुवृत्त्या अतिसर्गप्राप्तकालयोरपि यथादर्शनं सप्तमीपञ्चम्यौ भवतः। अतिसर्गः कामचारः निमित्तभूतस्य कालस्यावसरः प्राप्तकाल इति कटं करोतु भवानित्याद्युदाहार्यम्।

क्रियासमभिहारे सर्वकालेषु मध्यमैकवचनं पञ्चम्याः [2]३।१।१९

क्रियासमभिहारः पौनःपुन्यमिति। ननु समाहारो नाम विप्रकीर्णानामेकत्र समुदायभावापत्तिः, स च सूत्रस्थानेकस्यैककालस्य च धर्मो यथोत्पलादेः। न च क्रियाणामुत्पलविलीनानामसौ सम्भवति। तासां सहावस्थानासम्भवात्। एकेन धातुनानेकस्याः क्रियायाः युगपदनभिधानात्। अथापि समाहारः सादृश्यात्। पौनःपुन्यं समभिहारः उच्यते। तदेतदपि न सम्भवति क्रियायाः। तथा हि यद्येकस्यां पाकक्रियायामभिनिवृत्तायां पुनः पाकः क्रियेवारभ्यते, तत्किमेतावता प्रथमाभिनिवृत्तायाः पुनः पुनः प्रादुर्भावो येन पौनःपुन्यवाचो युक्तिरन्विता स्यात्। वैलक्षण्यमात्रमपरपाककियारम्भेन तु पुनरर्थः कश्चित्। सत्यम्। किन्तु स्वभावविलक्षणानामपि पाकादिक्रियाणां तुल्य-

---

१. केनामुना (भं०)
२. ३।१।२१ (दु० वृ०)

जातीयत्वेनैक्यमध्यवसायो भिन्नजातीयक्रियान्तराव्यवधानेन देशकालभेदापेक्षया यत्सातत्येनानुष्ठानं समभिहारः, तच्च क्रियाणां सम्भवत्येव। समभिहारसादृश्याच्च तदुपचारेण समभिहार इत्युच्यते मुख्यस्याभिहितस्य समाहारस्यासम्भवात्। तेन यथैव द्रव्याणां समभिहारो भवति तथैव क्रियाणामपि क्रियान्तराव्यवहितानां यदभिनिवर्तनं समभिहार इव समभिहार इति युज्यते, क्रियासमभिहारः पौनःपुन्यं भृशार्थत्वं वेति। अधिश्रयणादिलक्षणानामवयवक्रियाणां प्रधानं पाकादिक्रियोपकारिकाणां यत्कात्स्न्येनानुष्ठानं सा भृशार्थता। स च क्रियासमभिहारः, क्रियासमभिहारे वर्तमानाद्धातोरित्येतेनान्तरङ्गत्वात् प्रकृत्यर्थविशेषणं समभिहार इति दर्शयति। मध्यमैकवचनं भवतीति। ननु तत्प्राथम्यादेकत्वविषये प्रथमपुरुषविषय एव स्यात्। वचनान्तरविषये पुरुषान्तरविषये च न प्राप्नोति। लुनीहि लुनीहि इत्येवं लुनासि, युवां लुनीथ, यूयं लुनीध्वं, अहं लुनामि,त्यादिषु लुनीहीति न भवति, उच्यते—सर्वकाल इति द्वन्द्वेनायं निर्देशः। तेन सर्वत्रैकत्वादौ पुरुषान्तरे च तत्सेत्स्यति। कालग्रहणं चेदानीमतिरिच्यमाणं सद्विस्पष्टार्थमेव। सर्वेषु कालेषु वर्तमानेऽतीते भविष्यति चेद् यथा तु वृत्तिग्रन्थः एवं वर्ण्यते सर्वेष्वैकत्वादिषु सर्वेषु पुरुषेषु कालेषु वर्तमानादिष्विति णं चाभीक्ष्ण्ये इत्यादि। द्विश्च पदमिति सामान्येन द्वित्वविधिना अर्थवचनात् क्रियासमभिहाराभिव्यक्तौ लुनीहीत्यादेर्द्विर्वचनमिति भावः। ननु समभिहारविशिष्टार्थाभिधायिनो धातोर्मध्यमैकवचनं विधीयते। ततश्च तेनैव क्रियासमभिहारो गमित इति तदवगमाय कथं लुनीहि लुनीहीत्यादौ द्विर्वचनमिति स्यात्। अस्त्येतत्, किन्तु क्रियासमभिहारस्यार्थाभिव्यक्तिर्न धातुना क्रियते, किं तर्हि, द्विर्वचनसहितेन मध्यमैकवचनेन। ननु प्रकृत्यर्थविशेषणं क्रियासमभिहारः। सति चैवं प्रति [1]प्रत्ययस्याप्ययमर्थः। तस्यार्थान्तरानिर्देशादनिर्दिष्टार्थत्वाच्च स्वार्थ एवोत्पत्तेरिति क्रियासमभिहारो मध्यमैकवचनश्रवणादेवावगम्यत एवेति का तस्य द्विर्वचनं प्रत्यपेक्षा ? उच्यते—सवेदेवं यदि मध्यमैकवचनक्रियासमभिहारे विधीयते। न चैवं कर्मादिषु तस्य विधानात् तेन क्रियासमभिहारो हि स्यात् तात्पर्याद्विना द्विर्वचनं नावगम्यते। तदवगमाय अस्त्येतद् द्विर्वचनं प्रत्यपेक्षा। अधीष्व अधीष्वेति सर्वेषामात्मनेति गुणाभावः। अधीयत इति। अन्ते आत्मने त्वानकारादिति न लोपः। अध्यैतेति स्वरादीनां वृद्धिरादेः हि स्वान्ते च प्रत्यस्तमितसंख्यादिति, [2]विशेषायामभिव्यक्त्यामनुप्रयोक्तव्यः तेन लुनीहि लुनीहीत्यत्र लुनाति [3]समाना-

१. प्रत्ययस्याप्यसावर्थः (भं०)
२. विशेषाभिव्यक्तौ प्रयोक्तव्यः (भं०)
३. अस्पष्ट।

नार्थाच्छिवर्तिनानुप्रयुज्यते। यदा तु समुच्चीयमानक्रियावचनाद्धातोश्चानुवृत्त्या विकल्पेन मध्यमैकवचनप्रवृत्तौ सत्यां सक्तुपिब धाना: खादय पय: पिबेत्यादि: प्रयुज्यते तदाभ्यवहरतीत्यादिसामान्यवाच्ययं शब्दरूपमनुप्रयुज्यते। हिस्वाविति न कृतं प्रत्ययान्तराशङ्का तयोर्मा भूदिति। किं च स्यात् परस्मैपदात्मनेपदव्यवस्था न प्रकल्प्येते। हिस्वोर्विषयेत्यादि। यत्र विषये हिस्वौ विहितौ तत्र तध्वमावप्येष्टव्यौ [1]तेन पञ्चम्या हि स्वाविति कर्तव्ये गुरुसूत्रकरणाल्लभ्यते। ननु लुनीहीत्यादय: प्रयोगा: प्रेरणाविवक्षायामेव सिद्धा इत्यपार्थको योगारम्भ: नापार्थक:। धात्वर्थातिशय विवक्षायामसिद्धत्वात्।

मा-योगेऽद्यतनी [2]३।१।२०

मा-शब्द: प्रतिषेधवाची तथा चाहु:—अमानोन: प्रतिषेध: इति प्रतिषेधश्च वर्तमाना भविष्यत्विषय इति नातीतविषय: अतिक्रान्तवस्तु वैफल्यात्। वर्तमानकालविहिता: प्रत्यया: प्राप्ता इति ते बाध्यन्ते इति शेष:। मा इति लुप्तसप्तमीके निर्देशे कर्तव्ये योगशब्दाध्याहारेण च सूत्रार्थावगतौ सिद्धायां किं योगग्रहणेनेत्याह—योगग्रहणमित्यादि। द्वितीयान्तस्य मा शब्दस्येत्यादि। अस्मदो द्वितीयैकवचने परत: त्वन्मदोरेकत्व इति मदादेश कृतेऽन्तलोपे च विहिते अमौ चाम इत्यमादेशे च सञ्जाते यो द्वितीयान्तो मां-शब्दस्तस्य यो मादेश: त्वामा तु द्वितीयायामित्यनेन विहित: तेन धातोर्योगे सत्यद्यतनी न भवति। देवदत्तो मा अपच्यदिति न मा मा स्म योगे इत्यकारागमोऽत्र निषिध्यते। तत्रापि निषेधवाचिनो मा शब्दस्य परिग्रहात् मा भवतु मा-भविष्यत्वादयस्त्वसाधव: इत्याहु:।

मा-स्म-योगे ह्यस्तनी च [3]३।१।२१

मास्म-शब्देन योगे सतीत्येतेन यो मा-स्मेति निपातसमुदायोऽत्र गृह्यते इति दर्शयति। एतद् योग-ग्रहणस्य संयुक्त-मा-स्मशब्दपरिग्रहार्थत्वाल्लभ्यते।

वर्तमाना ति तस् अन्ति सि थस् थ मि वस् मस् ते आते अन्ते से अथे ध्वे ए वहे महे [4]३।१।२२

विभक्तिस्वरूपभ्रान्तिप्रसङ्गात् ति तस् अन्तीत्यादौ सन्धेरभाव:। एवं

---

१. तौ च (भं०)
२. ३।१।२२ (दु० वृ०)
३. ३।१।२३ (दु० वृ०)
४. ३।१।२४ (दु० वृ०)